...तानन्तरसम्



अनन्तरसौ निमायिनितायिनौ

(श्रीगौराङ्गनित्यानन्दौ)

गीतानन्तरसम्

(मायापुर–विश्वरूपखण्डम्)

(द्वितीयम्)

प्रमाता

बटोही झा

प्रवक्ता

केन्द्रीय–संस्कृत–विद्यापीठम्

विशाल–खण्डम्–४

गोमतीनगरम्

लखनऊ

प्रतिभा-प्रकाशनम्

प्रकाशन-तिथिः
गुरु-व्यास-पूर्णिमा
२००० ई.

मूल्यम्—१२० रूप्यकाणि

मुद्रक : **मंजुला प्रिंटर्स**, ५३२ क/१५६ ग, पाण्डेटोला, अलीगंज, लखनऊ—२२६ ०२०

परिचयः

'गीतानन्तरस'मितिकाव्यपरिचिताः सन्ति कतिपये संस्कृतसहृदयभावुकपण्डिताः । तस्य सविनयार्पणेन याचितानि तेषामाशिषः शुभाशंसनानि चेति । तेषु केषाञ्चिदुदारमनसा-मधिगतं पत्राशीःशुभाशंसनम् । तथाहि—

सुविख्यातकविवरश्रीमज्जगन्नाथपाठकमहाशयानाम्—

६.५.'९८ श्रीः जगन्नाथ पाठकः
3/14 M.I.G.
झूँसी, इलाहाबाद
-211019

प्रियवरेषु श्री बटोही झा शर्मसु,

"गीतानन्तरसास्यकाव्यमधुना चेतोऽधुना
मामकं
स्वादु स्वादु पदे पदे च कलयत्सामोद-
मालिङ्गते ।
धन्यः 'बटोही'-कविः श्रमेण चालिता
धन्या च तत्लेखनी-
स्तं गत्वाऽयमिवानुसारय इति मे
हार्दं शुभाशंसितम् ॥"

— [illegible] —

प्रियवरेषु श्रीबटोहीझाशर्मसु,

"गीतानन्तरसाख्यकाव्यमधुना चेतोऽधुना मामकं
स्वादु-स्वादु पदे-पदे च कलयत्सम्मोदमालिङ्गति ।
धन्यः 'पान्थ'-कविः श्रमेण चलिता धन्या च तल्लेखनी
स्वं गन्तव्यमवाप्नुयात्स इति मे हार्दं शुभाकाङ्क्षितम्" ।।

एतस्योत्तरे मदीयं पत्रकार्तज्ञ्यज्ञापनम्–

सरसकविताख्यातं सरलप्रकृतीश्वरम् ।
हृद्यं कविगुरुं वन्दे श्रीजगन्नाथपाठकम् ।। १ ।।

गन्तव्यं नहि वेत्ति साधु पथिकस्तत्प्रार्थये श्रद्धया
सौहार्दप्रतिभाप्रवृत्तिपटुतासिद्धं कविं भावुकम् ।
एकेनैव कवित्वसिद्धिरसनाऽऽलोकेन पद्येन यन्–
मोदांशुं व्यतनोत्तदस्य सुपथे नुद्याज्जगन्नाथजी ।। २ ।।

(अधोमुद्रितं श्रीवैद्यनाथझापत्रपुष्पं चतुर्थपृष्ठे छायाङ्कितमस्ति–
पायं पायमपेतदोषनिवहं श्रीमद्बटोहीकवेः
'गीतानन्तरसं' सखे! मम मनो नाद्यापि सन्तुष्यति ।
वृक्षश्चेद् रस एव भक्तिसलिलेनाप्यायितो वर्द्धितः
सूते काव्यफलं तदाऽमृतमहो तृप्येत् कथं भावुकः ।।)

दिल्लीसंस्कृतविद्यापीठ-साहित्याचार्यकक्षा-नियमिताध्यापनानुग्रहिणां
गुरुवर्याणां श्रीयुतहर्षनाथमिश्रपादानाम्–

स्वस्ति स्तात् 30.7.98
दिल्ली

चिरञ्जीविने परम प्रियाय
कमोदीपमान प्रतिमा सम्पन्न-
वाग्मिने श्री बरोडी का नाम-
योग्य शिष्याय कवये ।

भवता स्वकीयं काव्यं इयं
यत् प्रेषितं तन्मयाधिगतम् ।
श्री चैतन्यो महाप्रभुः गौरा-
ङ्गो हरिरुच्यते भावुकैः । स
स्वयं यथा हरिभक्ति स्वरूपः
तथा तच्चरित्रमपि भक्तिरस-
मयम् । तत् पठित्वा मया
स आनन्दः प्राप्तः, यस्य
स्पृहा मादृशस्य जनस्य
हृदये सदा तिष्ठति । भवदीयाऽसौ
स्तुत्या काव्यरचना प्रवृत्तिः भक्ति-
सम्भृता सर्वदा संवर्धताम्, इति
मदीया शुभकामना । भूयांसि
साधुवचांसि च स्वीक्रियन्तां भवता ।
सरस्वती श्रुति-महती
न हीयतां साच मदीयतां
इति महाकवेरनुसारी भवान्
साधु काव्य निबन्धन सम्प्रदानेन
कीर्तिं प्रीतिं च लभताम् ।
शुभं भूयात् सपरि-
वारस्य भवत इति शिवम् ।

भवदीयः
हर्षनाथः

एवमुत्प्रेरितस्य मम गुरुपादयोः पत्रपद्यपुष्पार्पणम्–

'ज्योतिर्मा तमसो नयेति' विनयी शिष्यो गुरुं याचते
संस्कारी कुलधर्मसङ्गविमलो, मूढोऽपि किं तैर्विना ? ।
सामान्येन हि सद्गुरुर्वितनुते पाठप्रकाशं पुन–
र्मध्ये तत्र महात्मनां विजयते श्रीहर्षसंज्ञो गुरुः ॥ १ ॥

गजानां हारो वा हरति गजवृन्दं कमलया,
विपर्यासं याते, भवति जगतां हारतुलितः ।
तथाग्रामे मिश्राः सुबुधजयदेवप्रभृतयः
कुले तेषां 'हर्षो' जयति मम साहित्यिकगुरुः ॥ २ ॥

(श्रीगुरुपादा मिथिलान्तर्गत 'गजहरा' ग्रामभुवः)

जम्मूसंस्कृतविद्यापीठ-नव्यन्यायप्रवाचक-श्रीवैद्यनाथझासुमनसः–

श्रीमत्सु झामहोदयानां चरणाब्जेषु प्रणतिपुरःसरं
तच्चञ्चरीकस्य वैद्यनाथस्य

पादं पादमपेतदोषनिवहं श्रीमदबर्यहीकृते,
'गीतानन्तरसं' सरवे मम मनो नाद्यापि संतृप्यति
वृक्षश्चेद् रस एव भक्तिसलिलैराप्यायितो वर्द्धितः
सूते काव्यफलं तदाऽमृतमहो तृप्येत् कथं मनुजः ॥

स्वीकृत्यानुग्रहीष्यन्तीति प्रार्थयते
वैद्यनाथझा

(अत्र झामहाशयपद्यस्य प्रथमपादादौ--'पायं पायमपेत' इति स्थाने 'मुपेत' इति पठितुमिच्छामि) तत्सहृदयतायां मदीयं पत्रार्पणम्–

निर्दुष्टस्थितिरत्र 'विश्व'मतितो नो सम्भवा सर्वथा
तत्क्षीरोदधिमन्थनात्प्रकटितं तथ्यं प्रमाणं परम् ।
कण्ठे दोषहलाहलं सहृदय: शीर्षे च दोषाकरं
धत्ते जीवदयाशरण्यकृपया श्रीवैद्यनाथ: स्वयम् ।। १ ।।

मासि श्रीपुरुषोत्तमे वितरति श्रीमत्सुरेन्द्राऽध्वना
स्थाने संसृतिसन्नपान्थमनस: संतोषभावामृतम् ।
औचित्यं मिथिलावनीद्विजपतेर्नैयायिकश्रीमते:
सौहार्द यदवाप्तमत्र तदहो! काव्यज्ञपेयं फलम् ।। २ ।।

(कार्तिके मासि श्रीसुरेन्द्रझाद्वारा श्रीवैद्यनाथसुमन:पुष्पमधिगतम्)

कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालय-व्याकरणविभागाध्यक्ष-शशिशीतगीत-हृद्यपद्यरचनाधीरललित-श्रीमत्कृष्णानन्दझा-सचेतसाम्–

।। श्रीकृष्ण: शरणं मम ।।

परिशीलितलोकोत्तरललितकविकर्म्मणां **डा० वटोहीझा**शर्म्मणां

काव्यद्वयस्य अभिनन्दनम्

गीतानन्तरसम्–

गेयं हरिपदपङ्कजगानम् ।
गौरवपुर्गुणविज्ञवटोहीकविवरकृतसन्धानम् ।। ध्रु० ।।
शरच्चन्द्रघनसारसमुज्ज्वलमुररिपुयशोविलासम् ।
नानाविधरागस्वरराजितसुमधुरभावविकासम् ।।
अधि**मिथिलं वैदेहीसंस्कृति**जागरणेन समेतम् ।
सूर्यकान्तसद्धर्मतपोबलगुरुशुभवचननिकेतम् ।।
श्रीमदनन्तरसोद्भवममृतं रसिकजनैरनुगीतम् ।
कृष्णानन्दसुकर्णपुटैरपि भावभरेण सुपीतम् ।।

श्रीमद्भागवतसहस्रनामस्तोत्रम्–

काव्यालङ्कृतिशास्त्राचार्येणोज्ज्वलसत्कवित्वेन ।
श्रीझोपाख्यवटोहीनाम्ना धाम्ना युतेन वाग्देव्या: ।।
श्रीराधाहृदयेशो भागवतोद्भवसहस्रनामाख्यात् ।
स्तोत्रात्स्तुत: सुभक्ते भावविकासन्तनोतु सुप्रीत: ।।

शिव फाल्गुनकृष्णत्रयोदशी
२०४४ वै.
(७।३।८८)

॥ श्रीहरिः ॥

॥ श्रीकृष्णः शरणं मम ॥

परिशीलित लोकोत्तर ललित कवि कर्म्मणां
डा० बटोहीझा शर्म्मणां
काव्यद्वयस्य
अभिनन्दनम्

गीतानन्दरसम्

गेयं हरेः पदकञ्जगानम्।
गौरवपुञ्जविज्ञबटोहीकविवरकृतसञ्जनम् ॥ध्रु॥
शरच्चन्द्र घनसार समुज्ज्वल सुरसरित्पुरशोभितवासम्।
नानाविधरागस्वर राजित सुमधुर भावविकासम्।
अपि हि मिथिलां वैदेहीसंस्कृति जागरणेन रमितम्।
सूर्यकान्त सद्भक्तपोषक सुरसुन्दर नाम निकेतम् ॥
श्रीमदनन्त लोकप्रभूतं रसिकजनैरनुगीतम्।
कृष्णानन्द सुकर्णपुटैरपि अवधारेण सुपीतम् ॥

श्रीमद्भागवतसहस्रनामस्तोत्रम्

काव्यालङ्कृतिशालिना सर्वगीतागानलहरीकेलिविदेन।
श्रीकृष्णपादद्वन्द्व बटोही नाम्ना भक्तवरेण वन्दनदोः॥
श्रीराधाकृष्णयोः भगवतोः सहस्रनाम स्तवराजम्।
स्तोत्रं स्तुतः शुभं कौ भक्तिकान्तेनैव सुपीतम्॥

अनुमोदक

(कदाचित्पूर्वं श्रीभागवतसहस्त्रनामस्तोत्रं समर्पितमासीत्, तत्कृते पद्यद्वयमन्तिमम्)

एतत्सौहार्दव्यक्तिकृतज्ञतायां मत्पत्राभिधा—

गीतं गौरमहाप्रभुरसितम् ।

साधुवरप्रभुदत्तविरचितं चैतन्यामरचरितम्

प्रेमपयोनिधिभक्तिरसामृतसिन्धुसमुज्ज्वलरत्नम् ।

विद्यापतिकविकोकिलकूजितमिथिलावनिकोत्सङ्गे

मैथिलराधामाधवभावं रसयतु गौरभ्रमरः ।

सूर्यकान्तमणिवस्तुकथा किं भागवते पथि भरिता ?

बलकृष्णोभयसंशयनिश्चयफलभामासत्याप्तिः ।

ठाकुरलालाऽनन्तस्पर्शे गीतरसे नहि चित्रम्

इह सानन्दः कृष्णः स्मयते, वैचित्र्यं परमार्थः ।

अमलविशालहृदयपरिपूरितरुचिराक्षरविन्यस्तम्

कृष्णगीतमभिनन्दनपत्रं पथिकातुलवरदानम् ।।

श्रीमद्भागवतं श्रुतिस्मृतिफलं प्रीतेर्हि मूलं सतां,

तद्दुग्धं प्रियकृष्णनाम दशमस्कन्धात्सहस्त्रं, ततः ।

श्रीगोपेन्द्रसुतस्य वेद्मि न, परं श्रीगोपजीभ्रातृज—

श्रीकृष्णाप्तबुधाप्तपत्रदिशया स्यात्को न धन्यः कृती ।। १ ।।

(आसन् दिल्लीसंस्कृतविद्यापीठे वेदान्तप्राध्यापकाः श्रीकृष्णानन्दझापितृव्यचरणाः

श्रीमद्गोपानन्दझामहोदयाः)

मिथिलामैथिलपण्डितललाम-आचार्यप्रवर-श्रीशोभाकान्तजयदेवझामहानुभावानाम्—

आचार्य शोभाकान्त-जयदेव झा

अवकाशप्राप्त निदेशक

मिथिला संस्कृत स्नातकोत्तर अध्ययन एवं शोध संस्थान, महेशनगर, दरभंगा

पत्राचार संकेत :

श्रीशोभासदन

राजकुमारगंज, दरभंगा

स्थान ....

दिनांक ७।२।१९८८।

गीतानन्दलहर्याः भक्तिरसामृतकलेवरमधीत्य मन्ये, अल्प-कायोऽपि खल्वयं भक्तिरसामृतसिन्धुं महाप्रभु-चैतन्यदेवमहाभिक्षोः लब्धमिति । गीतानन्दलहर्येन ग्रन्थेन सर्वेऽपि मुक्तिभाजः वैष्णवा विद्वांसः प्रसा-दमिच्छन्ति स्वान्तेन [illegible] च मानव-जीवनमिति विश्वसिमः ।

श्रीशोभाकान्तो जयदेवतनु-
जन्मा मैथिलपण्डितः ।

ममात्र पत्रप्रवृत्तिः—

शोभा लभते कदाचित्तपसा निजमनुरूपं कान्तम् ।
विद्याबुद्धिविवेकविधाता तदुचितनरमपि रचयति
ललितमनोहरकान्तिप्रभयाऽप्येतं समलङ्कुरुते ।
नरकुलभूसुरकुलपण्डितकुलमैथिलमणिकुलवृन्दे
श्रीजयदेवमिश्रतनुजनितः कान्तः शोभाकान्तः ।
सरलहृदयकमनीयकलेवरकलसंवादाऽऽलापः
अतिशयसुकृतगुरुव्रतसेवाशास्त्रचिन्तनाभ्यासः ।
एताभिः शोभाभिः कान्तो, जाने वा स्वयममुना
कान्ता तच्छोभैव जीवने, वरताप्रियताऽऽकृत्या ।
गौरमहाप्रभुतर्पणाशिषो लब्ध्वाऽकिञ्चनपथिकः
तन्मानसशोभापदकान्तिं स्मर्ता भवन् कृतज्ञः ।।

दिल्लीरमेशनगरस्थश्रीमोतीनाथसंस्कृतमहाविद्यालय-प्राचार्यवरचर-श्रीयुतवेदानन्दझा-सारस्वतानाम्—

श्रीमत्सु चिरायुष्मत्सु सुमतिमत्सु मत्सुप्रीतिमत्सु
अनवरतासेव्यमानसारस्वतपदपद्मरससरस्वत्सु
समुन्मिषत्पद्यकदम्बकेसरसम्पत्सु
राजतामनारतं मामकशुभाशंसावल्लरीवितानः
कतिपयैः कुसुमफलभरसौरभप्रकरैः ।

अथ शुभैषणापुष्पकम्—

गीतानन्तरसं निपीय रसना तृप्ताऽप्यतृप्ता मुहुः
पातुं वाञ्छति कर्णपूरवलयद्वारेण कर्णामृतम् ।
निर्व्याजं हृदयाशये निविशते दृष्टिं प्रयातं सतां
भक्तानां मनसो मुदं वितनुते कीर्तिस्रजा श्रीहरेः ।। १ ।।

कश्चिद् वाङ्मयकानने परिचरन् प्रेक्षापरः षट्पदः
सारान्वेषणतत्परः प्रतिपदं पद्यावलीसंचये ।
अश्रान्तः पथि संमते गुरुवटे छायां श्रयन्नूहते
गीतानन्तरसं रसेन सुहितः सोऽयं 'वटोही' मतः ।। २ ।।

हितकुन्दकुञ्जैषणः कश्चिन्मिलिन्दो

झोपाख्यवेदानन्दः

महामहिम राष्ट्रपति सम्मानित
पं० श्री वेदानन्द झा
व्या॰, न्या॰ वे॰ सा॰ सां॰ यो॰ आचार्य
एम॰ ए॰ हि॰ सा॰ रत्न

ॐ

जे० १६ ई० रमेशनगर
नई दिल्ली – १५
दूरभाष – ५४५८१२५
दिनाक – २६ – १० – ९९

कार्तिक कृष्ण तृतीया बुधे २०५६ वैक्रमाब्दे

"जयति भारती"

स्वस्ति

श्रीमस्तु चिरायुष्मस्तु सुमतिमस्तु मस्तु प्रीतिमस्तु
अनवरतासेव्यमान सारस्वत पद पद्मरससरस्वतु
समुन्मिषत्पद्यकदम्बकेसरसम्पत्तु
राजतामनारतं मामकशुभाशंसा वल्लरीवितानः
कतिपयैः कुसुम फलभर सौरभ प्रकरैः ।

अथ शुभैषणा पुष्पकम् -

गीतानन्तरसं निपीय रसना तृप्ताऽप्यतृप्ता मुहुः -
पातुं वाञ्छति कर्णयुग्मवलयद्वारेण कर्णामृतम् ।
निर्व्याजं हृदयाशये निविशते दृष्टिं प्रयातं सतां
भक्तानां मनसो मुदं वितनुते कीर्तिं प्रजा मोहरेः ॥१॥

=

कश्चिद् वाङ्मयकानने परिचरन् प्रेक्षापरः षट्पदः -
सारान्वेषणतत्परः प्रतिपदं पद्यावली संचये ।
अश्रान्तः पथि संमते गुरुवटे छायां श्रयन्नूहते -
गीतानन्तरसं रसेन सुहितः सोऽयं वरो हीमतः ॥२॥

=

हितकुन्दकुञ्जैषणः
कश्चिन्मिथिलेन्दो .
ओपारव्य वेदानन्दः

=

अस्मिन् रसोदन्वति मदीयपत्रस्रोतस्विनीसृतिः—

वेदः स्वयमानन्दप्रतिमः ।

तन्निःश्वसितं वाङ्मयमूलं ऋषिदर्शनतो व्यक्तं

श्रवणात्सञ्चितमद्यावधिमिह भवेदेव भाविन्यपि ।

आकाशः खलु निखिलाधारः शब्दगुणस्तु स्पष्टः

शब्दज्योतिः कथमिह नश्येत्सोऽनन्तोऽस्त्याकाशः ।

काले देशेऽसामान्ये वा लोकोत्तरसंस्कारी

पात्रविशेषो भवति प्रकटं यतो भुवः सौभाग्यम् ।

सत्कुलजननीजातः पावनजनकतपोभिः पुष्टः

आप्ताऽऽचार्यानुग्रहयोगात्कोऽपीह व्यवसायी ।

भद्रसङ्गमहिमा नहि गुप्तः कदापि तिष्ठति लोके

भद्रश्चेत्स सर्वतोभद्रश्चन्दनसुमनोयोगः ।

सकलशास्त्रपारङ्गतपण्डितगुणगणमण्डलपूजित!

श्रीमद्वेदानन्दविपश्चिन्नामाक्षरसमुपासक! ।।

शास्त्रदशात्मकगणितं काव्यं, तावद्वर्षं मिलितम्

दैनिकदर्शनमिह भवदीयं, तत्पुरतोऽर्पितमधुना ।।

अक्षरोपासक! श्रीमन्! स्फुटवैदुष्यविग्रह! ।

कुशली सर्वदा प्रीतः शुभं दिशतु मे हितम् ।। १ ।।

श्रीमोतीनाथसंस्कृतमहाविद्यालय-व्याकरणशास्त्रनिशातमति-ललितान्तःकरण-सात्त्विकस्वभाव-सङ्गप्रभावदीपितसत्पथ-विहितचैतन्यचरितावलिसंस्तुति-सदर्थसुहृत्-सदाचारप्रतिम-श्रीभैरवझा-भवसङ्गिनां बहुयाचनाऽऽप्तहार्दसौहार्दम्—

श्रीगणेशाय नमः

"जन्म कर्म च मे दिव्यम्" इति रहस्यं स्वयमेव प्रकाशितं भगवता श्रीमद्भगवद्गीतायाम्। अतः श्रीराधा-माधवयोः युगलावतार स्वरूप श्रीगौराङ्ग-महाप्रभोः जन्म कर्म च अनन्तरस-शब्देन शक्यतेऽभिव्यक्तुमिति। अत्र तद्रसास्वादनशीलः तद्रसिक-सहृदय-हृदयाह्लादकप्रभुश्च कश्चिदेव कदाचिदेव समनुभवति तत्कृपयेति, "यमेवैष वृणुते तेन लभ्यः" इति निगमेन शक्यते वक्तुम्। यद्यपि, समग्रं विद्यमानं 'गीतावली' रूपं "श्रीप्रभुदत्तब्रह्मचारि-विरचित-श्रीचैतन्यचरितावलि" माधुर्येण विरचितं, तथापि भावुकहृदयस्पर्शमहिम्ना एकोऽपि अनन्तरसः कीदृशाम्

आस्वाद्यवैचित्र्यं भजते इति प्रस्तुतग्रन्थावलोकनेन अनुभवितुम् एव शक्यते इति मन्ये।

सुहृद्वर श्री बटोही जी भगवद्नुराग-लब्ध-महाप्रभुप्रसाद प्रकाशेन वयं सर्वे सर्वदा प्रकाशिता भवेम इति कामयमानः कृतार्थतामनुभवामि। शमिति।

भवदीय एव

मंडन मिश्र

29.5.2000

ज्येष्ठ कृ. एकादशी

वि.सं. 2057

श्रीगणेशाय नमः

"जन्म कर्म च मे दिव्य"मिति रहस्यं स्वयमेव प्रकाशितं भगवता श्रीमद्भगवद्गीतायाम् । अतः श्रीराधामाधवयोः युगलावतारस्वरूपश्रीगौराङ्गमहाप्रभोः जन्म कर्म च अनन्तरसशब्देन शक्यतेऽभिव्यक्तुमिति । अथ च तद्रसास्वादनशीलः तद्रसिकसहृदयहृदयाह्लादनपटुश्च कश्चिदेव कदाचिदेव सम्भवति तत्कृपयेति, "यमेवैष वृणुते तेन लभ्यः" इति निगमेन शक्यते वक्तुम् । यद्यपि समक्षं विद्यमानं "गीतानन्तरसं" श्रीप्रभुदत्तब्रह्मचारिविरचितश्रीचैतन्यचरितावलिमाधृत्य विरचितं, तथापि भावुकहृदयस्पर्शमहिम्ना एकोऽपि अनन्तरसः कीदृशम् आस्वाद्यवैचित्र्यं भजते इति प्रस्तुतग्रन्थनावलोकनेन अञ्जसा एव शक्यतेऽवगन्तुम् ।

सुहृद्वरश्रीबटोहीझामहानुभावलब्धमहाप्रभुप्रसादप्रकाशेन वयं सर्वे सर्वदा प्रकाशिता भवेम इति कामयमानः कृतार्थतामनुभवामि । शमिति ।

—भैरवझा

एतदर्थे मदीयोद्गारः—

भैरव! नहि ते सङ्गतिगगने भवभीरवविस्तारः ।
मण्डनसंस्कृतविद्यापीठे मैथिलविप्रवटूनाम्
समवाये स्ववयस्यैर्गीतो 'भैरव-भैया'पदतः ।
रामनाथसंस्कृतविद्यालयवेदानन्दाचार्ये
पीठस्नाताध्यापकतायामादर्शस्त्वं कश्चित् ।
श्रोत्रियलीलानन्दभवेन्द्रभातृप्रियसहवासे
खुशीरामगृहपतिगृहवासे त्वत्सङ्गतिसंवासे ।
सात्त्विकभोजनसीमितजीवननिर्मलचिन्तनपथ्यात्
हरितिथिकल्याणग्रन्थव्रतसेवनतस्त्वद्द्वारा ।
प्रभुदत्ताऽऽचितचैतन्याऽमृतचरितमलौकिकरत्नम्
निजवदनश्रुतिरिक्तान्तर्हृदि नीतं त्वत्सम्मुखतः ।
'गीतानन्तरसं' पाथेयं तल्लोकितमिति मत्वा
वोढा पथिकस्ते कार्तज्ञ्यं निजभवपथपीयूषम् ॥

अखिलगुरुसुहृद्रसास्वादकः—

बटोही

ज्येष्ठपूर्णिमा

१६–६–२०००

संस्मृतिः

'पुण्यं यत्साधुदर्शनम्' १२ मार्च १९९७ दिनाङ्के लक्ष्मणपुरस्थकेन्द्रीयसंस्कृतविद्यापीठे गोवर्धनपीठाधीश्वर-जगद्गुरु-शङ्कराचार्य-स्वामिनिश्चलानन्दसरस्वतीभगवत्पादानामाकस्मिकं पदार्पणमभूत् । तत्स्वागताभिनन्दनशुभावसरे गीतम्—

साधूनां हृदयं वचश्च करणं शुद्धं मितं निःस्वकं
तेषां पादपदाङ्किता हरिहृदां तीर्थायते मेदिनी ।
दैवादद्य पदार्पणे शिवदृशां विद्यावतां गोमती—
नामस्थानधराविशालवसुधा प्रीणाति लोकोत्तरा ।।

कोकिल! मा कुरु फाल्गुनमासे शबलं सज्जनहृदयम् ।
नीलाचलजलधेरुद्गच्छति मधुरा माधवकान्तिः
गोवर्धनगिरिवृन्दावनतरुफलिता ललिता लीला ।
निश्छलदर्शनमखिलं नीत्वा विचरति निश्चलदेवः
शङ्करमूर्तिः शङ्करपीठाद् वितरति शं पाथेयम् ।।

मधुकर! मधुनाऽधुना मृदुभणनैर्भेदय मा श्रुतिविवरम् ।
अञ्जनवर्तिनिरञ्जनदेवो राजति नीरधिपुलिने
काले काले जगतीभूमावतिथिः स्वेच्छाचारी ।
सौम्याकृतियुतसस्मितवाचा यच्छति मन्दं मन्दं
नयनानन्दं निश्चलभासा सचलप्रतिमोऽप्रतिमम् ।।

(गानेऽत्र हार्दिकभावोऽयमासीत्—यथाऽभिनन्दनसामान्ये वाग्वैचित्र्यं वाणीविलासो भवति तथाऽत्र नापेक्षितम् । अयन्तु स्वत एव जनकल्याणाय विचरति यथाद्योपस्थितः । तदेतद्दर्शनश्रवणधारणाध्यानमात्रं पर्याप्तम् ।)

भागवते पथि भगवद्दर्शनानन्तरं सद्दर्शनमुदेति । तथा १७ मार्च १९९७ दिनाङ्के वङ्गप्रदेशाद् विद्यापीठप्राचार्य-श्रीउमारमणझामहोदयगुरवः पूज्यपादाः श्रीमदनन्तलालठाकुरमहाशया विद्यापीठे प्रकटिताः । तत्स्वागतार्थं नन्दनकाननं प्रार्थितम्—(कतिपयदिनपूर्वसमागतभगवत्पादशङ्कराचार्याभिनन्दने समस्तवाक्सामर्थ्यमर्पितं, तदद्य विद्वद्गुरु—स्वागताभिनन्दनकल्पान्निजकल्पतरुप्रसवान् यच्छत्विति—)

नन्दन! यच्छतु नन्दनकल्पं कल्पद्रुमसत्प्रसवम् ।
मधुमाधविकासुमनोवासितसुमनोऽर्चनमधुपर्कम्
हरिचन्दनरससुरभितललितं भालाऽलङ्कृतितिलकम् ।
वासव! वर्षतु सत्कृतिमेघस्त्वद्दयिताऽतिथिभोगम् ।
कामसुरभिरसदधिनवनीतं विद्वन्मनःप्रसादम्
भूदेवातिथिविबुधस्वादुस्वर्गङ्गारसवाचम् ।
भारति! बिभ्रतु भारतभारं सान्दीपनिकुलमवि तुम्
भगवन्! यच्छतु नन्दनकल्पं कल्पं कल्पमनन्तम् ।।

पुनस्तद्भूमिविद्याऽध्यवसायादिपरिचयः प्रस्तुतः—

सर्वाशाऽऽदिप्रभाता दिनकरकिरणै रञ्जिता वासवी दिक्
सांख्याचार्यः समाधौ यतिवरकपिलो यत्र सामुद्रतीरे ।
तत्राऽऽढ्ये भारताख्ये दिवि भुवि धरणीरक्तभक्तैर्विभक्ते
खण्डे जातोऽविभक्ते बुधकुलतिलकोऽनन्तलालो नयार्कः ।। १ ।।

रम्ये वसन्तललिते समयेऽत्र वङ्गाद्
बन्धुः सतां नयविदाञ्च गुरुर्गुरूणाम् ।
मान्यः पितामहनिभो वयसा प्रजानां
शेषः स्वयं दृशिगतो विदुषामनन्तः ।। २ ।।

जीवस्तीर्थतया हि गच्छति कथं, चिन्ता कथं ह्रियते,
लालो लालनपूर्वकं विनयतोऽधीतो गुरुभ्यां तथा ।
अन्वीक्षा रसना रसार्णवहृदो बुद्धिश्च बौद्धी दृशि—
र्न्याये वार्तिकसूत्रभाष्यविततं सम्पादनं शिक्षणम् ।। ३ ।।

लब्धा राष्ट्रपुरस्कृतिश्च किरणैश्छिन्नं निबन्धैस्तमः
सामान्यं, बहुधोदिताः स्मयमुदोऽनन्ताधृताध्यापनात् ।
गोस्वामी प्रभुलालजी गुरुरहो धाताऽस्य नारायण—
श्च्छत्रं शीलमतः किशोरवयसो विद्यासुतोमाकृतिः ।। ४ ।।

आचारप्रियभारताररतिः स्वामी गृही नातिथिः
संप्राप्तो हि निरीक्षितुं ममतया शिष्यस्य विद्याटवीम् ।
न्यायात्काव्यकृतौ दृशिं प्रतिभया तन्तुञ्च हर्षात्मना
कालीदाससमीक्षको भवमतिः श्रेयो विधाता परम् ।। ५ ।।

(विद्यापीठे शाकुन्तलोपरि तद्व्याख्यानमायोजितमासीत्)

अतः परं द्वितीयदिवसे १८ मार्च १९९७ दिनाङ्के लक्ष्मणपुरस्थ-'बटलरपैलेस'-मध्ये महाभारतस्योपरि तद्व्याख्यानमभूत् । तच्छ्रोतुं विद्यापीठविद्वद्भिः सह गतोऽहमपि । जाते सम्यग् व्याख्याने तत्रैव सम्पन्ने भोजनविधौ कतिपयबुधाश्चैकत्र तिष्ठन्तः संलापे चासन्। अकस्मादतिशयस्निग्धनिजपाणिना मम बाहुमूलं संस्पृश्य तन्मध्यान्निस्सार्य मामग्रेसारयन् तस्मिन्नेव भवने ब्रूतेऽनन्तकृपालुहृदयः ठाकुरमहोदयः—

(मम तु तथाऽकल्पितपूर्वापरिचितवन्द्यविद्वद्वृद्धपाणिसंस्पर्शसन्नं शरीरमानसम् । यथा तदानीं तथेदानीमपि तत्संस्पर्शविद्युत्प्रवाहं स्फुटमनुभवामि, तद्ध्वन्यालोकपद्यमनुस्मरामि—

'स्विद्यति रोमाञ्चति वेपते रथ्यातुलाग्रप्रतिलग्नः ।
स पार्श्वोऽद्यापि सुभग! तस्या येनास्यतिगतः' ।।

तथैव तत्पाणिसंस्पर्शसाहाय्येन तेन सममेव पुरःसरन् तन्मुखारविन्दादाकर्णयामि) त्वं महाकाव्यं लिख, Theme (वर्ण्यवस्तु) अहं ददामि । महाभारतस्य व्यासभीष्मविदुरययातिचरितान्याधृत्य कुरु । तच्चालङ्कारशास्त्रनिर्देशपालनेन सार्धम्' । अहन्तु तद्वाक्यान्ते—हुं-हुं कुर्वन् भीतभीत इव यथा तथा ततो मुक्तोऽभवम् । अयं हि प्रथमः सानुरागवृद्धपाणिस्पर्शानुभवो ममासीत्। (इतः पूर्वं सहृदयवृद्धबुधस्य स्वर्गीयश्रीरमेशचन्द्रशुक्लमहाशयस्य संकोचाऽऽच्छन्नवात्सल्यौदार्यमनुभूतमासीत्, किन्तु स विनम्रतामूर्तिर्मदीयकरयोर्निजचरणस्पर्शं कदापि सम्यङ् न सेहे ।)

तदाकृष्टस्तृतीयदिवसे १९ मार्च १९९७ दिनाङ्के प्राचार्यावासे तद्दर्शनार्थं गतः । तदानीं तत्र प्रकोष्ठे प्राचार्येण सह श्रीहेमचन्द्रजोशीप्रभृतयश्चासन् । तत्रापि ठाकुरमहानुभावः प्रकोष्ठाद् बहिरानीय कथयति— 'व्यासादिचरितानि महाकाव्योचितानि न सन्ति । ययातिचरितमाधृत्य महाकाव्यं लिखतु । महाभारते-'पूर्वययाति-उत्तरययाति' इति द्विधा विभक्तं तच्चरितमस्ति, (महाभारतं ठाकुरमहोदयस्य प्रियग्रन्थः) अहं तावद् भविता न वेति' । श्रुत्वेदं मया चिन्तितं— वार्धक्यवशात्तथा ब्रूते, झटिति तत्स्थानसङ्केतो जिज्ञासितः। स्वनामोल्लेखनपूर्वकं मालीरवागान, वैद्यवाटी, जिला—हुगली—७१२२२२ (पश्चिम बंगाल) इति लेखितवान् । तथाऽसौ तत्सन्ध्यायामेव वङ्गं गतः ।

अत्र मम मानसमान्दोलितं जातम् । महाकाव्यकरणसामर्थ्यं मयि नास्ति, न च तथा रुचिः । दीर्घकालिकं कार्यं ममासह्यं भवति । भागवतेन परिचितं ययातिचरितं शृङ्गारातिशयेनारब्धं चरमवैराग्येण समाप्तिमेति । अभीष्टविषयस्ततस्त्वारभ्यते । किन्तु श्रद्धेयवृद्धाशीर्निर्देशपालनमनिवार्यमासीत् । तत्र हुं-कारेण स्वीकृतिरपि सूचिताऽऽसीन्मया। अतो द्वित्रा दिवसा महदान्दोलितहृदयेन यापिताः । २३ मार्च १९९७ दिनाङ्के फाल्गुनपूर्णिमातिथिरासीत् । किंकर्तव्यविमूढः स्वप्रकोष्ठे चोपविष्टः पुरस्तात् पार्कमध्ये

होलिकादहनाऽऽयोजने बालान् व्यापृतान् पश्यामि, तेन द्रागेव महाप्रभुगौराङ्गदेवः स्मृतौ समुदितः। सा पूर्णिमातिथिस्तत्प्राकट्यतिथिः। गोलोकवासिश्रीप्रभुदत्तब्रह्मचारिप्रणीतं चैतन्यचरितावलिपुस्तकं पूर्वपठितमासीत्। तत्क्षणमेव तत्पुस्तकस्य पद्यानुवादश्चारब्धः । पूर्वन्तु नाम चिन्तितम् ।

प्रेमावतारस्य महाप्रभोस्त्वनन्तरसता सर्वविदितैवास्ति, परं स्वकृतिनाम्निठाकुरमहाशयस्य नामगन्धः स्यादिति 'गीतानन्तरस'मिति नामरत्नमुद्धृतम् । तथाहि—**गीतः, अनन्तरसो महाप्रभुगौराङ्गदेवो यस्मिन्, गीतः, अनन्तस्य-अनन्तलालठाकुरस्य सत्स्पर्शप्रेरणया, रसः-स्वरुचिर्यस्मिन्, गीता, अनन्तरसा-नानाभावा यस्मिंश्चेति** । यथा-तथा शीघ्रतया षण्मासैरनुवादकार्यं सम्पन्नम् । किन्तु ततः पितृपादो दिवङ्गतः । तद्बाधामुत्तीर्य द्रव्यप्रबन्धं विधाय तन्मुद्रणमारब्धम् । अस्मिन् सर्वस्मिन् क्रमे त्वरितत्वमपेक्षितमासीत् । (मुद्रणात्पूर्वं श्रीवृन्दावनवासि-गुरुवर-अमीरचन्द्रशास्त्रिपादाशीर्यथा लब्धं तदुल्लेखः पूर्वखण्डे सविस्तरं दत्तोऽस्ति) । **आसीन्मम संकल्पः—विमोचनमस्य वङ्गभूमौ, श्रीगौराङ्गप्राकट्यतिथौ, श्रीमदनन्तलालठाकुरकरकमलद्वाराऽस्तु** ।

यस्योल्लेखः पूर्वखण्डे कृतोऽस्ति, सोऽयं ग्रामीणः कलकत्तावासी चिरञ्जीविगिरीशमिश्रो दूरभाषद्वारा पूर्वमेव विमोचनविषये सङ्केतितः । अहञ्च मुद्रितपुस्तकस्य पञ्चाशत् प्रतीरादाय कलकत्तानगरं तदनन्तरवर्षस्य ११ मार्च १९९८ दिनाङ्के प्राप्तः । द्वितीयदिवसे १२ मार्च दिनाङ्के फाल्गुनपूर्णिमातिथिः— श्रीगौराङ्ग—प्राकट्यदिवसश्चासीत् । तत्र गतः पश्यामि—गिरीशद्वारा विमोचनकृते सामग्री-स्थान-समय-सहृदयसमाजसंग्रहादिव्यवस्था सम्यक् परिकल्पिताऽऽसीत् । तद्विज्ञाय प्रमुदितोऽहम् ।

कलकत्तानगरे भवानीपुरस्थ—श्रीलक्ष्मीनारायणमन्दिरपरिसरे विमोचनकार्यं सुनिश्चितमासीत् । निर्धारिततिथौ पूर्णिमायां पूर्वाह्ने श्रीमुनीश्वरझा- श्रीमानवेन्दुबनर्जीप्रभृति-विद्वत्सहृदयजनास्तदावासमेत्यामन्त्रिताः । ठाकुरमहाशयः कलकत्तानगराद् बहिः प्रतिवसति। स समुचितसमये निजावासाद् हावड़ा—स्टेशनमेष्यति, तत्र निर्धारितजनो गत्वा पूर्व—सङ्केतितस्थानस्थितत्वादपरिचितमपि संचित्य तमानेष्यति । किन्तु दौर्भाग्यान्मध्याह्नोत्तरकाले तथामूसलाधारवृष्टिर्दीर्घकालपर्यन्तमभूत्, यतः समस्तकलकत्तानगरस्य यातायात-सञ्चारव्यवस्था ह्यस्तव्यस्ता जाता । वयं स्वस्थाने (नारकेलडंगाक्षेत्रे) नीडनिलीनविहगा इव चिन्ताकुला मलिनाकृतयस्तद्विकलकालं यापितवन्तः । मार्गेषु तडागोपमजलाप्लवो जातः । प्रणालिका नदीजलधाराकारा प्रवहन्ति स्म । कस्यचिद् वाहनस्य चलनमतिकठिनमासीत् । यदा वर्षावेगो लघुतां गतस्तदा यथा-तथा निःसृत्य टैक्सीद्वारा वयं भवानीपुरमन्दिरस्थानं प्राप्ताः। निर्धारितः सायकालः (६-७ वादनम्) प्राप्त एवासीत् । तत्र चाहूतजनाः केऽपि नागताश्चासन्

नैवागच्छन्त इव लब्धाः । तथावर्षाकारणाद् दूरभाषद्वाराऽपि केनचित्सह वार्ता, प्रयासे कृतेऽपि न भवति स्म । एवंविधे दुष्काले तथावृद्धठाकुरमहाशयोऽपि वासं विहाय नागतो भवेद् रेलद्वारा हाबड़ास्टेशनमितिधिया कोऽपि तमानेतुं तत्र न प्रेषितः ।

किंकर्तव्यविमूढावस्थायां श्रीठाकुराभावे गौराङ्गमन्दिरं जिज्ञासितम् । तैश्चोक्तं—निकटस्थाने तदपि नास्ति । स्थितौ तस्यामन्ततस्तस्यामेव तिथौ किमपि करणीयमेव । ठाकुरावासस्थानं सुदूरमस्ति । अधुना रात्रिर्जाता । अतः सर्वपुष्पहारादिकं श्रीलक्ष्मीनारायणविग्रहाय पुजारीजीद्वारा समर्प्य पुस्तकञ्च निवेद्य तत्रैव वयं स्थिताः पुजारीजीहस्तात्प्रसादं गृह्णीमस्तस्मिन्नेव क्षणे पृष्ठभागे कियद्दूरेऽलगत्कोऽपि भद्रपुरुषः शनैः-शनैरागत्य श्रीविग्रहमुखः स्थितः । इह लक्ष्मणपुर्यां प्रथमदर्शनं कृतमासीत् । तत्र स्थितेषु मम सङ्गिषु गिरीशप्रभृतिषु केवलमहमेव तं परिचिनोमि । तथा क्षणादेवावसरे समुपस्थितं ठाकुरमहाशयमुपलभ्य चकितस्य मे कियान् कीदृक् प्रमोदो जातस्तल्लेखनमसम्भवमेवास्ति । धावित्वा पादयोः पतितः । अन्ये सर्वेऽपि गिरीशप्रभृतयस्तं ज्ञात्वा 'किमेष एव श्रीठाकुरमहाशय!' इति प्रफुल्लिताः । पुजारीजीसकाशात्प्राप्तासु वैयक्तिकासनिकासु श्रीठाकुरपुरस्सरोपविष्टेषु सर्वेषु मया कञ्चित्कालं सविनयं पुस्तकस्य गीतानन्तरसस्य संक्षिप्तपरिचयः प्रस्तुतः । निवेदितञ्च भवदाज्ञानुसारं महाकाव्यं न जातं, यत्किञ्चित्कृत्वा समुपस्थितोऽस्मि । (इतः पूर्वं श्रीठाकुरमहाशयो न जानाति स्म यत्किं कृत्वाऽहमागतः । प्रायस्तेन गतवर्षे कथितमात्मनो विस्मृतमपि भवेत् बटोहीझाकृतस्य कस्यचिद् विमोचनं तस्मिन् स्थाने तस्यां तिथौ सायं ७ वादने भवता करणीयमस्तीति गिरीशद्वारा स निवेदितोऽभूत्) ततोऽमोघस्पर्शाशंसी गुरुवरः श्रीठाकुरोऽपि प्रसन्नमनसा स्मृताखिलोदन्तो वङ्गभाषया (प्रायो मत्साङ्गिजनसुबोधार्थ) शुभाशीःशंसागर्भ निजोद्गारं प्रकाशितवान् । **एवं वङ्गभूमि—गौराङ्गतिथि—श्रीठाकुरद्वारा विमोचनालोकार्पणं सम्पन्नमेव** । ततस्तेनोक्तं—'मम गृहे नागमिष्यसि', 'प्रातः सिन्दूरक्रीडोत्सवोऽस्ति, तदनन्तरं निश्चितमागमिष्यामि' तदादेशः शिरोधृतो मया ।

ततः टैक्सीद्वारा हाबड़ास्टेशनं यावद् गिरीशसङ्गी श्रीठाकुरमहाशयं नीतवान् । तत्र वैद्यवाटीरेलमध्ये चोपवेश्य प्रत्याजगाम । तथादुष्काले तस्यागमनमवसरे चमत्कार इवानुभूतोऽखिलानाम् । हाबड़ास्टेशनतो भवानीपुरमन्दिरे सहायकं विना स्वयं तदुपलब्धिस्तत्सौजन्यौदार्यसौहार्दातिशयमभिव्यनक्ति ।

प्रतिपदि सिन्दूरक्रीडानन्तरं गिरीशेन सह हाबड़ामेत्य पुनस्ततो रेलद्वारा वैद्यवाटीं प्राप्तः । मार्गे वर्षा भवति स्म । मालीरवागानमध्ये ठाकुरजी विख्यातमहापुरुषोऽस्ति, जनान् पृच्छन् सारल्येन ठाकुरजीनिवासमेतवान् । स प्रतीक्षमाणश्चासीत् । तान् प्रणम्य श्रीमातृवन्दनां विधाय तदाज्ञयाऽऽवामुपाविष्टौ । मधुरालापः प्रचलितः । आवयोर्गमनेन ते

प्रमुदिताश्चासन् । श्रीमाताजी बहुमिष्टान्नं स्थाल्यां सज्जीकृत्य भोक्तुमदात् । वङ्गस्वागतं मिष्टान्नप्राधान्यं कियद् भवतीति स्वतोऽनुभूतम् ।

आलापे बहुरात्रिर्जाता, अन्ते तदाशीर्लब्ध्वा प्रत्याजगाम गिरीशावासम् । प्रातश्चतुर्थदिवसे प्रातःकाले गिरीशमित्र–मैथिलबन्धु–व्यवहारपटु–श्रीविनोदानन्दजीसाहाय्येन श्रीलगौराङ्गमन्दिरपुरस्सरविविधमन्दिरावलोकनं सम्पन्नम् । गिरीशपार्श्वे कलकत्तासहृदयसमाजमध्ये वितरणाय गीतानन्तरसस्य सर्वाः प्रतीः समर्प्य कलकत्तानगराल्लक्ष्मणपुरमागतः । एतन्मध्ये चिरञ्जीविगिरीशस्य तत्परिवारस्य तन्मित्रमण्डलस्य सौजन्यसहयोगः सदैव कृतज्ञतया स्मृतौ स्थास्यति ।

कालान्तरे गिरीशसत्प्रयासेन वङ्गाक्षरे श्रीठाकुरजीहस्ताक्षरेण मण्डितमेकं गीतानन्तरसपुस्तकं, मयाऽऽकांक्षितं श्रीठाकुरमहानुभावस्य शुभाशंसाशीःपत्रपीयूषञ्च डाकद्वाराऽधिगतम् । तथाहि–

कार्यवशात् लक्ष्मणपुरं प्राप्तस्य मे भाग्यवशात् महापण्डितेन कविधौरेयेण आचार्यवर्येण श्रीमता वटोहीझामहोदयेन साकं परिचयः संजातः । स्वरचितैःसंस्कृतश्लोकैः संगीतैश्च मानसं मे रसाप्लुतं चकारासौ कविवरः । मया महाकाव्यनिर्माणाय प्रचोदितश्च साग्रह स्वीकृतवान् मम प्रस्तावम् ।

स्वल्पकालाभ्यन्तर एव गीतानन्तरसमिति नूत्नं महाकाव्यमधिश्रीकृष्णचैतन्यचरित विनिर्माय प्रकाशं च नीत्वाऽस्मानन्यांश्च संस्कृतसेवकान् परमानन्दभाजनं कृतवानसाविति कृत्वा एतस्मै असंख्याता धन्यवादाः प्रदीयन्ते । कृतिरियं पूर्णतामासाद्य चिरं प्रकाशयतु झामहोदयस्योचितं गौरवम् ।

याचिता मया वृद्धेन भिक्षा । लब्धा च सा । एतेन कृत्स्नस्य संस्कृतविद्यारसिकवर्गस्य परमा प्रीतिर्भविष्यतीति निश्चप्रचं विज्ञायात्मानमपि कृतकृतार्थं मन्ये । का कथा कविवरस्य झामहोदयस्य ? तेषां सार्वत्रिकं चिरन्तनं च कल्याणं कामयते विदुषां विधेयो

–वैद्यवाटीवास्तव्योऽनन्तलालदेवशर्मठक्कुरः ।

Prof. Anantalal Thakur

38/1, Ram Mohan Sarani,
Mala Bagan, Baidyabati,
Hooghly [illegible]
[illegible]

Date [illegible]

कार्यवशात् लक्ष्मणपुरं प्राप्तस्य मे भाग्यवशात्
महाकविना कविवरेण आचार्यवर्येण श्रीमता
बटोही झा महोदयेन साकं परिचयः संजातः।
स्वरचितसंस्कृतश्लोकैः मनोभिरिव मानसं मे रसा-
प्लुतं चकारासौ कविवरः।
मया महाकाव्यनिर्माणाय प्रोत्साहितश्च आग्रहं स्वीकृत-
वान् मम प्रस्तावम्।

स्वल्पकालाभ्यन्तर एव गीताललितमिति
ग्रन्थं महाकाव्यमपि श्रीकृष्णचैतन्यचरितं विनिर्माय
प्रकाशं च नीत्वाऽस्मानस्मांश्च संस्कृतसेविनः
परमानन्दभाजनं कृतवान् तदर्थं कृते तस्मै
असंख्याता धन्यवादाः प्रदीयन्ते। कीर्तिरियं
पूर्णतामासाद्य चिरं प्रकाशयतु झामहोदयस्य
चिरं गौरवम्।

याचिता मया वृद्धेन भिक्षा। लब्धा नु
सा। एतेन कृत्स्नस्य संस्कृतविद्यारसिकवर्गस्य
परमा प्रीतिर्भविष्यतीति निश्चप्रचं विजानान
मपि कृतकृतार्थं मन्ये। किं कथा कविवरस्य
झामहोदयस्य? तेषां सार्वत्रिकं शिवदानं च कृपया
कुर्वन्तु विदुषां निधयो वेदवाटीवासिनोऽनन्त-
लालदेवशर्मठक्कुरः।

तस्याधमर्णोऽहं तत्परमोदारमहानुभावहृदये पत्रकार्तज्ञ्यं सङ्गीतवान्—

ठाकुर! लाडयसि त्वमनन्तम् ।
गौरभूमिपरिचयप्रभावो वसुधायामखिलायाम्
निम्नोन्नतजडबुधभेदस्थितिरहितो रसतामयते ।
तत्पावनवङ्गावनिजानां सुतरां निर्मलमनसाम्
श्रीचैतन्यसरोमीनानां दर्शनमिह सौभाग्यम् ।
पूर्वस्यां दिशि रविरुदितो दिवि तमः प्रबोधं भूमौ
भित्वा कीर्त्वा जगतीचित्रं नवनवमालोकयते ।
तत्काष्ठातः काले प्राप्तः स्वाप्तो लालोऽनन्तः
करलालनपूर्वकसंभाषणगौराङ्गस्मृतिमौज्झत् ।
'गीतानन्तरसं' प्रभुदत्ताऽऽचितनिमायिचारित्र्यम्
त्वत्संस्पर्शादुद्गतमेतद्वत्सपान्थपाथेयम् ॥
त्वत्कृपयाऽहो तच्छिवकल्पम् ।
अस्तु मनो मे संसृतिचक्रे ॥

ततस्तदिदं गीतानन्तरसं पुस्तकं विद्वत्सहृदयसमाजे प्रसृतम् । साधुशिरोमणिप्रभुदत्तब्रह्मचारिरचितचैतन्यचरितावलिपुस्तकं तथाविस्तृतमस्ति, यस्यादौ भूमिकाभागस्य सर्वांशतोऽनुवादः पर्वतसमानं दुर्गमः प्रतीतः । अतस्तदंशः संक्षिप्य कृतः। *किन्तु प्रतीतमनया रीत्या प्रभुदत्तलेखनीभावः स्फुटो न भवतीति* तस्मादद्वैताचार्य—विश्वरूपप्रसङ्गतो यथाशक्ति सर्वानुवादश्चारब्धः । परमज्ञानाद—नवधानाच्छीघ्रतावशाच्चाशुद्धयस्त्रुटयो बहुशोऽधुना पठने चायान्ति । तत्र प्रूफ—संशोधनेऽनुभवाभावः शीघ्रताकरणमपि प्रमुखं कारणम्। दोषज्ञा विद्वांसः संशोधनक्षमाः स्वोदारहृदयसौहार्दं प्रकाशितवन्तस्तदर्थे तत्कार्तज्ञ्यमावहामि हृदयेन । एतेनानुभवामि सम्पादनं, पुनः प्रकाशनं, संस्करणान्तरञ्चेति शब्दा बहु साभिप्राया भवन्ति । अस्तु।

इदानीं नूतनसहस्राब्दी-शताब्दी-प्रथमवर्षे द्वितीयखण्डमपि प्रकाश्यते । पूर्वन्तु केवलं पूज्यपाद—अनन्तलालठाकुरप्रेरणया यथाशीघ्रं किमपि कृतम् । खण्डान्तरस्य चिकीर्षा तदानीं नासीत् । अतः खण्डनामकरणं नहि विहितम् । लब्धे क्षणे द्वितीयमपि जातम् । (गुरुवर्यैः शास्त्रिपादैर्लेखितम् पूर्वखण्डे—**(गीतानन्तरसनाम्नः काव्यस्य प्रथमखण्डं श्रुतमिति)** गुरुवाक्येऽत्र प्रथमखण्डमिति पदेन तदितरखण्डमपि भवितुमर्हतीति तद्गूढाशीःप्रभावं सम्प्रति द्वितीयखण्डप्रकाशनावसरे संस्मरामि) अधुना विहिते द्वितीयखण्डे

नामकरणमावश्यकमिति मत्वा प्रथमखण्डकथायां श्रीलगौराङ्गपिता-श्रीजगन्नाथमिश्रपादो दिवङ्गत:, गौराङ्गलीला नवद्वीपमूलेति विहितस्य प्रथमस्य 'नवद्वीप-जगन्नाथखण्ड'-नाम स्वीकृत्य पूर्वखण्डकथायां महात्मा विश्वरूपो मायापुरात्प्रव्रजितस्ततश्चेदं **'मायापुर-विश्वरूपखण्डं' (द्वितीयम्)** सहृदयैर्भावनीयम् ।

खण्डेऽस्मिन् कतिपयभाषागतशब्दा यथावत्प्रयुक्ता: सन्ति । श्लोकसंख्यानुसारं तत्सूचिका—

टिकट—३२, करताल-खोल—१७४, हत्या-वामन (ब्राह्मण)—२१८, काजी—२२२, पखावज—४३६, दिल—४४६, घाट—६०५, कुफ्र, रू, सरह, काफिर, कत्ल, सबाब—७१९, दरबार—७२०, मुलुकपति—७२१, कुरान—७२२, तोबा, कलमा—७२३, हुजूर—७३७, बेंत, बाईस बाजार—७४०, जल्लाद—७४३, उफ—७४४, आह—७४६, कब्र, बहिश्त—७४९, खान-पान—९९३, चर्खा—९९४, तम्बू—१०६८, मुहल्ला (मुहलम्)—११२२, दुहनी—१३३६, बाबा—१३६५, वाह साहब—१३६९, घोंघवसन्त—१३७१, लड्डु—१४०२, दोहा—१४०४, घूसा-चपेटा—१५०६, पोथी—१५४९, टोल—१६२७, बावला, अफीम, पिनक—१६३२, बादशाह—१६६९, मशाल—१६८४, धूमधाम—१७०१, गहर—१७०६, झाँझ-मजीर—१७३८, सीसी—१७५४, मारो-काटो—१७६६, मुल्ला—१७८७, मामा—१८१०, बलिहारी—१८६१, खोल (शाक-विशेष)—१८८३, मियाँ बुद्धू—१९३४, कीर्तन-फीर्तन—१९४६, बच्चू—१९४९, झोली—२०९६, बवण्डर—२१५२।

सुहृद्वर-श्रीकृष्णमूर्तिमहाभागस्य संशोधने यथा पूर्वखण्डे सौहार्दं लब्धं तथाऽस्मिन्नपि खण्डे, सोऽधुना तिरुपतिविद्यापीठे प्रवाचकपदे विराजते, तत्कृतेऽतिरिक्तकार्तज्ञ्यं हृदयेन वहामि । कतिपयांशसंशोधने श्रीधर्मेन्द्रकुमारझा-सुधिय: सहयोगो लब्ध:, सोऽप्यत्र कार्तज्ञ्येन चर्चनीय: । दिल्लीमध्ये प्राप्तस्य जम्मूविद्यापीठ-प्रवाचक-श्रीवैद्यनाथझा-मतिमतो दृष्टि: खण्डस्यास्यादिभागे पतिता,ततस्तन्निर्देशोऽप्यत्र संगृहीत:, तस्यैव विद्यापीठस्य प्रवक्तृ-चिरञ्जीवि-श्रीधरमिश्रस्यापि सम्मति: संकलितेति द्वयो: पदशास्त्रज्ञयो: प्रीत्योल्लेखनमनिवार्यं मन्ये ।

गौरानुवादप्रियकार्यभारात्
कृतज्ञताभारभरान्न दूये ।
गार्हस्थ्यधर्मी तु यथाऽसहायः
प्रकाशनद्रव्यनियोगतोऽत्र ॥

सहधर्मिणी सुमेधाऽबोधमनसस्तत्सन्ततयश्च मिहिरप्रतिभासुमनसः साधुवादपात्राणि, यत्सौम्यतावशात्कृतिपूर्तिरवसरे च तत्प्रकाशनमुदेति ।

सम्माननीय-अटलविहारिवाजपेयि-प्रधानमंत्रित्वं, माननीय-मुरलीमनोहरजोशि-शिक्षामंत्रित्वञ्च प्रशस्यतरं, यत्सौजन्योद्घोषितेऽस्मिन् संस्कृतवर्षे राष्ट्रिय-संस्कृत-संस्थान-निदेशक-कृतिमता मतिमता शास्त्रिकुटुम्बेन श्रीकुटुम्बशास्त्रिवर्येणाऽऽयोजितेऽखिलभारतीय-संस्कृतशिक्षकसम्मेलने श्रीचम्मूकृष्णशास्त्रिवितानितसंस्कृतसम्भाषणान्दोलननवनीत-विशुद्धसंस्कृतवातावरणाऽऽस्वादनानन्तरमेतत्प्रकाश्यते, तत्सर्वेऽधुना ते साधुवादेन प्रशस्यन्ते।

पितामही 'तपस्विनी' देवी ३०-८-१९८९ दिनाङ्के (कुशोत्पाटिनी-अमातिथौ) दिवङ्गताऽभूत् । तत्कृते पूर्वविहितस्य गीतानन्तरसस्य समर्पणं संकल्पितमासीत् । किन्तु तत्प्रकाशनात् (१४-१-१९९८ दिनाङ्कात्) पूर्वमेव १-१०-१९९७ दिनाङ्के (रात्रौ प्राप्तायामाश्विनशुक्लप्रतिपदि) पिता दिवङ्गतः । श्राद्धकर्माङ्गितया पितुस्तत्समर्पणं जातम्। अधुना द्वितीयसमर्पणं दिविस्थितपितामहीतपस्विनीकृते सविनयं विधीयते ।

अन्ततः –

द्रव्यप्रवृत्तिभावानां शुद्ध्या प्रीतिः सदाऽस्तु नः ।
भवे भवेऽनुकम्पातो गुरूणां "सन्निमायिनि" ॥

रथयात्रा-दिवसः
३-७-२००० ई०

सद्गुरुकृपाकांक्षी
बटोही झा

रसार्पणम्



(स्वर्गीया तपस्विनी देवी)

चक्रे नाम बटोहीति या मम सरलात्मना ।
पितामही तपोमूर्तिः स्वर्गस्था सा 'तपस्विनी' ।।
तत्पौत्रेणैव तृप्ताऽस्तु मया साम्प्रतमर्पितम् ।
लब्ध्वा द्वितीयमेकान्तं 'गीतानन्तरसं' रसम् ।।

आमुखम्

प्रेम्णि प्रभौ च नो भेदः

इति प्रतिपाद्यमेवात्र प्रतिपाद्यते–

प्रथमभागस्य सहृदयैर्नितरां कृतस्वागतस्य प्रकाशनानन्तरं "गीतानन्तरसम्" इति काव्यस्याद्येमं द्वितीयभागं प्रकाश्यमानं विलोक्य को न मोमुद्यते ?

काव्यमिदं गीतकाव्यम् । नाम्नि गीतपदप्रयोगात् तल्लक्षणसमन्वयाच्च । उत्तमगीतकाव्यत्वेन सर्वैः सहृदयैः स्वीकृतस्य जयदेवकृतगीतगोविन्दस्य यानि वैलक्षण्यान्याख्यातानि–

यदि हरिस्मरणे सरसं मनो
यदि विलासकलासु कुतूहलम् ।
मधुरकोमलकान्तपदावलीं
स्मर तदा जयदेवसरस्वतीम् ।।

इत्यत्र, तानि सर्वाण्यत्र "गीतानन्तरसे" विद्यमानान्यनुभूयन्ते ।

सरसहरिस्मरणविधानक्षमता, विलासकलाकुतूहलपूर्तिः, मधुरकोमलकान्तपदावली चेति त्रितयमपि काव्ये गीतानन्तरसेऽहमहमिकया समक्षमागत्य हृदयमावर्जयति । मधुरकोमलकान्तपदावलीसद्भावाद् गेयता चात्र सुतरां विलसति ।

तरङ्गायते शब्दलहरी । सौन्दर्यलहरी-गङ्गालहरीप्रभृतिगीतकाव्येषु लहरीतिनाम–निर्देशो, गीतकाव्ये यं तरङ्गायितशब्दसौष्ठवसद्भावं प्रधानगुणत्वेन संकेतयति, सोऽप्यत्र सर्वत्र संलक्ष्यते ।

विख्यातेनानेकगीतकाव्यलेखकेन मनोहरतद्गाननिपुणेन डा०हरिवंशरायबच्चनेन कविना गीतकाव्यं कविव्याकुलताप्रसूतं कविव्याकुलतारूपमेव वा लक्षितम् ।

भावनानां मधुर आधारः श्वासैर्विनिर्मितं गीतं कवेरुरसो नोपहारः किन्तु तस्य विकलतास्तीति[1] कथनस्य तात्पर्यमस्ति-गीतं कयापि भावनयात्यन्तव्याकुलमानसस्य

१. "भावनाओं का मधुर आधार, सासों से विनिर्मित
गीत, कवि उर का नहीं उपहार, उसकी विकलता है ।"

कवेर्मुखादनायासं स्वतः प्रादुर्भूतं जायते; तत्रान्योपहारवत् कृत्रिमतायाः प्रयासस्य च लेशोऽपि न भवति ।

अत्र च वर्णितं चैतन्यमहाप्रभुचरितं प्रतिपदं व्याकुलतापरिस्पन्दितं वैक्लव्यगद्‌गदं लोकोत्तरवेदनाप्रकम्पितं च विद्यते । गयायात्राप्रसङ्गे पुरीश्वरो यतिवरस्तस्य कर्णे श्रीमन्त्रं जपति स्म, तस्य प्रभावेण सर्वतोभावेन पूर्वत एव राधात्वमितस्य प्रियतमश्रीकृष्ण-विरहव्याकुलताव्याप्तमानसस्यास्य सर्वे वाचिकाङ्गिकादिव्यापाराः कस्यचिदनिर्वचनीय-भगवद्‌भावनामादकतोन्मत्तस्य भक्तस्येव बभूवुः । ततश्चास्मिन् गीतकाव्ये गौरकृष्णस्य व्याकुलताप्रसूतौ विलापप्रलापौ भावनामहिम्ना तेन सह साधारणीकरणतां गतस्य कवेरुद्‌गारे संक्रान्तौ भूत्वा तं तद्‌गानाय व्याकुलीकुरुतः । गीतकाव्ये यो यादृशो वा व्याकुलताप्रवाहोऽपेक्ष्यते, सोऽत्र सर्वत्र साक्षात् क्रियते ।

प्रख्यातेषु गीतकाव्येषु क्वचिच्छृङ्गारो रस आस्वाद्यते—यथा मेघदूते अमरुशतके च, क्वचिच्च भक्ती रसो हृदयावर्जकोऽस्ति—यथा सौन्दर्यलहरी-गङ्गालहरी-सुधालहरीप्रभृति-गीतकाव्येषु ।

गीतगोविन्दे शृङ्गाररसस्य भक्तिरसस्य च सह सद्‌भावेन यथात्र शृङ्गारप्रियो, भक्तो वासुदेवप्रियोऽपि च विलक्षणचमत्कारसामञ्जस्यमनुभवतस्तथात्र गीतानन्तरसे गीतकाव्येऽपि।

बङ्गीयरूपगोस्वामिप्रभृति-काव्यशास्त्रकारेण कथितम्—गीतगोविन्दादौ हर्यालम्बनविषयक-शुद्धप्रेममयरतिरूपा भक्तिर्विलक्षणालौकिकचमत्कारमयी यद्यनुभूयते सहृदयैस्तदास्तु एतादृशी भक्ती रसः, वस्तुतत्त्वनिर्धारणे सहृदयानुभूतेः काव्यशास्त्रे सर्वाधिकतलबत्प्रमाणाङ्गीकारात् ।

यच्चोक्तम्—देवादिविषया रतिर्भावः, तदस्तु तथैव । अस्माकमपि देवविषयकरतिर्भाव एव, तस्यास्तथाविधरसास्वादजननसामर्थ्याभावात् । श्रीकृष्णस्तु देवाधिदेवः । उच्यते च 'कृष्णस्तु भगवान् स्वयम्' । स न दशावतारेष्वन्यतमत्वेन परिगणितः । दशाकृतिकृत्स साक्षाद् विष्णुः । अतस्तस्य भक्ती रसोऽस्तु । रससिद्धकविना सुकृतिना जयदेवादिना रचिते गीतगोविन्दादौ समुपस्थितसशक्तविभावादिनाऽनायासमास्वाद्यतां गताया लोकोत्तरचमत्कारकारिण्याः तस्याः सर्वतोभावेन सिद्धस्य रसत्वस्यापलापानर्हत्वात् ।

अयमेव मधुरो रसः, प्रकृतिरसः, सर्वेषां रसानां मूलम् । अन्ये शृङ्गारादयो रसा अस्य विकृतय इत्यपि भक्तिरसार्णवादिग्रन्थे निश्चप्रचम् ।

महाप्रभोः सुचरिते प्रधानं वस्तु प्रेमैव वर्तते । अतोऽत्र सकलं वृत्तं प्रेममयं शुद्धप्रेमैव प्रतीयते । **'प्रेम्णि प्रभौ च न भेदः'** । भक्तप्रह्लादस्य भक्तिरूपात् प्रेम्णो भगवान् नृसिंहो न भिद्यते, भगवतो नृसिंहाच्च प्रह्लादप्रेमापि नातिरिच्यते । इमे पदे चात्र चरित्रगीतकाव्ये

पर्यायतां गते दृश्येते । भक्तिमात्रगम्यमतिसूक्ष्ममेतद्रहस्यं महाप्रभुणाऽनेन स्वकीयाचरणेन स्फुटमिव कृत्वा दर्शितम्।

श्याम: श्रीकृष्णो राधाभावरसाप्तये गौरकृष्णो जात:, राधाया गौरवर्णत्वात् । चैतन्योऽय श्रीकृष्णस्यावतार एव स्वकार्येण विख्यात: । देशकालजातिदशादिसीमोन्मुक्तां समाजस्य जीवनदायिनीं यामानन्दमयीं भक्तिं स प्रसारयामास, सा मोक्षाधिक: पञ्चम: पुमर्थ: ।

अनुवादोऽयं मौलिककृतिरिव प्रतिभाति । अनुवादकारयितॄणां मनस्विना मनीषिणां विदुषां कथनमासीत्—अनुवादोऽयं मा भूच्छब्दानुवादोऽर्थानुवादो वा, मा च भावानुवाद एव भूत्वा स्यात्, किन्तु महाप्रभुगौरकृष्णस्य चैतन्यस्य चरिते यस्य व्यापकस्य सात्त्विकस्य जातिप्रान्तादिसीमोन्मुक्तस्य शुद्धस्य कर्मठस्य वैष्णवस्वभावानुरूपकर्मप्रेरकस्य प्रेम्ण: प्राधान्यमस्ति तस्यात्रानुवादे तथा सम्यगुद्घाटनं स्याद् यथा सहृदयपाठकस्तस्यानन्देनानायासं समुल्लसितजनताजनार्दनाय कार्यं कुर्यात् । सौभाग्यादिदमभीष्टमत्र प्रत्यक्षरं प्रतिबिम्बितमस्ति।

श्रीमद्भागवतस्य "श्यामं हिरण्यपरिधि"मित्यस्य (गीत-संख्या—९) तथा परमप्रसिद्धस्य श्लोकस्य "बर्हापीडं नटवरवपु:—वृन्दारण्यं स्वपदरमणं प्राविशद्गीतकीर्ति"रित्यस्य (गीत-संख्या—२५) चेत्यत्र गीतेऽनूदिते सर्वे गुणा: सर्वतोभावेन समागता अनुवादकलां स्तुवन्ति ।

एवं 'संकीर्तनरसलीनम्' (गीत-संख्या—१) 'गौर: प्रेमांशु: शीतांशु:' (गीत-संख्या—३) श्लोक-संख्या—३५, ३६, ७१, ७२, ७३ चेत्यादौ काव्यसौष्ठवमनुवादसौष्ठवेन सह मिलित्वा महच्चमत्करोति पाठकम् ।

'हरिबोल'नाम कीर्तनं संकीर्तनमस्ति हरे: । अतएवास्य 'नाट्यं भावानुकीर्तन'मिति लक्षणलक्षितेन नाट्येन सर्वतोमुखसाम्यमस्ति ।

अस्य कवि: डा०बटोहीझा, साहित्याचार्य: लखनऊ-केन्द्रीय-संस्कृत-विद्यापीठे साम्प्रतं वरिष्ठप्रवक्ता वर्तते । शास्त्रे योग्योऽयं सुयोग्याध्यापक: काव्यनिर्माणेऽपि पटुरिति दृष्ट्वाऽस्याध्यापकत्वाद्(गुरुत्वान्) मम मनो नितरां सन्तुष्यति । श्रीकृष्णलीलामृतं भक्तिरसगङ्गाप्रवाहायमाणं श्रीमद्भागवतमेतस्य प्रियतमपुस्तकम् । अनेनैतस्य बहूनि पारायणानि स्वान्त:सुखाय कृतानि । श्रीमद्भागवतविषयकमेव स्वच्छं शोधप्रबन्धं विलिख्य 'विद्यावारिधि:' (पी-एच०डी०) इत्युपाधिमसौ प्रापत् । श्रीमद्भागवतपारायणप्रयोज्यमेवैतत् फलम् यदनेन गौरकृष्णस्य चैतन्यमहाप्रभो: सरसं प्रेममयं चरितमनायासं गीतकाव्यात्मकानुवादायोपलब्धं, प्राप्तं च तत्र स्तुत्यं साफल्यम् ।

प्रथमभागस्य प्रारम्भे परिवारस्य सदस्यानां पित्रो:, भ्रातु:, ग्रामीणानामध्यापकानां, दिल्लीसंस्कृतविद्यापीठस्य गुरुवरप्राचार्याचार्याणां सहपाठिनां च संस्मरणमनेन कृतं

तथाभावनाविनयोल्लसितमस्ति यथास्य परगुणपरमाणून् पर्वतीकृत्य नित्यं निजहृदि विलसत्सु सत्सु गणना स्वतो जायते ।

अयं भव्य नव्य रचनया संस्कृत साहित्यस्य
श्रीवृद्धिं सदा करोतु इति मम शुभ कामना
शुभाशीश्चेति शिवम् ।

डा० हर्षनाथ मिश्रः
लब्ध राष्ट्रपति पुरस्कार प्रतिष्ठः
व्याकरणसाहित्याचार्यः
नव दिल्लीस्थश्रीलाल बहादुर शास्त्री राष्ट्रिय संस्कृत
विद्यापीठस्य (मान्यत संस्कृत विश्व विद्यालयस्य)
सेवा निवृत्त प्रवाचकः

[तात्कालिका दिल्लीसंस्कृतपीठानुबद्धाः सुधीजना जानन्ति—प्रातःस्मरणीय-श्रीयुतहर्षनाथमिश्रपादानां शास्त्रपाण्डित्यं गभीरवैदुष्यं गुरुत्वगौरवम् । गीतानन्तरसं-प्रथमभाग-परिचिताः सहृदयाश्चावयोर्गुरुशिष्यसम्बन्धमवगच्छन्ति । गीतानन्तरसस्य प्रथमभागे श्रीमद्गुरुगीताशीःशीर्षके श्रीवृन्दावनवासि-वयोवृद्ध-श्रीयुत-अमीरचन्द्रशास्त्रि-पादानामाशीर्यथाधिगतं तज्जानन्ति तत्पाठकाः । अधुना द्वितीयभाग-प्रकाशनावसरे दिल्लीमहानगरान्तर्गत-रोहिणीमध्य-संस्कृतनगरवासिनो द्वितीयगुरवः

श्रीहर्षनाथमिश्रपादास्तच्छीर्षकं पूरयितुं प्रार्थिताः । वयोवृद्धाः रुग्णाः सन्तोऽपि यथौदार्यात्तल्लिखित्वाऽधुना (कनिष्ठपुत्रेण सह पञ्जाब-नाङ्गलक्षेत्रे विलसन्तः) डाकद्वाराऽऽषाढशुक्लपक्षे (प्रेषणतिथिः ४-७-२०००, प्राप्तितिथिः १०-७-२०००) सम्प्रेष्य ह्यागामिपूर्णिमा-गुरुव्यासपूर्णिमात्वं संसाधितवन्तः –

हृष्यतीति स्वयं हर्षो हर्षयतीति तत्परः ।
तादृशहर्षनाथत्वमपरतो मम स्फुटम् ।।
शिष्याणां विनयाधानाच्छिक्षणात्पाठनात्तथा ।
सोऽयमेषां सदा मान्यो "योऽनूचानः स नो महान्" ।।

प्रेम्णि प्रभौ च नो भेदः सच्छिवसुन्दरात्मनोः ।
प्रभुप्रेम-रसस्वादः कृष्णचैतन्यसन्निभः ।।
शिशूत्कर्षो गुरोर्हर्षो, गुर्वाशीः शिशुसौभगम् ।
व्यक्तमाहोस्विदव्यक्तं शिष्यान्तःप्रेरको गुरुः ।।

एतदर्थमात्महार्दिककार्तज्ञ्यं विनिवेदयन् भूयोभूयस्तत्पादपद्मयोः स्वप्रणतिं निदेशयन् तद्गुरुवर्यश्रीहर्षनाथमिश्रमहाशयानां स्वास्थ्यप्रसादं श्रीलचैतन्यप्रियं भगवन्तं जगन्नाथमनुनाथति तदुदारभावनानुभावितहृदयो दयोदधिलब्धिनिधिः

हरिशयनी-एकादशी —बटोही]

१२-७-२०००

।। अनन्तरसः श्रीमन्निमायी विजयतेतराम् ।।

मङ्गलानुस्मृतिः

भानुजाजीवनाधारश्यामभवनौनाविकः ।
यथाकल्परसस्त्रोतोभारतगोधरावनः ।। १ ।।

अमीरचन्द्रगुर्वाशीःसंस्तुतप्रभुकेतनः ।
पुनर्द्वितीयखण्डेऽयमनन्तं दोग्धुमुद्यतः ।। २ ।।

गुरुश्चन्द्रोऽमीरो मधुरकवितामण्डनसभा—
—समीरो लालस्थो यदि सहजसौगन्ध्यमतनोत् ।
न तच्चित्रं तस्य, स्वगुरुधरणीलक्ष्यपथिक—
स्वकीयाशीःशंसाऽच्युतवनबुधःकाव्यमयते ।। ३ ।।

रवेर्मेषक्रान्तिः कुजदिनतृतीयातिथियुतिः (१९९८ ई०)
सुयोगश्रीवत्सोऽसितदलगता माधवकला ।
हरिद्वारे कुम्भो मिलितजनतामद्य पवते
द्वितीयो गीतोऽयं प्रथयतु रसः प्रेम सततम् ।।४ ।।

१. वन्दे संकीर्तनरसलीनं मधुराकृतिचैतन्यम् ।
नृत्यावेशे निजकरचरणौ परितः परिभ्रमन्तम्
बाहुयुगलमुद्धृत्य सम्मुदा नृत्याकम्पितदेहम् ।
'हरि-हरि' मधुरमनोहरनादैः सकलशिवेतरशत्रुम्
आयतविकसितनयनसरोजं लोकोत्तररसमूर्तिम् ।।

२. प्रभुजीकृपाकटाक्षाकांक्षी ।
अधुना पूर्वं भाविनि समये कृतमखिलं यज्जन्मनि
तत्सर्वं भवता सम्पन्नं हरे! भवतु तत्फलभुक् ।
नाहं कथमपि भवामि कर्ता करोति मम तत्स्वामी
कर्ता कारयिता स्वयमास्ते 'पलटू-पलटू' श्रुतिरिह ।।

'स्वामी सेवकतः कृपालुनयनो लब्ध्वैव वस्तु स्वकं
दीने साधनताविपन्नजगति श्रीश! क्षणं पश्यतु ।
गृह्णात्वंशमिमं द्वितीयमधुना विष्णो! भवत्साधितं
न स्यान्मे ममता तवेङ्गितकृतौ' दत्तप्रभुप्रार्थना ।। ५।।

प्राक्कथनम्

३. गौरः प्रेमांशुः शीतांशुः ।
आनन्दं विकिरति तनुकान्त्या द्रष्टॄणां सविलासम्
पीताम्बरलोकोत्तरसुन्दरकनकाकृतिकमनीयः ।
श्यामो मेघो जीवनदाता प्रेमनिधिश्चैतन्यः
नमितस्तुष्यति सच्चिद्रूपो हरिभक्त्या गौराङ्गः ।।

पुण्यद्वीपनवे पुरन्दरपदश्रीमज्जगन्नाथजी—
गेहे भाग्यवती शची हि सुषुवे गौराङ्गदेवं शिशुम् ।
सोऽयं फाल्गुनपूर्णिमामधुतिथौ संजात एवाद्भुतं
कर्मैश्वर्ययुतं सुदर्शनशिशुः कुर्वस्तथा ववृधे ।। ६ ।।

पित्रोर्बन्धुजनस्य नागरसतां चित्ते प्रमोदं भृशं
कुर्वञ्छैशवलीलया शिशुरयं वर्षे गतः सप्तमे ।
वार्धक्ये बहुकामनाप्ततनयस्नेहप्रमोदक्षणौ
त्यक्त्वा तौ विकलौ गतोऽग्रजसुतो विश्वो विरक्तो गृहात् ।। ७ ।।

अन्योऽप्यल्पवयाश्च धैर्यवचनैर्हृद्यैर्ददौ सान्त्वनां
यूनो ज्येष्ठसुतस्य तप्तमनसोः पित्रोर्वियोगात्तदा ।
विद्याधीतिमतिं तयोरनुमतिं जग्राह चित्रक्रियो,
बाल्यादेव हि काशते जगति तद्भव्यात्मनो लक्षणम् ।। ८ ।।

आसक्तोऽध्ययने पितुश्च निधनात्कैशोरकाले गतो
गौराङ्गोऽसमये गृहस्थभरतो मातृद्वितीयोऽर्दितः ।
तस्मात्षोडशवर्षगौरतरुणः स्वध्यापने संस्थितो
द्रव्योपार्जनलोकशिक्षणमना बभ्राम राढाञ्चले ।। ९ ।।

लक्ष्मीनामसुकन्यया प्रथमतश्चासीद्विवाहोऽस्य, सा
नोत्तीर्णा बुधविप्रयोगसहने मुग्धा प्रतीक्षातुरा ।
मातुश्चाग्रहतस्तदीयमनसो मोदार्थमात्रं सुत—
श्चक्रे भक्तिमयीं पुनःपरिणयाद्विष्णुप्रियामङ्गनाम् ।। १० ।।

शास्त्राध्यापनकर्मणा बुधवरो गार्हस्थ्यधर्मे स्थितः
कालं यापितवानसौ कतिपयं ख्यातिप्रतिष्ठान्वितः ।
श्राद्धं पूर्वजतृप्तिदायकमतः कर्तुं प्रतस्थे गयां,
विद्यासत्कृतिभावतो हि पवते बुद्धिः शरीरं मनः ।। ११ ।।

तत्रैवास्य पुरीश्वरो यतिवरः कर्णे न जाने तु किं
श्रीमंत्रं जपति स्म यच्छ्रवणतो मत्तो निमायी सुधीः।
तत्प्रेमासवपानविभ्रमरसाऽऽविष्टः सदा पण्डितो
लोकाद्बाह्यमिव प्रलापविकलोन्मत्तक्रियामातनोत् ।। १२।।

सर्वं तत्पठनञ्च पाठनमहो तस्यां दशायां गतं,
श्रीगौराङ्गमहाप्रभोः सुचरितं भागे तथाऽऽद्येऽस्ति तत्।
व्यापारः खलु जीवनस्य विदुषो लब्धो गयायात्रया
श्रीकृष्णस्य दिवानिशं सुमधुरं संकीर्तनं प्रेमिभिः ।। १३।।

आरब्धं भवति प्रभोश्च परतः प्रेमाकुलं जीवनं
भागस्तु प्रथमोऽस्य भव्यरसदप्रेम्णस्तथा भूमिका।
प्रेम्णा जीवनमत्र सच्च, रहितं तस्मात्तु लोके जडं,
प्रेमी सच्चरितेन जीवनतृषासंवाहकः प्राणिनाम् ।। १४।।

४. जीवन! भूभारो नहि चान्यः, प्रेमापेतो जीवः।
रविशशिगगनपवनपावकजलवसुधादिव्यापारैः
प्रकृतिः प्रीतिविसर्जनशिक्षां प्रतिपलमद्धा वितरति।
हृदयमुपलसारोपममुक्तं स्रवति यतो न प्रीतिः
जडायते मनुजात्माऽरसतोऽव्यक्तचेतनं ह्यचलम् ।।

प्रेमैवास्ति महाप्रभोः सुचरिते वस्तु प्रधानं, ततो
वृत्तं प्रेममयं तदस्य निखिलं, प्रेमैव वा स स्वयम्।
भेदः प्रेम्णि तथा प्रभौ नहि, पदे पर्यायतां ते गते
श्रीचैतन्यचरित्रपाठकमतौ भाव्यण्वपीदं स्फुटम् ।। १५।।

श्रीचैतन्यचरित्रचारुघटने दत्तप्रभोराग्रहो
'नेयं मे चरितावली परकृतेर्भावानुवादः परम्।
अस्माभिर्घटितं प्रभोर्हि चरितं प्रेमावतारस्य तत्
प्रेमबह्मरसामृतञ्च सततं लोकात्मनोर्प्यायताम्।। १६।।

साहित्यं निखिलन्तु गौरविषयं वङ्गेऽथवा संस्कृते
श्रीगौरप्रभुसम्प्रदायरसिका वङ्गोद्भवास्तत्कराः।
वङ्गीयाः कवयश्च ते प्रभुकृतिं वङ्गप्रथारीतित-
श्चक्रुर्देशजहावभाववशिताः, स्वाद्यः स्वदेशो रसः।। १७।।

तेषां गौरमहाप्रभुः कविहृदां देवोऽवतारी हरिः
सर्वश्रीरवतारपङ्क्तिसदसि प्रख्यापितो यत्नतः।
श्रीचैतन्यचरित्रचित्रणपथे तैर्विस्मृतं वस्तुतः
शुद्धप्रेममयं सतोऽस्य चरितं प्रेमस्वरूपस्य तत् ।। १८।।

'लोकेऽमानिहृदाऽन्यमानदहृदा शष्पद्रुमाभ्यामपि
स्यान्नीचेन सहिष्णुना ननु सदा संकीर्तनीयो हरिः'।
संदेशोऽयमहो! महाप्रभुसतः प्राज्ञैर्न तैः संस्मृतो
कृष्णाभिन्ननिमायिगौरशरणस्थानाप्तिसंसाधने ।। १९ ।।

गौरश्रीशरणं विना नहि परं तन्निष्कृतेः साधनं,
तैरेवं ह्यवतारिताप्रणयतः साफल्यमस्यार्जितम् ।
कल्याणं परमं स्वदर्शनदिशा लोकस्य संसाधितं,
घोरे सम्प्रति गौरभक्तिसरणिः काले निमायी मणिः ।। २० ।।

साक्षाद्ब्रह्म परं महाप्रभुरयं गौराङ्गदेवस्तथा
राधाभावरसाप्तयेऽवतरितः कृष्णो नु गौराकृतिः ।
श्रीगौडे ननु सम्प्रदायजगति स्थानेऽस्तु तन्मान्यता,
सत्प्रेम प्रभुदत्तभावमनसां गौरस्तु तत्केवलम् ।। २१ ।।

त्यागो वै विरतिस्तथा व्यवहृतौ भक्तेः परं साधनं
तस्याः प्रेम फलं ततः प्रभुदिशा मोक्षाधिकं पञ्चमम् ।
श्रीगौरप्रभुजीवने समतया स्रोतः परं निःसृतं
तद्भावत्रयमत्र रागरसधौ लीनं तथैकं गतम् ।। २२ ।।

श्रीचैतन्यविशेषितं सुचरितं वङ्गप्रदेशस्तुतं
साहित्यं प्रभुदत्तसाधितमिदं संलम्बते मुख्यतः ।
वङ्गे भागवतञ्च मङ्गलपदं चैतन्यसंश्लेषितं
प्रख्यातं चरितामृतं प्रभुमुनिर्धृत्वा चकारोज्ज्वलम् ।। २३ ।।

स्थाने भागवतस्वरूपचरितं चैतन्यनामामृतं
श्रीगौरं ह्युपलक्ष्य भागवतभासिक्तञ्चकार प्रभुः ।
चैतन्याश्रितजीवनं स्फुटतया चैतन्यसंजीवनं
शुद्धप्रेमसुजीवनं तदखिलं चिच्येऽत्र दत्तः कृतौ ।।२४।।

श्रीचैतन्यसमानभावरसिकप्राकट्यमत्र क्षितौ
कादाचित्कमयं सुखं रसयति प्रेम्णा जगज्जीवनम्।
प्रेमी वास्तविको हि जातिसमयस्थानस्य बन्धात्पृथक्
सर्वेषां सुखशान्तिपाठगुरुताबन्धुः सुवृत्तैः स्वकैः ।। २५ ।।

ध्यात्वा तच्चरितावली सुघटिता चैतन्यनाम्नः सतो
दत्तेन प्रभुणा मया विनयिना लोकेऽस्ति सोपस्थिता।
तज्जानन्ति हि पक्षपातरहिताः संकीर्णतादोषतः
शून्याः सत्पुरुषा, गता च कियती सा लक्ष्यपूर्तिः कृतौ ।। २६ ।।

सर्वं भागवतानुकूलघटनं जातञ्च मत्पुस्तके
तद्दर्पेण विनाऽत्र वच्मि नहि तद्भावान्तरं वेशितम् ।
मान्या सर्वजनप्रिया भगवतष्टीकासु सा श्रीधरी
हृद्या मे च महाप्रभोरपि, कृतं तन्नो विरुद्धं मनाक् ।। २७।।

लक्ष्यं प्रेम विधाय चैव चरितं गौरस्य बन्द्धुं, परं
भावः सोऽस्य न लौकिको,ऽस्य घटनं शक्यं किमज्ञानिना?।
प्रेमी वास्तविकोऽस्य वर्णनपटुर्नान्यः क्षमो वस्तुतः
प्राप्ते प्रेम्णि परं ह्यचेतनदशा तस्याक्षमा वर्णने।। २८।।

५. नामी निजनामप्रियरसिकाद् वेत्ति प्रेम निगूढम् ।
नामरूपमयमखिलं विश्वं यदाकृतिर्व्यहारः
सत्यं ज्ञानमनन्तं ब्रह्म प्रीतिरसः परमार्थः ।
कर्मणि कुशलो ज्ञाने मौनी भजने रसप्रमाता
नामवियोगी जीवति कठिनं मत्तो वा (कविदासः) ।।

जीवत्येव नहीति नामविरही प्रेमी कदाचिद्यदि
स्थाता मत्तसमो बहिर्व्यवहृतेर्दृष्टौ च संसारिणाम् ।
तेभ्यः प्रेमपथस्य भाववचनाकांक्षा दुराकांक्षणं
सोऽदः कारयति स्वभाववशगैरस्मादृशैः स्वार्थिभिः ।। २९।।

लाभः प्रेमपथस्य कोऽपि नियतं पान्थस्य चास्मादपि,
श्रीभूपालविलोकनं हि सुलभं सामान्यलोकस्य नो ।
नायं यत्र च तत्र विभ्रमति तन्मार्गे यथा वै तथा
तत्पार्श्वानुमतिं विलभ्य लभते तद्भाग्यशाली जनः ।। ३०।।
पूर्वं यामिक एव तर्जयति तत्सामान्यलोकं तथा
लोके केवलराजदर्शनमपि प्रीतिर्दिदृक्षोः परा ।
एवं यो न कदापि पश्यति पुरा राजेश्वरं मानव--
स्तत्सामीप्यगतौ स्वयं न कुशलस्तद्दर्शनेच्छातुरः ।। ३१।।

तस्मान्नाट्यगृहे स यति टिकटं नीत्वा यथार्थक्षमा--
धीशस्थानतदीयवेषकृतकं लब्ध्वा नृपं तन्नटम् ।
राजाऽऽभूषणकुण्डलादिमुकुटैर्दिव्यप्रभावैस्तथा
नायं वास्तविको नृपः पुनरपि प्रीत्या तथा कल्पते ।। ३२।।

एवञ्चास्य हि पुस्तकस्य पठनान्नो सम्भवा पाठक--
प्रेमाप्तिस्त्वमुनाऽनुमाऽस्य लघुकं स्यात्प्रेमिणस्तत्स्थितेः ।

प्रेमी मत्तदशो वियोगविकलः प्रीतिप्रमत्तः कियान्
स्याद्बाह्याचरणो रसाप्लुतमनास्तस्येदमादर्शकम् ।। ३३।।

अन्तेऽध्यापकताभरस्य विदुषः प्रेमैव तज्जीवनं
तन्मूर्तिस्मृतिमात्रतो हृदि कियान् मोदक्षणोऽहो! सतः ।
प्रीतौ गौरमहाप्रभोस्तु लसितं चित्रं तथानृत्यत–
स्तच्चेतोहरमङ्कितं स्वहृदये कुर्वन्तु हे पाठकाः! ।। ३४।।

स्वर्णाङ्गेऽस्ति सुपीतमम्बरमहो! देदीप्यमाने शुभे
धौतं सुन्दरमाभुवं कटितटे तल्लम्बमानं धृतम् ।
ऊर्ध्वं दृष्टिकनीनिकाद्वयमितं तन्नेत्रकोणाश्रुकं
सिञ्चद्गोलकपोलमस्य ललितं वक्षः करोत्यार्द्रकम् ।। ३५।।

तस्य श्यामगुडालकाः शशिमुखे वातेरिताऽऽन्दोलिताः
प्रीतौ तन्मयताप्तितः स च मनाक् पृष्ठे नताङ्गो यथा ।
गौराङ्गोर्ध्वकरद्वयः सुमधुरैः कुर्वन् दिशान्तर्दिशा
भाति 'श्रीहरि–बोल, बोलहरि' हे! गुञ्जायमानाः स्वरैः ।। ३६।।

आनन्दाम्बुधिमत्तभक्तनिवहाः प्रीतिञ्च गौरप्रभो–
र्नानावाद्यविनोदनैश्च परितः संवर्धयन्तोऽधिकम् ।
तेषां भाग्यवतां सुभक्तिमनसां मध्ये च मध्ये प्रभु–
र्गाढालिङ्गनया च नृत्यति पुनर्धृत्वा करं केनचित् ।। ३७।।

श्रीगौरप्रभुपादपद्मतलतो नीत्वा प्रसादं रजो
भक्ता भावुकतावशान्ननु निजे लिम्पन्ति कायेऽखिले ।
आनन्दोऽत्र कियान् स्मृतौ मधुरता प्रेम्णस्तथोपासना,
हा! नो तत्र वयं, सुकीर्तनरता, धन्या ध्रुवं तेऽमुना ।। ३८।।

आदौ नामसुकीर्तनातुलसुखं तेषाञ्च विद्यार्थिनां
प्राप्तं भाग्यवतां निमायिविदुषो ये पाठशालाश्रयाः ।
जाते गौरहरौ निमायिनि गुरौ पाठे तथेतिश्रियि
प्रायोऽभूत्स निमायिपण्डितपदात्प्रेम्णस्तथापण्डितः ।। ३९।।

नायं लौकिकपाठपाठकबुधः प्रेम्णोऽधुनाऽध्यापकः
सौभाग्यं प्रथमं तदस्य कृपया श्रीरत्नगर्भोऽग्रहीत् ।
आचार्यस्य हि तस्य पादकमले भूयः प्रणामस्तुतिं
कुर्वन्नत्र समापयामि तदहं वक्तव्यमेतत्प्रभुः ।। ४०।।

आचार्यस्य कृपांशुकाशनमहो! श्रीरत्नगर्भस्य य–
ज्जातञ्चोपरि पाठकाः प्रथमतः प्राप्स्यन्ति वृत्तं तथा ।

क्षुद्रस्य प्रभुलेखकस्य सुहृदामेतावती प्रार्थना
शान्तिर्नूनमिता, समाहितहृदा तत्सर्ववृत्तं पठ' ।। ४१ ।।
अन्ते तन्महतां कृपालुमनसां श्रद्धेयशुद्धात्मनां
पादेषु प्रणतिं करोमि बहुशो दीनानुकम्पावताम् ।
कर्तव्यं ननु धर्मबन्धुमननं प्रेम्णा च मन्येऽधुना
ते श्रीकृष्णसुविश्वनाथयतयश्चेन्द्रस्तथाऽऽनन्दजी ।। ४२ ।।

तेषां लेखनमत्र धन्यवचसां कार्तज्ञ्यसंज्ञापनं
न्याय्यं नास्ति,यतोहि ते स्वजनता, स्वश्लाघनं भाति नो।
प्रीतिं भागवतीमिता हरिकृपापात्राणि सर्वे त्वमी,
पापानां भवति क्षय: स्मरणतोऽद्धा तत्प्रभुप्रेमिणाम् ।। ४३।।

आनन्दयन्ति सुखसङ्गतिभि:स्वकाभि—
र्दत्तस्य मे प्रणयभाजनतास्मृतास्तत् ।
ये बन्धवो दयितगौरगुणानुरक्ता—
स्तेषां स्मृतिश्च निजपापविनाशहेतु: ।। ४४।।

भागवतस्मृते: पश्चाद्भगवत्स्मरणं पुन: ।
मन्ये नावश्यकं यस्मात्साधूनां वचनन्तथा ।। ४५।।

६. **विघ्नाः स्तुत्यास्तेऽभ्यागत्या प्रभुविस्मरणं लुप्यति ।**
प्रभुदर्शनमिह कोटिजन्मभिः कश्चित्सुकृती लभते
भगवत्कृपासुधारसवृष्टिः प्रतिपलमखिलं सिञ्चति ।
गुरुहितकर्ता भजनानन्दी भगवत्तुल्या भक्तिः
पदवन्दनसङ्गतिसाधनयाऽबाधाराधासिद्धिः ।।

(प्रेमभिक्षु: प्रभुदत्तब्रह्मचारी)

७. **मङ्गलमूलं मधुरस्मरणम् ।**
ललितत्रिभङ्गतनुमुरलीधरमोहनसुन्दरवेषम्
भ्रूभङ्गोन्नतविलसितलोचनसततप्रसन्नवदनम् ।
श्यामगुडालकशोभितकन्धरबर्हापीडमनोज्ञम्
तिष्ठतु संस्मृतिपटले नित्यं वंशीवादनरूपम् ।।

८. लीला मधुराधिपतेरखिला मधुरातिमधुरमधुरा ।
इह भूलोके कर्मवासनानियमितजीवसमूहे
क्षुद्रकामनाऽऽयोजनतायां किं मानवतोत्तमता ?
हरिरवतारैस्तनुते लीलानिर्मलगुणकृतिमानम्
तदनुस्मरणात्प्रेमी भक्तो नृत्यति रौति विलज्ज: ।।

साम्राज्यं हृदये यदा सरसतासारल्ययो: स्थापितं
वासं तत्र करोति सद्‌गुणगणस्तत्सर्वतश्चागत: ।
साद्‌गुण्यं निखिलं हि तिष्ठति नरे नारायणात्मप्रिये,
काले पुष्पितचूतशोभितवने मज्जत्यलि: पुञ्जित: ।। ४६ ।।

भक्त: पत्ररवेऽपि स प्रियपदस्वानभ्रमं जिघ्रति
स्थाने मत्तसमश्चमत्कृतमना: पश्यत्ययं सर्वत: ।
कश्चित्तत्पुरतो यदि प्रियगुणख्यातिं मुदा गायति
श्रुत्वा तत्प्रियगायकाङ्घ्रिलुठनं भूय: करोति ध्रुवम् ।। ४७ ।।

लक्ष्या तस्य वियोगिनी समदशा, कर्णप्रियं या वच:
श्रुत्वा चातकपक्षिणोऽपि मुखत: 'पी-पी-' ध्वनिं हृन्मुदम् ।
स्वप्राणप्रियसंस्मृतौ च विकला वाष्पं स्थिता मुञ्चती
सत्यं, मादकता तथा प्रियतमप्रीतस्मृतौ संसृतौ ।। ४८ ।।

प्रेमालापरतो महाप्रभुरयं शिष्यै: स्वगेहोन्मुखो
गच्छन्नध्वनि दृष्टमस्य भवनं श्रीरत्नगर्भात्मन: ।
सोऽप्यस्ति प्रभुजातिक: सिलहटप्राचीनवासी द्विज:
प्रीत्याऽऽहूय महाप्रभुं स्वभवने रत्नस्तथाऽऽवेशयत् ।।४९ ।।

श्रीरत्नो हि महाशय: सरलतामूर्ति: परं भावुक:
शास्त्राधीतिरति: स्थिते प्रभुबुधे तच्छास्त्रचर्चोद्‌गता ।
श्रीमद्‌भागवतप्रसङ्गवशत: स श्लोकमेकं जगौ
यत्र ब्राह्मणगेहिनीनयनयो: कृष्णोऽद्‌भुतं लक्षित: ।। ५० ।।

कृष्णो याति वने बलेन ससखो गोचारणायैकदा
गावो यत्र नयन्ति ते प्रतिदिनञ्चान्यत्र निन्युस्तत: ।
तत्र श्यामलभक्ष्यघासचरणात्प्रीताश्च गावस्तथा
पीत्वा ता यमुनाच्छनिर्मलजलं तृप्ता हि कृष्णप्रिया: ।। ५१ ।।

पश्यन्ति व्रजमार्गमेव सतृषा गोपालबाला: परं,
नास्माकं दिनभोजनं व्रजगृहात्प्राप्तं तथैतत्क्षणम् ।

आयात्वत्र कथं, नयन्त्यनुदिनं यत्र ध्रुवं गोपिका
गत्वाऽन्वेषणतोऽपि तत्र विफला याता गृहं सौदनाः ।। ५२।।

सर्वे चात्र परं क्षुधाविलुठिता गोपा मनश्चक्रिरे
वक्तव्यौ 'कनुआ' तथैव 'बलुआ' नो वार्तया चानया ।
नूनं तौ च करिष्यतोऽत्र किमपि ज्ञात्वा प्रबन्धं द्रुतं
'श्रीकृष्णः—कनुआ, बलश्च बलुआ' प्रेम्णा सखीनां मुखे ।। ५३।।

मन्तव्यञ्च विधाय तद्भगवतः पार्श्वे गताश्चोचिरे
'भ्रातो! हे कनुआ! त्वयाऽत्र निहताः शीघ्रं बकाद्यासुराः ।
बालप्राणहरी क्षणेन मरणं प्राप्ता च ते पूतना
दुष्टेयं विकटक्षुधा नहि परं भ्रातस्त्वया घातिता ।। ५४।।

भूयस्ते समये वयञ्च समये स्थाने त्वया रक्षिताः
कष्टं तन्निखिलं विनाशितमहो रक्षाधुना नो ततः ।
अस्मान् सा बहुधाऽत्र पीडयति भो मित्र! क्षुधा राक्षसी
भोक्तुं देहि कुतोऽपि किञ्चिदपि नो', ह्यार्तैः सखा स्मर्यते ।। ५५।।

तेषां तद्वचनं निशम्य भगवान् पश्यत्ययं सर्वतो
भक्ष्यञ्चास्य न दृष्टमत्र किमपि श्रीशो मनाक् चिन्तितः।
दूराद्दूरविलोचनानुपतनाद् वेदज्ञविप्रानसौ
यज्ञञ्चाचरतस्तथा कतिपयान् लेभे तटे यामुने ।। ५६।।

दृष्ट्वा तानवदत्सखींश्च भगवान् 'कुर्वन्तु कार्यं त्विदं
विप्रा ये यमुनातटेऽध्वररता गच्छन्तु तत्सन्निधिम् ।
(प्राप्ताः कृष्णबलोदिता ददतु तद्भक्ष्यातुराणां द्रुतं)
ज्ञात्वा ते क्षुधितांस्तथा निगदिता दास्यन्ति किञ्चिद् ध्रुवम् ।। ५७।।

तन्नो खादत मार्ग एव, मिलिताः सर्वेऽत्र चात्स्यन्ति तद्'—
जग्मुस्तद्द्विजसन्निधिं भगवता गोचारकाः प्रेरिताः ।
दूराद् याज्ञिकविप्रवृन्दनमनं कृत्वा च साष्टाङ्गतो
दीनोक्त्या बहिरेव मण्डपभुवो वक्तुं स्थिताः प्रस्तुताः ।। ५८।।

'धर्मज्ञा ननु भूसुरा! वयमिह श्रीकृष्णरामोदिताः
प्राप्तास्त्वन्निकटे क्षुधाविवशिताश्चेदस्ति दत्तान्नकम् ।
श्रीकृष्णस्य बलस्य नश्च भविता शान्तिः क्षुधाया यत'—
स्तच्चैषामनुयाचनं द्विजगणः श्रुत्वा तटस्थः स्थितः ।। ५९।।

ध्यातं तैर्न वचः, पुनश्च वदतामाक्षिप्य रुक्षं जगुः
'सत्यं मूर्खवरा हि यूयमखिलाः खाद्यं किमप्यत्र नो ।

देवांशात्कथमत्र देयमुचितं गच्छन्त्वित: सत्वरं'
विप्राणाञ्च तदुत्तराद् विफलितास्ते चागता दु:खिता: ।। ६० ।।

औदासीन्ययुता ब्रुवन्ति निखिला: कृष्णं सखायं निजं
'हे भ्रात: कनुआ! त्वयाऽदयसतां नूनं वयं प्रेरिता: ।
दूरं भोजनदानमत्र सुहृदा वार्ताऽपि तैर्नो कृता
विप्रै: प्रत्युत मण्डपान्निजभुवो दुत्कारमुत्सारिता:' ।। ६१ ।।

श्रुत्वा तद्वचनं जगाद भगवांस्'ते कर्मठा ब्राह्मणा
जानीयु: कथमेव दु:खमधनं ये स्वर्गकामा: स्वयम् ।
नारीणां हृदयन्तु कोमलमत: स्त्रीणाञ्च तेषां पुरो
भूयो यान्तु, तदीप्सितञ्च भवतां दास्यन्ति ता निश्चितम् ।। ६२ ।।

ता देहेन च सन्ति तत्र, तु मनस्तासां ममैवोपरि
ब्रूध्वं केवलमावयोरभिहितं' श्रुत्वा च गोपा जगु: ।
'हे भ्रात: कनुआ! वयं तव गिरा सर्वञ्च कर्तुं क्षमा,
यामो नो वनितासमीपमिह मा गन्तुं निशान्ते वद' ।। ६३ ।।

'स्त्रीणामेव तथास्ति मे परिचय:' कृष्णो हसंश्चोक्तवान्
'नाम्ना मे ननु दातुमुद्यतहृदस्ता एव, यातोऽधुना' ।
(एकाकी पुरुषो यथा न रमते वेदोक्तितस्तं विना
सत्यं सा प्रकृतिस्तथा चलति नो, तं वेत्ति सैवाच्छलम्) ।। ६४ ।।

आसीत्पूर्वत एव वै परिचयो विप्राङ्गनाकृष्णयो:
श्रीवृन्दावनमेति माथुरजनो नित्यं यतो हेतुत: ।
तन्मालाकरगेहिनी द्विजगृहे पुष्पं प्रदातुं गता
स्तौति प्रीतहृदा हि कृष्णबलयो रूपञ्च लीलाऽद्भुतम् ।। ६५ ।।

श्रावं श्रावमिदञ्च विप्रवनिताचित्तेऽनुरागस्तयो–
र्जातो दर्शनलालसाविकलतां चक्रेऽधिकं नित्यश: ।
तासामुत्सुकताऽतिवर्धितदशा चावश्यकत्वाधिका
यत्पूर्त्यर्थकमेव तच्च ललितं कृष्णश्चकार स्वयम् ।। ६६ ।।

कृष्णेनैवमनेकवारमधिकञ्चोक्ता: सखायस्तदा
सर्वेऽप्रीतहृदा हि विप्रवनितापार्श्वे तु जग्मु: पुन: ।
तद्वद्दीनतया वदन्ति सरला 'हे विप्रभार्या:! शृणु
श्रीकृष्ण: सबलस्त्वितोऽतिनिकटेऽस्तीह क्षुधार्तोऽधिकम् ।। ६७ ।।

खाद्यञ्चेद् भवतीगृहेऽल्पमपि तद्गत्वा तयोर्दीयतां'
श्रुत्वा केवलमेतदेव विकला: प्रीत्या बभूवुश्च ता: ।

नासीत्सत्यमधीरतावधिरहो ज्ञात्वा क्षुधार्तौ स्थितौ
दु:खं वै सुखमिश्रितञ्च निकटस्थित्या क्षुधार्तिस्तयो: ।। ६८।।

आकांक्षा चिरकालतश्च हृदये वैकल्यमासीत्तथा
तच्चेतोहरमूर्तिदर्शनगतं, पार्श्वे तयोर्यत्स्थितौ
तच्छीघ्रं विविधञ्च भोज्यनिवहं पात्रेषु संयोज्य ता
यातुं भर्तृनिषेधिता अपि बलान्मत्ता रतौ प्रस्तुता: ।। ६९।।

श्रीकृष्णो हि सुसज्जितश्च भगवांस्तिष्ठन् समृद्ध्या तदा
पश्यन्नेव विराजतेऽत्र दिशि वै चायाति नो कोऽपि वा? ।
श्रीमद्भागवतेऽतिसुन्दरतया श्रीव्यासदेवेन त—
च्छीकृष्णस्य च गोपवेषमधुरं चित्रं सजीवं ततम् ।। ७०।।

वेषस्तस्य हि लक्ष्यतां भगवतो देहो नवीनाम्बुद—
श्यामाभो वनमालशोभितगल: पीताम्बरावेष्टित: ।
बर्हापीडमनोहराद्भुतशिरा मृद्धातुभी रञ्जितो
नानाकोमलपल्लवश्रवणको मन्दस्मितास्यस्तथा ।। ७१।।

हस्ताब्जो नटवेषसुन्दरवरो मित्रांसवामस्थिति:
श्यामा गोलकपोलयोरुपरि ते क्रीडन्ति केशा गुडा: ।
वेषं सुन्दरमस्य तं सहृदयो दृष्ट्वा हि क: स्वे वशे,?
रत्न: कोमलकण्ठतोऽतिमधुरं पद्यं पपाठाऽद्भुतम् ।। ७२।।

९. श्याम: पीताम्बरधरसुन्दरवनमाली नटवेष:
नानाधातुविचित्रितदेह: कर्णोत्पलमुखहास: ।
कपोललम्बितकुञ्चितकेश: सुहृदंसस्थितहस्त:
क्रीडाब्जञ्च करेण धुनान: पश्यन्नग्रे तिष्ठति ।।

तत्पद्यश्रवणान्तरेण तरसा प्रेम्णा यथोन्मादित—
स्तस्मादुच्छलित: स्थितो ननु यतो भूमौ गतो मूर्च्छया ।
ब्रूतेऽयं क्षणत: प्रभु: पुनरपि 'श्यामं हिरण्येति त—
त्पद्यं किं? किमहो? पठ श्रवसि मे' रत्नस्तथागीतवान् ।। ७३।।

(श्याम: पीताम्बरधरसुन्दरवनमाली नटवेष:
नानाधातुविचित्रितदेह: कर्णोत्पलमुखहास: ।
कपोललम्बितकुञ्चितकेश: सुहृदंसस्थितहस्त:
क्रीडाब्जञ्च करेण धुनान: पश्यन्नग्रे तिष्ठति)।।

आरोदीद्बहुविह्वलः प्रभुरयं पद्यद्वितीयश्रुते–
र्लोकः संघटितो निशम्य परितः श्रुत्वा प्रभोः क्रन्दनम् ।
सर्वे तस्य तथाहि विह्वलदशां दृष्ट्वाऽभवन् विस्मिताः
प्रेमावेगमिमं परत्र पुरुषे कोऽप्यत्र नो दृष्टवान् ।। ७४।।

पद्माकारविलोचनाश्रुनिवहः शीतोऽपतच्छ्रीप्रभोः
स्थाने श्रावणभाद्रवर्षणमिव प्रीतौ गिरः कातराः ।
'कुत्रासि प्रियकृष्ण! मां नहि कथञ्चालिङ्गसि स्वोरसा
लेभे या नटनागराद्भुतदृशिं विप्राङ्गना सा वरा' ।। ७५।।

प्रेमावेशगतः प्रभुर्दृढतया रत्नं तथाऽऽलिङ्गति
प्रीत्याऽऽलिङ्गनमात्रतोऽस्य सुभगो गर्भोऽपि मत्तोऽभवत् ।
पूर्वं केवलमेकमत्तदशाया चासन् जना विस्मिता
मत्तौ किन्त्वधुना तथाहि मिलितौ स्थाने तदैकत्र तौ ।। ७६।।

उच्चै रोदिति स क्षणेन हसति श्रीरत्नगर्भो बुधः
पादाब्जे पतितश्च याचति पुनस्तत्प्रेमभिक्षां प्रभोः ।
पद्यं तत्पुनरेव गायति तथा क्रन्दन्नसौ पण्डितः
श्रुत्वा तन्ननु वेदनाऽधिकतया संवर्धते श्रीप्रभोः ।। ७७।।

प्रेमाक्तो भुवि मूर्च्छया पतति स श्लोकश्रवोमात्रतो
रत्नो मत्तदशस्तु गायति पुनर्मध्ये तथा क्रन्दति ।
पद्योच्चारणतो गदाधरसुधी रत्नं यथा वै तथा
चक्रे शान्तमतो मनाक् प्रभुरयं बाह्यप्रबोधं गतः ।। ७८।।

सर्वे शान्तिमितास्तथाहि मिलिता गङ्गाभिषेकं गताः
प्रेमस्रोतसि मज्जिता निजगृहं यातास्ततो भावुकाः ।
तत्सर्वप्रथमं कृपांशुपतनं श्रीरत्नगर्भे प्रभो–
र्मन्तव्यस्तदसौ तथा प्रथमतोऽनन्तानुकम्पाधरः ।। ७९।।

भक्तभावः

१०. विश्वे कीर्तनमेव प्रचलति, संकीर्तनन्तु चेयम् ।
कर्मप्रवृत्तिर्वाणीप्रसादो निश्चयकर्त्री बुद्धिः
केवलमानवदेहे सुलभं, यतो नरस्यामरता ।
लघुता तृणतः क्षमता द्रुमतो यस्याऽप्यधिकमिहास्ते
सोऽयममानी सर्वमानदः प्रभवति निश्छलचेताः ।।

शान्तो दास्यमतश्च सख्यमिति तद्वात्सल्यमत्रान्तिमं
माधुर्यं सुहृदां सतां प्रियतमोपास्तौ हि भावाः स्मृताः ।
एतेषु प्रथितं हि पञ्चसु तथा प्राणायितं दास्यकं
नैवोत्पन्नमुत स्थिरं ननु भवेत्सख्यादिकं तद्विना ।। ८० ।।

भावः कोऽपि भवेत्परन्तु तदिहाऽव्यक्तं हि दास्यं स्थितं
दासो नो यदि स प्रभुः कथमहो नो प्रेम दास्यं विना ।
येनाकारि न वन्दना नहि पुनश्चोपासना कस्यचि–
न्नेहामुत्र स वन्दनीयपदवीञ्चोपास्यसत्तां व्रजेत् ।। ८१ ।।

'क्रीतोऽहं ननु तेन चार्जुन! सखे!' तस्मादमुष्याखिल–
ब्रह्माण्डानुपमेयनायकहरिर्वाक्यस्य वक्ता स्वयम् ।
स्वामी सर्वचराचरस्य जगतः स्वामित्वबोधार्थकं
भक्तब्राह्मणपादरेणुमनुगः कर्तुं स्वशीर्षे सदा ।। ८२ ।।

भक्तैर्भागवते च लोकनिवहे वृत्तिर्विधेया कथं?
दैन्यं किं? ननु नम्रता च कियती? स्यात्तस्य लोकं प्रति ।
तच्छिार्थमसौ प्रभुः स्वयमहो कृत्वा तथा साम्प्रतं
भावावेशसमागतो वितनुते भक्तस्वभावं स्फुटम् ।। ८३

सोऽयं भक्तशिरोमणिर्ननु यतो भावामलादर्शको
मर्यादानियमाय तस्य निखिला जाता हि लोके क्रिया ।
वैशिष्ट्यं प्रभुजीवनस्य विमलञ्चास्तीदमेवोज्ज्वलं,
मर्यादावनमेव जीवनमिदं लोकोत्तराणां सताम् ।। ८४ ।।

अन्तोऽध्यापानकर्मणश्च, विगतं बाह्यञ्च शास्त्रं तथा
चाञ्चल्यं नहि पूर्ववन्न विदुषः शास्त्रार्थवादोन्मदः ।
उन्मादः पर एव सम्प्रति बुधे जातोऽधिरूढो यतः
सर्वं जागतिकं न केवलमिदं रूपञ्च स्वं विस्मृतम् ।। ८५ ।।

भावोऽलौकिकतामयोऽस्य वचनं गूढं, चरित्रं रहः
स्वार्थासक्तजनैरयं कथमहो! ज्ञातुं तथा शक्यते ।
प्रातर्गाङ्गतटे गतः प्रतिदिनं स्नातुं पथि ब्राह्मणान्
वृद्धान् विष्णुजनांस्तथा शुभवचो लब्धुं नमत्यास्थया ।। ८६ ।।

गङ्गातीरगतः करोति शिरसि श्रीवैष्णवानां रजो
भावावेशगतः प्रदक्षिणतया तान् वन्दते कर्हिचित् ।
आशीर्वादममुष्य ते ददति वै नानाविधं साधवः
'प्राप्ता भागवती रतिर्भवतु ते कुर्यात्तथा श्रीहरिः' ।। ८७ ।।

ऊचेऽन्यश्च 'भवान् प्रियो भगवतः प्रेमी तथास्तु ध्रुवं,
श्रीकृष्णस्तव पूरयेन्ननु मनः कामं' परो भाषते ।
तत्पादे पतितश्च रोदिति तथा श्रुत्वा च सर्वाशिषो,
ब्रूते 'केवलमाशिषाञ्च भवतां साहाय्यमत्रास्ति मे ॥ ८८॥

लोके भागवताः सुकोमलहृदः कारुण्यपूर्णाः सदा
दृष्ट्वा लोकसमाजपीडनमहो! तिष्ठन्ति ते दुःखिनः ।
याच्ञा मे भवतां, हृदोऽतितपनं कुर्वन्तु दूरं तथा
श्रीकृष्णेन हि योजयन्तु सफला स्याद्येन संकल्पना' ॥ ८९॥

सेवां यत्किमपीह गाङ्गपुलिने तद्वैष्णवानां सतां
स्वेच्छातः कुरुतेऽस्य यद्बहु सुखस्वादानुभूतिः सतः ।
तेषां चन्दनघर्षणं जलघटं नीत्वा गृहप्रापणं
धात्रीतैलविमर्दनं शिरसि वै धौताम्बरक्षालनम् ॥ ९०॥

वृद्धा वैष्णवसाधवो ददति तन्नानोपदेशं यथा
'श्रीकृष्णस्य सुकीर्तनं प्रतिपलं सारः सतां केवलम् ।
तच्चेतोहरनामसंस्मरणतः कालावधेर्यापनं
श्रीमत्कृष्णकथैकमात्रधरणं श्रव्यं न भिन्नं ततः ॥ ९१॥

भूयात्कृष्णमयञ्च जीवनमिदं सम्पूर्णतस्ते ध्रुवं
कृष्णं ब्रूहि सदैव यानशयनाहारोपवेशक्षणे ।
आहारो नहि चेन्द्रियस्य ललितो नामातिरिक्तः परः
पानं तस्य च कुर्वतामपि सदाऽतृप्तिः सतां स्थास्यति' ॥ ९२॥

वृद्धानां नमनं करोति विनयी श्रुत्वोपदेशं सतां
शीर्षे पादरजो दधाति नयनस्थानेऽञ्जनाभं तथा ।
तद्भक्तिञ्च विलोक्य वैष्णववचो 'मत्तो निमायी तु नो
कृष्णप्रेमरतो यतोऽजनि सुतो धन्या हि माताऽत्र सा' ॥ ९३॥

अत्रैतस्य विचित्रभावमननान्माता शची दुःखिता
दीना याचयति 'प्रभो! हि विधवापुत्रं सनाथं कुरु ।
एकं केवलमाश्रयं मम सुतं कृत्वा कृपाभाजनं
वृद्धाया ननु सप्तषष्टिशरदो नाथाऽनुगृह्णातु हे! ॥ ९४।

स्वर्गस्थो हि पतिर्विहाय रुदतीं ज्येष्ठात्मजो वत्सलां
जाने नात्र गतश्च कुत्र? विधवाऽऽधारो निमायी परम् ।
साऽहं यष्टिसुतस्य योगबलतश्चास्यैव यातुं क्षमा
स्वास्थ्यं सुन्दरमस्य देहि, कुरु तद्रोगाद्विमुक्तं विभो!' ॥ ९५॥

सौम्या साऽकुटिला तथा जनभरे दुःखं निजान्तर्गतं
ब्रूतेऽन्यद्रुदती 'निमायिसुतके जाने न जातञ्च किम् ? ।
सोऽयं रोदिति कर्हिचिच्च हसति द्राङ् नृत्यति भ्रंशते
शीघ्रं धावति गायति क्षणमितो वृक्षं तथाऽऽरोहति' ।। ९६ ।।

श्रुत्वा तद्वनिता वदन्ति विविधं 'मातर्बहु त्वं मृदु—
प्रज्ञा, पृच्छसि किं ? स एव जनितः प्राचीनवाताऽऽमयः ।
केनाऽप्यस्य विशेषवैद्यविदुषा भाव्यं निदानं द्रुतं
रोगोऽयं बहुभीषणो भवति वै' ब्रूते तथाऽन्याङ्गना ।। ९७ ।।

'बद्ध्वा तच्च निमायिनो हि चरणौ कक्षे पिधेह्यावृते
श्यामश्रीफलवारि पायय सदा रोगः शमं यास्यति' ।
ब्रूतेऽन्या 'कुरु मर्दनं शिरसि वै नित्यं शिवातैलतः
स्वास्थ्यं भावि, तथैकमात्रशरणं कर्ता शुभं नो हरिः' ।। ९८ ।।

सर्वासां वचनं शृणोति जननी म्लाना च मूका परं
बद्ध्वा स्थापनमद्वितीयतनयप्राज्ञस्य गेहे कथम् ? ।
एकं दुःखमितः सुतेन च परं विष्णुप्रियाचिन्तना,—
त्पुत्राऽऽलम्बनजीवना हि विधवा हृष्टा वधूसंततेः ।। ९९ ।।

दृष्ट्वा स्वामिदशाञ्च तिष्ठति सदा विष्णुप्रिया चिन्तिता
नान्नं वारि कदापि किञ्चिदपि तत्तस्यै तथा रोचते ।
म्लाना चिन्तनमुद्रया भवति सा प्राणप्रियप्रीतये
पत्युर्भोजनशेषतोऽत्ति तु शचीमानार्थमत्यल्पकम् ।। १०० ।।

दुःखं तेन शचीहृदि द्विगुणितं, शक्नोति सोढुं कथं
वृद्धा, सा नु सहिष्णुतावनलता सामान्यनारी नहि ।
सा नीलाम्बरपुत्रिकाऽजनि जगन्नाथप्रिया गेहिनी
पूर्वं, सम्प्रति विश्वरूपजननी विश्वम्भरद्वीपभूः ।। १०१ ।।

द्वीपे सर्वमुखेऽखिले प्रभुनवावस्थाकथा विद्यते
नानोक्तिर्मुखभेदतो हृदि यथा ब्रूते जनो वै तथा ।।
'एवं मत्तदशा न दृष्टिपथगा पूर्वं' बहूनां वचो
'नूनं भावविचित्रताऽस्ति, किमिदं ? जाने न सत्यं परम् ।। १०२ ।।

चेष्टा मत्तजनोपमा परमियं बुद्धौ न निश्चीयते
दिव्यत्वञ्च मुखप्रभाऽधिकतया यान्तीव संलक्ष्यते ।
चित्तं दर्शनमात्रतोऽस्य मुदितं भावान्वितं जायते
जाने किं वदने च मोहनमदो नैवं प्रमत्तो जनः' ।। १०३ ।।

श्रीवासः परमः सखा प्रभुपितुर्वासाङ्गना मालती
देवी तज्जननीशचीप्रियसखी, जानन्ति तत्पाठकाः ।
पुत्रस्नेहयुतौ च तौ प्रभुबुधे तद्वासचिन्ताव्यथा—
'प्राज्ञोऽप्यस्ति निमायिपण्डितसमः श्रीभक्तिभावाऽरुचिः' ।। १०४।।

आसीच्चास्य मतिस्तथा 'यदि परं प्राज्ञो निमायी व्रजे—
द्द्वीपे वैष्णवतां, ततोहि भविता धर्मोऽयमत्रोन्नतः ।
दौर्गत्यं ह्यधुना यथा न च तथा भाव्यत्र विश्वे सतां',
विद्याभावविशिष्टशिष्टमिलनात्सर्वो हरिः प्रीयते ।। १०५।।

श्रुत्वा लोकमुखात्प्रभोर्विषयिणीं वार्ताञ्च नानाविधां
श्रीवासस्य कुतूहलं मनसि तज्ज्ञातुं परञ्चोद्गतम् ।
मध्ये हर्षविषादयोः स पतितस्तर्कैस्तथाऽऽन्दोलितः
'प्रायस्तस्य स रोग एव जनितः, स्वास्थ्यं नृणां भङ्गुरम् ।। १०६।।

ज्ञातं यज्जनतोऽस्य लक्षणमतो मान्यः स भक्तः परं
भावेऽज्ञातसुखे ममापि हृदयं सम्मोदतेऽव्यक्ततः ।
आस्तां यत्किमपीति तत्र गमनाज्ज्ञेया निमायिस्थितिः'
श्रीवासस्तदिदं विचार्य मनसा गेहात्स्वतो निर्गतः ।। १०७।।

गेहे श्रीतुलसीप्रदक्षिणविधौ मग्नस्तदानीं प्रभुः
श्रीवासं पितृतुल्यपूज्यचरणं दृष्ट्वा दधाव द्रुतम् ।
प्रीत्याऽसौ गलवेष्टितः प्रभुतनुस्पर्शे स वासोऽकृत
स्पर्शादेव च वासपण्डिततनौ विद्युत्प्रवाहोऽसरत् ।। १०८।।

रोमाञ्चो जनितोऽखिलेऽस्य विदुषो देहे, बुधो विस्मितो
मुग्धात्मा चकितो मनोहरमुखं पश्यन् प्रभोः संस्थितः ।
नीत्वाऽन्तः प्रभुरत्र सादरममुं गेहे समावेशय—
त्क्रोडे रौति शिरो निधाय करुणं, मेघो नगान्मेहति ।। १०९।।

माता चापि शची विलोक्य सुहृदं श्रीवासमत्रागता
पुत्रव्याधिदशां विलप्य बहुधाऽवोचत्प्रभौ तु स्थिते ।
स्नेहस्तम्भितकण्ठशब्दजननी वक्तुं न शक्तोचितं
तं सोवाच यथा तथा पुनरपि, ज्ञातौ वचश्चेष्टते ।। ११०।।

भावावेशगतो निशम्य निखिलं वासः शचीमुक्तवान्
'ब्रूते योऽत्र हि वायुरोगमधुना तत्पीडितः स स्वयम् ।
रोगस्यास्य कृते शिवादियतयस्तिष्ठन्ति वै सस्पृहा
देवि! त्वं वरभागिनी सुजननी नम्या निमायिप्रसूः ।। १११।।

सर्वञ्चाखिलभक्तिलक्षणमिदं भक्तो निमायी सुत:'
श्रुत्वा प्राज्ञवचस्तथाऽद्य जननी संतोषमाप्ता मनाक् ।
ऊचे वासबुधं प्रभुश्च विकल'स्ते दर्शनान्मेऽधुना
शान्ति: सा परमा, यथेदमवदन् सर्वे हि वाताऽऽमयम् ।। ११२ ।।

रोगो वायुकृतोऽस्ति मेऽपि च मतौ, तन्मातृविष्णुप्रिया—
वैकल्यं मम कारणादिति हृद: स्फोटो यथाऽऽसीच्च मे ।
लोका मे विषये वदन्ति विविधञ्चागत्य नाश्वासन—
स्रष्टा त्वं यदि, नूनमेव वपुषो गङ्गाप्रवाहे गति:' ।। ११३ ।।

ऊचे वासबुधो 'मदीयहृदयं ब्रूते पुनर्भूयसा
ह्युद्धारो भविता तथाऽस्य जगतो युष्मन्निमाय्यध्वना ।
भक्तानां शरणं भवांश्च भविताऽऽराध्यस्तथा केवलं
यत्ते मादकताऽद्वितीयकलिता लोकोत्तरा विद्यते ।। ११४ ।।

भूमौ श्रीहरिरेव पूर्णपुरुषो भूत्वाऽवतीर्णस्ततोऽ—
विद्याया: शरिता भवेच्च भगवन्नामप्रचारक्रिय: ।
जाने तच्छुभकार्यमत्र वपुषाऽनेनैव कुर्यात्प्रभु,—
र्भव्येष्वत्र भवन्ति दिव्यमधुरास्ते पक्षपाता विभो:' ।। ११५ ।।

ऊचेऽधीरतया प्रभु: 'सुतसमस्तेऽहं ततो दीयता—
माशीर्यन्मम चास्तु वैष्णवसतां पादानुरक्ति: सदा ।
नो रोचेत हि कृष्णकीर्तनरते: कार्यं परं कर्हिचिद्
रुद्यामेव सदाऽऽतुर: प्रभुरतौ वाञ्छा तथा हार्दिकी' ।। ११६ ।।

'एवं मत्तदशाऽथवाऽल्पमधिकं स्यान्मेऽपि लब्धा तथा
त्वञ्चैवाशिषमद्य यच्छ रतितो नृत्यानि मत्तोपम:' ।
वासे वाञ्छति तन्महापुरुषयोर्वार्ता विशुद्धात्मना
दीर्घं सा चलति स्म, तत्प्रभुमतिं नीत्वा गत: पण्डित: ।। ११७ ।।

अद्वैताचार्यस्तथा तत्सन्देह:

११. वैष्णव! बोधय विष्णुप्रीतिम् ।
गोविन्दार्चनवन्दनचिन्तनमन्त्रोत्तमदिनचर्या
कायिकवाचिकमानसशुद्धिं तनुते साधुजनानाम् ।
हरिरिह वसति चराचरविश्वे गूढं करुणाऽऽलोक:
भागवते तु प्रकटं तिष्ठति तज्जननिष्ठां साधय ।।

संसारेऽत्र विराजते तु भगवांस्तत्प्राणिमात्रात्मनि
व्याप्तश्चाणुभरे तथा समतया, तस्योपलब्धिः परम् ।
भिन्नाकारतया तु पात्रधरणीभेदात्तथा जायते,
चैतन्ये सति सर्ववस्तुजगतां सांसारिकी संस्थितिः ॥ ११८॥

चन्द्रांशुः समरूपतोऽत्र पतति स्थाने जले वा स्थले
लोष्ठे तामसवस्तुनि स्फुटमयं लक्ष्यप्रभावस्तु नो ।
स्वच्छे निर्मलचन्द्रकान्तपटले प्राप्तोऽल्पमात्रोऽपि तद्—
वैचित्र्यं कुरुते, तथाऽस्य हृदयश्चांशुद्रुतं स्यन्दते ॥ ११९॥

स्पर्शस्यन्दनकारणाद्धिमकरस्नेहोऽधिकं तं प्रति
स्पष्टं वै भुवि चन्द्रकान्तमणितस्तन्नाम चन्द्रोज्जवलम् ॥
सम्बन्धो ननु शाश्वतः समभवच्चद्रेण वै तन्मणे,—
र्भिन्नोऽयं नहि चन्द्रतो, गुणसमावेशस्तथेन्दोर्मणौ ॥ १२०॥

भक्तानां हृदये तथा प्रभुकृपाभास्पर्शमात्रेण वै
तत्कालं द्रवतीदमत्र मणितो भिन्नास्ति भक्तस्थितिः ।
स्पृष्टोऽप्यत्र मणिस्तु चन्द्रकिरणैस्तिष्ठेदयं दीर्घत,—
श्चैक्यं भक्तहृदः प्रभोस्तु कृपया प्रेमाम्बुधौ जायते ॥ १२१॥

१२. तुलसी वृन्दाप्रियतमभक्तिप्रीतिलतापरिणामः ।
श्यामलसुन्दरभगवन्मूर्तिर्भक्तजनान्तस्तिष्ठति
श्यामलदललघुकुसुममनोहरहरिप्रियाऽखिलसुलभा ।
तुलसी-तुलसी प्रतिजनवदने तुलसी काननघासः
रामकृपाकणवर्षणपलतः ख्यातस्तुलसीदासः ।
तुलसी भणति तथाविश्वस्तः प्रभो! मनो मे मनुते
दासो मान्यः प्रभुतोऽप्यधिकं, सेवाधर्मोऽगम्यः ॥

भक्तानां महिमैव चास्ति हि तथा लोकोत्तरो दुर्लभो
योऽत्रानुग्रहपात्रमस्ति, महिमा तेनैव संबुध्यते ।
यच्चित्ते रसराजमादककृपापीयूषबिन्दुर्नहि
प्राप्तः, सोऽत्र कथं भवेद्रसिकतामर्मप्रमाता जनः ॥ १२२॥

१३. रसिको रसजन्तू रसमाता रसभावाम्बुधिलेता ।
रसनेन्द्रियवशरसभवमीनो बन्धनमृच्छति निधनम्
काव्यवासनावासितचेता भावव्यक्तिरसयिता ।
'रस एवायमिति' श्रुतिसूक्तिर्भावुकहृदयानन्दः
निर्गुणचिन्तनसगुणोपासनभवरससागरविलयः ।

रसिकशिरोमणिभगवद्रसिकप्रीतिभवस्थितिमानम्
रसिकजनानां प्रियतमलपनं रसिकेतरो न चेतति ।।

द्वीपे चात्र नवानुरागविषये नानाविधं श्रीप्रभो–
श्चर्चा सम्प्रति विद्यते हि निखिले स्थाने जनानां मुखे ।
अद्वैतस्य गृहञ्च वैष्णवसतां व्यायामशाला मते–
रभ्यासं कुरुतेऽत्र भक्तिसमितः सर्वो हि मल्लोपमः ।। १२३ ।।

तत्र श्रीप्रभुलाभमात्रविषयव्याख्यासमीक्षा, कदा–
चारारिः प्रबलो जितोऽत्र भविता केनेति वार्ता सदा ।
दृष्ट्वा वैष्णवधर्मदुर्गतिबलाभावं हताशास्तु ते,
तत्रापि प्रभुनूतनस्थितिमितौ वादो-विवादोऽधुना ।। १२४ ।।

'आवेशो ह्यधुना निमायिविदुषो भक्तेः परं निश्चितं
प्रेमा तद्धृदि काशतेऽखिलतया चेष्टा तथाऽलौकिकी ।
उन्मादी स यथा विभाति परमः प्रेमैव तत्कारणं
तेजोऽप्यस्य मुखे तथैव लसति' श्रीसाधुपक्षस्तथा ।। १२५ ।।

केऽप्यन्ये विमतास्त्वितो 'न युगपच्चैवं तथा युज्यते
सर्वज्ञातनिमायिपण्डितदशा दृष्टा यथाऽद्यावधिम् ।
द्वीपे वैष्णवसाधुभक्तहसनं यस्यैकमात्रक्रिया
तत्रैवं परिवर्तनञ्च सहसा संभावनीयं कथम् ? ।। १२६ ।।

तस्य प्राक्तनवायुरोगफलनं जातं पुनर्निश्चितं
मत्तानामिव चैव तस्य नियतं सर्वा तु चेष्टा ततः' ।
एवं पक्षविपक्षयोस्तु वचनं श्रुत्वाऽत्र संबोधयन्
तानाचार्यगुरुर्जगाद शनकैर्गम्भीरतापूर्वकम् ।। १२७ ।।

'यूयं यस्य तथानिमायिविदुषो वार्तामिह भ्रातरः!
कुर्वन्तः स्थ, ममापि तस्य विषये स्वैकानुभूतिस्तथा ।
नित्यं श्रीतुलसीदलत्रिपथगानीरार्पणापूजने
श्रीकृष्णस्य करोमि (सर्वविदितं), प्राकट्यमस्यास्तु तत् ।। १२८ ।।

१४. हृदयं व्याकुलमत्र भ्राम्यति हरिदर्शनलालसया ।
केवलजननीप्रथमाऽभिज्ञाः खगगोमानवशिशवः
धनसंग्रहणं प्रियतारमणं संसृतिजन्तुप्रकृतिः ।
धर्माचरणं सात्त्विकभावो मुक्तश्चात्मा नित्यम्
प्रेष्ठाकर्षणभावितचेताः सुकृती कोऽपि सचेताः ।।

दत्ते श्रीतुलसीदलेन चुलुकाधाराम्बुना वा हरि:
प्रीतो भक्तजनाय वत्सलतनु: क्रीतो यथा स्वाखिलम् ।
विश्वास: प्रबलोऽस्ति मे मनसि तद्वाक्ये सदा गौतमी—
तन्त्रोक्तेऽत्र, मया पुनश्च भवतां दत्तं तथाऽऽश्वासनम् ।। १२९।

न ज्ञातं हि यथार्थतो गतदिने गीतैकपद्यं मया,
तच्चिन्ताऽकृतभोजनो हि विमना रात्रौ ततश्चास्वपम् ।
स्वप्ने चैकसुगौरवर्णपुरुषो व्यक्तस्तथोवाच मां
(शृण्वद्वैत! वदामि ते स्फुटमहं तत्पद्यतात्पर्यकम् ।। १३०।।

वाञ्छा ते सफलाऽधुना, तुलसिकापत्रेण गङ्गाम्बुना
यस्माच्चाकृषि पूजनं मम सदा पूर्णं हि तत्साम्प्रतम् ।
भक्ताऽऽश्वासनमत्र तेऽधिकमतो देयञ्च नापेक्षितं
कर्ता शीघ्रमहं यत: प्रकटित: श्रीनामसंकीर्तनम् ।। १३१।।

यत्संकीर्तननादतोऽखिलदिश: पूता भवेयुर्ध्रुवं)
तच्चोक्त्वा पुरुषेण तत्प्रकटितं रूपं स्वकीयं स्फुटम् ।
श्रीविश्वम्भर एव नेतरनर: सोऽयं शचीनन्दन:
संवादेन ममाग्रतोऽत्र शुशुभे स्वप्नोऽद्य सत्यार्थक: ।। १३२।।

आसीत्पाठगृहे यदा मम गुरोश्चैतस्य विश्वोऽग्रज—
स्तं वक्तुं जननीगिराऽत्र कतिधा प्राप्तस्तदाऽयं शिशु: ।
आकृष्टं मम मानसं शिशुममुं दृष्ट्वैव जातं हठात्
तज्ज्ञातञ्च तदैव मे ननु मन:संपूरकोऽयं भवेत् ।। १३३।।

स्वप्ने चाद्य विलोक्य तञ्च तदिदं स्पष्टं', तथा शंसतो
वृद्धाद्वैतगुरोर्गल: समभवद्रुद्धश्च शुद्धात्मन: ।
वात्सल्यं निजभक्तवत्सलविभो: संस्मृत्य चास्वाद्य तद्—
वृद्धं बालसमं रुदन्तमभितो दृष्ट्वाऽत्र सर्वेऽरुदन् ।। १३४।।

प्रेम्णा पूरितमत्र सर्वहृदयं संचिन्त्य सर्वे तथा
भाव्युत्कर्षमतोऽत्र वैष्णवसतां मग्नाश्च मोदाम्बुधौ ।
एवं ते मधुवार्तया निजगृहं याता गुरोर्वैष्णवा:,
साधूनां ननु साधना फलवती काले तथा सङ्गति: ।। १३५।।

सम्प्रत्यत्र तथाधिकं प्रभुदशा जाता विचित्रा क्रमा—
त्तस्मै केवलकृष्णवैष्णवकथासङ्गोऽधुना रोचते ।
सोऽयं भक्तगदाधरादिसहित: कुर्वन् सदा लक्ष्यते
चर्चां भागवतीञ्च केवलमिह, प्रेम्ण: प्रभु: सागर: ।। १३६।।

'अद्वैत: परमो हि भागवतना प्राज्ञो महावैष्णवो
भक्तानां शरणं गदाधर! नवद्वीपस्य सत्सङ्गिनाम् ।
गच्छामोऽद्य गुरुं, पदाब्जरजसा कर्तुं च पूतं स्वकं'
ब्रूते स प्रभुरेकदा स्वसुहृदं प्रीत्या गदापण्डितम् ।। १३७ ।।

इच्छां ताञ्च गदाधर: प्रभुसतो ज्ञात्वा समं तेन स
प्राज्ञाद्वैतगृहं ययौ च, सुहृदो: सङ्गो वर: सङ्गम: ।
सोऽयं सप्ततिवर्षवृद्धसुमतिर्गेहे तदानीं बहु
श्रद्धाभक्तिसमन्वितश्च तुलसीपूजाक्रियायामभूत् ।। १३८ ।।

श्वेता: सन्ति च मूध्रजा मुखविभाऽपूर्वा च तेजोमयी
गम्भीरस्वरतो विदन्तमुखत: सुस्तोत्रपाठे रत: ।
श्रीश्लोका वदनात्सरन्ति मधुरा नेत्राश्रुधारा: समं
दृष्टो वृद्धबुधो विशुद्धभगवन्निष्ठावतारो नव: ।। १३९ ।।

तद्भावञ्च विलोक्य गद्गदमना विस्मृत्य देहस्थितिं
भावावेशगत: पपात धरणीपृष्ठे प्रभुर्मूर्च्छित: ।
अद्वैतो निजमिष्टदेवमवनीप्राप्तं यदा मूर्च्छयाऽ—
पश्यत्स्वस्य पुरस्तदास्य मनसो मोदस्य पारो नहि ।। १४० ।।

पूजापात्रमत: पुर:स्थितमसौ धृत्वा प्रसूनाक्षतै—
र्नैवेद्यै: प्रभुकोमलाब्जपदयोश्चक्रेऽर्चनं श्रद्धया ।
तं तावद्बुधवृद्धमानववरं तद्बालपादार्चनं
कुर्वन्तञ्च गदाधरो हि चकितो दृष्ट्वा जगाद द्रुतम् ।। १४१ ।।

'आचार्य! त्वमनर्थकञ्च किमिदं कर्ताऽसि तावद्बुधो
वृद्धश्चैकशिशो: पदार्चनमहो! कृत्वाऽस्य दत्से त्वघम्' ।
'ज्ञाता भाविमहं गदाधर! शिशोरस्य प्रभावं द्रुतं'
श्रुत्वाऽद्वैतगुरुर्गदाधरवच: स्मित्वा ददौ चोत्तरम् ।। १४२ ।।

'आश्चर्यञ्च करोषि मेऽर्चनविधिं दृष्ट्वेममत्राऽधुना
काले ते स्वत एव तत्र भविता दूरं भ्रमोऽयं ध्रुवम् ।
सर्वे वैष्णवसाधवोऽस्य चरणौ सम्पूज्य धन्यं स्वकं
मन्तार: कृतकृत्य'मस्य वपुष: साधोर्हि तोष: सत: ।। १४३ ।।

बाह्यज्ञानमसौ गतोऽल्पमधुना तद्वादमध्ये प्रभु—
र्धृत्वाऽऽचार्यपदे रुदन्नकथयन्नष्टे हि मूर्च्छाक्षणे ।
'व्यर्थं मे समयो बहु व्यपगतो जल्पैकमात्रोत्सवो
देहि त्वं शरणं स्वकीयपदयोर्मामुद्धराद्य प्रभो! ।। १४४ ।।

प्रेम्णस्तत्त्वमतस्तु बोधय सतः स्वल्पाधिकं मेऽधुना
प्राप्तस्त्वच्छरणं हि रक्षतु भवान्', राध्नोति दीर्घो लघुम् ।
आचार्यश्चकितो निशम्य तदिदं वाक्यं सदैन्यं प्रभो-
स्तत्प्रोवाच 'न मे पुरो बहु पुनर्व्यक्तं पिधेहि स्वकम् ।। १४५।।

एतावन्ति दिनानि चाभवदहो! लीनस्तथैवाऽधुना
स्थातुं वाञ्छति वै कियन्तमवधिं, ते तु प्रकाशक्षणः' ।
दैन्येनोक्तमथ 'त्वमेव पितरौ चास्ते गुरुः साम्प्रतं
कृष्णप्रेम तवाशिषैव सुलभं स्यान्मे सतां सेवनम्' ।। १४६।।

परस्परं दैन्ययुता द्वयोस्तथाऽ-
भवच्च वार्ता बहुकालमार्तयोः ।
गदाधरेण स्वगृहं ययौ प्रभु,-
र्न केवलोऽयं रमते कदाचित् ।। १४७।।

'सोऽयं वाञ्छति वञ्चनं मम, यदि स्वप्नो हि सत्यं भवेद्
दृष्टो यो निशि मे स एव नियतं, संकीर्तनस्य क्षणे ।
आरब्धे स्वत एव मां स्वनिकटे कर्ता, नवद्वीपतो
गन्ता शान्तिपुरं ततोऽहमधुना'ऽद्वैतेन तन्निश्चितम् ।। १४८।।

श्रीवासावासे संकीर्तनारम्भः

१५. वासो वसनं भुवनं हृदयं बहिरन्तर्मुखभवनम् ।
अन्नजलाम्बरगृहप्रकारे भुवनाभोगे सततम्
नानानिम्नोन्नतपरिवर्ते देहासक्ती रमते ।
प्रियतमवासो हृदयसरोजं प्रेमी-भ्रमरो धावति
श्रीवासाङ्गणहरिसंकीर्तनभूगगनाम्बुधिमिलनम् ।
चण्डीमण्डपखगरथयात्रावृन्दापतिविरहार्त-
श्रीगौरामृतकीर्तनसुमनोलोलुपमनःप्रवासः ।।

एकाज्ञातवशङ्कताखिलजगत्सर्वात्मना वर्तते
शीतोष्णौ सुखदुःखदौ भुवि जलं शीतं तथोष्णोऽनलः ।
सर्वेषामनुभूतिरिन्द्रियगता तावद्भवेत्किन्तु सा
जन्तूनां स्थितिभेदतोऽत्र नियतं न्यूनाऽधिकाऽप्यश्नुते ।। १४९।।

आनन्दाज्जनिरस्य सर्वजगतः पुत्रैः पिता मृग्यते
तत्रैवास्मि भवानि, वाञ्छितमिदं सर्वस्य नैसर्गिकम् ।

तेषां तद्भवितव्यमेव, गुणतः कार्येऽभिदा कारणे
तज्जातञ्च यतोऽस्य येन भवनं तत्रैव तल्लीयते ।। १५० ।।

बिन्दुर्नीरधितः कथं विरहितो, व्याख्याऽत्र नानात्मिका
स्थानेऽनेकविधे तु स भ्रमतु तद्यात्राऽन्तिमाऽब्धौ परम् ।
अस्यान्या गतिरेव नास्ति जलधेर्वाष्पात्मनश्चाम्बुद–
स्तद्वर्षधरणीतडागसरितां योगेन भूयोऽम्बुधिः ।। १५१ ।।

बिन्दोः क्षुद्रतडागसङ्गजनिता दौर्गन्ध्यवद्दुःस्थितिः
स्याज्जाता च कदापि, दोषगुणयोर्योगो यतः संसृतिः ।
चातुर्मास्यमहाजलप्लवभरे तस्मात्तु शुद्धिं गतो
वेगेनातिशयेन यास्यति निजां निर्दिष्टसंस्थां हि सः ।। १५२ ।।

जीवानां मननात्मनामिह मनश्चैकं यथैव ध्रुवं
सर्वत्रैकसमानमस्य च गतिः कुर्यात्तु सञ्चालनम् ।
कुर्वन्त्यत्र कयापि निश्चितदिशा देहे मनोवृत्तयो,
जीवस्य प्रियसङ्गयोगकरणं मुख्यं हि लक्ष्यं परम् ।। १५३ ।।

शान्तिर्नास्ति कुतोऽपि तत्प्रियतमासक्तिं विना प्राणिनो
गत्वा तत्र पुनश्च तस्य शरणस्थानं प्रिये वा लयः ।
भावे निर्भरमस्ति तन्निजनिजे किञ्चिन्न चाप्यस्तु किं,
गन्तव्योऽस्ति हि सन्निधिर्ननु ततो योगो विधेयस्तु वै ।। १५४ ।।

योगो यच्छति शान्तिमस्य परमां, शान्तिः सतः संस्थिति–
र्योगश्चित्तनिरोध एव रहसि स्थाने तथोपद्रवम् ।
भूयस्तत्कुरुते, निरोधसरलोपायोऽस्य, संस्कारिणां
भक्तानां शुभकर्मिणां प्रभुहृदां किंस्वित्प्रपत्ती रतिः ।। १५५ ।।

तेषां साधनया तथैव कृपया प्राप्तो निरोधः पुनः
स्वल्पो वा सकलोऽस्ति तत्सुमनसा कार्यं मनोयोजनम् ।
शीघ्रं वस्तु सजातिकं स्वसदृशीं जातिं प्रति स्तीर्यते
सत्सङ्गस्य च कीर्तनस्य महिमा गीतस्तथैतावता ।। १५६ ।।
एकोद्देश्यगताश्च चित्तमनसी सम्यक् समाधाय यत्
किञ्चिच्चापि हि साधनं विदधते चेदत्र लोका भुवि ।
तद्वैयक्तिकसाधनातिशयितस्तस्य प्रभावोऽधिको
घोरे चाद्य विशेषतोऽत्र समये ''संघे हि शक्तिः कलौ'' ।। १५७ ।।

खाद्यं भावगतेन पर्वतशिरो वैचारिकेणाखिलं
दोषेणाद्य विदूषितं जलनभोवातक्ष्मामण्डलम् ।

प्रोक्तं श्रीहरिकीर्तनस्थितिरतिः सङ्गे सतां साधनं
सर्वश्रेष्ठमिदञ्च केशवयशोगानं कलौ तत्तपः ॥ १५८॥

सर्वं तच्च विचिन्त्य कीर्तनरसस्त्रोतोगृहारम्भणं
श्रीसंकीर्तननायकोऽकृत कृती चैतन्यदेवः स्वयम् ।
विस्मृत्याखिलमत्र गच्छति वनं यस्यां दशायां पर—
स्तत्रायं जनसंग्रहाय मिलते वैशिष्ट्यमस्यैव तत् ॥ १५९॥

प्रेमोन्माददशा तथा रसिकता नान्यत्र वै संश्रुता
कृष्णप्रेमरतिः सुकीर्तनयुतिः प्राप्ताऽत्र पर्यायताम् ।
सत्प्रेमाध्वनि लोकशिक्षणरतो भूमौ समुद्धारक—
श्चैतन्योऽपरतो निमायिरसिको गौरोऽस्ति विश्वम्भरः ॥ १६०॥

अल्पाल्पं त्वधुना महाप्रभुदशा गम्भीरतां गाहते
चैतन्येऽपि कदापि याति, कुरुते सम्भाषणं प्रेमिभिः ।
आयाताः प्रभुसन्निधौ कतिपये कालात्तथाऽऽशान्विता
भक्ताः कीर्तनमीप्सितं निजगतं कर्तुं ब्रुवन्ति प्रभुम् ॥ १६१॥

स्वीचक्रे च मुदा प्रभुः सुमनसां तेषां तथासम्मतिं,
श्रीवासस्य गृहे चचाल निखिलं संकीर्तनाऽऽयोजनम् ।
तत्रागत्य निशि प्रकृष्टभगवद्भक्ता गृहे पुञ्जिताः
सर्वादौ प्रभुणेरितं ह्यनुकृतं सर्वैश्च संकीर्तनम् ॥ १६२॥

कुर्वंस्तत्र सुकीर्तनं द्रुतगतिर्नृत्यं तथा ताण्डवं
भावावेशगतः प्रभुः समकृत स्वल्पं नदेहस्मृतिः ।
भावाध्मातमलातचक्रसदृशं भ्राम्यच्छरीरं तदा
नो पादौ भ्रमणञ्च नास्य जनतानेत्रप्रतीतौ सतः ॥ १६३॥

मूर्च्छोन्मादकरीव सौष्ठवभृतस्तस्यागता नृत्यतो
भूमौ तत्पतितः सुयत्नसहितं भक्तैः स चोत्थापितः ।
आरेभे गदितुं रुदन्नयमतः स्वल्पक्षणानन्तरं
'कुर्यां किं,? न मनस्त्वितो मम वशे, सर्वं मनश्चेष्टितम् ॥ १६४॥

वक्तुं यन्ननु कामये नहि तथा शक्नोम्यहं भ्रातर—
स्तच्चैकं कियतो दिनाच्च भवतो वक्तुं वचश्चिन्तये ।
शक्तः किन्तु तथा नहीममवधिं, वक्ष्ये परं वोऽधुना
तत्तावच्छृणु सावधानमनसा, स्थाने मनो भ्रंशते ॥ १६५॥

उक्तास्तेन तथा मनःस्थिरतया शान्ताश्च तस्थुस्तदा
पश्यन्तश्च समुत्सुकाः प्रभुमुखे भक्ता मुरारौ यथा ।

आरब्धं कथनं गभीरवचसा सत्साहसेनाऽधुना
'स्वात्मीया! ननु गोप्यमेव भवतां स्यात्किं विशुद्धात्मनाम्? ।। १६६ ।।
तद्ब्रूयां भवतां समक्षमधुना सर्वप्रकाश्यं न यद्
ग्रामे मेऽध्वनि तद्गयागमनके श्रीनाट्यशालाभिधे
एक: श्यामलवर्णसुन्दरशिशु: प्राप्तो हि मत्सन्निधौ
तत्कर्णप्रियनूपुरध्वनियुताऽऽरक्ताब्जपादद्वयम् ।। १६७ ।।

तत्पादाङ्गुलिमण्डलं लघुगुरुस्पष्टक्रमात्सुन्दरं
मध्ये गोलगभीरनाभिवलिमत्कुक्षिश्च पीताम्बरम् ।
वक्षो मांसलमुन्नतं वरगलश्च्छन्नास्थिक: सर्वथा
श्रीगुञ्जावनमालशोभितमुर: कर्णस्फुरत्कुण्डल: ।। १६८ ।।

श्रीमद्गोलकपोलयोरुपरि तच्छ्यामालका लम्बिता:
पद्माकारविलोचनद्वयदिशा तिर्यक् विपश्यंश्च माम् ।
मन्दं मन्दमयं स्मयन् स्वमुरलीस्वानञ्च विस्तारयन्,
श्रुत्वा तन्मधुरस्वनं मम मनो नासीत्स्ववश्यं तदा ।। १६९ ।।

संमोहञ्च गत:, पुन: स शिशुको यात: क्व जाने च नो
तच्चैवं वदतो विमूर्च्छिततनोर्नेत्राश्रुधाराऽसरत् ।
देहश्च स्फुटमुत्थरोमनिकरस्तत्स्थोऽपि हार्दं जगौ,
जाग्रत्स्वप्नसुषुप्तियोगदशया सद्वाक् सदा नौति तत् ।। १७० ।।

१६. करुणा, ममता मृदुता मुदिता चाहोस्विद् वत्सलता ।
ज्ञानाभावान्नश्वरवस्तुनि ममताऽहंताजनिता
तत्सम्बन्धिनि रागासक्त्या हृन्मुदिता चेतनता ।
पुण्यविषयगतयौगिकमुदिता चित्तप्रसादनयुक्ति:
भगवन्ममता-मृदुता-मुदिताऽतनुता तनुते प्रियताम् ।
जननीममता पितृवत्सलता सहृदयगुरुजनमृदुता
साधुजनानां सात्त्विकमनसां मुदिता चातिथितरुता ।
वत्सजीवभगवद्वत्सलता करुणोदधिरसमयता
माथुरदयिताराधाकरुणाऽखिलसंसृतिसुन्दरता ।
मातृविलोकनबालातुरता भक्तहृदयकातरता
सकलचराचरकरुणासिन्धो: शरणागतबान्धवता ।।

'हे श्रीकृष्ण! हरे! दिनानि जगतोऽधन्यानि चैतानि तत्—
साधोर्दर्शनमन्तरेण मम ते हा! हन्त! नेयानि किम् ? ।
आर्तानां करुणैकसिन्धुभगवन्!' तत्कृष्णकर्णामृत—
श्लोकं गद्गदकण्ठतोऽनिशमसौ भूय: पठन्मूर्च्छित: ।। १७१ ।।

भूयस्तत्पठनाच्च शून्यदशया ग्रस्तस्य भूयस्तथा
श्लोकोच्चारणजन्यमूर्च्छितदशा जाने न जाता कियत्? ।
श्लोकोच्चारणतो यथा ननु तथा भक्तैरयं वारितो
जातश्च प्रकृतौ तथाऽल्पसमया,त्प्रेमक्षणो ह्यस्थिरः ।। १७२ ।।

दशां प्रभोस्ताञ्च विलोक्य तत्र ते
रुदन्ति भक्ता निशयाऽनया तथा ।
सहैव संकीर्तनसाधुसङ्गतः,
स्वतन्त्रता वै समयस्वतन्त्रता ।। १७३ ।।

नित्यं तत्र हि वासपण्डितगृहेऽवर्षच्च संकीर्तना—
नन्दस्तन्निशि मुख्यभक्तनिवहे स्थानेऽत्र चैकत्रिते ।
गेहान्तः पिहिते कपाटयुगले चारभ्यते कीर्तनं
वाद्यन्ते करतालखोलमुरजा यत्र स्वरैर्वै लयैः ।। १७४ ।।

मध्येभक्तगणञ्च नृत्यति मधुव्यक्तिप्रभुः सुन्दरं
नृत्यन्ति प्रभुणा सहैव सुजना विस्मृत्य देहस्थितिम् ।
स्तम्भस्वेदविवर्णभावपुलकाः कम्पाश्रुभङ्गस्वरा
व्यज्यन्ते प्रलयोऽपि नृत्यरसिके भावाश्च ते सात्त्विकाः ।। १७५ ।।

तं भावोदयमद्भुतं प्रभुतनौ दृष्ट्वा विमुग्धाश्च ते
भावावेशगतास्तथोच्चरवतः कुर्वन्ति संकीर्तनम् ।
सर्वे चातुरचेतसो ननु सदा स्पष्टं प्रभुप्राप्तये
शुद्धान्तःकरणास्तथा सहृदया मानापमानोत्थिताः ।। १७६ ।।

तत्रानन्दकथा कथं भवतु?, ये चानन्दरूपाः स्वयं
भक्तास्ते पदमेव केऽपि दधते प्रेम्णा प्रभोर्विह्वलाः ।
अन्योन्यं पदधारणञ्च नमनं कुर्वन्ति ते रोदनं
तत्कृत्यैर्ननु वासपण्डितगृहं प्रेमार्णवप्रीतिदम् ।। १७७ ।।

तत्र प्रेममहार्णवेऽखिलजनाः प्रेम्णा च मत्ता यथा
चक्रुर्नृत्यमथ प्रवेशकरणादेव स्वतः प्रेरिताः ।
प्राप्तायां प्रभुसङ्गतौ च विषयाः सांसारिकाः सर्वतो
यान्ति द्राङ् ननु विस्मृताश्च हृदयं पुस्फोर तेषां स्वयम् ।। १७८ ।।

आसीत्तत्र गदाधरश्च परमस्तस्यान्तरङ्गस्तथा
सेवायामभवत्स्थितः सुमनसा नित्यं प्रभोरेव सः ।
ताम्बूलं मुखशुद्धिहेतुकमसौ भोजान्तके चैकदा
प्रेमावेशगतो ददन्तमवदच्चाधीरबालोपमः ।। १७९ ।।

'भ्रातर्ब्रूहि गदाधर! त्वमधुना कृष्णो विहायात्र मां
यातः कुत्र न तं विनाऽस्मि भविता जीवन्नहं हे सखे! ।
सङ्केतं नियतं वदाऽस्य ननु मे गत्वा च यत्रापि, स
स्थाने तं परिरभ्य रोदनमहञ्चान्विष्य कुर्वे तथा' ।। १८० ।।

तं कर्तुं विषयान्तरे वदति स 'व्यर्थन्तु तेऽधीरता,
श्रीकृष्णस्तव कुत्र यास्यति ननु त्वामेव हित्वा तथा ।
स्थाने ते हृदये सदैव लसति,' श्रीशस्तु भावप्रियः
'किं सम्प्रत्यपि मे प्रियोऽत्र हृदये?,' 'स्थाता सदा स्थास्यति' ।। १८१ ।।

श्रुत्वैवेदमसौ प्रभुर्निजनखैर्हर्षेण चोल्लासतो
वक्षः स्वस्य विदारयन् वदति तं 'द्रक्ष्यामि दृत्वा हृदम् ।
लीनो मन्निकटे परं न नयने स्पष्टं दृणामीत्युर'—
स्तस्मात्सन्नगदाधराऽनुनयतः शान्तश्च संज्ञां गतः ।। १८२ ।।

शय्यायां निशि चैकदा प्रियहृदः सेवासु मग्नो गदा—
धारी तत्पदयोर्निधाय च शिरो दीनो ययाचे प्रभुम् ।
'कृष्णप्रेम न लब्धमत्र, मयि तत्पापं कियत्पुञ्जितं ?
तन्मे ब्रूहि सुदीनवत्सलविभो! काले कृपा कुत्र ते ? ।। १८३ ।।

नो मे साधनशक्तिरत्र न तथा शक्तः शुभे कर्मणि
श्रीतीर्थेष्वपि पुण्यकर्मतपसां योगो न मेऽस्ति प्रभो! ।
मे त्वत्केवलपादपद्मशरणं, शुष्कं तथा जीवनं
कृष्णप्रेमविहीनमत्र भविता भारायितं चान्यथा' ।। १८४ ।।

प्रीतस्तस्य निशम्य कातरवचश्चाश्वासनार्थं जगौ
'माऽधीरोऽस्तु गदाधर! प्रियतमः कृष्णस्य नूनं भवान् ।
दीनो वै भगवत्प्रियः, प्रभुरतिर्दैन्यं विना नाप्यते
येषां साधनकर्मणामभिमतिस्ते नो कृपाभाजनम् ।। १८५ ।।

सोऽयं नूनमकिञ्चनप्रियजनो, निष्किञ्चनैर्लभ्यते
कृष्णप्रेमनिदर्शनं जगति वै निष्किञ्चनत्वार्जनम् ।
भावस्ते हृदये चकास्ति विमलो, भावो रसो व्यञ्जितः,
श्वो गङ्गास्नपितो ध्रुवं प्रभुकृपाव्यक्तानुभूतिं क्रियाः ।। १८६ ।।

श्रुत्वा श्रीमुखतो गदाधरमनोहर्षस्य पारो नहि
प्रेमाम्भोधिनिमग्नमानसतया मोदाश्रु मुञ्चन्निशाम् ।
क्व प्रातर्भविता ? कथञ्च ननु मे प्रेमोपलब्धिस्तथा ?
प्रत्येकां घटिकामसौ विगणयन् मत्तः प्रतीक्षारतः ।। १८७ ।।

शय्यातः क्षणतो निषीदति तथा तिष्ठन्नसौ नृत्यति
स्वे भूयः शयने च याति हसति प्रीतस्तथोच्चैः स्वयम् ।
दृष्ट्वा तस्य दशां प्रभुश्च मुदितः, प्रातश्च भागीरथी—
स्नानेनैव मदेन नृत्यति मुदा मत्तो यथा पानतः ॥ १८८॥

दृष्ट्वा सालसलोचनः प्रभुमसौ नत्वा पदाब्जद्वयं
कार्तज्ञ्यञ्च निवेदयन् वदति 'हे जीवाधमोद्धारक! ।
दत्त्वा प्रेमपयस्तथा परिचयो नाम्नो यथार्थः कृतो
गौरः केवलमङ्गतो नहि, हृदा स्वच्छो वदान्योऽपि वै ॥ १८९॥

दुःसाध्यस्थितिरद्य मेऽधममतेर्जाता च तेऽनुग्रहा—
त्सामर्थ्यं त्वयि सर्वमस्ति फलतः सर्वञ्च कर्तुं क्षमः ।
जीवेष्वत्र कृपा सदैव भवतां हेतुं विना वर्षति',
स्थाने चन्द्ररवी स्वतो निजकरै रात्रिंदिवं दीव्यतः ॥ १९०॥

'चक्रे चाद्य गदाधर! त्वयि कृपां कृष्णः कृपालुः कथं?
तत्त्वं प्रार्थय तं, मदर्थमधुना कुर्यात्कृपाभाजनम्' ।
त्वामेवात्र च वेद्मि कारणमहो!, तत्ते दयायाः फलं,
त्वद्भिन्नं नहि कृष्णमन्यमयिताऽरोदीद् ब्रुवन् विह्वलः ॥ १९१॥

श्रीशुक्लोऽपि गदाधरस्य च तथा स ब्रह्मचारी दशा—
मद्राक्षीदभवच्च तस्य हृदयं प्रेमाधिगन्तुं परम् ।
तत्प्रेमासवपानहेतुकमदश्चित्तं गतञ्चञ्चलं
विस्मृत्य स्वगतां गदाधरसमां मत्तस्थितिं वाञ्छति ॥ १९२॥

भिक्षाकृत्यमसौ विधाय पथि यन् गङ्गोन्मुखं श्रीप्रभुं
दृष्ट्वैवास्य पदाब्जयोश्च पतितो वृद्धोऽपि शुक्लाम्बरः ।
संकोचं जनयन् जगाद सुमतिः 'पुत्रोपमः सोऽस्म्यहं
क्रोडे लालितवान् भवांश्च किमिदं चक्रे त्वनर्थं मयि'? ॥ १९३॥

श्रुत्वा कातरभावतो वदति स श्रीब्रह्मचारी प्रभुं
'वार्धक्यं निकटेऽधुना, ननु ततो नो वञ्चनीयोऽधिकम् ।
चक्रे पावनतीर्थसप्तनगरीयात्रां पदातिः स्वयं
भिक्षान्नेन गृहाटनेन वपुषः कष्टं तथा जीविकाम् ॥ १९४॥

व्यर्थं जीवनमत्र यातमधुना प्रेमाधिकारी यथा
श्रीकृष्णस्य भवामि,तत्कुरु कृपां नम्रस्य मे प्रार्थना' ।
श्रुत्वा शुक्लवचस्तथा ह्यवितथं नोवाच किञ्चित्प्रभु—
र्मन्दं मन्दमभूत्स्मयन् सुरसिकः पश्यन् मुखं ब्रह्मणः ॥ १९५॥

स ज्ञात्वा प्रभुसुस्मितार्थमधुनाऽधीरोऽब्रवीत्तत्स्वयं
'नाहं तीर्थतप:प्रसङ्गकथनात्तस्याधिकारी तथा ।
दीनो याचनपूर्वकञ्च शरणं प्राप्तोऽस्मि तत्प्राप्तये'
भावज्ञस्य मुखात्स्वतोऽस्य फलितं 'दत्तं हि दत्तं सर' ।।१९६।।

विस्मृत्याखिलमत्र तच्छ्रवणतो नृत्यंश्च मत्तो यथा
प्रेमावेशगत: प्रलापसदृशं कुर्वन्नभूच्छुक्लजी ।
प्रीतौ गद्गदतां गत: प्रभुरयं दृष्ट्वा विचित्रां दशां
भिक्षाझोलिकशुष्कतण्डुलकणं तस्य प्रभुश्चर्वति ।।१९७।।

कृष्णस्तण्डुलचर्वणं समकरोत्प्रीत्या सुदाम्न: पुरा
स्पष्टं तच्च, पुनस्तयोर्व्यवहृतेस्तद्दर्शका विस्मिता: ।
वारम्वारममुष्य भावकरतिं शंसन्ति सर्वे मुदा
शुक्ल: पर्णकुटीं चचाल सुगत: प्रेमाप्लुतो धन्यताम् ।।१९८।।

एवं भक्तगणे प्रभुं प्रति गत: सम्मानभावोऽधिकं
तेष्वप्यस्य च पूर्वतोऽधिकतया प्रेमद्रुतं मानसम् ।
माघे मासि हि वासपण्डितगृहे संकीर्तनारम्भणं
जातं, तस्य सुकीर्तनं दिशि दिशि द्वित्रैस्तु मासै:सृतम् ।।१९९।।

आगच्छन्ति च कीर्तनस्य बहव: श्रीवासगेहोन्मुखा
रात्रौ दर्शनलालसा: परमिमे यान्ति स्वतो द्वारत: ।
सर्वेषां नहि कीर्तनं तु सुगमं, तिष्ठन्ति केऽप्यत्र ते
भक्ता:, किन्तु परे गृहेऽत्र पिहिते पक्वा लभन्ते गतिम् ।। २००।।

धीरभाव:

१७. धीरा जायन्ते खलु काले, सन्ति सदैवाऽप्रकटम् ।
दशरथनिधनं रामवियोगात् किं वा श्रवणोदन्तात्?
रामवनगमने स्वपरदैवाधीनेच्छा वा हेतु: ? ।
शन्तनुसत्यवतीसंयोगे भारतगङ्गोत्सङ्ग:
जनयति देवव्रतं हि भीष्मं शरशय्यासुखयोगम् ।
दशरथराग: श्रवणोपास्ती रामास्था-व्रतनिष्ठा
नहि मुह्यन्ति व्यवसाया भुवि हृदयसुहृन्मतरुचिता: ।।

सर्वेषां नियमस्य बन्धनमिह स्पष्टं सदैवाऽप्रियं
त्यक्त्वा बन्धनमत्र तच्च निखिला: स्वातन्त्र्यमिच्छन्ति वै ।
हेतुस्तत्र हि जीवमात्रजननं प्रेम्णस्तथाऽऽनन्दतो
यस्मिन्नास्ति च कोऽपि बन्धनियम:, प्रेम्णस्तृषा प्राणिनाम्।। २०१।।

सर्वेऽस्यैव परं प्रियस्य पयसोऽभावे ह्यधीरा यथा
च्छित्वा सर्वविधञ्च बन्धनमतस्तत्पार्श्वलाभोत्सुका: ।
पार्श्वप्राप्तिरमुष्य किन्तु नियमाचारं विनाऽसम्भवा
तत्प्रेम्ण: परिधौ कृता नियमत: खातास्तु नैसर्गिका: ।। २०२।।

शक्त: प्रेमसुधां न कोऽपि गमने तत्पारयानं विना
स्थाने सत्यमिदं यदत्र नियमातीतं स्वयं प्रेम तत् ।
पार्श्वे नास्य तथाहि कोऽपि नियम:, प्राप्तिस्तु शक्याऽस्य नो
संसारे नियमं विना, व्यवहृतौ सर्वं हि रेखाङ्कितम् ।। २०३।।

प्रेम्णश्चेत्तु कदाचिदत्र विधिना केनापि जात: पृथक्,
तस्माद्वा पृथगेव जीवनमिदं मत्वाऽथवा स्वं स्थित: ।
प्राप्तुं तत्पुनरेव नात्र नियमाऽयोगेन स स्यात्क्षम:,
प्रेम्ण: साधनमेकमात्रनियम: प्राप्तौ, गतिर्वा बहु ।। २०४।।

भोगैस्तर्पयतीह चेन्द्रियगणं तत्प्रेमनाम्ना तु य:
सक्तो वस्तुनि लोलुपश्च नियमांश्चोल्लङ्घ्य दम्भी हि स:।
लक्ष्यं चेन्द्रियवासनोपशमनं प्रेम्णो हि नाम्नाऽस्य तु
प्रेमा कल्पतरुर्यदर्चनगतं भावानुसारं फलम् ।। २०५।।

तन्नाम्ना वरवस्तु वाञ्छति च य: प्राप्तं तदेवाऽमुना
येषां सुन्दरभोग्यवस्तुरसना तेषाञ्च लाभस्तथा ।
ये तत्प्रेमपथेन केवलमिह प्रेमैव वाञ्छन्ति तु
प्राप्तां तामपि ते त्रिलोकिपदवीं गृह्णन्ति न प्रेमिण: ।। २०६।।

'वार्ता स्वर्गसुखस्य केह तु वयं मुक्तिं त्यजामो ध्रुवं'
संसारेऽत्र सदा मिलन्ति बहुधा लोका वदन्तस्तथा ।
मिष्टान्नञ्च विलोक्य यस्य रसना लालायिता जायते
दिव्यं स्वर्गसुखं स तत्कथमपि त्यक्तुं समर्थो भवेत् ? ।। २०७।।

अज्ञास्ते खलु स्वर्गसौख्यनिकरे दिव्येऽनभिज्ञा: स्फुटं
स्थाने यैश्चिरकालमत्र नियमा नो सेविता यत्नत: ।
तेषां चित्तमदो भविष्यति वशे? ते स्यु: कुत: प्रेमिणो ?,
ज्ञेयं तत्त्रियुगेऽपि नानुमितित:, प्रेमी सुखी तत्सुखे ।। २०८।।

सर्वेषां नियमस्य पालनपथे क्षोभश्च खेदोऽरुचि–
र्धीरो देवकृपावशीकृतमना: स्वेच्छाविरुद्धं तथा ।
कश्चिद्वा विधिपालनं तु कुरुते तेनास्य मन्दं क्रमाद्
दैन्यं तत्परता विनम्रदृढता चायान्ति सद्वृत्तय: ।। २०९।।

क्षोभो यन्मनसीह तत्र नियमे द्वेषस्ततो जायते
लोके तद्विपरीतभाषणमतोऽसिद्धौ च कोपागमः ।
आसक्तिर्बहुलाऽत्र कर्मणि ततो वामप्रचाराय यत्
स्पष्टं निन्दितसाधनानुगमनं सर्वस्वनाशोऽस्य तत् ।।२१०।।

आरब्धं प्रभुणा गृहेऽत्र पिहिते चादौ तथाकीर्तनं
यन्नाऽत्रानधिकारिणां मिलनतः संसारिभावो भवेत् ।
औत्सुक्यं जनमानसे तु जनितं द्रष्टुं परं कीर्तनं
तस्माद्वै नियमे तथा प्रभुकृते क्षोभोऽत्र जज्ञेऽसताम् ।। २११ ।।

श्रद्धालुर्निजधीरतानियमितश्चासीत्प्रतीक्षारतः
प्राप्तुं याचितवान् प्रवेशपदवीं तत्कीर्तनान्ते प्रभुम् ।
ज्ञात्वा तं ह्यधिकारिणं परदिनाद्दत्ताऽस्य चाज्ञाऽऽगते—
र्यातस्तत्प्रभुपादपद्मशरणं सद्वृत्तिवृद्धिक्रमात् ।। २१२ ।।

क्षोभो यस्य च मानसेऽस्य नियमे द्वेषस्ततः कीर्तने
तस्माद् वैष्णवशत्रुता स्वयमतो निद्राप्रचारे रतः
तेषां निन्दितकर्मभिः कुमनसां नष्टं न तत्कीर्तनं
स्थाने प्रत्युत तद्विरोधवशतो जाताऽत्र वृद्धिस्तथा ।। २१३ ।।

यातास्तु स्वयमेव कुप्रवृत्तयो दुष्टाश्च तेऽधोगतिं
कल्याणे त्वसहिष्णुताभरहृदां गर्ते निपातो ध्रुवम् ।
तेषामेव विरोधतोऽत्र जगति व्याप्तं हि संकीर्तनं,
साहाय्यं महतां कृतौ कुमनसां नूनं विरोधादपि ।। २१४ ।।

द्वेषात्कीर्तनकुप्रचारविषये निन्दा विरोधस्तथा
सर्वं यद्यपि चेष्टितञ्च विविधं, यातं परं निष्फलम् ।
लोके सत्पुरुषाश्च दुष्टमनसां घोरे विरोधे सति
क्षोभन्ते नहि, किन्तु कर्मणि निजे मज्जन्ति पूर्वाधिकम् ।। २१५ ।।

सत्यप्यत्र तथाविरोधिनि जने स्थाने बहिर्मानसे
स्वैर्भक्तैस्तु महाप्रभोश्चलति तच्छ्रीकृष्णसंकीर्तनम् ।
उच्चैः श्रीहरिबोलकीर्तनरवो ह्याप्यायते चानिशं
बाधा तत्सुतरां समीपजनतानिद्रासुखे वर्धते ।। २१६ ।।

'मत्ताः सन्त्यखिला निशासु सकलं क्रोशन्ति यामं तथा
निद्रा नोऽत्र गता तथाध्वनिभराद् ब्रूमस्त्वमीषाञ्च किम् ?।
सर्वे ते मिलिताः समानहृदयास्तत्क्रोशने न श्रमो,
योगे बुद्धिरपेक्षिता जपतपोज्ञाने तथाऽऽस्था परम्' ।। २१७ ।।

एवं कीर्तननिन्दने बहुविधं दुष्टं जनानां वच—
स्तेष्वेकेऽपि च वासपण्डितबुधं निन्दन्ति नानोक्तिभिः ।
'हत्यामूलमसौ हि कीर्तनगृही श्रीवासिया वामनो
भिक्षायाचितरोटिकाफलमिदं मत्तो दरिद्रोऽपि सः ।। २१८।।

आयातो हि चतुष्पणः स्वनिकटे क्रोशत्यमुष्योष्मणा
रात्रिं व्याप्य, ततोऽपि विंशतिजना निष्कर्मिणः सञ्चिताः ।
एतस्यैव च कारणान्नु भविता सर्वस्य नाशश्च नः'
सर्वेषां शुभकीर्तनाप्रियहृदामन्योन्यवार्ता तथा ।। २१९।।

'अद्यैव श्रुतमस्ति राजवचनाच्चायाति नौकाद्वयं
बद्ध्वा कीर्तनरागिणो हि नदियास्थानाच्च नेतुं तथा ।
सङ्गे सैन्यदलं तदस्य भविता च्छित्वा च भङ्क्त्वा पुन—
र्गङ्गायां करिता च वासवसति'श्चैकेन दुःसूचितम् ।। २२०।।

भीतास्तच्च निशम्य केऽपि जगदु'र्भ्रातोऽत्र दोषस्तु नः
किञ्चिन्नो, वदिता स्फुटं, नहि वयं स्मः कीर्तने वा गृहे ।
जाने किं क्रियतेऽमुकाऽमुकजनैर्द्वारं पिधायान्तरे',
तच्चैवं यदि कीर्तनं न भविता नूनं भवेज्जल्पनम् ।। २२१।।

केषाञ्चिन्ननु सम्मतिः 'प्रथमतः सैन्यागमात्कुर्महे
काजीमेत्य च कीर्तनस्य विषये दुर्वेदनं तार्किकम् ।
नास्माकं सहयोजनाऽश्रुतिपथेऽशास्त्रीयकार्येऽत्र वै
किं कर्माऽत्र विधीयते हि वनितासङ्गैर्न जाने तथा ।। २२२।।

उच्चैः कृष्णसुकीर्तनञ्च जनताबोधाय तद्बाह्यत—
श्चान्तः पञ्चमकारमांसमदिरोपास्तिश्च वामाध्वना ।
एवं वै नदियास्थितिस्तु विषमाऽस्माकं प्रतीतिस्तथा
तत्काजीनिकटे निवेदनमिदं पूर्वं तथैवोचितम्' ।। २२३।।

एतत्सर्वजनस्य सम्मतमतस्तत्केऽपि गत्वा नव—
द्वीपस्यामलकीर्तनस्य जगदुः काजीमभद्रस्थितिम् ।
काजी सर्वमिदं निशम्य वदति 'स्थानेऽत्र चिन्ता तु किं ?
कर्ता कीर्तनसङ्गतेर्नियमनं' श्रुत्वा गता हर्षिताः ।। २२४।।

एवं सम्प्रति चापणेऽपि विविधा लोकापवादोद्गति—
र्ब्रूते कोऽपि 'तथोच्चकीर्तनरवाद्रुष्टो हरिः स्यादपि ।
दुर्भिक्षं परिणामतोऽस्य सकले देशे पतेन्निश्चितं'
मध्ये खण्डनमस्य नम्रवचनाच्चान्यः करोति द्रुतम् ।। २२५।।

'वक्तुं तन्नहि युज्यतेऽत्र भगवान् रुष्टो भवेत्कीर्तना—
त्सोऽन्तर्यामितया तथा घट-घटव्यापी पुनर्भावविवित् ।
सर्वस्याऽऽसहते च, किन्तु शनकैश्चैते हि नामस्मृतिं
कुर्युस्तेन च किं न पुण्यमयथाहू-हाऽऽनिशं किं तपः' ?।। .२२६ ।।

ब्रूते तापशमार्थमत्र मनसः कोऽपि द्रुतं द्वेषतो
'भक्तेः स्वस्य च कीर्तनस्य दिवसैर्द्वाभ्यां चतुर्भिश्च वा ।
एतेषां भविता विनोदनमतो वासस्य नो मङ्गलं',
कीर्तिः सज्जनसंस्तुतेरधिकतः कोताऽसतां निन्दया ।। २२७ ।।

श्रीवासोऽप्यखिलं शृणोति कथनं लोकस्य तद्दैनिकं
तस्याप्यल्पभयं तथाश्रवणतश्चित्ते रुरोह स्फुटम् ।
'राजा गौडभुवो हि सोऽस्ति यवनो हिन्दूविरोधी तथा
नाश्चर्यं यदि तत्पुनः स कुरुते,ऽसह्योऽसतां वैदिकः ।। २२८ ।।

अस्माकं बहुहिन्दुबान्धवजना भूयो विरुद्धं वचः
काजीमेत्य च कीर्तनस्य विषये चक्रुः स्वयं तत्पराः ।
अस्यां संभवकं स्थितौ, बहु तु नो दद्यात्तथोत्पीडनं',
नूनं बन्धुगणाध्वना प्रभवति स्थाने सतां बाधकः ।। २२९ ।।

श्रुत्वैवं वचनञ्च लोकमुखतः केऽप्यत्र भक्ताश्च ते
त्रस्ताः सौम्यहृदो हि वासवसतिं याताश्च कार्यन्तु किम् ?।
भीताः केऽपि तथेदमद्य जगदु'श्चेदस्ति यच्छ्रूयते
त्यक्त्वा स्थानमिदं तथाल्पसमयं गन्तव्यमन्यत्र नो' ।। २३० ।।

सर्वेषां वचनं निशम्य वदति श्रीवासभक्ताग्रणी—
'भ्रातः! सम्प्रति भावि तच्च भविता कर्ता नृसिंहः शुभम् ।
कुर्मः कीर्तनमेव चागतमतः कष्टञ्च सर्वं सहै'
वासो भक्तगणं तु बोधयति तच्चित्तेऽस्य तस्थौ भयम् ।। २३१ ।।

नासौ श्रीप्रभुसम्मुखे स्वमनसो भावं चकार स्फुटं
ज्ञाता सर्वमनःस्थितेः प्रभुरयं, स्वच्छेऽखिलं भासते ।
भीताः सन्त्यखिला, नृपो हि यवनो ज्ञात्वा स्वभक्तस्थितिं
'कार्या निर्भयता सतां सुमनसा'मेवं प्रभोर्निश्चयः ।। २३२ ।।

एकस्मिन् दिवसे महाप्रभुरसौ सौन्दर्यशोभाकरो
गन्धाढ्यञ्च लिलेप चन्दनमहो! सम्पूर्णकाये निजे ।
तैलं सञ्जयति स्म कुन्तलभरे श्यामे गुडे सुन्दरे
धृत्वा शुभ्रमहार्घमम्बरमयाद् भक्तैश्च गङ्गोन्मुखः ।। २३३ ।।

ताम्बूलेन तथारुणोऽधिकतया रक्तः प्रभोश्चाधरः
कान्तं शारदपूर्णिमाशशिमुखं हर्षच्छटा नेत्रयोः ।
भक्तानां खलु वर्धयन्निजहृदां मोदञ्च मन्दं स्मयन्
गङ्गायाः पुलिने त्वितोऽटति ततः, प्रीतो हि सर्वप्रियः ।। २३४।।

आसन् ये भगवत्प्रियाः सुहृदया भक्तास्तथा सात्त्विका
दृष्ट्वा ते मुदिता हृदि प्रभुममुं लावण्यरूपाद्भुतम् ।
ये किन्त्वत्र बहिर्मुखाः खलजनाः सन्निन्दका द्वेषिण–
स्ते कुर्वन्ति परस्परञ्च विविधञ्चालोचनां श्रीप्रभोः ।। २३५।।

'एषोऽप्यद्य निमायिपण्डितवरो नूनं विचित्रो जनो
नाल्पञ्चापि भयं तथाहि नगरे सर्वत्र वार्तारवः ।
श्वश्चागामि हि सैन्यमत्र नियतं बद्ध्वा च सर्वादितो
गौरं पण्डितमेव मायिनममुं नेता तथा नौकया ।। २३६।।

ज्ञात्वा सर्वमिदं तथापि मुदितो राजात्मजाभोऽटति
शृङ्गारेण च सज्जितो नहि मुखे म्लानिर्मनाग् लक्ष्यते' ।
'सर्वन्त्वत्र मृषा तु गल्पकथितं नायाति सैन्यञ्च नौः',
'काजीजी स्वयमाह किन्तु कलहः श्वो द्रक्ष्यते तत्स्फुटम्'।। २३७।।

एवं स्वानुमितिं जनास्तु विविधां संचालयन्तोऽभवन्
भक्तैर्गङ्गतटे तथा प्रभुरभूत्प्रीतो विहारे रतः ।
कोऽप्येको मिलितो बुधः परिचितस्तीरे च संध्यारतो
दृष्ट्वा तं प्रणनाम तत्र विविधाऽऽलापश्चचाल द्वयोः ।। २३८।।

वार्तायां ननु पण्डितः कथयते 'भ्रातः! शृणोम्यद्य किं ?
धर्तुं त्वां खलु सैन्यमत्र वसतावायाति राजाज्ञया ।
सम्पूर्णे नगरे जनश्रुतिरियञ्चोष्णा, तथेदं यदि
द्वीपं तर्हि विहाय गच्छसि कथं नान्यत्र वाल्पावधिम् ।। २३९।।

लोके चात्र कदापि नोचितमहो राज्ञा विरोधो नृणां
सद्धर्मस्य पुनस्तथा स्वयमयं राजा विरोधी च यः ।
एवं मेऽस्ति तु सम्मतिस्त्वमधुना गच्छ द्रुतं पण्डित!
क्षेत्रादेव पलाय्य चेदमुचितं जानीहि चाग्रे यथा' ।। २४०।।

उक्तञ्चेषदुपेक्षयाऽत्र भविता यत्पश्य तत्त्वं भवत्–
त्यक्त्वा गौडभुवं परत्र गमने कुत्राद्य शक्ष्याम्यहम् ? ।
चेदन्यत्र च यामि तर्हि नृपतिः सैन्यप्रयोगान्न किं
स्थाने शक्ष्यति बन्धने मम तथा कर्तुं, ततोऽत्रैव शम् ।। २४१।।

दु:खं तत्किमपीह भावि नु सहै, धर्मस्य दु:खं प्रमा
लोके पुण्यपरीक्षणं शुभकृते: कालेऽत्र चैव ध्रुवम् ।
द्रष्टव्यं, निकषे परीक्षणमहे कत्यत्र शुध्यन्ति ते' ?
तूष्णीकोऽत्र स पण्डित:, प्रभुरयं श्रीवासगेहोन्मुख: ।। २४२।।

श्रीनृसिंहावेश:

१८. सिंहो हिंसति शास्त्रे लोके, रणति नरोऽपि तथा किम् ?
हिंसकजीवसमूहनियमनात्सिंहो मृगपतिनामा
वनमिव भवरणमध्ये भव्या नरनारायणसमता ।
सिंहोऽहिंसोऽप्यत्र धरण्यां सत्सङ्गतिपरिशुद्ध:
ज्ञानोपासनकर्मसुरणनाद् रागद्वेषाक्रान्तम्
ज्ञानी भक्त: कर्मठवृत्तिर्विश्वमरण्यं कुरुते ।
श्रीजगदम्बावाहनसिंहो जननीभक्ताऽऽराध्य:
प्रह्लादकशिशुरक्षणधर्मा सेव्यो जनकनृसिंह: ।।

श्रीवास: समुपासको भगवत: श्रीमन्नृसिंहस्य तत्—
चैकस्मिन् दिवसे स्वपूजनगृहे भक्त्या बभूवार्चने ।
दीर्घ गेहकपाटयो: खट-खट-स्फोटस्तदानीं गतो
मन्ये कोऽपि तथा कपाटयुगलं संताडयेदुच्चकै: ।। २४३।।

श्रीवासस्य च तन्निशम्य सहसा ध्यानं हि भग्नं तत:
कोऽयं ताडयते कपाटमधिकं वासस्तु भीतो यथा ।
पृष्टं 'कोऽस्ति' बहिस्तथा ध्वनिरभूद्यस्यार्चकस्त्वं सदा
प्रत्यक्षं खलु पश्य तं, भुवि यदप्रत्यक्षमर्चा कृता' ।। २४४।।

स्तब्धोऽल्पं क्षणतो हि मुक्तमकरोद्द्वारन्तु बिभ्यच्च स
स्पष्टं पश्यति पण्डित: स्वभिमुखं लावण्यरूपाद्भुत: ।
श्रीविश्वम्भर एव लोचनपथे साक्षाच्छचीनन्दन—
श्चायाति स्वयमत्र पूजनगृहे नि:शङ्कभावेन हि ।। २४५।।

सोऽयञ्चागत एव वासवसते: पूजासने संस्थितो
वासस्यावगमो नु शोभितगल: श्रीवैजयन्तीस्रजा ।
श्रीमच्छङ्खसुचक्रपद्मगदयाऽलङ्कारशोभाकर:
स्थाने हि प्रकटं गृहेऽत्र भगवान् विष्णु: स विश्वम्भर: ।। २४६।।

वारम्वारमसौ च गर्जति यथा मत्तैकपञ्चाननो
हुंकारेण भयङ्करं प्रभुमुखं दृष्ट्वा स भीतोपम: ।

गम्भीरस्वरतश्च सिंहसदृशो गर्जंश्च घोरं तथा
स्थाने संस्थित एव तद्भगवतः पीठे जगाद प्रभुः ।।२४७।।

'श्रीवास! त्वमिमं विवेद नहि मां स्पष्टं तथाद्यावधिं
नाडाऽद्वैतसुधीश्च शान्तिपुरकं यातः परीक्षामनाः ।
मा भैषीश्च कुतोऽपि, दुष्टदमनं कर्ता समस्तात्मना
स्थाता कोऽपि न भक्तपीडकजनो मत्सम्मुखे निश्चितम् ।।२४८।।

न ते चिन्ता कार्या, स्तुहि च सुहृदं शान्तमनसा'
तथाऽऽश्वस्तो वासः प्रभुमुखगिरा प्रीतहृदयः ।
क्षणं प्रेमाविष्टो विकलगलतोऽस्तौद्भगवता
पुराणश्लोकेन प्रथममधुना ब्रह्मवचसा ।।२४९।।

१९ **नन्दन! नन्दनतय! गोवर्धनयशोद! पयोदबन्धो!**
विद्युत्सुवसन! गुञ्जाभूषण! बर्हमुकुटमुखमण्डल!
गलवनमाल! सुकोमलपदतल! पाणिकवल! वनचारिन्! ।
मुरलीमनोहर! वेत्रविषाणनियमितगोकुल! बालक!
भगवन्नौमि भक्तभयहारिन्! स्तवनीय! त्वां केवल! ।।

गीत्वा भागवतश्लोकं 'नौमीड्येति' प्रजापतेः ।
श्रीवासो दैन्यभावेन सम्बोधयति च प्रभुम् ।। २५०।।

'लक्ष्मीवल्लभ! गौरसुन्दर! जगन्नाथप्रिय! श्रीधर!
श्रीविश्वम्भर! विश्वरूपनदियाबन्धो! शचीनन्दन! ।
भक्तानां भयभञ्जनात्ममदन! श्रीमन्निमायिप्रभो!
प्रह्लादाप्तनृसिंहरूप! जयतु श्रीविष्णुकान्ताप्रिय! ।। २५१।।

एतावद्दिवसैरहं भुवि तमोऽज्ञानेऽस्मि वै विभ्रमन्
साक्षान्मे गुरुरूपतोऽद्य कृपया दृष्टः स्फुटं त्वं प्रभुः ।
जीवोऽहं खलु पामरः स्वभवनप्राकट्यतः पावितः
सृष्टेः कारणमादिमो जयतु हे! ब्रह्मंश्च विष्णो! शिव!'।। २५२।।

श्रीवासस्तुतिगायने सुमधुरे पूर्णे दिदेश प्रभुः
'पूजां मे कुरु चात्र, याचतु वरं मे त्वं मनोवाञ्छितम् ।
कृत्वाऽऽदेशमथ प्रभोः शिरसि तत्स्त्रीबालदासादिभिः
श्रीवासोऽत्र समुद्यतोऽर्चनविधौ तस्यैव सम्मोदतः ।। २५३।।

साक्षान्मे प्रकटं नृसिंहभगवांस्तद्भावमात्राकुलो
वृद्धोऽसौ जनकोपमः स्मरति नो पूर्वस्थितिं सर्वथा ।

'सोऽयं मे सुहृदश्च पण्डितजगन्नाथस्य पुत्रो लघुः
क्रोडे यो मम लालितः, पितृसमं मानं विधत्ते सदा' ।। २५४।।

सामग्री हरिपूजनाय हि तथा चैकत्रिता यावती
साकल्येन समर्पिता तदमुना स्थाने प्रभोः पूजने ।
श्रीवासस्य गृहाङ्गना निजकरैः कण्ठेऽर्पयन्ति स्रजं
शीर्षे पुष्पभरं प्रभोः प्रणमनं कुर्वन्ति साष्टाङ्गतः ।। २५५।।

पादं मूर्ध्नि निधाय तत्प्रभुरपि प्रीत्या ददौ चाशिषो
'भक्तिर्वो मयि चास्तु' वासभवने पूर्णं तथा पूजनम् ।
उच्चैर्हुंकृतितोऽवदत्प्रभुरयं तस्माद्गभीरस्वराद्
'वासोऽनन्यहृदा ममैव कुरुषे भक्तिं, भयं ते कुतः? ।। २५६।।

सामर्थ्यं किमहो नृपस्य, यदयं कुर्याद्विरुद्धञ्च नो
नौका वैष्णवबन्धनाय नदियामध्ये तथाऽऽयाति चेत् ।
तत्राहं प्रथमं स्थितो नृपममुं गत्वा च पृच्छामि वै,
श्रीसंकीर्तनधर्मिणां नियमनाऽऽदेशं कथं दत्तवान् ? ।। २५७।।

काजीवर्गगिरा चकार यदि तत्तर्ह्यत्र चायान्तु ते ?
कृत्वा सम्प्रति तत्स्वशास्त्रनियमाद् विश्वासतः प्रार्थनाम् ।
अल्लाहेति खुदेति सर्वमुखतस्ते वादयन्त्वन्यथा
श्रीकृष्णेति च वादयामि यवनैः किं हिन्दुभिर्गोखगैः ।। २५८।।

एवञ्चाखिलसर्वजीवमुखतः श्रीकृष्णसंकीर्तनं
सम्पाद्यात्र हि देवयामि जगति स्पष्टं प्रभावं प्रभोः ।
कृष्णोच्चारणमत्र तत्र यवनद्वाराऽपि भावीह मे
यद्येवं कथितेऽपि मानयति नो हन्यामहं तं ध्रुवम् ।। २५९।।

चिन्ता माऽस्तु तथाहि कस्यचिदपि स्थाने भवेर्निर्भय–
स्तत्सर्वं भविता कथं ?, तदखिलं ते दर्शयामि द्रुतम् ।
प्रायो वर्षचतुष्टया त्वमिधया 'नारायणी' कन्यका
श्रीवासानुजपुत्रिका,ऽह्वऽयति तां पार्श्वेऽधुनैव प्रभुः ।। २६०।।

पार्श्वस्थां ननु तां प्रभुः कथयते 'वत्से! तु नारायणि!
श्रीकृष्णस्य कृतेऽधुना रुदिहि हे! स्थानेऽत्र मत्ता सती' ।
तच्छ्रुत्वैव च बालिका लघुवयाः कृष्णस्मृतौ प्रीतितो
मूर्च्छायामपतच्च रोदिति भृशं हा कृष्ण! हाकृष्णवाक् ।। २६१।।

श्रुत्वाऽस्याश्च तथाहि रोदनमहो! सर्वे च नार्यो नरा
लीना विस्मयसागरेऽखिलदृशोरश्रुप्रवाह्रोऽपतत् ।

तेनोक्तं हसता 'तथैव निखिलैः कर्ता हि संकीर्तनं'
दत्वाऽऽश्वासनमेवमस्य पतितो भूमौ प्रभुर्मूर्च्छितः ।। २६२।।

चैतन्ये बहुकालतोऽयमभवद् भूत्वा तथाऽऽश्चर्यतः
पश्यन् लोकमितस्ततो वदति 'भोश्चात्राऽऽगतोऽहं कथम्? ।
स्थाने पण्डितजी! मया किमपि तच्चाञ्चल्यमुत्पादितं ?
जातञ्चेत्क्षमताञ्च मे तदखिलं जाने क्रियां नाऽऽगतिम् ।। २६३।।

क्षाम्यन्मे ह्यपराधमत्र पितृवत्सर्व सदा वर्तसे'
श्रीवासः प्रभुसौम्यहार्दिकवचः श्रुत्वा विनीतोऽवदत् ।

'भ्रान्तौ मां चिरकालमत्र धरसे, भूयो भ्रमे मा क्षिप,
ज्ञातं वास्तविकं स्वरूपमधुना तद्वञ्च्यते किं पुनः ? ।। २६४।।

स्वपादे सुस्थाने हृदयरतिरेवं वरमत
स्तथाशीर्वादं मे वितर भगवन्! वासरसहृत्!'।
सुवासे श्रीवासे गदति मुदितस्तत्र मनसा
मनाग्व्रीडावासो निजजनिनिवासं प्रभुरयात् ।।२६५।।

श्रीवाराहावेशः

२०. सूकर! वसुधोद्धारक! भगवन्! सद्वसुप्रियतां नयतु ।
स्वर्णिमभाजनपिहिते सत्ये नहि वस्तुस्थितिबोधः
विषयवासनारञ्जितमनसः सुतरां वसुलोलुपता ।
स्वर्णनयनहृतवसुधाऽन्वेषणखुरगतशिखरिसुमेरुः
कर्मधराखिलयज्ञतन्तुकः सत्कृतिकल्पं धारय ।।

आवेशो गुणसंक्रमः परिमितं कालं शरीरे परे
लोके भिन्नशरीरतो निगदितो, यात्रा गुणैः प्राणिनाम् ।
प्रायः स्त्रीपुरुषेषु भूतगणकाऽऽवेशाऽऽगमो दृश्यते
ह्यावेशोऽपि जनश्च यत्प्रकृतिकस्तेष्वत्र तल्लक्षणम् ।। २६६।।

भूतप्रेतगणाश्च तामसजने यक्षादयो राजसे
देवाश्चैव हि सात्त्विके प्रकृर्तितस्त्वायान्ति चावेशतः ।
आवेशो विरले जने, न नियतं कस्मात्कथं जायते
भूतादिः स्वमतोपयुक्तवपुषि स्थित्वा व्यनक्ति स्वकम् ।। २६७।।

एतस्मादतिरिक्तमस्ति भगवन्नानावतारान्तरे
पूर्णज्ञानकलांशनामविविधं ख्यातोऽवतारो रसः ।

आवेशोऽपि तथा, यतोहि भगवान् देहे विशेषे स्थित:
कृत्वा कार्यविशेषमत्र समयादावेशतो लीयते ।। २६८।।

सर्वं कर्तुमकर्तुमन्यविधिना कर्तुं समर्थस्तथा
दुष्टानां महतां वधे हि भगवान् तत्केवलेच्छाप्रभु: ।
सोऽयं प्राकृतनामरूपगुणतो नित्यं पृथग्वस्तुत:
प्रेमाधीनगतस्त्वसीमकृपया लीलावतारोऽयते ।। २६९।।

दुष्टक्षत्रियपीडितां हि धरणीं श्रीभार्गवस्यात्मनि
ज्ञात्वा विप्रमुनेर्यथा भगवदावेशो बभूव स्फुटम् ।
कृत्वा तां समयेन दुष्टरहितां शान्तस्तदावेशतो
रामोऽद्यापि महर्षिभावतपसा चास्ते महेन्द्राचले ।। २७०।।

कार्यस्यात्र हि सिद्धये भुवि तथाऽऽवेशावतार: सदाऽ—
सामान्यस्य, परं तथाधिकदिनं सोऽयं न तिष्ठत्यपि ।
पाञ्चालीकरुणार्तितो भगवतश्चीरावतारोऽप्यभू—
न्नारीह्रीधनरक्षणं क्षणमहो! कृत्वा विलीनोऽपि स: ।। २७१।।

एवं सम्प्रति तत्प्रभोरपि तनौ भिन्नावतारस्फुटाऽऽ—
वेशो बोधयति स्वभक्तहृदयं, लीला: प्रभो: प्रेमिणाम् ।
आवेशस्थितिगस्तदीयगुणतस्तत्तद्विधत्ते प्रभु—
स्तद्भावे शमिते हि दीनहृदयोऽमानी स भक्तोपम: ।। २७२।।

स्वे शीर्षे च करोति भक्तपदयोर्धूलिञ्च जिज्ञासते
'कृष्णप्रेम कदा भवेदधिगतं तत्प्राप्त्युपायं वद ।
केन स्वप्रियकृष्णमूर्तिमिलनं, प्राप्तं भवेन्मे तथाऽ—
धीर: सर्वजनं सदा प्रभुरयं, भक्तार्तिलुब्धो हरि: ।। २७३।।

एवञ्चास्य हि जीवने स्फुटमितौ भावौ विभिन्नौ तथा
भावावेशगत: कदापि भगवद्भावश्च भक्तोऽन्यथा ।
भक्ता ये खलु चान्तरङ्गसुहृदस्ते सर्वदा तद्धिय—
स्तत्तावत्यपि तस्य दैन्यवचने तेषां नभावान्तरम् ।।२७४।।

सामान्यास्तु भवन्ति संशययुता: 'किं वर्ततेऽस्य स्थिति:
साक्षादेष हि कृष्ण एव, ननु वाऽऽविष्टा भवेद्देवता ।
किं वा तान्त्रिकसिद्धिरस्य विषये लोकेषु नानावचो,
ब्रह्माऽऽत्मा भगवान् हि दीव्यतिसतां युक्तात्मनां प्रेमिणाम् ।।२७५।।

श्रीकृष्णलीलोदयमस्य देहे
कश्चित्प्रभोर्भक्तगणो ददर्श ।

अक्रूरलीलां कुरुते कदाचि—
त्कदापि गोपीविरहे विरौति ।। २७६।।

आसीद्गुप्तमहाशयोऽत्र भगवद्वाराहमूर्तिप्रियो—
पास्ता चैकदिने बभूव वसतौ तत्स्तोत्रपाठे रतः ।
दूरादेव तथास्तुतिश्रवणतश्चोच्चैर्वराहोपमो
गर्जन् 'सूकर-सूकरेति' वचसाऽयाद्गुप्तवासं प्रभुः ।। २७७।।

तत्रास्य प्रकृतौ वराहभगवद्धर्माःस्फुटं लक्षिता
वाराहोपमयानमस्य धरणीमानीय हस्तावुभौ ।
मार्गस्थं क्षिपते सवारिकलशं दाढेण धृत्वाऽन्यतोऽ—
वक्रं गुप्तमहाशयार्चनगृहं गत्वा स्थितश्चासने ।। २७८।।

ब्रूते तं समुपासकं प्रभुरयं 'त्वं मां मुरारे! स्तुहि
प्रोक्तं बद्धकरेण दीनमनसाऽ'नन्तप्रभाव! प्रभो! ।
पूर्णं ते महिमा न बोधविषयो वेदादिशास्त्रैरपि
स्थाने 'नेति च नेति' च श्रुतिवचस्त्वं सर्वयामी विभो! ।। २७९।।

श्रीशेषस्त्वनिशं सहस्रवदनैर्गायिन् गुणानां स्वयं
नान्तं याति गुणोत्करस्य विलयं यावत्स्तुयां त्वाञ्च किम्?'।
गम्भीरस्वरतः प्रभुर्वदति 'माऽभैषीर्मुरारे! मम
द्वीपे कीर्तनविघ्नकारकजनो यः कोऽपि वध्यो हि सः ।। २८०।।

कर्तोद्धारमहं समस्तजगतस्तन्नामसंकीर्तनात्'
तच्चैवं कथयन् पपात धरणीपृष्ठे प्रभुर्मूर्च्छितः ।
सोऽयं स्वप्रकृतौ गतः क्षणमितो भूयो मुरारिं तथा
ब्रूतेऽधीरतया परं परिचितो गुप्तः प्रभावात्प्रभोः ।।२८१ ।।

जातं नो परिवर्तनं प्रभुगिरा तस्मान्मुरारिस्थितौ
धन्यं तद्गृहगः स्वदर्शनविधेः कृत्वा ययौ स्वं प्रभुः ।
श्रीभावात्मकलीलया विविधया भक्तांस्तथा नन्दयन्
रेमे श्रीप्रभुकृष्णकीर्तनमहे सोऽयं सदा योजयन् ।। २८२।।

मध्ये कीर्तनमत्र चैकदिवसे प्रेम्णा जगाद प्रभु—
'श्चागन्तैकमहाजनोऽत्र नदियाभूमौ तथाल्पैर्दिनैः ।
श्रीमत्कृष्णसुकीर्तनस्य च नवद्वीपस्य कोणेऽखिले
यद्द्वारा भविता गृहे ननु गृहेऽलोकप्रचारोत्सवः' ।। २८३।।

श्रुत्वेदं वचनं स्वतः प्रभुमुखात्सर्वस्य मोदोऽधिकं
सोत्साहं ननृतुस्तथाऽधिकतया भक्ता रसोद्रेकतः ।

विश्वासोऽस्ति दृढं प्रभोर्निगदितं भावीति सत्यञ्च तत्,
सर्वाऽऽमोदकशुद्धगौरहृदयस्नेही भवेदद्भुत: ।। २८४।।

चत्वारो ननु पञ्च चैव दिवसा याता भवेयुस्ततो
ब्रूते भक्तजनान् स चैकदिवसे संकीर्तनानन्तरम् ।
'द्वीपे चात्र ममाग्रजोऽतुलसखा सर्वस्वबन्धुश्च मे,
प्राप्त: स त्ववधूतवेषसुजनो गत्वाऽनुसन्धत्स्व तम्' ।। २८५।।

लब्धवाऽऽदेशमतो महाजनममुं लब्धुञ्च भक्ता ययु:
'सर्वस्वञ्च निमायिनो नरमणि: स्यात्कोऽवधूताऽऽकृति:?'।
औत्सुक्यं सहजन्तु पाठकहृद: सोऽयं निमायीसखा
नित्यानन्दपदोऽवधूतपथिक: सञ्चीयते योऽग्रत: ।। २८६।।

निमायिभ्राता-नितायी

**२१. पुत्रो गार्हस्थ्याश्रमपादपमोदककुसुमसुगन्ध: ।
नारीनरपत्नीपतिबन्धे च्छायाश्रयसुखमूलम्
भूसम्पत्सौभाग्यविताने गृहमन्दिरमणिदीप: ।
वश्यो,धनिक:, सुकृती, प्राज्ञ: क्रमिकोत्तमगतिसूचि:
पुण्यतीर्थकृतदुष्करतपस: पितु: सुत: फलममृतम् ।
विश्वगौरहरिनित्यानन्दप्रभृतिसुते किं वाच्यम् ?
यज्जीवनमखिलं हरिचिन्तनकीर्तनपूतं यातम् ।।**

अत्यन्तं हि विचित्रमस्ति जगतीमध्ये विधानं विधे—
रन्योन्यं रिपुभावतो दृशिगतौ द्वौ सोदरौ कुत्रचित् ।
श्रीकर्णार्जुनसोदरौ समजनी वाली च सुग्रीवको
रक्षोरावणभीषणप्रभृतिकाश्चासंस्तथा सोदरा: ।। २८७।।

एकोऽन्यस्य परस्परं समभवन्मृत्योस्तु तत्कारणं
लोके तद्विपरीतमत्र जननी भिन्ना च भिन्न: पिता ।
तज्जातेषु तथाधिकञ्च सुदृढं प्रीति: परैर्लक्ष्यते
यत्तुल्या विरलेऽपि संभवतया स्यात्सोदरे कुत्रचित् ।। २८८।।

प्रत्येके ह्यनुमीयते जगति तै: सर्वै: प्रसङ्गैरिदं
संस्कारैर्ननु पूर्वजन्मकलितैर्बद्धास्तथा प्राणिन: ।
सम्बन्ध: खलु यस्य येन सह यत्कालञ्च यज्जन्मनां
तावत्तस्य च तेन साकमवनीसङ्गोऽनुपाल्यो ध्रुवम् ।। २८९।।

भूयो द्वयोर्ननु तयोर्यदि वाऽस्तु जन्माऽ—
भिन्ने कुटुम्बनिवहे वसुधाविभागे ।
भिन्ने कुले जनपदेऽस्त्वथवा हि जातौ
सम्बन्धता तु भुवि पूर्वसमानमेव ॥२९०॥

श्रीगौराङ्गमहाप्रभोर्जनिरभूद्गौडप्रदेशस्थिते
प्रख्याते नदियापुरे, सिलहटाऽऽवासी च मिश्रान्वयः ।
प्राज्ञो विप्रवरः पिताऽस्य च नवद्वीपप्रसिद्धद्विज—
श्रीनीलाम्बरचक्रवर्तितनुजा माता सुधीवंशजा ॥ २९१॥

गौरश्चात्मनि सोदरद्वयमयं श्रीविश्वरूपोऽग्रज—
स्त्यक्त्वैतं लघुपञ्चवर्षमनुजं यातः पुनर्नाऽऽगतः ।
पित्रोः केवलमेक एव सुतकः सोऽयं हि सर्वावरो
वाच्यः सर्ववरोऽथवाऽस्य जननी संतानमन्यन्न कौ ॥ २९२॥

नित्यानन्दजनिस्तु राढविषये राढीयसद्ब्राह्मण—
श्रेणीकौ पितरावमुष्य, निखिले ज्येष्ठः स्वयं सोदरे ।
भ्रातॄणान्तु न कोऽपि नामपदवित्ते के, कियन्तोऽस्य वा ?
ख्यातः सोऽत्र निमायिबन्धुवरतश्चाद्यस्तुतिः कीर्तने ॥२९३॥

२२. गायतु निष्किञ्चनजनदयितम् ।
गौडभक्तसंकीर्तनमण्डलमध्ये नामोद्गीतम्
नित्यानन्दं भजनानन्दं गौरहरिं भज मधुरम् ।
प्रीतिप्रतिमावृषभानुसुताराधानन्दश्यामम्
जप हरिकृष्णं जप हरिरामं मानवजीवनमूल्यम् ॥

नासीद्यद्यपि पाञ्चभौतिकवपुर्लोके द्वयोश्चानयो—
रेकस्थानगतेन वीर्यरजसा जातं तथाप्येकता ।
आत्मान्तःकरणं द्वयोः समतयाऽऽसीद् भिन्नदेशीययो—
स्तद्भिन्नावपि तौ ह्यभिन्नपथिकौ नित्यो निमायी भुवः ॥ २९४॥

श्रीनित्यप्रभु-वीरभूमिविषय-ग्रामैकचाका-जनि—
स्तद्ग्रामस्य समीपमत्र शिवकं लिङ्गं 'मयूरेश्वरः' ।
अद्यत्वे शिवलिङ्गनामपदतो ग्रामोऽपि 'मोरेश्वरो'
यश्चैका ननु वीरभूमिपदकस्थानास्थली विद्यते ॥ २९५॥

ओझा श्रीहरिसंज्ञकोऽस्य जनको माता च पद्मावती
नित्यो यत्र महाजनो हि जनितस्तौ वैष्णवौ दम्पती ।

तत्काले नहि सम्प्रदायलघुताप्राबल्यमासीत्तथा
प्राय: स्मार्तमतानुसारगृहिण: स्वं वैष्णवं मेनिरे ।। २९६।।

तेषां यद्यपि विष्णुरेव गृहिणाञ्चोपास्यदेव: परं
तन्मुख्यार्चनया तथाहि समये देवान्तराऽऽसेवनम् ।
काले वैष्णवशैवमध्यकलहो यत्र स्वत: श्रूयते
सावस्था नहि विद्यते स्म जनतामध्ये निमायिस्थले ।। २९७।।

संख्या चास्त्यधिकं शिवार्चकनृणां, श्रीविष्णुभक्ताऽऽकरे
श्रीलिङ्गार्चनमत्र कर्तुमुचितं सर्वमिरश्रद्धया ।
अस्तु, श्रीहरिपण्डित: प्रियहर: सन्नप्यसौ वैष्णवो
भक्त्या नित्यशिवार्चनं हि कुरुते संगम्य मोरेश्वरम् ।। २९८।।

वंशे श्रीहरिपण्डितस्य सततं वृत्तिश्चलन्ती सती
पौरोहित्यपदा ततोऽयमपि तत्स्वल्पञ्च कुर्वन्नभूत् ।
नासीच्चास्य गृहे तदन्नवसनाभाव: परं हार्दिक–
न्त्वोझादम्पतिदु:खमस्ति विपुलं, संतानशून्यं गृहम् ।। २९९।।

स्वप्ने कोऽपि महाजनो वदति 'हे देवि! त्वदीयोदरा–
दुत्पन्नो भविता तथैकपुरुष: संसारमान्यो महान् ।
यद्द्वारा ध्वनितं भविष्यति भुवि श्रीकृष्णसंकीर्तनं'
लेभे तन्मधुरं प्रतीतिविषयं पद्मावती चैकदा ।। ३००।।

प्राय: सात्त्विकभावपूतमनसां शुद्धस्वभावात्तथा
प्राप्तानां शयनं निशान्तसमयस्वप्नो हि सत्यायते ।
जात: पूर्णयथार्थसत्यविषय: पद्मावतीदेविका–
स्वप्नोऽप्यत्र तथाहि गर्भमधुधा काले च पद्माऽभवत् ।। ३०१।।

माघे शुक्लदले बभौ सुतमणि: पद्मावतीगर्भतो
नित्यानन्दपदेन नामकरणं जातं यथार्थं शिशो: ।
सोऽयं नित्य-निताथि-नाममधुर: श्रीगौरभक्तात्मनि
ख्यात: श्रीबलरामसोदरसमो मान्यस्तथा पूज्यते ।। ३०२।।

नित्यानन्दशिशुश्च दर्शकदृशो: संतृप्तिशोभाम्बुधि–
स्तल्लावण्यमयं त्वमुष्य च कृशं लम्बायमानं वपु: ।
कान्तिर्दीव्यति गौरवर्णतनुतो दीर्घे सिते लोचने
बालोऽयं सुभगस्तथैव शिशुताकालान्महान् बुद्धिमान् ।। ३०३।।

विद्यारम्भणसंस्कृत: शिशुरयं वर्षे गत: पञ्चमे
संस्कारे सति चैव तत्र पठने लीनो मनोयोगत: ।

काव्ये व्याकरणे तथाल्पसमयैर्बोधोऽमुनाऽऽप्तोऽच्छक:
शालाधीतिगतिर्यथावधिमसौ क्रीडारति: सङ्गिभि: ।। ३०४।।

अन्यप्राकृतिकार्भकोपमरति: क्रीडासु नायं ह्यभूद्
बालै: शैशवकालतोऽभिनयति श्रीकृष्णलीलाकृतिम् ।
एकं कृष्णमथान्यगोपनिवहं कृत्वा स्वकीयं बलं
श्रीगोचारणतीरभोजनपुरीयात्रासु दीव्यत्ययम् ।। ३०५।।

लीलास्ता ननु केन कुत्र ललिता लोकेऽस्य वै शिक्षिता—
स्तन्नो वेत्ति जनस्त्वयञ्च कुरुते शास्त्रीयलीला: परम् ।
श्रीरामायणपावनाभिनयनं बालै: कदाप्यश्नुते
शत्रुघ्नो भरतोऽत्र वै तदितरो राम:, स्वयं लक्ष्मण: ।। ३०६।।

भूत्वाऽन्ये शिशवश्च भृत्यकपयो लीला विभिन्नस्थला:
सेवन्तेऽभिनयेन राममधुरोदन्ता मुदा नित्यश: ।
लीलायां वनचित्रकूटगमनाऽऽवासस्तथा कर्हिचिद्—
वैदेहीहरणं कदापि करुणं प्रस्तूयते शोभनम् ।। ३०७।।

श्रीमल्लक्ष्मणमूर्च्छनाभिनयने नित्य: स्वयं लक्ष्मणाऽ—
वस्थायां भुवि मेघनादशरतोऽसंज्ञ: स्थितश्चैकदा ।
नेतुं यो हनुमत्कृतो लघुशिशु: संजीवनीं प्रेषितो
निर्दिष्टाभिनयं स विस्मरति तद्भ्रंशेत मूर्च्छा कथम् ? ।। ३०८।।

मूर्च्छायां बहुकालमत्र शयितश्चासीदयं वस्तुतो
मन्दं मन्दममुष्य याति(जनताऽपश्यच्च) नाडीगति: ।
नायं जागरितोऽपि तत्र यतनाद् बालै: पिता सूचितो
धावंश्चागत एव बोधयति तं नासौ परञ्चोत्थित: ।। ३०९।।

एवन्त्वस्य पिताऽतिदु:खितमना जातस्ततो बालको
योऽभूद्रामतया रुदंश्च निकटे सस्मार वृत्तं त्वसौ ।
तं बालं द्रुतमाजुहाव ननु यो लीलाहनूमत्कृत—
स्तत्संजीवनके तु जिघ्रति तथा मूर्च्छाऽस्य भग्ना स्वत: ।। ३१०।।

बाल्यादेव तथा चकार बहुश: शास्त्रीयलीलाकृतिं
श्रेष्ठ: स्वाखिलसङ्गितश्च पठने सर्वैरयं स्वीकृत: ।
प्रायो ज्येष्ठसुतेऽधिकं हि जनको वात्सल्यवाँल्लक्ष्यते
माता किन्तु कनिष्ठसंततिमना:, क्रोडस्थदृष्टिर्धरा ।। ३११।।

आसीदेव स तीक्ष्णबुद्धिरखिलं रूपे गुणे चासम:
प्राणेभ्योऽप्यधिकं ततोऽस्य विषये ह्योझा हरि: प्रीतिमान्।

सङ्गे स्वस्य कृतोऽमुना हि सततं नो तं विनाऽऽस्ते क्षणं
मातुश्चापि विमोदकः सुचरितैरेवं गतो द्वादशे ।। ३१२।।

भक्तश्चास्ति हरिः सतां खलु, ततः प्रायो गृहे साधवः
सन्तः केऽपि भवन्ति चास्य गृहिणो, गेहं सता शुध्यति ।
अन्नं यत्किमपीह शुष्कमरसं काले भवेत्सञ्चितं
श्रद्धापूर्वकसाधुसत्कृतिकरस्तेनैव धर्मी गृही ।। ३१३।।

प्राप्तः कोऽप्यतिथिर्यतिर्हरिगृहे चाकस्मिकस्त्वेकदा
श्रद्धापूर्वकमत्र पण्डितगृही चक्रेऽस्य चातिथ्यकम् ।
पद्मा शुद्धतया पपाच विविधं भक्तादिशाकं स्वयं
भक्त्या भोजितवान् हरिर्यतिवरं संन्यासिनं सज्जनम् ।। ३१४।।

संन्यासी हरिभक्तिभावमुदितस्तस्थौ दिनञ्चाधिक—
ञ्चक्रे शक्त्यनुसारमस्य सुगृही सेवाञ्च शुश्रूषणम् ।
सोऽयं दर्शनसुन्दरो यतिवरश्चासीत्तथा रूपवान्
ज्योतिश्चैकविशेषमस्य मुखतस्तन्निःसरत्सर्वदा ।। ३१५।।

दीप्यन्ते स्म चरित्रता सरलता गम्भीरता स्वच्छता
साधोश्चाकृतितः स्वतो हि भगवद्भक्तिस्वभावस्तथा ।
श्रीसंन्यासिनि तत्र चाल्पवयसि श्रद्धाधिका ह्युद्गता,
जातः श्रीहरिपण्डितो नु सहजं तस्य प्रभावाद् वशे ।। ३१६।।

एकान्ते गृहिणं हरिं समवदत्प्रेम्णाऽतिथिश्चैकदा
'याचे पण्डितजी! भवन्तमपरां भिक्षां, कथं दास्यति ? ।
ऊचे तत्र गृही सुदीनवचनः 'किं विद्यतेऽत्र प्रभो!
निर्वाहो भवति त्वितः खलु ततो लब्धेन यत्केनचित् ।। ३१७।।

पश्यत्येव भवान् मदीयगृहके वस्त्वस्ति किं तादृशं
भिक्षायां भवते ददै च यदहं, यत्किं तथोपस्थितम् ? ।
तेष्वप्यत्र तथा न किञ्चिदपि यत्ते स्याददेयं हि मे
याचेद्देहमपीह मे, तमपि ते दातुं त्वहं प्रस्तुतः' ।। ३१८।।

गाम्भीर्येण स चाह 'पण्डित! हरे! पार्श्वेऽस्ति ते चाखिलं
यद्वाञ्छामि तु वस्तु तेऽत्र तदिदं नो वै धनं पार्थिवम् ।
किन्त्वेतद्बहुमूल्यकं खलु, ततो दानेऽस्य नूनं तवाऽऽ—
पत्तिः स्याच्च यतो बहुप्रियमिदं, वस्त्वत्र वै दीयते ।। ३१९।।

उक्तं श्रीहरिणा बुधेन 'भगवन्! शृण्वन् भवाम्यत्र यत्—
सर्वप्राणिजगत्स्वजीवनमदः सर्वाधिकं वै प्रियम् ।

प्राणानामपि चेद्भवानिह परं भिक्षां तथा याचते
तानप्यद्य हि दातुमस्मि मुदितो', मर्त्यस्य देवोऽतिथिः ॥३२०॥

स्थित्वा तत्क्षणकं यतिर्वदति तं 'प्राणान्न तेऽन्तर्गतान्
वाञ्छाम्यत्र तु याचनेन भवतो बाह्यस्थितांस्तानसून् ।
प्राणेभ्योऽप्यधिकं प्रियं निजसुतं ज्येष्ठञ्च दत्तां हि मे
योग्योऽयञ्च भविष्णुरस्ति, नियतं भव्येषु दृष्टिः सताम् ॥ ३२१॥

कर्तुञ्चेच्छति सर्वतीर्थसरितां यात्रामयं तेऽतिथि–
स्तत्रैकस्य सहायकस्य सुहृदोऽपेक्षा तथायात्रिणः ।
तीर्थेषु भ्रमणेन साधुसुहृदा श्रेयो यथास्ति ध्रुवं
कल्याणं तदमुष्य, मेऽपि भविता कार्यस्य सिद्धिस्तथा' ॥ ३२२॥

स्तब्धः श्रीहरिपण्डितस्तु वचनं श्रुत्वा च संन्यासिनः
स्वप्नेऽप्यस्य न चिन्तनं, त्वनुपमं तद्वस्तु याचेत सः ।
प्राणेभ्योऽप्यधिकं यमिच्छति पिता यस्माद् विना जीवनं
स्याच्चासंभवतुल्यमेव तदहो, चात्मा हि पुत्रः पितुः ॥३२३॥

तं पुत्रं यदि कोऽपि याचति तथा नेतुञ्च कर्तुं निजं
सर्वस्मै समयाय, तर्हि स पिता दुःखी कियान् वै भवेत्? ।
एतस्यानुमितिं तथा सहृदयः स्नेही पितैव क्रियात्–
सा चान्यस्य नरस्य बुद्धितलतो बाह्या हि भावस्थितिः ॥ ३२४॥

विश्वामित्रमुनिस्तथावरतपा ब्रह्मर्षिरोषी परं
रामं याचितवान्नृपं दशरथं त्वल्पाय कालाय वै ।
इच्छापूर्तिरमुष्य चेन्न भवति श्रेयस्ततो नास्ति मे
नूनं राज्यकुटुम्बयोरिति नृपो वेत्ति स्म सद्धार्मिकः ॥ ३२५॥

ब्रह्मर्षेरमितप्रभावतपसोः शक्त्यापि तेजस्विन–
श्चासीदत्र स पूर्णतः परिचितः, सूर्यं न वेत्त्यत्र कः ? ।
विश्वासोऽपि दृढं तथास्य हृदये मे पुत्ररामस्य वै
विश्वामित्रसुसङ्गतौ किमपि नो चानिष्टशङ्का पुनः ॥ ३२६॥

तद्वात्सल्यवशात्ततोऽपि नृपतिः स्वीकर्तुमस्योद्यतो
नो मित्रस्य च तुष्टये ममतया वाचा सदैन्योऽवदत्– ।

२३. मुनिवर! गृहधर्मोऽतिकठोरः ।
पञ्चमहाक्रतुसेवनतायाञ्चातिथिसत्कृतिरेका
पितृ–ऋणमुक्तौ वंशवितान पुत्रस्यावश्यकता ।

देहात्प्राणात्प्रियं न चान्यत् तदपि ददै क्षणमेकम्
प्राणेभ्योऽपि प्रिया मुने हे! सर्वसुतास्ते चैके
गोस्वामिंस्तु रामप्रदाने प्रभवेन्नहि दशनृपतिः ।
रामो धर्मो मोक्षो वा किं परमात्मा,? नहि जाने
धर्मप्राणो मुक्तिप्रियश्च जीवात्मा रामाऽऽप्तः
सञ्चितवस्तुजगद्दानं स्याद् दीयते किं स्वधाता ? ।।

अन्ते चात्र नृपो वशिष्ठमुनिना मोहाब्धिपारङ्गतो
विश्वामित्रतपस्विने प्रियसुतं रामं प्रदातुं मतः ।। ३२७।।

प्राज्ञं श्रीहरिमत्र बोधयति तं तद्धर्मनिष्ठा ततो
ध्यातं तेन हि 'पुत्रदुःखसहनं दाने, त्वदानेऽशिवम् ।
संन्यासी प्रभवेच्च शापविधिना सर्वस्वनाशे तु मे
तस्माद्भावि यथा तथेप्सितसुतो देयोऽस्ति संन्यासिने' ।। ३२८।।

एवं तन्मनसा विचार्य गृहिणीपद्मावतीसन्निधिं
गत्वा सर्वमुदन्तमाह हरिजी, नारीधनं संततिः ।
नित्यानन्दमहाजनस्य जननीस्थानप्रतिष्ठा यया
सौभाग्येन तथार्जिता,विचलिता सा किं स्वधर्माद् भवेत्?।। ३२९।।

धीरा सा खलु पुत्रमोहवशतो धर्मं त्यजेन्न स्वकं
श्रुत्वैषाऽऽह तथोत्तरं दृढतया 'स्वामिन्नधीना तव ।
इच्छा या भवतो ममापि खलु सा यद्यप्यसह्यं परं
दुःखं पुत्रवियोगजं भुवि पितुर्मातुस्ततश्चाधिकम् ।। ३३०।।

लोके किन्तु पतिव्रता-सहचरी-नारी-नरार्धाङ्गिनी-
धर्मः स्वामिमनोऽनुपालनमतो भिन्नं त्वनौचित्यकम् ।
इच्छायां त्वयि सर्वथा सहमता, धर्मस्य लोपो यथा
गार्हस्थ्यस्य भवेन्न चात्र गृहिणो कार्यं तथा स्वामिना' ।। ३३१।।

लब्ध्वा श्रीहरिपण्डितेन गृहिणीहार्दं प्रियश्चात्मजो
ज्येष्ठोऽयं रुदताऽर्पितस्तु करयोः संन्यासिनश्चातिथेः ।
नित्यानन्दसुतोऽपि धर्महृदयश्चक्रेऽत्र नापत्तिकं
नायं पृष्ठमुखो ददर्श पितरौ प्रीत्याऽनुगच्छन् यतिम् ।। ३३२।।

श्रीकाशी-मथुरा-प्रयाग-यमुना-गङ्गोत्तरी-द्वारका-
श्रीरामेश्वर-रङ्गनाथ-पुरिका-केदार-बद्री-गयाः ।
श्रीनित्यो यतिसङ्गतो भ्रमितवान् तेष्वत्र तीर्थेष्वयं
श्रीमन्माधवसाधुदर्शनमहो! लेभे च तीर्थाटने ।। ३३३।।

नित्यस्तत्र च माधवेन्द्रयतित: श्रीकृष्णभक्तिं ततो
लब्ध्वा प्रेम्णि च विह्वलो व्रजमयं तस्याज्ञया चाऽऽययौ ।
अस्य ग्राहकसङ्गिसाधुयतिकस्तस्थौ क्व मार्गे कुत—
स्तत्सम्यङ्नहि चीयतेऽत्र किमपि, ह्युद्धारको लीयते ।। ३३४।।

ज्ञातं तेन ततो व्रजे, समुदित: श्रीगौरचन्द्रो नव—
द्वीपे शीतलरश्मिभिर्वितनुते शैत्यं द्वयो: पक्षयो: ।
मोहाग्नौ ज्वलतां निरन्तरमयं संसारिणां प्राणिनां
श्रीकृष्णामृतकीर्तनेन मधुरं दत्ते प्रबोधं मुदम् ।। ३३५।।

आलोके स्वत एव गौरशशिनो गन्तुं तथोत्कण्ठितं
श्रीनित्यस्य मनस्ततोऽधिकदिनं तस्थौ व्रजे नातुर: ।
लेभे द्वीपनवं प्रयागसरिता काशीशिवाऽऽलोकनात्—
साक्षाद्याति महाप्रभोर्न निकटे नित्योऽवधूतो यति: ।। ३३६।।

पूर्वं नन्दनपण्डितस्य वसतौ नित्योऽत्र गत्वा स्थितो
ज्ञातं श्रीप्रभुणा पुरैव सुहृदा तद्दिव्यदृष्ट्याऽऽत्मन: ।
भक्तान् प्रेषितवांस्ततोऽत्र नदियामध्ये तदन्वेषणे,
सामान्या जगतीह याति घटना काले विशेषात्मना ।। ३३६।।

स्नेहाकर्षणम्

२४. स्नेह: श्यामपयोधरदृष्टिद्रुतसुहृदयरसभाव:
वत्सलताऽऽस्था वृद्धार्भकयोर्ममता परिचितवर्गे
शिष्टाचारो व्यवहारो भुवि साधारणजनताया: ।
भक्तिस्रोत: प्रभुपदकमले पुण्यार्जितफलममृतम्
इह हृद्द्रवता सत्संयोगात्सिद्धि: परमा प्रीति: ।।

अस्ति प्रेम्णि तथा कियच्च विपुलं ह्याकर्षणं वस्तुतो
बिम्बं चन्द्रमसो हि खे तु सरितां स्वामी समुद्र: क्षितौ ।
चन्द्रो यत्र तिथौ समस्तकलयाऽऽकाशे युतोऽभ्युद्यत—
स्तस्यामेव परं क्षितौ जलनिधि: प्रेम्णा तथाऽऽप्यायते ।। ३३८।।

दूरे भास्करत: कियद्भगवतो भूमौ हि पद्माकर:
किन्त्वाऽऽकाशतले रवौ समुदिते फुल्लत्ययं तत्क्षणम् ।
श्रीसूर्यस्य वियोगतोऽस्य नु मनो म्लानं यथाऽऽसीच्च यत्—
स्पृष्टं सच्च तदंशुना विकसितं हर्षेण तन्माद्यति ।। ३३९।।

जाने गर्जति कुत्र वारिदघटा किन्तु क्षितौ बर्हिण:
श्रुत्वा तद्ध्वनिमत्र मत्तसदृशा नृत्यन्ति ते केकया ।
स्यान्न प्रेम्णि तथाधिकं प्रकृतितस्तावत्समाकर्षणं
नास्तित्वं जगतोऽस्य सम्भवमत: प्रेमप्रभावो महान् ।। ३४० ।।

संसारस्थितिरेव केवलमहो! प्रेम्ण्यस्ति वै निर्भरा
प्रेमैवास्ति तथेश्वरोऽत्र जगति प्रेमेश्वरश्चैव तत् ।
नृत्ये नर्तयतीह लोकनिवहं प्रेमैव नानाविधं
विश्रामस्थलमेकमेव च हृद: प्रेमात्र वै प्राणिनाम् ।। ३४१ ।।

स्वच्छान्तर्हृदि यत्र तत्प्रकटितं सत्प्रेमरूपं यदा
शान्तिश्चात्र तदैव जीवहृदये, शान्तिर्हि लक्ष्यं परम् ।
प्राकट्ये सति मानवस्य मनसि प्रेम्णश्च सत्सङ्गतो
नाज्ञेयो विषयोऽस्य कोऽपि, निखिलं प्रत्यक्षमाभासते ।। ३४२ ।।

यत्र क्वापि चराचरे जगति वा प्रेमाऽमुनाऽऽलोक्यते
तत्रैव स्वयमस्य याति हृदयं स्थाने पलाय्य द्रुतम् ।
ये प्रेमासवपानमत्तसदृशास्तत्पादयो: सन्निधौ
शान्तिस्तिष्ठति याऽत्र सा प्रभुकृपापात्रात्ममात्रस्थिति: ।। ३४३ ।।

श्रीनित्यप्रभुरत्र तीर्थमखिलं प्रेम्णैव चाकर्षितो
द्वीपेऽटंश्च समागतो,ऽमलहृद: शान्ति: प्रभुप्राप्तित: ।
अत्र श्रीप्रभुगौरभावहृदये सूत्रं विना पूर्वतो
ज्ञातञ्चास्त्यखिलं तथाहि नदियामध्ये यतिश्चागत: ।।३४४ ।।

तस्मिन्नेव दिने स्वभक्तनिवहं द्वीपेऽवधूतप्रभु—
श्रीनित्यस्य च मार्गणेऽयुजत स स्थाने प्रभु: प्रस्तुत:।
ग्रामो नो लघुमात्रको ननु नवद्वीपो, द्रुतं तैर्यत:
श्रीनित्योऽत्र तु मृग्यते स्म, न मणिर्लभ्योऽब्धितो हेलया ।।३४५ ।।

नित्येनाऽत्र न कोऽपि वै परिचितो दृष्ट्वैव यत्तं पुन—
र्जानीयाज्जगतीह कोऽपि कमपि स्पष्टं हि संयोगत: ।
पूर्णाहो नवतो नवागतमहाव्यक्तेस्तथान्वेषणे
व्यस्तौ श्रीहरिदासवाससुधियौ, नाप्तं सतोऽप्यल्पकम् ।।३४६ ।।

अन्ते चासफलौ प्रभोस्तु निकटे प्राप्तौ तथावोचतां
'द्वीपे चात्र महाजन: स निखिले गत्वा गृहेऽन्वेषित: ।
दृष्ट: सर्वविधस्वभाववसतौ लब्धोऽस्य गन्धोऽपि नो
सम्प्रत्यत्र च किं प्रभो! क्व गमनं कार्यंतथाऽऽज्ञापय ।।३४७ ।।

श्रुत्वा तन्मुखतो वचः प्रभुरिदं पश्यंश्च मन्दस्मितः
सर्वानत्र जगाद 'मे गतनिशि स्वप्नायिता सूचना ।
द्वीपे चात्र महाजनः स नियतं प्राप्तो, निवासस्य मे
सङ्केतं जनताञ्च पृच्छति, यती राध्नोति सर्वं गृहम् ।।३४८।।

अस्त्वेकं कुरु कर्म, तं यतिवरं सर्वे मिलित्वा वयं
यामाऽन्वेष्टुमि'दं प्रगाय तरसा यातुं प्रभुश्चोत्थितः ।
भक्ता वासगदादयोऽपि तमनु प्रायांस्त्ववक्रं प्रभु—
र्यातो नन्दनपण्डितस्य वसतिं तैर्दृष्टमत्राद्भुतम् ।। ३४९।।

एकः साधुमहाजनोऽखिलगृहं दिव्यप्रभाऽऽलोकितं
कृत्वा स्वामिततेजसा विलसति स्थानेऽत्र पद्मासने ।
तस्य श्रीमुखमण्डले तु न रविग्रीष्मप्रभाचण्डता
शान्तिः शारदचन्द्रसौम्यकिरणैस्तुल्या मनोहारिणी ।। ३५०।।

चक्रे तस्य महाजनस्य पदयोर्भक्तैः समं वन्दनं
गौराङ्गश्च ततोऽत्र भावरसधिः शान्तं न्यसीदत्प्रभुः ।
केनाप्यत्र न कोऽपि संवदति, यज्ज्ञातौ हि वार्ताक्रमो,
नित्यानन्दविलोचने तु पिबतो गौराङ्गचन्द्राननम् ।। ३५१।।

भक्तैर्दृष्टमहो! निमेषपतनं नास्त्येव तच्चक्षुषो—
र्मुग्धास्ते निखिलास्तथास्थिरतया पश्यन्ति नित्यप्रभुम् ।
तत्र श्रीप्रभुणा कृतं स्वमनसि श्रीनित्यभावोऽधुना
भक्तानां स्फुटमस्तु चात्र, महिमा प्रेम्णः परैः स्वाद्यते ।। ३५२।।

भावोद्दीपनमस्य सत्त्वजनितं प्रेमप्रसङ्गश्रुते—
र्दृष्ट्वा भक्तगणोऽत्र साधुमनसो जानातु गूढस्थितिम् ।
श्रीवासं स्तुतिपद्यकं नुदति तद्गातुं शनैः श्रीप्रभु—
'र्बर्हापीड'मनोज्ञपद्यममृतं गौराप्तवासो जगौ ।। ३५३।।

२५. **नटवरनागरवृन्दारण्यं मधुररसस्मृतिशरणम् ।**
बर्हमुकुटनटवेषमनोहरसुमनोभूषितकर्णः
कनककपिशवसनो विजयन्तीं मालाञ्च श्रयमाणः ।
अधरसुधापूरितमुरलीबिलगोपश्लोकितकीर्तिः
श्रीपदरमणाद् वृन्दाविपिनात्पदमेकं नहि गच्छति ।।

श्रीमद्भागवतात्मसारदशमस्कन्धस्य पद्येऽत्र त—
न्माधुर्यं कियदस्ति ?, तस्य पदतो व्यक्तिक्रियाऽसम्भवा ।
एतत्संस्कृतकाव्यभावरसिकः प्रेमी च बोद्धुं क्षमः
पद्यं भागवतप्रचाररसनामूलं तदाहुर्व्रजे ।। ३५४।।

वार्ताऽऽसीदियमत्र यद्भगवतो व्यासस्य पुत्रः शुको
बाल्यादेव विरक्तभावहृदयात्त्यक्त्वा पितुः सन्निधिम् ।
घोरेऽभूद्विपिने तथैव विचरन् वेषेऽवधूते सदा,
काले भागवतस्य चात्र रचने श्रीव्यासदेवो रतः ।। ३५५ ।।

तस्याधीतिमयं करोतु जनकाऽऽकांक्षा, परं दुह्यते
यावद्गौस्तु ततोऽधिकञ्च समयं स्थाता न चैकत्र यः ।
किं स व्याससहस्रपद्यपठने तिष्ठेद्विरक्तः पुन–
र्वाञ्छाऽतिष्ठदतः स्वकीयमनसि श्रीव्यासदेवस्य सा ।। ३५६ ।।

घोरे तत्र वने कुशांश्च समिधो नेतुं हि गच्छन्ति ते
शिष्या व्यासमुनेः परञ्च ददृशुर्व्याघ्रं तथैकाहनि ।
तद्भीताः स्वगुरुं वदन्ति 'विपिने गच्छेम नो निर्जने,
व्याघ्रो नो मिलितस्ततो ननु वयं भीताश्च वर्तामहे' ।। ३५७ ।।

शिष्याणां वचनं निशम्य भगवान् व्यासो मनाक् सस्मित–
स्तानूचे क्षणतो विचार्य मधुरं 'व्याघ्राद्भयं वोऽस्ति किम्? ।
एकं मंत्रमहन्तु तादृशमतो विज्ञापयामीह वो
जन्तुः कोऽपि न हिंसकोऽस्य निकटे भूयात्प्रभावाद् ध्रुवम्' ।।३५८।।

विश्वस्ता गुरुवाक्यतः परदिने सन्ध्यानिवृत्ताश्च ते
प्राप्ता हिंसकजन्तुवारकजपं नेतुं गुरोः सन्निधौ ।
शिष्या बद्धकरास्तथा गुरुपदे सन्त्यत्र जिज्ञासवो
'बर्हापीड'जपाय तच्च भगवान् व्यासोऽत्र पद्यं ददौ ।।३५९।।

श्रद्धाभक्तिहृदा च कण्ठनिहितं पद्यं कृतं तैस्तथाऽ–
रण्ये यान्ति यदा स्वरेण मिलिता गायन्ति पद्यं तदा ।
तेषां नीरवनिर्जनं ननु वनं गानेन गुञ्जद् बभौ
पद्यस्यात्र तथामधुप्रतिरवो दीर्घक्षणं श्रूयते ।। ३६० ।।

स्थाने तत्र शुकोऽवधूतमघवा प्राप्तो भ्रमंश्चैकदा
मुग्धः श्लोकमिमं निशम्य सुमतिः शिष्यान् समेत्यावदत्।
'युष्माभिः क्व चितं सुपद्यममुकं',? 'मंत्रोपदेशं ददौ
सुश्लोकं भगवान् गुरुः कुलपतिः श्रीव्यासदेवो हि नः ।। ३६१ ।।

आगन्ता नहि हिंसकोऽत्र सविधे चास्य प्रभावाद्वने',
तत्पद्यान्तरलीननिर्मलरसञ्चानन्तमत्यामृतम् ।
पीत्वा श्रीभगवाञ्छुकः सहृदयो जातो हि मत्तोपमो
विस्मृत्य त्ववधूतताऽऽचरणकं सर्वं निजं धावितः ।।३६२।।

आप्तं पाठयितुञ्च पद्यमिदकं व्यासं गुरुं याचते
मत्तं प्रेम्णि तथाहि हंसपरमं लब्ध्वा विरक्तं सुतम् ।
प्रीतस्तेन भृशं पिताऽऽत्मजशुकं नीत्वाऽवदत्तं रहो
वात्सल्येन शनैः 'सुत! त्वमधुनाऽनन्तं पठ स्वादुकम् ।।३६३।।

बर्हापीडसहस्रकाष्टदशकश्लोकैर्मया निर्मितं
श्रीहंसप्रियसंहितैव परमा श्रीमत्पुराणं महत्' ।
ऊचे त्वाग्रहपूर्वकं 'नहि पितस्तत्पद्यमात्रं वद'
श्रीव्यासोऽत्र तदेव पद्यमपठत्तेनापि हृत्स्थं कृतम् ।।३६४।।

गायन् पद्यमसौ तदेव च सदाऽरण्येऽभवद्विभ्रमन्,
कृष्णप्रेम तथाऽऽसवस्तु, रसनास्पर्शोऽस्य चाल्पोऽपि यत्।
तत्त्यागो नहि संभवः पुनरपि स्वादप्रियस्याऽऽत्मनो,
वाञ्छेत्त्यागममुष्य चेदपि नरो, गृह्णाति तं तत्स्वयम् ।।३६५।।

जाता तन्मधुतामनोज्ञमदिराऽऽसक्तिः शुकस्यापि सा
श्रीमद्भागवतश्रुतौ स निरतस्त्यक्त्वाऽवधूताऽऽग्रहम् ।
साङ्गोपाङ्गतया पितुश्चरणतोऽधीत्यैव तन्निर्ययौ
श्रीव्यासो भगवांस्ततोहि भणति, 'प्रेष्ठः सतां श्रीहरिः ।।३६६।।

२६. विक्रम! नमो नमस्ते सततम् ।
बद्धो जीवो निजसंस्कारे कथं स्वभावं तनुताम् ?
इह स्वप्रकृतौ न प्रभुताऽस्य किमनन्ताया वार्ता ? ।
ज्ञाने कर्मणि सिध्यति योगी, भोगी रोगी क्व यातु ?
रागो दैन्यं त्वयि संगच्छेत्कृपया सिद्धिः सरला ।।

वैशिष्ट्यं त्विदमेव तद्भगवतश्चैकं गुणानां महद्
ग्रन्थिर्यस्य हृदश्च संशयतमो भिन्नो हतं मूलतः ।
नष्टः कर्मचयश्च तेऽपि मुनयः कुर्वन्ति हेतुं विना
भक्तिं तेषु गुणेषु, चास्तु न कथं, राजा रसानां स वै ।।३६७।।

उत्प्लवन्तं न कोऽप्यत्र विलीनं प्रेमसागरे ।
ददर्शाद्यावधिञ्चैव प्रेमात्मा श्रीहरिस्तथा ।।३६८।।

'बर्हापीडेति' पद्यस्य महत्त्वं यस्य तादृशम् ।
श्रूयतां तस्य भावोऽपि सहृदयाः श्रुतिस्पृहाः ।।३६९।।

गोपालोऽल्पवया मम प्रियतमो वृन्दोन्मुखः सङ्गिभि—
र्गोपैर्बालभरैश्च गच्छति समं गोचारणार्थं प्रियम् ।

सर्वे कोमलकण्ठतोऽस्य यशसः कुर्वन्ति गानं परं
वंशीवादनकर्मणि स्वयमहो! मत्तः कियत्सुन्दरः ।।३७०।।

चित्ताकर्षकसुन्दरं नटसमं सम्पूर्णकायेक्षणं
शीर्षे राजति बर्हिपिच्छमुकुटं तत्कर्णयोः कर्णिके ।
देहे सुन्दरपीतम्बरमहो! स्वर्णप्रभं धूयते
श्रीमाला विजयन्तिकाऽकस्ति सुगले, वक्रेऽल्पमक्षिभ्रुवौ ।।३७१।।

वक्रं पूरयते निजाधररसैः श्रीवेणुरन्ध्रं स्थितो,
रन्ध्रेभ्योऽखिलविश्वमोहनरवस्तेभ्यस्तथा श्रूयते ।
पृष्ठे यान्ति यशोदनन्दतनयश्रीकीर्तिगानप्रिया
गोपाला, मुरलीधरः स पदकैर्वृन्दां पुनाति व्रजम् ।।३७२।।

श्रुत्वा भावमिमं यदा हि जगतश्चोन्मादकं 'बर्हिणो'
मत्तः प्रेम्णि शुकोऽवधूततिलकोऽप्यासीत्तथा किं पुनः ।
अस्माकं प्रभुभावकः सहृदयः स्थानेऽवधूतप्रभु—
र्नित्यानन्दयतिः स्वभावनियतस्तिष्ठेद्रसे भावुकः ? ।।३७३।।

श्रीवासाऽऽननिःसृतं श्रुतिहृदोर्माधुर्यमोदाम्बुधिं
बर्हापीडनटाकृतिस्मृतिनिधिं श्रुत्वैव पद्यं त्विदम् ।
मूर्च्छातः पतितस्त्वयं भुवि तथा वास नुनोद प्रभु—
र्भूयस्तत्पठितुं, द्वितीयपठने जाते च वासाऽननात् ।।३७४।।

नित्यानन्दयतिश्चकार सततं हुंकारमुच्चैस्तथा
वाष्पं तस्य ससार नेत्रयुगलात्सर्वाङ्गरोमोद्गतिः ।
स्वेदार्द्रञ्च वपुर्ननर्त स यथोन्मादी तथाप्रीतित—
श्चक्रे कण्ठगतं प्रभुर्यतिवरं, स्नेहः स्वतः स्रंसते ।।३७५।।

अन्योन्यं परिरम्भणञ्च कुरुतश्चोभौ महामानवौ
नित्यः प्रेम्णि नचतनो ननु पदे यातः कुतोऽस्य क्व ते?।
उच्चै रोदिति विह्वलस्तु कथयन् 'हा कृष्ण! हा कृष्ण! तन्—
मध्येरोदनमत्र हुंकृतिमसौ दीर्घं करोत्यद्भुतम् ।।३७६।।

कम्पन्ते दलवच्च हुंकृतिरवं श्रुत्वापि भक्तास्ततः
सर्वे काष्ठकलोपमाः स्थिरतया सन्त्यत्र मौनस्थिताः ।
भ्रातुः स्वस्य निमायिनः स पतितः क्रोडे ततो मूर्च्छितो
नित्यानन्दशिरः स्वकोमलकरस्पर्शेन लेभे प्रभुः ।।३७७।।

स्पर्शेन प्रकृतिं गतः स परमानन्दानुभूत्या समं
स्वस्थं तं समवाप्य दीनहृदयो नित्यं प्रभुर्भाषते ।

'श्रीपादाद्य शिर:सु ते पदरजो धृत्वा हि धन्या वयं
द्वीपे ते वरभागिनोऽत्र विहिता दत्वा निजं दर्शनम् ।।३७८।।

लाभोऽस्मादृशगेहिनां कथमहो! स्यात्तेऽवधूतप्रभो—
र्मण्डूको गृहकूपमध्यपतितो यातुं न शक्तो बहि: ।
सौभाग्यं तदतोऽधिकं किमपरं त्वादृङ्महामानवो
यद्याति स्वयमेव दर्शनविधौ हेतुं विनाऽनुग्रहात्' ।।३७९।।

श्रुत्वा प्रेममयं प्रभोर्निगदितं ब्रूतेऽवधूतोत्तमोऽ—
धीर: 'स्वप्रियकृष्णदर्शनमना बभ्राम भूमौ बहु ।
पुण्यस्थानपवित्रतीर्थसरितां सर्वत्र यात्रा कृता
सर्वं सात्त्विकदेवभूमिपदकं यातं तथाऽऽलोकितम् ।।३८०।।

तत्स्थानेषु परञ्च दृष्टमखिलं रिक्तं हि सिंहासनं
यात: श्रीभगवांस्तु कुत्र तदितो भक्ताश्च पृष्टा मया ।
श्रुत्वा प्रश्नमिमन्तु मे च बहवो मूका: परे विस्मिता
मत्तं केऽपि च मेनिरे स्वहृदि मां, मत्तोऽसमानो नर: ।।३८१।।

तत्प्रेम्णाऽऽतुरभावविह्वलहृदं भक्तस्तथैकश्च मां
ब्रूते (श्रीभगवान् स्फुटं समुदितो वङ्गे नवद्वीपत: ।
श्रीमत्कृष्णसुकीर्तनं प्रसरति प्रेमेन्दुनाऽम्भोनिधि,—
र्याहि त्वं शरणं तदेव नियतं शान्तिं ततो लप्स्यसे) ।।३८२।।

द्वीपे चात्र नवे ततोऽस्मि शरणं प्राप्तस्तथा दर्शनं
श्रीकृष्ण: स्वयमेव मे स्वकृपया स्थाने दयालुर्ददौ ।
कर्ता सम्प्रति मां तथास्वशरणे वेत्तु स्वयं नोऽथवा,'
क्रोडे चास्य तथा प्रगाय पतितो गौरस्य नित्योऽर्पित: ।।३८३।।

मन्दं मन्दतया प्रभुस्तमवदच्चोत्थाप्य नम्रं वच—
'स्त्वञ्चासि स्वयमीश्वरस्त्वदखिलैश्वर्यं स्फुटं लक्ष्यते ।
एवं मे स्तुतितो हि वञ्चनमहो!, त्वय्येव ते सद्गुणा—
स्तत्साधारणजीवमात्रमहकं त्वच्छ्रीकृपायाचक:' ।।३८४।।

तत्संवादमिमञ्च भक्तनिवहस्तन्मंत्रमुग्धस्तथा
श्रृण्वन्मौनतया स्थितश्च निकटे लीनो रसे विस्मये ।
श्रीवासं शनकैस्तु पृच्छति तदा गुप्तो मुरारिर्द्वयो:
को ज्येष्ठस्त्वनयो: प्रियश्च ननु को न ज्ञायते वार्तया? ।।३८५।।

श्रीवासोऽपि तथैव मन्दमवदत्'पप्रच्छ कश्चिच्छिवं
गत्वा (तेऽस्ति पिता हि क:) शिववच(स्त्रैलोक्यनाथो हरि:)।

विष्णुश्चैत्य स एव पृच्छति (पिता ते कोऽस्ति) तत्सस्मितं
तेनोक्तं हरिणा (जगन्मम पिता देवाधिदेवः शिवः) ।।३८६।।

एवं तत्प्रभवन्ति केवलममी ज्ञातुं त्वमीषां स्वकां
लीलां, वेत्तु परश्च कोऽपि किमहो? तत्प्रेम सज्जीवनम्' ।
लीलास्ताश्च सविस्मयं निजगृहे पश्यत्यसौ नन्दना–
चार्यः प्रेमसमुद्रकेऽत्र वितता यत्रोर्मयः प्रेमिणोः ।।३८७।।

चेतोद्रावकरोदनध्वनिभरैर्गेहञ्च तद्गुञ्जितं
पश्यन्ती–पदतो ह्युभौ नरवरौ जाने लपन्तौ न किम् ? ।
शक्तौ केवलमस्य मर्म सुहृदौ ज्ञातुञ्च तावेव तत्–
सामान्यस्य तु वैखरी–पदविदो लोकस्य बुद्धेर्बहिः ।।३८८।।

व्यासपूजा

२७. **भजनं भागवतं त्विह सततं तच्छरणागतमनसाम् ।**
जीवो नानायोनिषु भ्रमति तत्तद्वासनया सह
प्रभुकरुणासंतानितजाले जगत्यभीष्टं लभते ।
तेजःसम्मुखपतगोत्पतनं स्वप्रियतममभिसरणम्
निजविह्वलजीवेभ्यो भवति स्निग्धप्रभुरतिविकलः ।।

सन्देहच्छलवञ्चनादिजगतां प्रेम्णः पथि व्यापके
पात्रापात्रविभेदभावगणना, स्थानञ्च नैवास्ति वै ।
नात्राहो! कुलगोत्रजातिवरणच्छन्ना विचारस्थिति–
र्नापि स्थावरजङ्गमस्थितिभिदा, प्रेमाऽद्भुता भूमिका ।।३८९।।

प्रेमाऽन्धो भवतीति लोकमुखतः प्रायस्ततः श्रूयते
किन्त्वेवं वदिता स्वयं भ्रमपथे प्रेमास्ति चान्धं न तत् ।
अन्यत्सर्वमिहान्धमस्ति नियतं प्रेमातिरिक्तं भुवि,
प्रेमाऽमोघशरस्तथेह जगति व्यर्थप्रयोगो न यः ।।३९०।।

२८. **प्रेमा सूत्रं सूक्ष्मं मधुरं, यद्बद्धं जगदखिलम् ।**
सदैव प्रेमशरप्रयोगः समुचितलक्ष्ये तिष्ठति
यत्कुत्रापि निलीनं स्वत्वं प्रेम ततस्तन्मृगयति ।
ततः सुभाषितमत्र प्रथितं 'तृणं तृणेन तु मिलितम्'
तस्यांशस्तत्पार्श्वे यातः प्रेमोभययोजयिता ।।

प्रेम्णो व्यापकतां विलक्ष्य वितते धर्मे सतां भारते
काप्येकैव न पद्धतिर्हि नियता चोपासनायास्ततः ।
यत्राकर्षणमस्तु शुद्धहृदये यस्य स्वतः स्वीकृति—
स्तस्यैवार्चनचिन्तनादिभजनात्प्रेमाऽन्ततो गम्यते ।।३९१।।

चिन्वत्र त्वमुपास्यकं स्वहृदि स स्थाप्यः प्रियः कोऽपि तन्—
नौकाया भवसागराच्च तरणं भावि ध्रुवं हेलया ।
पत्नी ध्यानरता भवेच्च भगवद्भावाऽत्र पत्यौ तथा
शिष्यो ब्रह्मसरूपमेव गुरुकं वन्देत मत्वा हृदा ।।३९२।।

एतत्सर्वफलं ततोऽत्र भविता चान्ते तथैकं ध्रुवं
गन्तारो निखिलास्तथा जगति वै स्वाभीष्टकञ्चान्तिमम् ।
सर्वेषां प्रभुपादपद्मशरणप्राप्तिः स्वभावानुगा
मुक्तिर्वा मिलिता तथेष्यति लयं दुःखं तथाऽऽत्यन्तिकम् ।।३९३।।

एषा त्वस्ति सचेतनाकृतिवति प्रेमक्रिया पद्धति—
र्धर्मे च प्रथिते सनातनमते त्वैतावती मान्यता ।
धातुप्रस्तरमृत्तिकासुघटिताञ्चान्येन वा कल्पितां
मूर्तिं पूजयते तथेश्वरमनाः प्रेमाऽमलं प्राप्स्यति ।।३९४।।

दम्भः कृत्रिमताऽथवा नहि भवेदस्मिन्निरीक्षेत तत्—
स्वात्मानं, प्रति कञ्चनास्ति ननु मे पूर्णोऽनुरागो न वा ।
पूर्णं प्रेम तु कञ्चन प्रति यदि क्रान्तं जनस्यात्र त—
त्कल्याणं नियतञ्च तस्य जगतीसर्वस्वमेवास्य तत् ।।३९५।।

नित्यानन्दशिशुर्विहाय पितरौ वर्षे गृहाद् द्वादशे
चैवाल्पे वयसि श्रितो यतिगुरुं संन्यासिनं निःसृतः ।
त्यक्त्वैनं स यतिस्तु कुत्र चलितः किञ्चिन्न तज्ज्ञायते
किन्त्वेतत्खलु निश्चितं यतिकृते जाता रतिः साऽस्य नो ।।३९६।।

नो जाता गुरुभावनापि च ततो नित्यस्य तस्मिन् यतौ
प्रायो विंशसमाश्च रिक्तहृदयो नित्यस्तु तीर्थेऽभ्रमत् ।
यत्प्रेष्ठस्य कृते मनोऽस्य विकलं प्राप्तो न कुत्रापि स,
श्रीगौरप्रभुनाम्नि कर्णविषये, चेतोऽस्य चान्दोलितम् ।।३९७।।

गौराऽऽलोकनविह्वलः स चलितो द्वीपोन्मुखः सत्वरं
गौरोऽस्य स्वयमद्य नन्दनगृहं लब्ध्वा ददौ दर्शनम् ।
पूर्णा दर्शनमात्रतश्चिरमनोवाञ्छा सतो वस्तुतो
भूमौ यद्भ्रमणं स्वतोऽद्य मिलितं तद्वस्तु लोकोत्तरम् ।।३९८।।

संन्यासी स्वयमस्ति, सम्प्रति परं गौरो गृहस्थाश्रमी
ज्येष्ठो वर्षदशैकतश्च वयसा प्रीतौ विचारस्तु नो ।
श्रीमद्गौरमहाप्रभौ मृदुहृदा स्वात्माऽर्पित: सर्वतो
ज्येष्ठं सोदर तुल्यमेतमकृत स्वान्तो निमायी निजम् ।।३९९।।

नित्यानन्दमसौ च नन्दनगृहान्नीत्वा स्वसङ्गे प्रभु:
श्रीगौरो निजभक्तमण्डलयुत: श्रीवासगेहं ययौ ।
तत्स्थाने गत एव भक्तनिवहैर्नित्यातिथिप्राप्तितो
भावावेशगतैर्नवीनमनसाऽऽरब्धञ्च संकीर्तनम् ।।४००।।

उच्चै: कीर्तनमज्जिता: प्रभुहृदो भक्तास्तथा विह्वला:
प्रेमाक्ता 'हरिबोल' दीर्घनिनदैर्गायन्ति नृत्यन्ति च ।
आनन्दो बहु कीर्तनेऽद्यघटिते दीव्यन् प्रतीतिं गतो
मन्ये प्रेमविभक्तभक्तनिकरै: स्वं विस्मृतं पूर्णत: ।।४०१।।

एतावत्समयं बभूव मधुरो गौर: प्रशान्त:, परं
तस्थौ सम्प्रति संयतोऽत्र ललितो नो, तत्स्वभक्तै: समम् ।
विस्मृत्यापि तनुस्मृतिं हरि—हरिध्यानं स कुर्वन् प्रभु—
र्नित्यानन्दकरद्वयं प्रमुदितो धृत्वा ननर्तोच्चकै: ।।४०२।।

नित्योऽपि प्रभुणेङ्गितप्रतिमया तुल्योऽत्र नृत्यन् बभौ
क: शक्तश्च्छविवर्णनेऽद्भुतमये तात्कालिके तद्द्वयो: ।
आसीन्मंत्रविमुग्धभक्तनिकर: पश्यंस्तथा नृत्यतो:
शृङ्गारप्रकृतेर्विभक्तरमणं प्रेमिद्वयावस्थितौ ।।४०३।।

नो शक्ता: करतालवाद्यधरणे भक्ताश्च तद्वादका
मञ्जीरादिमृदङ्गवादनमहो! सन्नञ्च सङ्कोचितम् ।
नास्ते वाद्यरवोऽद्य कीर्तनमहे सर्वे जडाभा: स्थिता
माधुर्यन्तु निमायिनित्यघटितं नृत्यं पिबन्ति द्रवम् ।।४०४।।

नित्यालिङ्गनमत्र नृत्यकलया चक्रे निमायी ततो
लब्ध्वा तत्परिरम्भणं भुवि गतो नित्यस्तथा मूर्च्छित: ।
सङ्गेनैव निमायिवस्तु ददृशे चैतन्यशून्योपमं,
योगात्क्रीडति चेतनोऽत्र विलयेऽव्यक्ते न तत्क्रीडनम् ।।४०५।।

उत्थाय क्षणतो बलेन तरसा सिंहासने श्रीप्रभो:
श्रीगौरो निषसाद सम्प्रति बलाऽऽवेशप्रतीतिस्तनौ ।
भावे क्रोशति दीर्घमत्र वदितै,वं 'वारुणी-वारुणी'
'स्वान्त: साऽस्ति तवैव भावरसधेर्यामिद्य जिज्ञाससे' ।।४०६।।

वासो बद्धकरो जगाद 'भविता यस्मिंश्च तेऽनुग्रहः
पीत्वा तां स हि वारुणीं भवपथे मत्तोऽत्र पान्थो भवेत्' ।
भावावेशमिमं प्रभोः शमयितुं भक्तस्तथैको ददौ
गाङ्गं वारि च काचपात्रनिहितं, पात्रे समे सोऽसमः ।।४०७।।

जातोऽल्पं प्रकृतिस्थभावमधुना पीत्वा च गङ्गाजलं
नित्यानन्दमबोधयत्स्वयमसौ धृत्वा कराभ्यां प्रभुः ।
एवं भक्तगणेन तत्र दिवसे संकीर्तनाम्भोनिधे—
स्तद्भ्रातृद्वयनृत्यदर्शनसुखाऽऽनन्दोऽद्भुतं सञ्चितः ।।४०८।।

श्रीवास्य गृहे तथैव विहितो नित्यस्य वासः स्थिरः
सङ्गे स्वस्य नितायिबन्धुमपरं निन्ये निमायी गृहे ।
ऊचे मातरमेत्य वत्सलशचीं 'मातोऽधुना पश्य ते
प्रत्यावृत्य समागतोऽपरसुतो, मे विश्वरूपोऽग्रजः ।।४०९।।

आसीस्त्वं बहु तत्कृतेऽत्र रुदती श्रीदेवकीसन्निभा'
माता वास्तवमेव तत्र समये तद्विश्वरूपाकृतिम् ।
नित्यानन्दविभौ ददर्श परितस्तद्भावनाऽन्तक्षणं
सोभौ नित्यनिमायिनौ समतया चक्रे स्वकीयात्मजौ ।।४१०।।

धृत्वा नित्यकरं स पृच्छति मृदु प्रेम्णा प्रभुश्चैकदा
'श्वोऽस्ति श्रीगुरुपूर्णिमाशुभतिथिः श्रीपाद! निष्ठात्मनाम् ।
क्व स्थानं भवितोपयुक्तनिलयं श्रीव्यासपूजाकृते' ?
'किं स्थानं नहि पूजनोचितमिदं संकीर्तनश्रीधरम्' ।।४११।।

नित्येनोक्तमथेङ्गितं विदधता श्रीवासपूजागृहं
प्रोक्तं 'शोभनमेव तेन हसता 'श्रीवास एवोचितः ।
आचार्योऽर्चनमस्य कार्यमधुना कर्ताऽखिलं पण्डितः
सामग्रीघटनं तथोत्सवभरो यातो ह्यमुष्योपरि' ।।४१२।।

ऊचे वासगृही मुदं प्रकटयन् 'भारस्य वार्ताऽस्ति किं,?
सामग्री ननु पूजनस्य सकला गेहे तथोपस्थिता ।
वस्त्वन्यत्कदलीफलञ्च कुसुमञ्चाम्रस्य वै पल्लवाः
कर्ताऽद्यैव बहिश्च होमसमिधश्चैषां जनैः सञ्चयम् ।।४१३।।

एतस्मादतिरिक्तवस्तु वदतु ह्यावश्यकं यद्भवेद्',
'ब्रूयां किं तदितो भवान् स्वयमिहाऽऽचार्यो धिया तच्चिनु ।
गङ्गास्नानविधौ चलन्तु समयो यातो महांश्चाधुना',
भक्तौ कर्मसमाप्तिरत्र सुलभं तत्पादशौचं सरित् ।।४१४।।

श्रीवासश्च गदाधरश्च निखिला भक्ता मुरारिस्तथा
गङ्गास्नाननिमित्तका: प्रचलिता द्वाभ्यां सहात्र श्रुते ।
नित्यस्य प्रकृतिस्तु बालसदृशी कूर्दन् स मार्गेऽसर–
न्मध्येगाङ्गजलं गतो यदि ततो नायाति भूयो बहि: ।।४१५।।

होरां यावदसौ जले तलगत: क्रीडाप्रियो लीयते
धारायां बहु दूरमेव सरति ह्युत्तानगत्या वहन् ।
भक्तै: स्नानमसावपि प्रियतरं कुर्वन् तदानीं क्षणा–
द्दृष्ट्वा चाम्बुगतं तथैकमकरं धर्तुं तमेवासरत् ।।४१६।।

तद्धा! हेति विधाय वाससुमना: क्रोशत्ययं कस्य तु
श्रोता कुत्र तदग्र एव सरति, प्रेमाऽभयं सर्वत: ।
श्रीवासानुनयाद्यदा स्वयममुं गौराङ्ग एवावदत्–
तर्ह्येवाद्य पराङ्मुखोऽभवदसौ, मन्ताऽवधूत: स्वत: ।।४१७।।

सर्वं कर्म विचित्रमस्य, तदसौ रात्रौ गतायाञ्च, नो
जाने दण्डकमण्डलुप्रभृतिकं मत्वाऽभनक् किं स्वकम् ?।
पप्रच्छ प्रभुरत्र कारणममुं मूकोऽवधूतोऽभव–
च्चित्वा तत्प्रभुणा प्रवाहितमिदं गङ्गाहृदि श्रद्धया ।।४१८।।

सर्वे भक्तजना विधाय मुदिता: स्नानञ्च संध्याविधिं
प्राप्ता: श्रीगुरुपूर्णिमातिथिदिने श्रीवासविद्वद्गृहे ।
श्रीवासोऽद्य ससङ्ग पूजनगृहं स्वं पण्डितोऽत्यन्तकं,
स्थाने वन्दनमालिका विलसति स्थाने मनोहारिणी ।।४१९।।

द्वारे चात्र लसन्ति भद्रकदलीस्तम्भाश्च सम्पूर्णतो
गेहं गोमयलेपितं वरपटं तत्राऽऽस्तृतं सुन्दरम् ।
सर्वस्तत्र ससाद भक्तनिवह: श्रीवासपीठाऽऽमुख:
पीठे चोन्नतभूमिभागनिहिते मूर्तिर्मुने: शोभते ।।४२०।।

सामग्री सकलाऽग्रतोऽर्चनविधे: स्थालेष्वनेकेषु च
न्यस्तान्यत्र फलानि, गेहघटितं मिष्टान्नकञ्चान्यत: ।
स्थाल्याञ्चाक्षतधूपदीपसुमनस्ताम्बूलपूगीफलं
नैवेद्यं कुसुमस्रजोऽन्यविविधं भात्यर्चनासाधनम् ।।४२१।।

आचार्याऽऽसनमास्तृतं प्रमुखत: श्रीपीठतो दक्षिणे
श्रीवासोऽर्चनपद्धतिं निजकरे गृह्णंश्च भक्ताऽऽग्रहम् ।
आचार्याऽऽसनमास्थित:, सविधिकं व्यासोऽखिलैरर्चितो
वासेनेङ्गित एव पूजनविधौ नित्योऽधुना प्रस्तुत: ।।४२२।।

नित्यानन्दकरे ददत्स्रजमतो वासोऽवदत्पण्डित:
'श्रीपाद! स्रजमत्र चार्पय शुभां श्रीव्यासचित्रेऽधुना' ।
श्रीव्यासेऽपि तथेदमुक्तवति न व्यासाय मालाऽर्पिता
नित्यानन्दयति: स्रजं निजकरे मूको दधत्संयत: ।।४२३।।

सत्येवं पुनरेव वासविबुधो दीर्घं मनागुक्तवान्
'श्रीपादात्र कथं स्थिरोऽर्पयसि नो मालां स्वहस्तस्थिताम्?' ।
मूर्ति: कापि यथा चलोपलमयी धृत्वा कराभ्यां स्रजं
नित्यानन्दविभुस्तथैव जडवज्जानेऽश्रृणोन्नो मनाक् ।।४२४।।

श्रीवासोऽत्र तदाकुलो ध्रुवमयं नित्यो ग्रहीता न नो
वाचं, बोधयति प्रभु: स्वयममुं मन्ता ततो बोधित: ।
दूरे संस्थितमत्र पण्डितगृही चाहूय चाह प्रभुं
'व्यासायार्पयति स्रजं न, समयोऽत्येत्यत्र तत्स्वं वद' ।।४२५।।

आदेशस्वरतो मनाक् प्रभुरमुं बन्धुं जगाद स्वयं
'श्रीपाद! स्रजमत्र देहि न कथं व्यासाय, पश्याधुना ।
कालोऽत्येति, तवैव चात्र निखिला भक्ता: प्रतीक्षारता—
स्तत्सम्पादय पूजनं द्रुततरं तद्भावि संकीर्तनम्' ।।४२६।।

श्रुत्वा तत्प्रभुवाक्यमत्र शयनाद्बुद्धो नितायी यति:
पश्यन् स्वं परितो यथा मृगयते मन्येऽत्र वस्त्वन्यकम् ।
दृष्ट्वेतश्च तत: स्रजं स्वकरगां व्यासाय नायं त्वदाद्
गौरस्य द्रुतमस्य मूर्ध्नि निदधौ, माला श्रियं लाति तत् ।।४२७।।

दीर्घश्यामगुडालकान्तरगताऽनल्पं बभौ स्रक् प्रभौ
भक्ता मोदविचेतना इव, परं व्रीडायुतोऽल्पं प्रभु: ।
नित्य: प्रेमविमूर्च्छितो भुवमित: प्रेमास्त्वहो! चेदृशं
गौराङ्गो हरिरेव यस्य हृदये सर्वं नितायी तथा ।।४२८।।

२९. **केवलकारुणिकश्चेतयिता साक्षी विश्वं दयते ।**
क्रीडाकौतुकसृष्टिविधाता बालसम: संहर्ता
स्थाने पुष्टिरनुग्रहवृत्तिर्जडचेतनयो: स्वामी ।
जननी जनक: सखा च बन्धुर्विद्या द्रविणं निखिलम्
नित्यानन्दप्रियगौराङ्ग! प्रभो! ममासि त्वमेव ।।

सर्वस्वं प्रभुगौर एव सुहृदो, भावानुसारं फलं
प्रत्यक्षं ह्यमुना तथाप्यधिगतं, ध्यानादसद् द्योतते ।

सा मूर्तिः पुरतोऽस्य नित्यमनसो लुप्ता सतो मानवी
गौराङ्गस्य तु षड्भुजी प्रियतमा संदृश्यते साम्प्रतम् ।।४२९।।

कान्तिर्गौरमुखस्य कोटिदिनकृत्कान्तेरपि प्यायिता
धत्ते हस्तचतुष्टयेन दरकं चक्रं गदां पद्मकम् ।
शेषाभ्यां मधुरञ्च सीरमुसलौ दृष्ट्वाऽस्य रूपाद्भुतं
स्वात्मानं कृतकृत्यमद्य मनुते नित्यो निमायिप्रभोः ।।४३०।।

तृप्तिं नैति तदीयनेत्रयुगलं तद्दर्शनाच्चाधुना
नेत्रे विस्फुटिते स्थितेऽस्य पतनं यातं निमेषस्य वै ।
कोणाभ्यां वहते तथाश्रु सततं चैतन्यशून्या तनु–
र्न श्वासश्चलति स्थितो हि मृतकस्यात्मा यथा कर्कशः ।।४३१।।

दृष्ट्वा ज्योतिरपूर्वमस्य वदने संगच्छतैवाश्रुणा
नेत्राभ्यामनुमातुमत्र सुकरञ्चासीद्यतिर्जीवति ।
भक्तानामधिकं तथास्य दशया भीतिः समुत्पादिता
श्रीवासादिसुचेष्टयापि विविधं नाप्नोदयं चेतनाम् ।।४३२।।

श्रीनित्यो नहि चोत्थितः कथमपि स्वात्मा विलोक्य प्रभु–
र्देहेऽमुष्य निजं सुकोमलकरं प्रेम्णाऽऽह सञ्चालयन् ।
'हे श्रीपाद! यतः शरीरमदधात्तत्कार्यकालोऽधुना
प्राप्तः सन्निकटः समुद्धर भुवं जागृष्व चानुग्रहात् ।।४३३।।

सर्वे तेऽत्र कृपार्थिनः, स्वकृपयोद्धर्तुं यमिच्छेद् भवां–
स्तत्कृष्णामृतमिष्टनामकिणादुद्धारमस्याटतु ।
उद्धारो भविता कथं जडहृदां, नो चेद् भवान् स्वेच्छया
लोके श्रीहरिनामकीर्तनसुधादानी तथाहैतुकः' ।।४३४।।

भग्नाऽचेतनताऽस्य तत्प्रभुकरस्पर्शादसौ साम्प्रतं
यातोऽल्पं प्रकृतौ, सचेतनममुं दृष्ट्वा जगाद प्रभुः ।
'भक्ता! व्याससुपूजनन्तु चरितं सर्वे मिलित्वाऽधुना
कुर्युस्तन्मधुरस्वरेण मधुरं श्रीकृष्णसंकीर्तनम्' ।।४३५।।

आदेशतः प्रभुसतः क्षणतश्च भक्ताः
सर्वे गृहीतकरतालपखावजाद्याः ।
प्रेम्णा सुकीर्तनरता महता जगुस्तं
मंत्रं महान्तममृतं हरिनाममिष्टम् ।।४३६।।

३०. षोडशनाममहामणिमाला कलिकालामृतमंत्रः ।
अष्टौ हरयश्चादावन्ते संपुटदिक्स्थानीयाः
रामकृष्णयोश्चतुरावृत्तिर्वारद्वयमिह मध्ये ।
अष्टौ भिन्ना प्रकृतिर्लोके भूम्यादिर्हरिमात्रम्
रामो धर्मादिः पुरुषार्थः कृष्णो दास्याद्याप्तिः ।।

तत्संकीर्तनपावनध्वनिभराच्छ्रीवासविद्वद्गृहं
गुञ्जत्यत्र निशम्य कीर्तनरवं द्वारे तथा संयुताः ।
साक्षाद्दर्शनलोलुपा हि बहवश्चागत्य लोकाः परं
रुद्धद्वारि बहिः स्थिताः श्रुतिमुदं संकीर्तनाल्लेभिरे ।।४३७।।

एवं कीर्तनमोदमग्नमनसां कस्यापि कालो नहि
ज्ञातस्तद्दिनमस्त 'मद्य कुरुत श्रीकीर्तनान्तं' प्रभुः ।
दत्वाऽऽदेशमथ प्रसादवहनं भक्तेषु चक्रे स्वयं
तस्मात्तेऽद्य महाप्रसादरसनात्प्रीता ययुः स्वं गृहम् ।।४३८।।

वासस्यैव गृहे ततोऽवसदसौ श्रीमन्नितायी प्रभु–
र्यस्मिन् स्वात्मजतुल्यवत्सलयुतौ वासस्तथा मालती ।
वर्षाणामिह विंशतिः स्वपितरौ त्यक्त्वाऽऽगतस्याभव–
न्मध्येदेशमसौ तथाऽत्र समये चासीत्सदा पर्यटन् ।।४३९।।

मातुः सौख्यमसौ पितुः पुनरपि प्रीतोऽत्र लब्ध्वा बहु
श्रीगौरोऽपि तथादरञ्च कुरुते चास्याधिकं हार्दिकम् ।
तज्ज्येष्ठाग्रजतोऽपि चाधिकमना गौरोऽत्र संलक्ष्यते
तावत्येव यथार्थतोऽत्र भवति प्रेमा निमायिव्यथः ।।४४०।।

सर्वस्वं गुरुरेव शिष्यसुमतेः शिष्यञ्च नो सेवकं
किन्तु स्वस्य सखायमत्र मनुते चेत्स्वान्तरङ्गं गुरुः ।
सत्कारस्य च भावनोभयहृदोर्नूनं तदाऽभिन्नता
श्रद्धावत्सलतामये लघुगुरौ हार्दप्रसादः स्वतः ।।४४१।।

यच्छास्त्रे गुरुशिष्ययोजनमहो! प्रोक्तं तथाऽभीप्सितं
श्रीकृष्णार्जुनयोर्विदेहशुकयोर्योगे च तद्गौरवम् ।
श्रीगौरप्रभुरेव नित्यहृदये पूज्यश्च, नित्यः सदा
गौराङ्गात्मनि, तन्महापुरुषयोर्वैशिष्ट्यमेवेदकम् ।।४४२।।

श्रीनित्योऽस्त्यतिचञ्चलः प्रकृतितो, नात्ति स्वयं पाणिना
तस्माद् भोजयतीह तं शिशुसमं वासाङ्गना मालती ।

शुष्कं तत्स्तनमेव कर्हिचिदसौ बालोपमः स्वे मुखे
दत्वा क्रोडगतश्च खेलति, तथा वात्सल्यभावस्तयोः ।।४४३।।

नित्यानन्दयतिस्तस्थौ तथा वत्सलयोर्गृहे ।
कुर्वाणो मालतीवासदम्पत्योरधिकं सुखम् ।।४४४।।

अद्वैताचार्यस्योपरि कृपा

३१. सहजं प्रेम जगति पीयूषं दूरादपि नर्तयते ।
श्यामलघनगर्जनमिह गगनाच्छुक्लापाङ्गं भ्रमयति
कुमुदचकोरीमुखलोचनयोर्हास्यसौख्यकरचन्द्रः ।
जलजं विकसति जलधिः प्रथते रविराकापतियोगात्
भविता नूनं प्रियतममिलनं, भावो बहु प्रीणयति ।।

चेत्स्वाभाविकमेव वास्तवमहो! प्रेमाऽत्र सांसारिकः
स्वार्थो नास्ति यदीह कोऽपि, नियतं तद्वस्तु लोकोत्तरम् ।
काप्यत्रोभयपक्षतो हृदि ततश्चोमिर्यथा जायते
स प्रेमा परिभाषितोऽत्र ललितं केनापि वै बिभ्यता ।।४४५।।

३२. 'इश्कं' प्रायो वदतीदमेव, मलन्निवोरसि हृदयं कश्चित् ।
'प्रेम' विकलता दिवानिशं वै, निजदुःखैरपि तत्सुखसुखिता ।।

विज्ञायानुमिनोति वक्षसि दिलं (हृदं) चाकृष्यमाणं जनः
प्रेम्णश्चैव भवेन्न वा विपदियं, तत्रापि शक्तो नहि ।
वक्तुं निश्चयपूर्वकं, स वदिता भीतो यथा निश्चये
प्रेम्णो वै परिभाषणं कलमितो याथार्थ्यतो नो भवेत् ।।४४६।।

तिष्ठञ्छान्तिपुरे शृणोति सकलां गौराङ्गलीलाकथा—
मद्वैतः सुमनाः प्रसीदति हृदा प्रेष्ठप्रशंसाश्रुतेः ।
सम्पूर्णे क्रमशश्च गौडविषये व्याप्तं यशः सौरभं
श्रुत्वा तच्च महाप्रभोः प्रियजने कोऽप्यत्र भावोदयः ।।४४७।।

आचार्यः प्रभुभक्तिभाववचनं श्रुत्वा प्रमोदे जनै—
र्लीनो नृत्यति कर्हिचित्स्वमनसि ब्रूते विपश्चित्तथा ।
'गङ्गाम्भस्तुलसीदलैर्भगवतो भक्तार्तिभङ्गात्मनो
यत्पूर्वं चिरकालमत्र विहितं पूजार्चनं निष्ठया ।।४४८।।

मन्ये तत्सफलं ममार्चनतपः (साध्यस्य सिद्धिः सतां)
तद्भक्तार्तिविनाशको हि भविता गौराङ्गविश्वम्भरः' ।
भूयः संवदति प्रधीः स्वहृदये, 'नाना निमायिप्रभोः
पूयन्ते पदसङ्गतो, न कुरुषे गत्वा निजं सार्थकम् ? ।।४४९।।

किन्तु प्रेम्णि कृपाप्रतीक्षणसुखं मिष्टं वचोऽगोचरं
तस्माच्चिन्तयते क्षणेन चलिता चात्मा कथं मे स्वयम्? ।
देवश्चेष्टतमो यदेष ननु मे ह्वाता स्वयं मामसौ',
स्वेच्छायामपि चात्र शान्तिपुरतोऽद्वैतस्तथाऽऽयाति नो ।।४५०।।

भावे श्रीप्रभुरत्र तिष्ठति यदा क्रोशत्ययं चोच्चकैः
'नाडा' तिष्ठति कुत्र?, शान्तिपुरि माञ्चाहूय लीनः स्वयम् ।
तस्यैवाद्य समागतोऽस्मि सुधियो द्वीपेऽत्र हुंकारतो
जानात्यत्र न किन्तु कोऽपि नदिया-'नाडा'-पदार्थं प्रभोः ।।४५१।।

वासो ज्ञातुमियेष दीनवचना'न्नाडा'पदार्थं यदाऽ—
'द्वैतप्रार्थनयैव सर्वजगतामुद्धारहेतुं भुवि ।
(ब्रूते तत्र तदा स्वयं प्रभुरयं) चात्रावतीर्णोऽस्म्यहं
सोऽद्वैतो गुरुरेव मेऽत्र कथने 'नाडा' पदार्थः प्रियः' ।।४५२।।

द्वीपे नित्यसमागमाच्च ववृधे गौराङ्गमोदोऽधिकं
तच्चाद्वैतवियोगमद्य तरितुं नायं प्रभुः श्रीप्रभुः ।
अद्वैतप्रभुनित्यकौ परिकरस्तम्भौ प्रधानौ प्रभोः,
क्रीडायां सहयोगिनः सहचरा लीलासु चावश्यकाः ।।४५३।।

एकान्ते च तदेकदा प्रभुरयं रामञ्च वासानुजं
सङ्केतेन नुनोद शान्तिपुरकं गन्तुं स्वभक्तप्रियः ।
लब्ध्वा चेङ्गितमस्य चातिमुदितः स्थाने रमापण्डितः
शीघ्रं शान्तिपुरं चचाल सुजनश्चाचार्यमाप्तुं ततः ।।४५४।।

प्राप्तः शान्तिपुरं रमाय्यकुटिलं त्वद्वैतगेहं ययौ,
स्वावासाद्बहिरेव पश्यति तमायान्तं गुरुः स्वाऽऽमुखम् ।
दृष्ट्वा गद्गदितः प्रसन्नहृदयोऽद्वैतः स्फुटं ज्ञातवान्
'लब्धं मेऽद्य शुभं दिनं, प्रभुपुरो गेहे सतोऽभ्यागतिः ।।४५५।।

मेऽत्रावाहनहेतवे स्वकृपया रामोऽमुना सर्जितो
विस्मृत्य प्रभुतां स्वकां स मनुते भक्तप्रतिज्ञां बहु' ।
एतस्यान्तरतो ननाम शिरसाऽऽचार्यं रमापण्डितः
प्रेमाऽऽलिङ्गनमस्य चाकृत गुरु,र्लोके नृताऽऽचारतः ।।४५६।।

लब्ध्वाऽऽलिङ्गनमस्य रामसुभगो दृष्ट्वा गुरुं सिस्मिये
मन्दं मौनमयं स्थितो, वदति तत्प्राप्य स्मयन्तं गुरुः ।
'मन्ये मां स्मृतवान् प्रभुः परमिदं ज्ञेयं कथं मेऽधुना
याथार्थ्येन स एव मे प्रियतमो वोऽत्र प्रमाणन्नु किम् ? ।।४५७।।

भूमौ कीर्तनकप्रचारकरणे पूर्वञ्च यस्य प्रभोः
प्राकट्यं हि ललाष, चायमधुनाऽऽराध्यः स एवास्ति मे' ।
'आचार्याद्य महाशयात्र विषये तावन्न विज्ञा वयं,
ज्ञातुञ्चैव भवादृशाः कुशलिनो हेतुं प्रमाणं तथा ।।४५८।।

एतद्वेद्मि तु निश्चयेन यदसौ ब्रूते भवन्तं स्मरन्
वारम्वारमथ प्रभुः,—सहृदयोऽद्वैतो हि मामाह्वयत् ।
आयातो भुवि हुंकृतेश्च वशगस्तस्यैव चिन्ताऽधिकं
लोकोद्धारकृते तदेव परिता श्रीकृष्णसंकीर्तनात्' ।। ४५९ ।।

तन्मन्दस्मितयुक्तमिष्टवचनं शृण्वन् प्रसन्नात्मनाऽ—
द्वैतः श्रीप्रभुभक्तवत्सलकृपां मत्वा हृदा स्निह्यति ।
इच्छंश्चापि मुखेन किञ्चिदपि नो वक्तुं प्रभुः पण्डितः
प्रेम्णा गद्गदितोऽवरुद्धगलको भावाद्रुदन्नाबभौ ।। ४६० ।।

आचार्यस्य विलोक्य तादृशदशां देवी च पार्श्वस्थिता
सीता चापि तथाश्रु धर्मवनिता प्रीत्या मुमोच स्फुटम् ।
दृष्ट्वा प्रेम्णि च विह्वलौ स्वपितरौ पुत्रोऽपि तद्रोदिति,
प्राज्ञास्था वनितारतिर्व्यवहृतौ बालानुकारस्थितिः ।। ४६१ ।।

आवेगस्तदनन्तरं गुरुहृदः प्रेम्णोऽल्पमन्दं गतः
शीघ्रं पूजनसाधनञ्च सकलं चित्वा सपत्नीसुतः ।
सार्धं तेन रमायिणा स चलितोऽद्वैतो नवद्वीपकं,
स्थाने माधवसौरभं सुमनसो यान्ति द्विरेफा द्रुतम् ।। ४६२ ।।

प्राप्ते द्वीपनवे रमायिणमयं ब्रूते गुरुः पण्डितः
'पश्य, श्रीप्रभुसन्निधिं न विधिनाऽनेनाद्य यास्याम्यहम् ।
अत्रैवास्मि भवामि नन्दनगृहेऽवक्रं गृहं याहि चेत्—
प्रष्टा चाऽऽगमने प्रभुर्मम तदा नात्राऽऽगतो (ब्रूहि) सः ।। ४६३ ।।

प्रीतिर्वास्तविकी त्वमुष्य यदि मां स्थानादितः स स्वयं.
कृत्वा स्वे निकटे, पदं शिरसि मे कर्ता कृपालुस्ततः ।
ज्ञास्यामि ध्रुवमस्य सौहृदमथोद्धारं विधातुं भुवः
स्थाने प्रार्थनया ममैव सुमनाः कालेऽवतीर्णः प्रभुः' ।। ४६४ ।।

आचार्यस्य तथाविधञ्च वचनं श्रुत्वा स गेहं ययौ
भक्ताश्चात्र तु वासपण्डितगृहे सायं तथैकत्रिताः ।
तत्राल्पावधितस्ततः प्रभुरपि प्राप्तो यथा दैनिकं
भावावेशगतोऽद्य किन्तु मधुरश्चैव प्रविष्टे गृहे ।।४६५।।

शीघ्रं भागवतासनं भगवदावेशेऽधिरुह्य प्रभुः
''नाडा'' शान्तिपुरात् (जगाद तरसा) प्राप्तस्तु लीनोऽधुना ।
नन्दाचार्यगृहे परीक्षणकृते, द्वीपे स्थितोऽप्यत्र मे
सोऽद्यापीच्छति भक्तसौहृदतया कर्तुं परीक्षां तथा ॥ ४६६

आह्वाता तु ममैष एव, सुहृदो भूयः परीक्षोद्यतः,
श्रुत्वा तच्च परस्परं प्रभुमुखात्पश्यन्ति भक्ता मुखम् ।
श्रीनित्यः स्मयते स्म गुप्तमनसा, गुप्तो मुरारिस्तदा
चक्रे श्रीप्रभुपूजनं सुविधिना नैवेद्यदीपादिभिः ॥ ४६७

कण्ठे चार्पितवान् सुवाससुमनोमालां प्रभोर्वासितं
ताम्बूलं वदने ददौ च रसितुं, ह्यन्ते क्रतोर्भोजनम् ।
गत्वा तत्क्षणमेव चाह गुरुकं सर्वं रमापण्डितो
वृत्तान्तञ्च निशम्य तत्र चकितोऽद्वैतो गुरुर्विस्मितः ॥ ४६८

प्रेम्णा विह्वलितः पतंश्च निपतन् वासस्य वासं त्वितो
गेहे यत्र विराजितः प्रभुरयं तत्र प्रविष्टे सति ।
अद्वैतस्य तदा प्रतीतमभवच्चालोकपूर्णं गृहं
सर्वं, राजति कोटिसूर्यसदृशाऽऽलोको यथात्राद्भुतम् ॥४६९

स स्पष्टं प्रभुमूर्तिमत्र विनयी द्रष्टुं न तेजोमयीं
शक्तः सोढुमसह्यतैजसमहद्भावं विपश्चिच्च नो ।
व्याप्तं लोचनयोः पुरस्तम इव स्थानेऽपतन्मूर्च्छितो
देहल्याः प्रभुसम्मुखेऽत्र विहितो भक्तैश्च वृद्धो गुरुः ॥४७०

प्राप्ते श्रीप्रभुसम्मुखेऽपि सुमतिश्चासीत्तथाऽचेतन—
स्तद्दीर्घश्वसनात्तयैव दशयाऽरोदीत्तथोच्चैर्गुरुः ।
वृद्धप्राज्ञतपस्विनो ननु तथाऽवस्थां विलोक्यात्र ते
चानन्दाम्बुधिमज्जिता निजलघुप्रीतिं विचार्यारुदन् ॥ ४७१

ऊचे तत्क्षणतः प्रभुर्मधुगिराऽऽ'चार्याधुनोत्तिष्ठ हे!
कोऽर्थश्चाद्य विलम्बनेन, भवतः पूर्णा मनःकामना ।
प्राप्तं सन्निकटक्षणं जगति ते दीर्घाभिलाषाफलं
तच्चोत्थाय समर्च माञ्च विधिव',त्पूजा प्रसादो द्वयोः ॥ ४७२

वाणीं प्रेममयीं प्रभोश्च तदिमां श्रुत्वा सचेता मनाग्
जातः सौम्यशिशूपमः सरलतामूर्तिः सुधीर्ब्राह्मणः ।
वृद्धः सप्ततिवर्षकः सितशिरा माधुर्यरूपप्रभो—
रद्वैतोऽत्र समुद्यतोऽर्चनविधौ, प्रेमा हि साध्यं परम् ॥ ४७३

मिश्रो यं मनुते स्म चात्मनि जगन्नाथोऽपि पूज्यं पिता
यश्चास्याग्रजविश्वरूपसुमतेर्द्वीपेऽत्र विद्यागुरुः ।
येनायञ्च सुलालितो हृदि निजक्रोडे निमायी शिशु–
र्भक्ताग्रण्यमहागुरुश्च नदियापूज्यः स एवार्चकः ॥४७४॥

यस्याऽऽयुस्तरुणस्य केवलमिदं वर्षं त्रयोविंशति–
स्तस्याऽऽदेशनतोऽद्य सेवकसमो भाग्यं स्वकीयं स्तुवन् ।
एतत्त्वेव विभूतिमत्त्वभगवत्तत्त्वञ्च यस्याग्रतः
सर्वश्चात्र लघुः स्वयञ्च सकलाऽऽराध्यः प्रभावात्स्वकात् ॥४७५॥

अद्वैतः प्रथमं सुवासितजलैः प्रक्षाल्य पादौ प्रभो–
र्दत्वार्घ्यं वरचन्दनेन ललितं श्यङ्गं समालेपितम् ।
नैवेद्याक्षतपूजनाद् वरगले कृत्वार्पणं सुस्रज–
स्ताम्बूलञ्च समर्प्य गद्गदितगीस्तुष्टाव बद्धाञ्जलिः ॥४७६॥

२३. नमनं कुर्मो वारम्वारम् ।
जीवजगद्वरनरगुरुभूसुरभजनस्वभावसुराय ।
पशुगणगृहगोकुलसंचारकपुरुषोत्तमहिततरवे
स्थावरजङ्गमपुष्टिविधायकपरमाह्लादकविभवे ।
कृष्ण! हरे! गोविन्द! मुरारे! नारायण! वासुदेव!
हे कल्याणस्वरूपमुकुन्द! नाथ! प्रिय! विश्वम्भर! ॥

'श्रीब्रह्मण्यसुराय गोद्विजजगत्कल्याणकृष्णाय ते
गोविन्दाय नमो नमः' स्तुतिपदं भूयश्च गायन् रुदन् ।
गौराङ्गं ह्यभिलक्ष्य सोऽत्र विविधं यातो यथाऽस्तं स्तुवन्
सीताऽद्वैतबुधाङ्गना प्रभुपदञ्चानर्च तस्यान्तरे ॥४७७॥

मग्नौ मूर्ध्नि तयोः स्वपादकरणाद्भावस्थितौ श्रीप्रभुः
पादस्पर्शमवाप्य तौ च रुदितः प्रीतौ प्रभोर्दम्पती ।
'आचार्य! द्रुतमेतु सम्प्रति (तदा ब्रूते समाश्वासयन्)
मामाह्लादय चात्मकीर्तनरसद्वारा विलम्बेन किम् ?' ॥४७८॥

आदेशेऽधिगते तदैव सुहृदश्चारब्धवाञ्छीप्रभोः
प्रेम्णाऽद्वैतगुरुः करद्वयमयञ्चोत्थाप्य संकीर्तनम् ।
भक्तास्तन्मिलिताः स्ववाद्यगतितः संकीर्तने मज्जिताः,
कर्ता कर्म करोति सङ्गिकरणैः प्रेम्णा भिया साक्षिणि ॥४७९॥

प्रेमावेशतया तदोच्चगतितो नृत्यत्यसौ पण्डितो
ध्यानं नास्ति तनोर्मनागपि गुरोः प्रेम्ण्यत्र वै मज्जतः ।

देहेऽद्वैतबुधस्य कीर्तनरसात्स्वेदादिभावा: शनै:
सर्वे सम्प्रति सात्त्विका: प्रकटिता:, प्रेमी हि सत्त्वाम्बुधि: ।।४८०।।

आनन्दोऽत्र विलक्षणोऽद्य रसित: सर्वैश्च संकीर्तने
यत्राद्वैतनिमायिनित्यरसिका: प्रेमस्वभावास्त्रय: ।
तत्रालौकिकसत्त्वसारलसने स्याद्विस्मय: किं सतां
ह्यन्ते प्रेमनिमज्जिता निजगृहं चेलु: क्षपाचालिता: ।।४८१।।

अद्वैताचार्यस्य श्यामसुन्दररूपदर्शनम्

३४. सिद्धि: शरणस्मृतिसत्प्रीति: तत्स्फुटताव्यवहारात् ।
जगदौचित्यं सद्व्यवहार: प्राकट्यं तत्प्रीते:
प्रीणयति प्रीतिश्चात्मानं प्रीतो जगत्समाजम् ।
परमार्थाऽऽधारो व्यवहारो यत्रोभयसमवृत्ति:
दानादानाख्यानाकर्णनभक्षणभोजनसमता
अन्योन्यं षड्विधताप्रीति: व्यवहाराश्रितशुद्धि: ।।

प्रीतौ लाघवभावनैव सुहृदां नास्ते, सदा स्वप्रियं
प्रेमी स्वोत्तममेव चात्र मनुते, भक्तप्रिय: श्रीहरि: ।
सर्वस्वं मनुते यथा निजहरिं भक्तो, हरिस्तं तथा
श्रद्धाभावममुं प्रति प्रकटयन् ब्रूते स्वयं श्रीपति: ।।४८२।।

'पृष्ठे भक्तजनस्य सर्वसुहृदश्चाटामि तत्कारणं
ह्यायात्वङ्घ्रिरजोऽस्य तन्मम तनौ पूयेय चाहं यत:' ।
भावोऽयं जगताञ्च पावनहृदामा:! पावकस्य प्रभो:,
क्रीडन्त्यत्र हि भावना भगवतो मध्ये तथा प्राणिनाम् ।।४८३।।

भक्तास्तञ्च भजन्ति चानिशमहो! ब्रूते पुन: सोऽपि वै
'यो मां भावनया यथेह भजते नूनं भजे तं तथा' ।
लीलां पश्यतु सर्वतो भगवतो विश्वैकपूज्यस्य तु
प्रेम्णश्चाति निदर्शनं किमसमं, कर्ता क्रिया कर्म तत् ।।४८४।।

यो वै स्थावरजङ्गमात्मजगतां विश्वम्भर: पालको
गच्छेत्तृप्तिमिदञ्च यस्य निखिलं संकल्पमात्रेण हि ।
ब्रूते सोऽयमदस्तु 'यत्किमपि यो भक्त्याऽत्र दत्ते च मे
प्रीतश्चाद्मि तदेव, शोभनमिदं प्रेम्णैव सर्वं जगत् ।।४८५।।

पत्रं खाद्यमथात्र नो, तु कुसुमं घ्रेयञ्च, पेयं जलं
खाद्यं केवलमन्नमेव च फलं, प्रीत्याऽऽह मत्तो हरि: ।

३५. यच्छति तुष्टिं मे प्रयतात्मा ।
वसुधाक्रोडे विस्तृतकाननानातरुपत्राणि
ऋतुमनुविकसितकमनीयाऽऽकृतिसुरभितविविधसूनानि ।
क्षुधाशमनहेतुकनैसर्गिकलघुगुरुमधुरफलानि
तृषानिवारणसाधनशीतलनिर्मलसरित्तोयानि
भक्त्या केवलमुपहृतमेतत्प्रीत्या तदप्यश्नामि ॥

'अश्नामीति' तथाक्रियैव सहसाऽऽयुक्ताऽत्र पत्रादिषु
स्थाने धन्यमथेदृशं त्वदनकं, प्रेम्णो हि चित्रं जगत् ॥ ४८६ ॥

तावद्वस्तुनि तृप्तिकारणमिदं प्रेमैव निःस्यूतकं
तत्प्रेमादनतः प्रभुश्च मुदितः, प्रेमा तथा वस्तुकम् ।
अत्राप्यस्य नियोजनं भवति तत्सर्वः पदार्थोऽत्र वै
सर्वेषां सुखदस्तथा मधुमयश्चानन्ददस्तृप्तिदः ॥ ४८७ ॥

अद्वैतो विवुधस्तदीयदिवसश्रीकीर्तनानन्तरं
भूयो द्वित्रदिनैश्च शान्तिपुरमेवायं जगाम स्वकम् ।
अद्याप्यस्य तथा प्रभुं प्रति हृदि स्थानेऽस्ति शङ्कास्थिति–
'देवोऽसौ मम कोऽपि वा ननु परो', दोलायितं तन्मनः ॥४८८ ॥

भूयश्चैकदिनेऽत्र संशयमना द्वीपे गुरुश्चाऽऽययौ
चेतोऽस्य स्वत एव यद्यपि तथाऽऽकृष्टं प्रति श्रीप्रभुम् ।
आनन्दः स्तुतिमात्रतोऽस्य सुहृदश्चित्ते गुरोर्जायते
भावोऽयं नहि शक्यतेऽत्र भवितुं विश्वासमन्तर्विना ॥ ४८९ ॥

अद्वैतः प्रकटन्तु बोधयति सोऽविश्वासमेव स्वकं
भक्तैः कृष्णकथारतोऽयमभवच्छ्रीवासगेहे प्रभुः ।
दृष्ट्वाद्वैतमथाऽऽगतं सहजनो मानाय तस्योत्थितः,
शिष्टाचारपरम्परानुसरणं कर्तुर्मनः स्वस्थता ॥ ४९० ॥

श्रद्धाभक्तियुतोऽधिकं नमति तं चाचार्यदेवं प्रभुः
सोऽप्यस्य स्वसितालकैः पदरजः पस्पर्श वै जिह्रियत् ।
प्रेमालिङ्गनदानमत्र सुमतिश्चोपस्थितानां ददौ
भक्तानां, प्रभुणा ततः सममसौ सौहार्दतः संस्थितः ॥४९१ ॥

सर्वेष्वत्र सुखं स्थितेषु वदति स्थाने स्मयंश्च प्रभुः
'श्रीसीतापतिरत्र राजति ततश्चित्ते भयं नास्ति मे ।
कामं त्वस्तु परस्य, मे न शमनं कोऽप्यत्र कर्तुं क्षमः'
(सीतानाम गुरोश्च धर्मवनिता, लक्ष्यं तथा तत्प्रभोः) ॥४९२ ॥

श्रुत्वेदमुत्तरं श्रीमान् ह्रीण इवाभवन्मनाक् ।
ऊचे विधातुमन्यत्र वार्तामियं महाप्रभुः ॥ ४९३ ॥

गाम्भीर्यं लघु कृत्रिमं ननु धरन् पश्यन्निजञ्चाभितोऽ—
द्वैतश्चाह तथाऽत्र नो रघुपतिर्ह्यास्ते यदूनां पतिः' ।
'कर्तारोऽत्र तवाऽऽश्रये हि निखिलाः श्रीकृष्णसंकीर्तनं
वाञ्छाऽऽसीच्च तथा, भवांस्तु पुरगः, किञ्चापराधोऽत्र नः'? ॥४९४॥

आचार्योत्तरपूर्वमेव वदति श्रीवासविद्वद्गृही
'स्थाने शान्तिपुरेऽत्र तिष्ठति गुरुश्चाद्वैतसंज्ञो यतः ।
द्वीपे चात्र नवेऽधुना हि नवधाभक्तिस्वरूपो भवान्
प्राकट्यं गतवान् विराजति यतो नित्यो रसाऽऽस्वादकः ॥ ४९५ ॥

अद्वैतोऽपि विहाय शान्तिपुरकं नित्यप्रमोदास्पदे
पीठे गौरनिमायिकीर्तनमनाः स्थाने त्वयं वाञ्छति ।
नित्यानन्दमयीं निजस्थितिमिह, पुष्पाय लुभ्यत्यलि—
द्वैताद्वैतमयी दशा तु विदुषो द्वैविध्यबद्धाऽधुना' ॥ ४९६ ॥

ज्ञात्वा मर्म सुगूढमत्र कथनेऽद्वैतो जगाद स्मयन्
'श्रीवासो ननु यत्र तत्सुमनसां स्थाने कथञ्चाल्पता? ।
वासे चात्र तथा श्रियो जगति वै चाकर्षणं तादृशं
ह्यायास्यन्ति शतञ्च मादृशजना यस्य प्रभावात्स्वतः' ॥ ४९७ ॥

गूढोक्त्या मुदितोऽनया च घटयन् वासस्तदाह प्रभौ,
'लक्ष्मीश्चात्र यदाऽभवन्ननु तदा, तस्या न वासोऽधुना ।
अन्तर्धानमसौ तु सम्प्रति नवद्वीपाद्गता' (तेन सा
वासोक्तिः, प्रथमा निमायिवनिता लक्ष्मी,रभिन्ना श्रियः) ॥४९८॥

श्रीवासो मयि तद्युनक्ति तरसा ज्ञात्वा जगाद प्रभु—
'ब्रूषे पण्डितजी! तथात्र किमिदं? भक्तः पदार्थः श्रियः ।
भक्तो यत्र भवादृशो विलसति श्रीस्तत्र नून भवेद्,
भक्तिः श्रीरथवा विहाय तदहो! स्थानं कुतो यास्यति?' ॥४९९॥

अत्राद्वैतवचस्'तथोचितमिदं तिष्ठेत्किमश्रीर्हरि—
द्वीपे श्रीश्च विराजतेऽत्र ललितं विष्णुप्रियानामतः ।
श्रीयोगादथवा स्वनाम्नि लसति श्रीयुक्तविष्णुप्रिया
(लक्ष्यञ्चात्र गुरो,र्द्वितीयवनिता गौरस्य विष्णुप्रिया) ॥ ५०० ॥

अर्थं तं घटयन् परत्र वदति स्थाने स्वयं श्रीप्रभुः
'श्रीरस्त्वस्ति स्वत एव सर्वसमयाद् विष्णुप्रियैव ध्रुवा ।

३६. माधव! भक्तिः प्रीणयति त्वां, किं वा तस्याः प्रियोऽसि?।
'भक्तिप्रियो माधव' इत्यत्र विग्रहो विग्रहदश्च
बहुव्रीहिस्तु भक्तिः प्रियेति, तत्पुरुषस्तत्प्रियश्च।
बहुव्रीहौ च भक्तिर्मुख्या तत्पुरुषे त्वं मुख्यः
स्त्रीमुख्या तु प्राकृतसृष्टिर्व्यवहारे पदशास्त्रे।
योगे प्रकृतिः सांख्ये प्रधानं भक्तिमुख्यतायुक्तिः
दास्यसख्यवात्सल्यमधुरता तव गौणत्वे सिध्यति॥

श्रीभक्तिस्तु सदा प्रिया भगवतो "भक्तिप्रियो माधव"—
स्तद्भक्तेरथवा श्रियो ननु चिरान्नामास्ति 'विष्णुप्रिया' ॥ ५०१ ॥

आचार्यस्तदिदं निशम्य तरसा ब्रूते प्रणम्य प्रभुं
'लक्ष्मीविग्रहतः प्रभुः प्रथमतो जग्राह तस्माच्च ताम्।
भूयश्चान्यतदीयविग्रहमयं विष्णुप्रियाऽर्धाङ्गिनीं,'
योगश्चात्र वियुज्यते यदि, पुनः कालेन संयुज्यते ॥५०२॥

वार्ता तत्र परस्परं प्रचलति श्लेषच्छटाचातुरी
तन्मध्ये प्रभुगेहतः सनमनं ब्रूते जनश्चागतः
'आचार्योऽद्य गृहे ममाऽस्तु, दिशते माता शची मे मुखा—
त्स्वीकुर्याच्च निमन्त्रणं स्वकृपया मेऽद्यानिवार्यं गुरुः' ॥५०३॥

श्रुत्वा तद्वचनं प्रभुः किमपि नो तस्मै ददौ चोत्तरं
जिज्ञासामनसा गुरोर्मुखमयं पश्यंस्तदानीं स्थितः।
ज्ञात्वा भावमवादि चास्य गुरुणा 'सौभाग्यमद्यास्ति मे
भोक्तुं यच्च निमन्त्रितोऽस्मि नु जगन्मात्रा, कृतार्थो यतः' ॥५०४॥

मध्ये त्वेव गुरोर्वचो विघटयन् वासो जगाद द्रुतं
'ह्येकाकी ननु भोक्ष्यसे कथमिदं सौभाग्यसौख्यं गुरो! ?।
कर्ता वा सहभागिनं परमपि? त्वान्त्वत्र चैकाकिनं
सौख्यस्यास्य तथोपभोक्तृकमहं सोढा कदाप्यद्य नो ? ॥५०५॥

गौराङ्गो यदि नो निमन्त्रयति मां, गत्वा शचीमातरं
याचिष्यामि, तथाहि साऽत्र नियतं द्वीपेऽन्नपूर्णा नवे।
तद्द्वारान्नहि कोऽपि भग्नहृदयः प्रत्यागतः शक्यते,
सङ्गेऽहं करणीय एव, नहि तेऽद्वैताऽदनं सम्भवम् ॥५०६॥

आचार्यश्च महाप्रभुः सिलहटस्थानीयविप्रावुभौ,
नैकं खादनपानकं ननु तयोरन्योन्यमासीत्परम् ।

तज्ज्ञातुं प्रभुराह संकुचितहृ'च्चिन्त्यं न वै भोजनं,
तल्लोकद्वयभक्तरन्धनमिहाऽऽचार्यस्य कष्टं कृते' ॥५०७॥

आचार्यस्तु तदन्तरे समवद'त्कष्टं किमर्थन्तु मे ?
कष्टञ्चेद् भविता तु, वत्सलशचीमातुर्भविष्यत्यद: ।
अस्तीयं जगदम्बिका, न मनुते कष्टञ्च कष्टं हि सा,
पक्तव्यं ननु मे यदीह पचने माताऽसमर्था भवेत्' ॥५०८॥

तस्मादुत्तरत: प्रभुर्विदितवान् भक्तादने मे गृहे
चापत्तिर्नहि कापि सम्प्रति गुरोरद्वैतविद्वन्मणे: ।
शुद्धप्रेम्णि च वस्तुतो न नियम: कोऽप्यत्र वै निश्चितो,
यत्राऽपक्वदशा हृदोऽत्र, नियमापेक्षाऽखिले कर्मणि ॥५०९॥

नेदं वक्तुमिहोचितं, हि नियमं प्रेमी भिनत्तु ध्रुवं,
सर्वो वान्यसमोऽत्र पालयतु वै सामाजिकं निश्चितम् ।
श्रीसीताग्निपरीक्षणं भुवि परित्यागेऽनुजस्यानया
सर्वश्रेष्ठगुणेन चात्र विहितो रामोपमप्रेम्णा ॥५१०॥

कार्ये चासहनीयकष्टभरिते यस्मात्प्रवृत्ति: सतो
धर्मो वै जनसंग्रहस्य जगति क्षुण्णस्तथा नो भवेत् ।
कृष्णास्तद्विपरीतमत्र मधुर: प्रेम्ण: कृते चाण्वपि
ध्यानं नो नियमस्य चाकृत परं सामाजिकस्य प्रिय: ॥५११॥

अद्याप्यत्र हि दृश्यते च नियमे सामाजिके धार्मिके
वर्तन्ते बहवो दृढं, विरहितास्तेभ्योऽपि ते प्रेमिण: ।
शक्य: प्रेमपथस्य कोऽपि नियमो निर्धारणीयो न त--
च्छून्योऽयं नियमात्तथाहि निखिलात्पन्थाश्च लोकोत्तर: ॥५१२॥

संकोचस्थितिरद्य किं प्रभुगृहेऽद्वैतस्य संभोजने,
सर्वस्वं प्रभुपादपद्मयुगले येनार्पितं यत्स्वकम् ।
नीत्वा स्वी: तिमत्र मातृनिकटे दूतो ययौ चाधुनाऽऽ--
चार्योऽवोचदसौ तथाहि किमपि श्रीवासकर्णे शनै: ॥५१३॥

अन्योन्यं शनकैर्विलोक्य वदति स्मित्वा वदन्तौ प्रभु:
'किं गुह्यालपनं द्वयो: सुमनसो:, श्रोतुं न योग्योऽस्मि किम्?।
श्रुत्वा तत्त्रपितोऽल्पमत्र परमाऽऽचार्यश्च मौनं स्थित:,
स्थित्वा वासबुध: क्षणन्तु लपति, स्थाने परोऽपेक्षित: ॥५१४॥

'अत्यन्तं ननु दु:खितोऽस्ति मनसाऽऽचार्यो निजेन प्रभो!
रूपं वास्तविकं निजं स्वकृपया नित्यस्य चाऽऽलोकितम्।

जाने, किन्तु कथं ममोपरि कृपा नाद्यावधिं तादृशी
ह्यस्याश्वासनमस्ति मेऽतिसमयाद्' 'ब्रूते तथाऽयं गुरुः' ।।५१५।।

अल्पं विस्मयमत्र स प्रकटयंश्चोचे 'न बोधे त्वहं
स्पष्टं, वास्तविकस्वरुपकथनात्किं वै गुरोराशयः! ।
रूपं वास्तवमेतदेव ननु मे पश्यन्ति यत्सर्वदा
सर्वे किञ्च तथाहि साम्प्रतमपि स्थानेऽत्र पश्यन्ति यत्' ।।५१६।।

अर्थं भिन्नतया प्रभुर्घटयति ज्ञात्वाऽऽह वासो बुधः
'सत्यञ्चामिदकं प्रभो! प्रकटितं रूपं त्विदं वास्तवम् ।
श्रद्धाभक्तियुता नुमो वयमपि श्रीगौरमेवाकृतिं
ह्याश्वस्तस्तु गुरुस्त्वया किमपि तच्चैवाद्य संस्मार्यते' ।।५१७।।

एवं वासमुखात्तदुत्तरमिदं श्रुत्वाऽऽह तुष्टः प्रभु—
'वेत्ता पण्डितजी! भवान्ननु, समो नो नृस्वभावः सदा ।
अन्यच्चिन्तयते क्षणेन स पुनस्तद्भिन्नमेव क्षणा—
त्किं किञ्चात्र वदामि, वेद्मि न तथोन्मादस्थितौ मे स्वयम् ।।५१८।।

स्वोन्मादस्थितिगेन चात्र किमपि ह्युक्तं भवेद्यन्मयाऽ—
द्वैताचार्यकृते मनागपि न तत्कालेऽधुना स्मर्यते' ।
वासस्तच्च निशम्य दीनहृदयो ब्रूते 'प्रभो! वञ्चनाऽ—
स्माकं किं क्रियते सदा हि भवताऽऽप्तो वञ्चकः स्वप्रियः? ।। ५१९।।

उन्मादो हि यदा जनेऽत्र भवति, त्रासः समाजे ततः
पार्श्वेऽप्यस्य गतेर्बिभेति जनता, ह्यात्माऽत्र लोकप्रमा ।
उन्मादो भवतस्तु लोकहृदये पीयूषसेकोपमो
भक्तानाञ्च विशेषतस्तदधिकाऽऽनन्दप्रतीतिर्नहि ।। ५२०।।

उन्मादस्तव वस्तुतो ननु भवत्युन्माद एवात्र किं ?
यद्येवञ्च, पुनः सतां कथमहोऽपूर्वप्रमोदस्थितिः ? ।
सामर्थ्यं त्वयि चास्ति कर्तुमखिलं, यस्मिंश्च काले यथा
वाञ्छेदत्र तथा प्रदर्शनविधौ रूपस्य ते योग्यता' ।।५२१।।

ऊचे, 'पण्डितजी!' प्रभु'र्ननु तथा विश्वासमाधेहि, मे
कस्मैचिच्च विशेषरूपतननं नाप्यस्त्यधीने मनाक् ।
रूपं कुत्र च किं क्षणे प्रकटितं, जाने तथा न स्वयम्,
द्रष्टुं वाञ्छति, चोक्तमत्र भवता, श्रीश्यामरूपं गुरुः ।।५२२।।

एतन्नास्ति वशे हि मे,ऽस्य सुहृदो भावे तथा निर्भरं
तद्भावानुगदर्शनञ्च भविता प्रीतिश्च रूपे यथा ।

एष श्यामलसुन्दरेक्षणमनाश्चेदस्ति सत्यं, ततो
मूर्तिं ध्यायतु तन्मनोहरमयीं पश्येत्कथञ्चित्तथा' ।।५२३।।

आचार्योऽत्र निशम्य शङ्कितहृदा चाल्पं परीक्षात्मना
स्वे नेत्रे पिदधे, क्षणेन पतितो भूमौ ततो मूर्च्छित: ।
देहस्पर्शममुष्य चाकृत जनस्तत्रास्ति नो चेतना
नासाच्छिद्रकरस्थितेर्नु बुबुधे श्वासश्चलत्येव नो ।। ५२४।।

प्राणा: सन्ति तनौ न चास्य नियतं, तैर्लक्षणैर्ज्ञायते
पार्श्वस्थं कुरुते जनं तु चकितं कान्तिर्मुखस्यामला ।
सर्वाङ्गञ्च वपुस्तथा पुलकितं, सर्वे परं विस्मिता
वास: पृच्छति 'भो: प्रभो! कथमहोऽद्वैतस्थितिर्मूर्च्छिता? ।।५२५।।

'माऽभैषी: किमपीह चात्मनि गुरो: स्वाभीष्टदेवाकृति–
र्दृष्टा, प्रेमविमूर्च्छना तदधुना मन्येऽनु चैवं त्वहम्' ।
'प्रत्यक्षाऽनुमितिद्वयं तव वशे, सौभाग्यशाली सुधी–
र्यत्ते श्यामलसुन्दराकृतिदृशिं वाञ्छाक्षणेनाप्तवान् ।।५२६।।

सौभाग्यञ्च कदापि नार्जितमियद्, भाग्यच्युता वै वयं,
ह्यास्तां तावदिदं तथा निजनिजं तद्भाग्यमेवास्ति तद् ।
एतद्भिन्नसुदर्शनं न रुचितं, गौरस्वरूपं त्विदं
स्थाने नोऽत्र यथेष्टमस्ति, कृपयाऽऽचार्य ससंज्ञं कुरु' ।।५२७।।

'का वार्ता क्रियते,? सचेतनममुं शक्नोमि कर्तुं कथं?
संज्ञाप्ति: स्वयमेव, पश्य शनकैर्नेत्रेऽधुनोन्मीलति' ।
एवं संवदति प्रभौ ननु गुरोर्मूर्च्छा शनैस्त्रुट्यते
वास: पृच्छति स्वस्थमत्र शनकै'राचार्य! किं दृष्टवान्'? ।।५२८।।

ऊचेऽसौ भरितस्वर: 'परमहो! दृष्टं हि रूपाऽद्भुतं
श्याम: सुन्दरपीतवस्त्रलसितो वन्यस्त्रजा शोभित: ।
प्रत्यक्षं मुरलीमनोहरकर: प्राकट्यमाप्तो मम
स्पष्टं तादृशगौर एव हृदये मन्दस्मित: प्राविशत् ।। ५२९।।

तन्मन्दस्मितमुग्धमानसमिदं तन्माधुरीपानत–
स्तल्लीनं विजहौ स्वरूपमभितो, भूय: क्षणेनात्र सा ।
मूर्तिर्गौरमयी पुर: प्रकटिता, चैतन्यलाभस्तत:'
प्रेम्णा गद्गदकण्ठरोदनमसौ चक्रे तथैवं वदन् ।। ५३०।।

तस्याक्षिद्वयकोणशीतलपयोवाष्पप्रवाहोऽसरत्–
किन्त्वत्र प्रभुराह सम्प्रति हसंस्तत्कृत्रिमोपेक्षया ।

'आचार्यो गतरात्रिजागरणकष्टक्रेऽद्य मन्ये तथा
निद्रां नेत्रनिमीलनादलभत स्वस्वप्नवार्ताऽस्य तत्' ॥ ५३१ ॥

तस्येदं वचनं निशम्य पतितोऽधीरः प्रभोः पादयो–
र्ब्रूते गद्गदितः 'प्रभो! परमितो नो वञ्चनीयोऽधिकम् ।
विश्वासो ननु जायतां प्रभुपदे देह्याशिषं तादृशं'
वृद्धाचार्यममुं प्रभुर्भणति तत्प्रेम्णा गलाऽऽलिङ्गितम् ॥ ५३२ ॥

'स्थाने भागवतो भवांश्च परमो, निष्ठा तवात्युन्नता
ध्यानं यच्च निरन्तरं प्रचलति स्पष्टं फलं तेऽधुना ।
नेत्रे चात्र निमीलिते भगवतस्तज्जायते दर्शनं,
त्वायातु द्रुतमेव भोजनकृते, माता प्रतीक्षारता' ॥ ५३३ ॥

आज्ञां प्राप्य महाप्रभोर्गृहमतो यातुं गुरुः प्रस्तुतो
वासाऽऽचार्ययुतस्ततो निजगृहं लब्ध्वा ददर्श प्रभुः ।
माता चास्ति महानसेऽत्र निखिलं पाकं विधाय स्थिता
प्रक्षाल्य स्वकराङ्घ्रिकौ द्रुतमसौ चातिथ्यकर्मोद्यतः ॥५३४॥

पादौ क्षालयति प्रभुः स्वयमहाऽऽचार्यस्य वासस्य च
प्रादात्तत्र निषेदितुं गृहपतिस्तत्सुन्दरञ्चासनम् ।
भोक्तुञ्चाग्रहतो द्वयोः प्रभुरपि स्थानेऽन्तरेऽयं स्थितः,
प्रीतिर्यत्र समस्थितिर्द्विजनगा मध्यासनञ्चोचितम् ॥५३५॥

नानाव्यञ्जननिर्मितिं कृतवती माता शची स्नेहतो
भोज्यान्ने परिवेषिते भगवते चोभौ विधायार्पणम् ।
सर्वान्नं तुलसीदलेन लसितं प्रेम्णाऽग्रहीष्टां तथा
प्रेमाधीनगुरुः पुनर्वितरितञ्चाद प्रभोस्त्वाग्रहात् ॥५३६॥

एवं तत्र दिनेऽधिकं त्रिभिरपि स्थानेऽत्र जग्धं तत–
स्ताम्बूलं मुखशुद्धिहेतुकमदान्नीत्वा प्रियातः प्रभुः ।
विश्रामं क्षणकं विधाय सुहृदो लब्ध्वा प्रियाज्ञां तदाऽ–
द्वैतः शान्तिपुरन्तु वाससुमतिर्गेहं स्वकीयं ययौ ॥५३७॥

प्रच्छन्नभक्त–पुण्डरीकविद्यानिधिः

३७. हृदयं मानवचिन्तारत्नम् ।
भुवि मानवेतरजीवजगत्सु नहि संस्कारोद्बोधः
परं बहुजन्मकर्मवासनाकोशो मानवहृदयम् ।
हृदयकोशसञ्चितसंस्कारा ह्यनुकूलप्रतिकूलाः

कालानुसारदेशविशेषे सङ्गतितः प्रभवन्ति ।
उत्तमनिष्ठासमतामैत्रीदीनजनानुग्रहता
नियतं ते ते सात्त्विकभावा मानवसत्सम्पत्तिः ।
सति सद्भावे हृदयभेदतः सुखशान्तिस्थितिभेदः
हृदये भक्तिः सत्सङ्गतितो भगवत्कृपया कृतिनाम् ।
प्रभुनामश्रवणस्मरणाभ्यां पुण्यवतां हृद्विकृतिः
नेत्रवाष्पतनुपुलकोद्गमता भागवतानां प्रकृतिः ।।

उत्पन्ना हृदयेऽत्र यस्य भगवद्भक्तिर्मनो रञ्जितं
श्यामप्रेम्णि, रतिश्च नाम्नि मधुरा लीलाकथायां हरेः ।
भक्तैस्तैर्वरभागिभिर्नरवपुर्नूनं कृतं सार्थकं,
प्रेमानन्दपयोधिलब्धिरखिलप्राप्तिः पयःसंस्कृतेः ।। ५३८ ।।

प्रायश्चात्र हि दृश्यते भगवतो यस्योपरि श्रीकृपा
मत्तः प्रेम्णि च, बाह्यजीवनमपि त्यागात्मकं तस्य वै ।
पीतो येन हि वारमेकमपि तत्प्रेमासवश्चाद्भुत—
स्त्रैलोक्ये यदपीह भौतिकसुखं सर्वं तदस्यारसम् ।। ५३९ ।।

तावज्जागतिके सुखेऽत्र कुरुते सौख्यानुभूतिं नरो
यावद्वास्तविकं सुखं न भवति स्पष्टं जगत्सङ्गतेः ।
दृष्टो येन सुखस्वरूपमखिलं सत्प्रेमदेवः क्षणं
तुच्छं तस्य कृते पुनश्च निखिलं सांसारिकं दृश्यते ।।५४० ।।

तत्प्रायः परमार्थमार्गपथिको भक्तस्तथा साधको
ज्ञानास्थो निजजीवने भवति वै त्यागस्वरूपः सदा ।
दूरे तिष्ठति रूपतोऽपि नियतं भोगाच्च सांसारिका—
त्तस्याऽऽसक्तिभयं पुरा, परमतः प्रेम्णि स्वरूपे रतिः ।।५४१ ।।

भक्ताः किन्तु च तादृशाः कतिपये यज्जीवनं बाह्यतः
संसारिप्रतिमं प्रतीतिविषयं, भक्तेरगाधो रसः ।
हृन्मध्ये परिपूरितस्तु, नयनद्वारा बहिः स्यन्दते
स्थाने चोच्छलितो मनागुपहतो, गूढो विशुद्धो रसः ।।५४२ ।।

सम्बन्धो हृदयेन भक्तिसरितो लोके परं वस्तुत,—
श्चेच्चेतो विषये रतं नहि, ततः कस्यामपीह स्थितौ ।
तिष्ठेच्च प्रभुपादपद्मभजनं कुर्वत्सदैवास्य तद्—
ब्रूते तच्च विचिन्त्य 'केशव' कविः 'स्थानं गृहं वा वनम्' ।। ५४३ ।।

३८. **भावो भवकारणमिह नियतम् ।**
दैहिकबौद्धिकहार्दिकवृत्तिर्मनोभावमनुगच्छति
भावे सति तु भवस्थितिरुचिता मनश्च भावस्थानम् ।
अन्तःसद्भावो यदि मनसो, बाह्ये सति तनुभोगे
निजवशगे मनसि प्रभुरसगे गृह-वनकं वन-गृहकम् ।।

प्रायस्त्यागमयस्वजीवनकृतो लोके तथाधारणा
रूढा लोटति साधकस्य मनसि, त्यागं विना बाह्यतः ।
भक्तिर्भागवती कदापि जगति प्राप्तुं न शक्याऽमला
विघ्नोऽयं व्यवसायिनाञ्च परमः श्रीभक्तिमार्गे परम् ।।५४४।।

लोके जीवनमत्र यावदधिकं त्यागायितं तद्वरं
भक्तः कोऽपि न शक्यते तु भवितुं त्यागं विना रूपतः ।
युक्तं नास्ति परं तथाऽऽग्रहविधिस्तत्त्यागजन्यो यतः
सोऽप्येकस्त्वभिमान एव, मृदुताधर्मस्ततो नश्यति ।।५४५।।

चाण्डालं शुनकञ्च रासभमपि श्रद्धाविनम्रस्तृणाद्
भक्तो नो मनसा परञ्च वपुषा भूमौ नमेद् दण्डवत् ।
दूरं स्यादमुना तथाहि विधिना लोकेऽभिमानो हृदो,
मान्यस्तु प्रभुरेव भक्तहृदयोऽमानी भवेन्मानदः ।।५४६।।

भक्तानां विषयेऽत्र कोऽपि वदितुं शक्नोति किं वस्तुतो,
रूपे कुत्र कथं स तिष्ठति, यतो नानास्थितौ लोकितः ।
बाह्यत्यागनिदर्शनं व्यवहृतौ यस्यास्ति नो जीवने
तत्सोऽयं नहि भक्त एव, तदहो! चिन्त्यं कदाप्येव नो ।।५४७।।

श्रीविद्यानिधिपुण्डरीकपदवान् प्रच्छन्नभक्तस्तथा
यस्याचारविहारयोर्ग्रहणतो भक्तः स नो चीयते ।
सर्वेषां विषयी तथैव स मतौ, बोधन्तु लोकास्तथा
मत्ताभस्तु सदा निजप्रभुरतौ श्रीमान् स विद्यानिधिः ।।५४८।।

किञ्चित्कर्म जनप्रदर्शनमनाश्चक्रे स नो चाल्पकं
कार्यं त्वस्य निजप्रियेण, विषये सर्वे रमन्ते प्रिये ।
तद्बाह्यव्यवहारजातमखिलं कुर्वन्ति संसारिणो
लोकाश्चात्र परे तथा विषयिणो, भेदोऽत्र भावस्थितौ ।।५४९।।

एकस्मिन् सुकुलेऽस्य जन्म, वपुषाऽत्यन्तं दृशोः सुन्दरो
देहो राजकुमारतुल्यललितः क्षौमञ्च सूक्ष्माम्बरम् ।

स्निग्धश्यामलकुञ्चिता बहु तथा तत्कुन्तला: कोमला—
स्ते तैलाक्तसुगन्धिताश्च सततं तन्वा समं सज्जिता: ।।५५०।

स्नातुं गाङ्गतटं न गच्छति ततो भक्तिर्न गङ्गां प्रति
प्रायो वेत्ति जनस्तथा, तु सुहृदोऽगाधाऽस्य निष्ठा जले ।
स्नाने चास्य भयं, भवेन्मम पदस्पर्शोऽत्र मात्रम्बुना,
गङ्गायां मलमूत्रतैलमलनं बालास्थिनिक्षेपणम् ।।५५१।

दृष्ट्वा मार्मिकदु:खमस्य भवति, स्थाने हि खेद: सतां
श्रीदेवार्चनपूर्वमेव पिबति श्रीगाङ्गपूताम्बुकम् ।
एवञ्चास्य हि लोकबाह्यचरितं दृष्ट्वाऽत्र सर्वो जन:
'संसारी' 'विषयी' गिरेति कुरुते घोरं सदोपेक्षणम् ।। ५५२

'हा! विद्यानिधिपुण्डरीक! ननु मे—ओ! बाप! विद्यानिधे!'
भावाविष्टमहाप्रभुर्लपनतश्चोच्चै रुरोदैकदा ।
सोऽधीरो भुवि पुण्डरीकवचनाद् भूयोऽपतन्मूर्च्छित:
सर्वोऽन्योन्यमुखञ्च पश्यति ततस्तत्र स्थितो विस्मित: ।। ५५३

श्रीकृष्णोऽस्ति नु पुण्डरीककथने मेनेऽत्र पूर्वं प्रभो—
स्तद्विद्यानिधियोगतस्त्वनुमितं भूयो हि भक्तै: परम् ।
नाम्नाऽनेन भवेच्च कोऽपि विमलो भक्त: पुनश्चिन्तनाद्
द्वीपे कोऽपि न पुण्डरीकसहितो विद्यानिधिर्वैष्णव: ।। ५५४

भक्तै: पृष्टमत: क्षणं सविनयं मूर्च्छासमाप्तौ 'प्रभो!
नामोच्चारणतोऽत्र ते विलपनं भूयश्च यस्योच्चकै: ।
श्रीविद्यानिधिपुण्डरीकपदत: कोऽयं महावैष्णव: ?
स्थाने योऽत्र महाशय: स्वमुखत: सम्बोधितो भाग्यवान्' ।। ५५५

'प्रच्छन्नो ननु वैष्णव: स परमो' गम्भीरवाचाऽवदद्—
'दृष्ट्वा यं नहि कोऽपि वैष्णवतया स्वश्रद्धया स्वीक्रियात् ।
बाह्याचारविचारमात्रमखिलं प्रायोऽस्य संसारिभि—
स्तत्तुल्यं पुरुषैस्तथा विषयिभि,र्मर्त्य: समो बाह्यत: ।। ५५६

भक्तोऽत्यन्तमयं प्रियो मम सुहृद् योऽस्त्यन्तरङ्गस्तथा
श्रीविद्यानिधिपुण्डरीकचटकग्रामीणविप्रोत्तम: ।
गेहं शान्तिपुरेऽपि चास्य तदयं काले कदाचिच्चट—
ग्रामाच्छान्तिपुरं तथाप्रियमपि ह्यायाति गङ्गाऽऽस्थया ।। ५५७

यस्याधीरतयाऽत्र दर्शनमहं वाञ्छामि, भावी कदा
प्रेम्णा यं परिरभ्य भद्रदिवसो यस्मिन् मुदा रोदिता' ।

श्रुत्वा तद्वचनं प्रभोः प्रमुदिताः सर्वे समुत्कण्ठिताः
श्रीविद्यानिधिपुण्डरीकमधुना द्रष्टुं स्वगौरप्रियम् ॥ ५५८ ॥

आगन्ता स हि शीघ्रमेव नवकद्वीपे यदर्थं प्रभू–
रोदित्यत्र तथा ततो ह्यनुमितं भक्तैश्च सर्वैः स्वतः ।
स्थातुं कः प्रभुणा स्मृतो निजगृहे शक्तस्ततोऽभ्यागतेः
श्रीविद्यानिधिपुण्डरीकसुहृदः सन्ति प्रतीक्षारताः ॥ ५५९ ॥

द्वीपेऽसूचितमेकदाऽऽफलति स श्रीपुण्डरीको महान्
कोऽप्यस्याऽऽगमनं न वेद, बहुभिर्दृष्टोऽपि भक्तैरयम् ।
दृष्ट्वा कोऽपि तु वैष्णवोऽस्ति परमः शक्तोऽनुमातुं न तं
सर्वेऽस्याऽऽगमनात्ततोऽपरिचिता बुद्ध्वाऽऽढ्यसाधारणम् ॥५६० ॥

मन्ये दत्तमुकुन्दनाम भविताऽस्मत्पाठकानां स्मृतौ
छात्रैकोत्तमवैष्णवोऽस्ति चटकग्रामस्य वासी पुरा ।
कण्ठोऽत्यन्तमधुस्वरोऽस्य पठनञ्चाद्वैतपार्श्वे तथा
तत्सत्सङ्गसभास्वगानमधुराऽऽस्वादैर्जनाऽऽरञ्जनम् ॥ ५६१ ॥

यत्कालात्प्रभुता प्रभोः प्रकटिता तस्माच्छरण्यं गतः
श्रीमत्कृष्णकथासुकीर्तनरतो बोभूयते सर्वदा ।
ग्रामीणोऽस्य स पुण्डरीकसुमनास्तस्मादुभौ सज्जनौ
तुल्यौ तौ वयसा स्फुटं परिचितौ चान्योन्यमच्छात्मकौ ॥५६२ ॥

श्रीविद्यानिधिभक्तिभावमभितो दत्तो मुकुन्दस्तथा
स्थाने पण्डितवासुदेवसुजनस्तौ जज्ञतुः केवलम् ।
गौराऽभिन्नगदाधरेऽधिकतया स्नेही मुकुन्दस्ततो
ब्रूते 'भागवतो गदाधर! महान् द्वीपेऽधुनोपस्थितः ॥ ५६३ ॥

आयावस्तमिमं विलोक्य चलतु' श्रुत्वा प्रसन्नो गदा
ब्रूते 'वाह! वचोऽधिकञ्च तदितो मिष्टं भवेत्किं परम् ।
तुल्यञ्चास्ति हि दर्शनं भगवतः स्थानेऽत्र भक्तस्य च
स्याद्वै भागवतोत्तमः स, भवता यच्छंसितस्तच्चल' ॥ ५६४ ॥

आलप्येदमुभौ तथाहि सुहृदौ विद्यानिधिं चेलता–
मेकस्मिन्ननु सुन्दरे स भवने द्वीपस्य तस्थौ निधिः ।
वासस्थानममुष्य चातिविमलं शय्याऽत्र मध्ये प्रिया
तत्पादा बहुमूल्यधातुघटिताः सूक्ष्माऽऽस्तृतप्रच्छदा ॥ ५६५ ॥

स्नानध्याननिवृत्तपुण्डरनिधिः शय्यान्तरार्धाऽऽनतो
लिप्तं गन्धितचन्दनं सुललितं दीर्घेऽस्य फाले तथा ।

तन्मध्ये रचितोऽतिसुन्दरमहो! बिन्दुर्लघुर्लोहितो
बाला मूर्ध्नि सुगन्धतैलकलिताश्चित्रं गुडाः सज्जिताः ।।५६६।।

नानोपस्करमोदितञ्च शनकैश्चर्वश्च ताम्बूलकं
रक्तं कोमलपल्लवाधरमपि स्वाऽऽक्तं ततोऽस्याधिकम् ।
तत्र ष्ठीवनपात्रमस्ति पुरतः, पात्राण्यमूल्यानि तद्–
वायुं कोमलबर्हकव्यजनजं तत्सेवकौ तेनतुः ।। ५६७।।

सोऽयं राजकुमारसन्निभदृशिर्दत्तो मुकुन्दस्तदा
प्राप्तस्तस्य सतो गदाधरयुतो विद्यानिधेः सन्निधौ ।
स्थानेऽनेन निदेशितेऽत्र ललिते नत्वा निषण्णावुभौ
तद्दत्ताऽऽगमजां मुदं प्रकटयञ्छ्रीपुण्डरीकोऽवदत् ।। ५६८।।

'अद्य त्वस्ति महाञ्छुभोऽत्र दिवसो दृष्टो यतो मे भवान्
द्वीपे चैव विराजते तदिति मे ज्ञातं, तु नाद्यावधिम् ।
स्थाने ते मिलनं तथा कलयतो दत्तं स्वयं दर्शनं
सङ्गे यो भवतोऽस्ति तत्परिचयो मे दीयतां साम्प्रतम्' ।।५६९।।

शिष्टाचारयुतं गदापरिचयं दत्ते मुकुन्दोऽधुना
'शुद्धो भागवतो महाप्रभुकृपापात्रान्तरङ्गोत्तमः ।
श्रीमन्माधवमिश्रविप्रतनयो बाल्याद्विरक्तः स्वतो
भद्रं नाम गदाधरेति मधुरं गृह्णात्ययं वैष्णवः ।। ५७०।।

श्रुत्वा तत्र गदाप्रशंसनमिदं विद्यानिधिः स्वां मुदं
तन्वानो वदतीह 'दर्शनमहो! लब्धं त्वयाऽस्यापि मे' ।
उक्त्वा केवलमेतदेव ददृशे विद्यानिधिः स स्मयन्,
गम्भीरा मितभाषिणो भुवि तथाऽऽकृत्या गिरा मोदकाः ।।५७१।।

आजन्मैव गदा विरक्तहृदयो दृष्ट्वाऽत्र विद्यानिधे–
स्तद्वासाऽऽसनवस्त्रवैभवसुखं जातो यथा विस्मितः ।
सन्दिग्धो, विषयी तथेदृशजनो भक्तः प्रभोः किं भवे–
न्मग्नो यो विषये रसेऽत्र सततं कुर्यात्स भक्तिं कथम् ।।५७२।।

वेद स्पष्टमहो! गदाधरमनोभावं मुकुन्दस्ततः
श्रीविद्यानिधिमानसान्तररसं सङ्गीतवान् व्यञ्जितुम् ।
श्रीमद्भागवतस्य कोमललयः श्लोकौ तथा मार्मिकौ
श्रीकृष्णस्य शनैः शनैः परकृपासंदीपकौ तौ जगौ ।। ५७३।।

३९. शरणं कं वा दयालुं याम ।
सकलचराचरसुहृदं किं वाऽहंकृतिममतां स्वगताम्
नानाऽऽहारविहारविलासं गिरिनीरधिधां वसुधाम् ।
साधुक्षमतापटुताशुचिता निजपरमुदितां तनुते
वत्सलकृष्णार्पितममताच्छलफलितपूतनाधात्री ॥

४०. अशनं संयमहीनमनर्थम् ।
स्वयं विधाता कालो निखिलं ग्रसते प्रतिक्षणमत्र
नवं नवं पुनरेव विधातुं, विहितमवति निजनियमात् ।
परिमितमशनं योगिजनानां साधूनां भैषज्यम्
अमलं सत्त्ववतां भक्तानां क्षुधाशमनमन्येषाम् ।
क्षुधापिपासा प्रकृतिप्रदत्ता करणीयं तच्छमनम्
हिंसासंग्रहवृत्तिरनन्ता केषाञ्चित्तन्मूला ।
सत्सङ्गतितः संग्रहशुद्धिः प्रभुतो हिंसाशान्तिः
प्रभुशुभमधुरमनोहरदर्शनहिंसकसद्गतिलाभः ॥

तच्छ्लोकोभयके मुकुन्दमुखतः सत्येव कर्णे क्षणे
शय्यातः पतितो विमूर्च्छितदशः श्रीमान् स विद्यानिधिः ।
यश्चैकक्षणपूर्वमत्र विहसंश्चासीत्स्थितः सज्जितः
श्रीश्लोकश्रवणात्क्षणेऽस्ति परके तस्यैव चित्रा दशा ॥ ५७४॥

तद्देहे युगपत्तथा समुदिताः स्वेदादिभावाः सतो
नेत्राभ्यां रुदतः ससार पयसो धारेव तस्योच्चकैः ।
केशाः कुञ्चितसज्जिताश्च परितो मुक्ता विकीर्णाः क्षणा–
ज्जातं सम्प्रति धूलिधूसरमिव श्रीमच्च पूर्णं वपुः ॥ ५७५॥

हस्ताभ्यां निजचीनवस्त्रमवदद् दत्तं द्रुतं चीरयन्
'हे भ्रातः! पठ तत्पुनः पठ पुनर्मे कर्णरन्ध्रे पुनः ।
एतस्मात्स्वमधुस्वरात्कुरु तथा पीयूषसंसेचनं'
दत्तस्तत्पठनं तथाऽकृत पुनस्तेन स्वरेणैव सः ॥ ५७६॥

श्रीश्लोकं स दक्ष–यथा पठति तद्विद्यानिधेश्चाधिकं
वैकल्यं ववृधे तथा ननु तथा, चक्रे तथाप्याऽऽग्रहम् ।
पाठात्किन्तु निवारितः स मधुरो दत्तोऽत्र तत्सङ्गिभि–
र्मूर्च्छायां पतितोऽस्ति पुण्डरनिधिर्मुञ्चंस्तथाश्रूणि सः ॥ ५७७॥

तस्यैवञ्च दशां विलोक्य तु गदाऽऽश्चर्यस्य पारो नहि
स्थाने यः क्षणपूर्वमत्र विषयी सांसारिको बुध्यते ।

मत्तः प्रेम्णि स वै प्रलापनिरतस्तद्विस्मितोऽसौ परं,
प्रेमी भागवतो विलक्षणतया काले सता चीयते ।। ५७८।।

त्यागस्योपरतेर्गदाधरहृदो भावो विलीनः क्षणे
जाने कुत्र न, भूयसा स कुरुते स्वस्यात्मनो धिक्कृतिम् ।
एवं भागवतोत्तमं प्रति मनोभावे तथा कुत्सिते
प्रायश्चित्तमथात्र चिन्तयति तद्घोरैनसः स स्वतः ।। ५७९।।

अन्ते तस्य च निश्चयोऽयमिति मेऽक्षम्योऽपराधो ध्रुवं,
क्षम्योऽप्यत्र भवेत्तथा भगवतः, श्रीवैष्णवानां तु नो ।
प्रायश्चित्ततपस्तदेकमयते मंत्रस्य दीक्षाग्रहः
शिष्यत्वेऽस्य गते स्वयं गुरुहृदा क्षाम्येन्महान् वत्सलः ।।५८०।।

निश्चित्यैव जगाद तत्र स मनोभावं मुकुन्दं प्रति
ज्ञात्वा तस्य विशुद्धभावमधिकं प्रीतो मुकुन्दस्तथा ।
वैमल्यं प्रशशंस हार्दिकमिदं, श्रीपुण्डरीको निधि–
र्दीर्घेण प्रकृतिं क्षणेन गतवान्, प्रेमाधिको नाऽऽसवः ।। ५८१।।

देहं धूसरितं तमस्य विमलञ्चक्रुस्तथा सेवकाः
सोऽयं शीतलवारिणा करमुखे प्रक्षाल्य तूष्णीं स्थितः ।
ऊचे नम्रगिरा 'महाशय! निधे!' दत्तो मुकुन्दस्तदा
'प्राज्ञोऽयञ्च गदाधरोऽस्ति परमो भक्तः कुलीनो द्विजः ।। ५८२।।

इच्छाऽमुष्य च हार्दिकी सुमनसो मंत्रग्रहः श्रीमता
भूयान्मे भवता, ततो विनयिनश्चाज्ञा किमस्त्यत्र ते ?' ।
श्रीविद्यानिधिरत्र शुद्धहृदयः प्रोवाच संकोचतः
'शुद्धो भागवतस्तथा स्वयमयं पूज्योऽस्ति मे सर्वतः ।। ५८३।।

तावन्मे नहि योग्यताऽस्य विदुषो यन्मंत्रदीक्षां ददै,'
तद्दैन्यातिशयेन दत्तवचनं 'किन्त्वस्य चेच्छा तथा ।
दुःखं हार्दिकमस्य चात्र भविता चेत्प्रार्थनाऽस्वीकृता
स्वीकार्यं हि कृपालुनाद्य, न सतो दुःखं सता सह्यते ।। ५८४।।

मन्त्रस्वीकृतिमन्ततोऽयमवदद्दत्ताऽऽग्रहे चाधिके
तस्मिन्नेव दिने दिदेश सुमना दीक्षामुहूर्तं शुभम् ।
एतत्स्वीकृतितस्तथा प्रमुदिते मित्रे तदोभे तत–
श्चायाते निजकं गृहं निशि बहु प्रीतौ गतायां रते ।। ५८५।।

एतद्द्वित्रिदिनान्तरेऽप्रकटतः श्रीपुण्डरीकोऽपर–
श्चैकान्ते प्रभुदर्शनार्थमयते दृष्ट्वैव स श्रीप्रभुम् ।

आलिङ्ग्यास्य पदे रुरोद करुणं विस्फुट्य, लब्ध्वा प्रभु:
प्रेम्णोऽभूच्च विचेतन: स्वपदयो: शिलष्टश्च विद्यानिधिम् ।। ५८६ ।।

आलिङ्गत्प्रभुरत्र गाढमभित: श्रीपुण्डरीकं सुहृ–
च्छ्रीविद्यानिधिलब्धितो निजमुद: सीमा न तस्याधुना ।
नेत्राश्रु स्रवति प्रभोरविरलं देहश्च रोमाञ्चितो
रोदित्यद्य शिरो निधाय निजकं क्रोडेऽस्य विद्यानिधे: ।। ५८७ ।।

आसीच्च प्रहरद्वयं ह्यविरलश्चैवं रुदञ्छ्रीप्रभु:
क्लिन्नञ्चाश्रुभिरस्य वस्त्रमखिलं विद्यानिधेश्चातिथे: ।
मौनं प्रेमतिरोहित: प्रभुमुखं विद्यानिधि: सोऽप्यसौ
पश्यन्नस्त्यनिमेषमत्र समयज्ञानं न, यात: कियान् ? ।। ५८८ ।।

चैतन्ये प्रभुरेव चाल्पमगमन्मध्याह्नकाले गते
तत्कालं स्वतिथेर्जगौ परिचयञ्चाहूय भक्तेऽखिले ।
विद्यासङ्गतितोऽधिकं प्रमुदितै: सर्वै: स्वभाग्यं स्तुतं
स्वे केऽद्वैतसतां दधौ पदरजो भक्त्याऽनमत्तान्निधि: ।। ५८९ ।।

आरब्धश्च ततोहि कीर्तनमिमं मध्येऽत्र विद्यानिधिं
कृत्वा, मूर्च्छति तन्निशम्य निधिक: श्रीकृष्णसंकीर्तनम् ।
नीतस्तैश्च निरुध्य कीर्तनमयं नानोपचारै: स्थितौ
नीत्वाऽदेशमत: प्रभोरवहितो भूत्वा ययौ स्थानकम् ।। ५९० ।।

तन्मन्त्रग्रहणाभिलाषमधुना सायं प्रभो: सन्निधौ
श्रीविद्यानिधिपुण्डरीकनिकटाद् ब्रूते गदापण्डित: ।
तच्छ्रुत्वा मुदितो 'गदाधर ! महान् लब्ध: सुयोगस्त्वया
प्राप्ति: पुण्डरतुल्यवैष्णवसतश्चात्यन्तमेवोज्ज्वला ।। ५९१ ।।

कार्यं नात्र विलम्बनं तदुचितं शीघ्रं', जगाद प्रभु–
र्लब्ध्वाऽऽदेशममुष्य पुण्डरनिधेर्जग्राह मन्त्रं गदा ।
श्रीगौराङ्गमहाप्रभु: स्वयमसौ यस्य स्मृतौ क्रन्दति
स्थाने यत्स्तवने पुनश्च विकलोऽधीरो यमालिङ्गितुम् ।। ५९२ ।।

सौभाग्यं मनुते गदाधरसमो भक्तो महान् पण्डितो
यच्छिष्यत्वपदे,ऽस्य पुण्डरसत: शक्तोऽत्र क: कीर्तने ? ।
शुद्धा वास्तविकी हि भक्तिरतुला विद्यानिधेर्वस्तुतो
यस्यां कृत्रिमताप्रदर्शनकतालेशोऽपि नासीत्तथा ।। ५९३ ।।

एवं प्रच्छन्नभक्तानां वासप्राकट्यसङ्गते: ।
देश: कालश्च पात्रञ्च पूयते विमलात्मनाम् ।। ५९४ ।।

४१. भ्राता भाग्यवतामुपलब्धिः ।
पितरौ सर्वेषामिह, भवतः परन्तु दीर्घ भाग्यात्
भगिनी भ्रातृद्वितीयातिथिका भाग्यात्सोऽपि तथाऽस्याः ।
भ्रातृद्वन्द्वे किं वक्तव्यं ? यथा कृष्णबलसङ्गः
दशरथनन्दनपाण्डुसुतानां प्रीतिः सोदरकाम्या ।
सहृदयविश्वरूपसोदरताऽनुजनिमायिनो लीना
नित्यानन्दश्रीपादाप्तिः विश्वाऽतुलदृष्टान्तः ।
प्रेमाकारौ करुणाप्रतिमौ प्रीतिरसाम्बुधिमेयौ
नित्यानन्दश्रीगौराङ्गौ वन्दे त्वनुपमबन्धू ।।

आनन्दस्य च मुख्यकारणमिदं ह्यात्मार्पणं सर्वतो,
यावन्नार्पयतीह तावदवनी माताऽपि दत्ते नहि ।
पूर्णप्रेमरसो हि सर्वविषयाऽऽस्वादे समं स्वात्मना
त्यक्ते चात्र समर्पिते सुहृदयैरास्वाद्यते भावुकैः ।। ५९५ ।।

व्याप्तोऽस्ति प्रभुरत्र सर्वविषये विश्वम्भरः पूर्णतः
सामर्थ्येन चराचरे भुवि समं पूर्णस्वरूपेण च ।
स्थाने वै विषये च यत्र रमते चित्तं, मनो गच्छति
प्रेम्णाऽऽत्मार्पणमत्र कार्यमखिलं तस्मै तथा केवलम् ।। ५९६ ।।

स्वत्वं लोपयतु स्वतोऽत्र सकलं, चेष्टा तथा भावना
वाञ्छापि प्रियहेतवे भवतु वै स्वस्यात्मनः केवलम् ।
भूत्वा तिष्ठतु कस्यचित्सकलतः प्रेम्णो यथार्थं तदा
गूढं मर्म हि शिक्षिताऽत्र कविना केनापि चोक्तं स्फुटम् ।। ५९७ ।।

४२. शिक्षण ! नवं नवं ग्रहणीयं शिक्षयसि स्थितिभेदात् ।
देशे काले पात्रे प्राप्ते भिन्ने भिन्ने भिन्नम्
भुवि परिवर्तिनि वयसि क्रमशः क्षणे-क्षणे परिवृत्तम् ।
अनुकूलप्रतिकूलस्थित्याः शिक्षणमिह यज्जातम्
न तु वास्तविकं नैव स्थायि क्षणिकसुखासुखभिन्नम् ।
नहि हसनान्नहि रोदनतो वाऽस्माभिः शिक्षितमल्पम्
यद्यल्पं शिक्षितमस्माभिर्भूत्वा कस्यचिदेव
विश्वम्भरचरणार्पितसुहृदां प्रेमाध्यायं ध्यापय ।।

भूत्वा कस्यचिदेव चात्र वसनेऽहाऽद्धा प्रमोदः कियान्?
स्वे भारे ह्यखिलेऽर्पिते तदुपरि स्पष्टं तथा कस्यचित् ।

निश्चिन्तास्थितिजं कियन्ननु सुखं, कर्ताऽभिमानी नरः
सर्वं स्वेन विधातुमिच्छति सदा, वेत्तुं कथं शक्नुयात्? ॥ ५९८॥

तस्याल्पस्य शिशोः सुखस्थितिमहो! विद्यादहंकृत्कथं
यस्य क्षुत्तृषसौख्यदुःखसमये क्रोडैकमात्राश्रयः।
मातुः क्रन्दनशेषमन्यदपि नो प्राप्तेऽनिवार्येऽयते
यत्र क्वापि भवेच्च सा प्रतिपलं तं केवलं ध्यायति ॥ ५९९॥

नित्यानन्दयतिश्च वाससुमतिर्भक्तौ ह्यनन्यौ प्रभो–
र्नित्येनात्मसमर्पणं प्रभुपदेऽधीतं स्वभावोचितम्।
सर्वस्वं ननु वासपण्डितमतौ स्थाने प्रभुः केवलं
प्रीतेः पात्रमुभौ प्रभोः परमसौ नित्योऽस्य बाह्यासवः ॥ ६००॥

श्रीनित्यो यतिरत्र तिष्ठति गृहे वासद्विजस्यैव त–
त्पत्नी लाडयतोऽधिकञ्च सुततस्तं मालती च स्वयम्।
श्रीनित्यस्य दशा सदा शिशुसमा नात्ति स्वयं कर्हिचिद्–
भक्तञ्चादयति स्वयं निजकराद् देवी ततो मालती ॥ ६०१॥

खादन्नेव पलायते शिशुसमो, मध्ये कदाचिद्यति–
स्तद्भक्तद्विदलञ्च लिम्पति तथा सम्पूर्णदेहेऽमनाः।
तत्कार्यं भ्रमणन्तु बालसदृशं कृत्वा गृहे भोजनं
यानं गुप्तगृहे कदापि विशति श्रीगाङ्गविद्यालये ॥ ६०२॥

नीत्वा खादति कस्यचित्किमपि तद्वस्तु द्रुतं कर्हिचिद्
याति श्रीप्रभुगेहमत्र जननीपादौ शिशुर्वेष्टते।
चाञ्चल्याच्च कदापि गच्छति गृहं भीताऽस्य माता शची
भक्तानां वसतौ तथा विविधकं बालोपमं क्रीडति ॥ ६०३॥

श्रीवासस्य परीक्षणाय गृहिणः स्नेहः कियान् हार्दिको
ज्ञातुं नित्ययतौ रहः प्रभुरहो! पृच्छत्ययं त्वेकदा।
'स्थाने पण्डितजी! न चैव विदितं ह्यस्यावधूतस्य त–
न्नित्यस्यान्वयजातिगोत्रपितृकस्थानेषु चाप्यल्पकम् ॥ ६०४॥

दत्वा वासममुष्य तन्निजगृहेऽज्ञाताऽवधूतस्य ते
द्वीपे नोचितमत्र तत्किमपि वै कार्यं कृतं श्रेयसि।
एतं लाडयसे गृही सुतसमं, विद्याच्च कोऽस्यात्मकं
तस्मात्स्वेऽत्र गृहे न पुत्रसदृशो वास्यो हि नित्यस्त्वया ॥ ६०५॥

सोऽयं गाङ्गतटेऽस्तु साधुरिव वा कुत्रापि घाटे यति–
र्भिक्षां खादतु, किं गृहस्थितिसुखं कस्यापि साधोरिह।

...पण्डितजी: मया सहमत: कस्त विचारोऽत्र च?'
व्यक्तिस्तिष्ठति साधु चेत्प्रतिपदं संरक्षकस्तत्प्रभुः ॥ ६०६॥

एवं स्वप्रभुतो निशम्य वदति स्तब्धोऽतिदैन्येन तद्–
वासोऽव्यक्तगलः 'प्रभो! किमुचितं ते मे परीक्षेदृशी ? ।
उत्तीर्णा ननु ते परीक्षणविधौ किं प्राणिनः पामरा
बद्धाः संसृतिवासनासु मुदिताः कामं कुतः स्युर्वयम् ॥ ६०७॥

कुर्यान्न प्रभुरेव चात्मनि कृपां तावन्न चोत्तीर्णता,
कामं पूर्णतया च वेद्मि तदिदं प्राणा न बाह्याः परम् ।
श्रीनित्योऽपरविग्रहोऽपि भवतो भिन्नोऽप्यभिन्नो मतो
यश्चैवं दयितः प्रभोस्तव हृदि श्रीपादरूपोऽपि सः ॥ ६०८॥

सोऽयं नित्ययतिस्तु पानविधिना कुर्यादगम्यागतिं
धर्मभ्रष्टमपीह माञ्च तदपि स्यान्नो घृणा तत्र मे ।
नित्यानन्दमहं सदैव विमलं मन्ये स्वरूपं प्रभो'–
धृत्वाऽसौ चरणौ रुरोद विकलश्चोक्त्वा वचो मार्मिकम् ॥ ६०९॥

उत्थाप्य स्वकराम्बुजेन वदति प्रेम्णा तथाऽऽलिङ्ग्य तं
'श्रीवास! त्वनया तथोत्तरगिरा क्रीतोऽस्मि त ` वस्तुतः ।
सन्तुष्टोऽस्मि च ते कदापि भविताऽभावो न सद्वस्तुनः
कृष्णप्रेमसुखाप्तिरत्र नियतश्चाश्वानकं ते गृहे ॥ ६१०॥

अहोऽनुरागो मयि ते,ऽधुनैव मे
स्फुटं हि बुद्धं सुहृदो हृदम्बुजम्' ।
तथाऽऽशिषा सद्गृहिणं प्रसाद्य स
प्रभुर्ययौ भक्तपरीक्षको गृहम् ॥६११॥

एकस्मिन् दिवसे महाप्रभुरयं ब्रूते शचीमातरं
'मातर्नित्ययतिं गृहेऽद्य निजके वाञ्छाऽस्ति मे भोजयै ।
स्वादु स्वादु च भोजनं स्वकरतस्तस्मात्पचाद्य स्वयं
पाके स्वे परिवेश्य भोजय तथा चावामुभौ भ्रातरौ' ॥ ६१२॥

माता तच्च निशम्य हर्षितमनाः पक्तुं द्रुतं प्रस्तुता
नेतुं नित्ययतिं प्रभुश्च चलितः श्रीवासगेहं ततः ।
नित्यानन्दमयं गतोऽत्र वदति 'श्रीपाद! ते मद्गृहे
भोक्ष्यावोऽस्ति निमन्त्रणं चलतु तत्सङ्गे तथाहं भवान्' ॥६१३।

श्रुत्वैवायमियच्च नृत्यति तथाऽऽनन्देऽत्र बालोपमः
प्लुत्वोत्प्लुत्य तथाऽऽह नृत्यनिरतोऽ'हो! रेऽद्य लालोत्सवः ।

भोक्ष्ये मातृशचीकरस्य भगवद्भक्तप्रसादौदनं
भोक्ताऽल्पं तनुलेपिता प्रभुमहञ्चानन्दयिष्येऽधिकम्' ॥६१४॥

दृष्ट्वा चञ्चलताप्रदर्शनमुखं प्रीत्याऽऽह तं तर्जयन्
'कार्यं पश्यतु सावधान! न तथा तत्रापि चाञ्चल्यकम् ।
चाञ्चल्याद् भवतो बिभेति जननी त्रस्येत्ततश्चाधिकं,
सम्यङ् मौनतयाऽद्य भुङ्क्ष्व कृपया तत्रात्र चास्त्यन्तरम्' ॥ ६१५॥

प्रेमामिश्रितमिष्टतर्जनवचः श्रुत्वा प्रभोर्बालवद्
भीतश्चाऽऽह तदा गभीरवचसा कुर्वन् करौ कर्णयोः ।
'ओ! रे! चञ्चलता कथं, लघुमपि ज्ञातं न चाञ्चल्यकं,
मत्तश्चञ्चलतां करोति, किमहं मत्तो, यतस्तत्क्रियः ?' ॥ ६१६॥

नाट्यं तस्य विलोक्य हस्तलघुकाऽऽघातं तथैकं ददत्—
पृष्ठे, 'चास्तु चलाधुना नहि कुरु व्यर्थं विलम्बं', जगौ ।
'एतत् वेद्मि, भवान्निजप्रकृतिकं त्यक्ता कुतो निश्चितं
पश्यत्वद्य मनाग् भवेदवहितः', स्थानक्षणज्ञः कृती ॥ ६१७॥

प्रेम्णाऽन्योन्यमुभौ गृहं त्वधिगतौ तद्वार्तया भ्रातरौ
सत्यामेव तथाहि मातरि तदा पाके त्ववाप्तौ गृहम् ।
श्रीनित्यो गत एव बालसदृशः प्रोवाच दीर्घस्वरः,
'अम्मा! मूषककूर्दनानुभवनं कुक्षौ, क्षुधा बाधते ॥६१८॥

सम्प्रत्यस्ति कियद्विलम्बनमितो गच्छत्यसुः क्षुद्द्रुतः',
सङ्केतेन दिदेश नित्यसुहृदं, 'मैवं कुरु' श्रीप्रभुः ।
उच्चैराह पुनस्तथैव यतिकोऽ'म्मा! पश्य गौरक्रियां,
तत्क्षुन्मां यदि बाधते कथमहं याचेऽपि नो भोजनम्' ? ॥ ६१९॥

माता तन्मृदुबालसौम्यवचनं श्रुत्वा जहासाऽमलं
चक्रे तत्परिवेषणं द्रुतमसौ स्थालीद्वये वत्सला ।
तत्र क्षालयति द्वयोः करपदे विष्णुप्रियाजी ततो
भोक्तुं क्षालितहस्तपादयुगलौ चोभौ निषण्णौ समम् ॥ ६२०॥

पुत्राभ्यां परिवेषणं कृतवती स्नेहेन माताऽऽत्मनो
भक्ताः केऽपि तथाऽऽययुः सुमनसस्तस्यान्तरङ्गाः समम् ।
प्रेम्णैवञ्च विलोक्य भोजनरतौ ते चात्र दृष्ट्वा तदाऽऽ—
नन्दप्रेममुदम्बुधौ विलुठिताः, स्वच्छानुभूती रसः ॥ ६२१॥

माता भोजयती प्रतीतिमयते चोभौ तथा भ्रातरौ
सङ्गे भोजयति स्म कृष्णरमणौ स्निग्धा यशोदा यथा ।

मातुश्चान्तरमद्य हर्षभरितं मातृत्वमाप्लावितं
नाना तत्र विनोदपूर्णवचनं भुञ्जानयोर्जायते ।। ६२२।।

भुक्त्वा मौनमवर्तत प्रभुरयं नित्यस्त्वदन्नेव त—
च्छेषं किन्तु तथौदनं ननु बहु स्थाल्यां विलोक्य प्रभोः ।
'अस्ति त्यक्तमिदं कथं ? नियमतो भोक्तव्यमप्येदकं',
'पूर्णं सम्प्रति चाधिकं हि जठरञ्चात्तुं पुनर्न क्षमः' ।। ६२३।।

गृह्णन् मुष्टिमथौदनस्य वदति स्थाल्याश्च नित्यः प्रभो—
'र्मा भुङ्क्ष्वास्त्वहमेव चाद्मि' वचनाज्जग्धुं तदोच्छिष्टकम् ।
हस्तं शीघ्रमथोद्यतस्य सुहृदो जग्राह तस्य प्रभुः
खादन्नेव पलायते स्म तदितः पाकालयोत्थो यतिः ।। ६२४।।

आश्चर्यं धृततत्करः प्रभुरपि स्थाने दधावानुगो
द्वन्द्वायोधनमाङ्गणे प्रचलितं तत्रैवमेव द्वयोः ।
नित्यानन्दयतिस्तदोदनमसौ चादैव भक्तप्रभु—
र्दृष्ट्वा स्नेहमिमं द्वयोश्च जननी मुन्मूर्च्छितेवाऽऽबभौ ।। ६२५।।

मातुस्ताञ्च दशां विलोक्य तरसा प्रक्षाल्य हस्तादिकं
चक्रे वायुमथ स्वपाणियुगलात्पाकस्थमात्रे प्रभुः ।
चैतन्ये क्षणतो गता च जननी प्रेमाश्रु सा मुञ्चती
पुत्राभ्यां निजमाशिषं ननु ददौ, प्रीतौ पदे नेमतुः ।। ६२६।।

नित्यं प्रभुः प्रापयितुं जगाम
श्रीवासगेहं सुमनाश्च यावत् ।
निमंत्रितेनायमनेन सार्धं
गृहं सदाचारनिधिर्बुधानाम् ।।६२७।।

नित्यानन्दयतिस्तथाहि नवकद्वीपेऽवधूतप्रभुः
स्थित्वैवं प्रभुसन्निधौ रसयते वाचामतीतं सुखम् ।
सङ्गं सोऽत्र सदा प्रभोरनुययौ, यत्रापि याति प्रभु—
र्द्वीपे भक्तगृहेऽत्र पृष्ठमनुगो नित्योऽप्यवश्यं बभौ ।।६२८।।

श्रीनित्येन विना प्रभोरपि गतिः कुत्रापि नो रोचते
भक्ताः स्वस्वगृहे महाप्रभुममुञ्चामन्त्रयन्तेऽखिलाः ।
तद्देहे निजभावनानुसरणान्नानावतारार्थिनो
लीलाः श्रीप्रभुसाधिताश्च विविधं पश्यन्ति लोकोत्तराः ।।६२९।।

हुंकारं कुरुते नृसिंहकलिताऽऽवेशादसौ कर्हिचित्—
प्रह्लादप्रकृतिः सदैन्यवचनः स्तौति प्रभुं विह्वलः ।

नाट्यं श्रीमथुरागतेश्च कुरुते श्रीकृष्णभावात्तथा
भावेऽक्रूरमहोदयस्य सहसा प्रीतौ प्रभो रोदिति ।। ६३० ।।
क्रीडत्यत्र कदापि गोकुलधरागोपालबालोपम—
स्तत्प्रेम्णोद्धवसन्निभश्च विकलो रोदित्यसौ कर्हिचित् ।
एवं श्रीयतिनित्यभक्तसहितो द्वीपेन्दुगौराङ्गको
नानासुन्दरलीलयाऽत्र तनुते शीतप्रकाशाऽमृतम् ।। ६३१ ।।

द्विविधो भावः

४३. वन्दे भगवद्भक्तोभयकं चैतन्याऽमृतरूपम् ।
सूकरनरहरिवामनरूपा लोकेश्वरतापेक्षा
रघुनन्दनयदुनन्दनमूर्तिर्हृदयमधुरताऽऽकांक्षा ।
व्यासप्रणयननारदगायनमखिलमतिश्रुतिपेयम्
प्रेमावतारहरिगौराङ्गः स्वात्मनिवेदनदीक्षा
नदियानिमायिहरिकीर्तनततिरतिभारतभुवमतति ।।

दृष्ट्वाऽरण्यगतं कविर्विकसितं यन्मालतीपुष्पकं
भूत्वाऽऽनन्दविभावितः सहृदयो नृत्यन् स्वतो माद्यति ।
सौन्दर्यं परिपूर्णतोऽनुभवति स्थानेऽत्र विश्वस्य तद्—
ग्रामीणोऽध्वनि पश्यति प्रतिदिनं दृष्टिस्तथा त्वत्र नो ।। ६३२ ।।

पुष्पास्तित्वममुष्य चाध्वनि कृते तावद्यथा लोष्ठकं
काष्ठं प्रस्तरमत्र तत्र पतितं सामान्यवस्त्वन्यकम् ।
पुष्पे तत्र विशेषभावभरिताऽऽरोपोऽस्य नो जायते
यद्भिन्ना भुवि भावनाऽत्र भवति प्रत्येकजीवात्मनाम् ।। ६३३ ।।

प्राणी भावमयो नूनं, भावो यत्र यथाऽस्य तत् ।
स च तत्र तथाभावं पश्यति तुलसीदृशा ।। ६३४ ।।

४४. प्रभुजी! भावजगत्परिपोषय ।
गगनपवनपावकजलधरणी स्वतोऽत्र सूत्रे द्रव्यम्
रजःप्रधानप्रकृतिः सृष्टिर्नुदति क्रियासु तथैव ।
द्रव्याभावो न च निष्क्रियता भावजगन्न च शून्यम्
यद्भवहेतुर्भावः प्रोक्तो, भावमयम् जगदखिलम् ।
भिन्नभावस्थितौ तु विवादस्ततो विविधमुत्पातः
भावं शोधय हे जगदीश्वर! देहि भावनां स्वगताम् ।।

ते भक्ता निजभावनानुसरणान्नानास्वरूपं प्रभो—
र्देहेऽप्यत्र विलोकयन्ति, तमहो कश्चिद् वराहात्मकम् ।
कोऽपि श्रीनरसिंहरूपमपरः पश्यत्यमुं वामनं
श्रीश्यामोपमसुन्दराकृतिरयं कस्यापि चालोक्यते ॥६३५॥

कश्चित्षड्भुजरूपदर्शनमतः प्राप्नोति लोकोत्तरं
नो दृष्ट्वा द्विभुजं, चतुर्भुजमयञ्चान्यस्तमापश्यति ।
प्रत्यक्षं ननु चास्य दर्शकदृशोः शङ्खश्च चक्रं गदा
पद्मं हस्तचतुष्टये स्फुटतया चाविर्भवन्ति श्रिया ॥६३६॥

एकस्यैव सतस्तथैवमधुना श्रीविग्रहं श्रीप्रभो—
र्भिन्नं भिन्नममुष्य भक्तनिवहो भावान्निजात्पश्यति ।
रूपस्यात्र चतुर्भुजस्य सुभगं यस्यापि वै दर्शनं
पश्यत्यस्य भुजान् स एव चतुरः सामान्यमन्ये जनाः ॥६३७॥

दृष्टौ यस्य शरीरमस्य सुहृदो ज्योतिर्मयं दृश्यते,
ज्योतिः केवलमत्र पश्यति, न तन्मूर्तिं तथान्याञ्च सः ।
द्रष्टुस्तस्य तथाऽद्भुतो नयनयोर्व्याप्तः प्रकाशोऽधुना,
सामान्यस्य जनस्य तत्क्षणमपि श्रीगौररूपाऽऽकृतिः ॥६३८॥

भक्तः पश्यति चास्य भक्तभगवद्भावौ च सामान्यतो
भावे भागवते तु विस्मरति तत्स्वात्मानमप्यत्र सः ।
निःसङ्कोचधियाऽपसार्य सुमनाः स्थानाच्च देवाऽऽकृतिं
ब्रूते स्वं 'भगवांस्तथाऽस्मि' भगवत्सिंहासने संस्थितः ॥६३९॥

भक्तार्चा भवतीति तस्य भगवत्तुल्यञ्च तस्यां स्थितौ
पादक्षालनमस्य गाङ्गजलतस्तच्चन्दनाऽऽलेपनम् ।
पुष्पाणां तुलसीदलस्य विधिना पादाब्जयोश्चार्पणं
कृत्वाऽन्ते च तथार्प्यतेऽस्य पुरतो नानोपहारः सतः ॥६४०॥

आपत्तिं किमपीह नैव कुरुते सोऽयञ्च तत्कर्मणां
भक्तैः किन्तु कृतं सुपूजनविधिं गृह्णाति सर्वं मुदा ।
आशीर्याचनहेतवे च नुदते तेभ्यश्च दत्ते प्रियं
भक्तेभ्यो वरदानमप्यकलितं, प्रीतिस्तु काम्या प्रभोः ॥६४१॥

भावोत्पत्तिरियं प्रभौ भगवतो नो केवलं, किन्तु सा
नानादेवगणस्य चापि, समये रामस्य भावे प्रभुः ।
हुंकृत्या मदिरेति चेच्छति गिरा चारक्तनेत्रस्तथा
चक्रञ्चाह्वयते कदापि, मघवद्भावे पविः कर्हिचित् ॥६४२॥

योगी कोऽपि मधुस्वरेण डमरुं संनाद्य तत्रैकदा
गायञ्छ्रीशिवगीतकं भ्रमति तद्भिक्षार्थमत्र स्थले ।
आयातः प्रभुगेहसम्मुखमसौ कुर्वंश्च भिक्षार्थनां
तत्र श्रीशिवगानमुज्झति महादेवस्य भावं प्रभौ ।। ६४३।।

स्कन्धे बालभरं विकीर्य सहसा शैवेऽत्र भावे गतो
ब्रूते याचकगायकस्य मधुरस्तूच्चस्वरेण प्रभुः ।
'अस्म्येवास्मि शिवः शिवो, ननु वरं त्वं याच माञ्चाऽधुना
प्रीतस्ते स्तवनात्'क्षणेन शमिते भावे स्थितोऽयं क्षितौ ।। ६४४।।

शान्ते शैवेऽस्य भावेऽत्र क्षणं चैतन्यशून्यता ।
भिक्षां दत्वा यथेच्छञ्च स्वगतस्तं विसृष्टवान् ।। ६४५।।

भक्तैर्भावनयाऽऽत्मनोऽत्र विविधञ्चैवं तथाऽऽलोक्यते
देवा भागवताः प्रभावपि पुनश्चायान्ति भावात्मना ।
तद्भावे शमिते हि विस्मरति तद्भावोक्तसर्वं स्वयं
स्पष्टं दीनविनम्रभक्तसदृशाऽऽचारं करोति प्रभुः ।। ६४६।।

तद्दैन्यञ्च तदास्य चाश्महृदयद्रष्टुस्त्वपि द्रावकं
तुच्छञ्चाधमकं निगद्य निजकं दीर्घं द्रवत्युच्चकैः ।
भक्तालिङ्गनकं विधाय च रुदन् विस्फुट्य जिज्ञासते
'कृष्णः कुत्र गतो नु ? तन्मिलनतो भ्रातस्त्वसून् प्रीणय ।।६४७।।

उक्त्वा तन्मम वेदनां शमयतु श्रीकृष्णसंकेतनं
त्यक्त्वा मां विलपन्तमेव विरहे यातः कुतो मोहनः' ।
एवं प्रेम्णि स विह्वलो ननु पदेऽद्वैतादिवृद्धात्मनां
भक्तानां समवाप्य तत्र च शिरो घृष्यन्निजं भिक्षते ।। ६४८।।

वारम्वारमयं नमत्यखिलकं, कश्चित्तदानीं यदि
ब्रूते वा भगवानिति स्तवनकं तस्यार्चनञ्चेष्टते ।
गङ्गायां पतितुञ्च धावति ततो दुःखी, तदत्र प्रभोः
सामान्यस्थितिगस्य कोऽपि कुरुते नार्चां प्रभूच्चारणम् ।। ६४९।।

एक एव सदा भावो भक्तात्मन्यस्ति तु स्थिरः ।
स्वादयति हि सद्भावः शब्दव्याहृत्यगोचरम् ।। ६५०।।

तिष्ठत्यत्र यदा प्रभुः प्रकृतितो भावे च साधारणे
श्रद्धाभक्तियुतस्तदैकहृदयो भक्तो ह्यमानी यथा ।
साष्टाङ्गं सुरवाहिनीं नमति तच्चाम्भस्तथाऽऽचामति
श्रीमत्ठाकुरपूजकस्तुलसिकाऽम्भोदः परिक्रामति ।। ६५१।।

विस्मृत्य स्वयमीश्वरीयचरितं भावेऽखिलञ्चचेष्टते
भावेऽस्तेऽत्र च कोऽपि किञ्चिदपि तत्पृच्छत्यमुञ्चेत्तदा ।
दैन्येनातिशयेन चोत्तरमिदं 'भ्रातो! न वेद्मि स्वतोऽ—
चैतन्ये मम किञ्च किञ्च वचनं (ब्रूयाच्च तच्चेतन:) ।।६५२।।

नो मन्तव्यमशोभनं किमपि वै चोक्ते भवद्भिर्मया
क्षाम्यद्भिर्भवितव्यमेव सततं जातेऽपराधे च मे ।
तद्देह्याशिषमत्र येन मुखतोऽचैतन्यभावेऽपि नो
व्यापार: स भवेद्यतोऽस्मि भवतां कृष्णेऽपराद्धा तथा' ।। ६५३।।

नृत्यञ्चात्र करोति भावयुगल: संकीर्तनेऽपि, प्रभु:
सारल्यातिशयेन चातिमधुरं भक्तात्मना नृत्यति ।
शीर्षे पादरज: करोति सुहृदां भूयश्च तान् वन्दते
मध्येकीर्तनमेव सोऽत्र पतति द्राग् भक्तभावद्रुत: ।। ६५४।।

तत्पातश्च कदापि दीर्घमभवत्संकीर्तने तादृशो
भक्तास्तस्य दशां विलोक्य विकला: सर्वे भवन्ति स्म यत् ।
वैकल्येन विलोक्य तस्य पतनं तावच्च माता शची
साऽधीरा परमं सती च रुदती श्रीमत्प्रभुं याचते ।। ६५५।।

'श्रीमन्! हेऽशरणाश्रयात्मजममुं मा पीडयेयत्प्रभो!
मेऽत्राद्वैतनिमायिनं', सहृदया भक्तास्तत: कीर्तने ।
सर्वे ते ननु सावधानमनसो रक्षन्ति धृत्वा प्रभुं
सन्नद्धा: परिवृत्य, मूर्च्छितदशश्चेन्नापतिष्यत्क्षितौ ।।६५६।।

भावावेशगतोऽपि कुत्रचिदसौ संकीर्तनं श्लाघते
तल्लोकोत्तरमद्भुतं भवति वै नृत्यं तदानीं प्रभो: ।
भक्तानां नहि साहसं प्रियतनुस्पर्शेऽपि तस्याधुना
नृत्ये हुंकृतितो ध्वनन्ति च दिश: पादाद्यथा भूचल: ।।६५७।।

एकाऽऽकृष्टिविशेषयन्त्रितहृदो मुग्धास्तथा विस्मिता
भक्ता: कीर्तनकास्तदाहि निखिला: कुर्वन्ति सर्वा: क्रिया: ।
बाह्यज्ञानमथास्ति नाल्पमपि तत्तेषां सतां वस्तुत—
श्चानन्दो बहु तत्र नृत्यरसने सर्वस्य भद्रात्मन: ।।६५८।।

एवं कदापि ननु कीर्तननृत्यसङ्गे
पूर्णाऽतियाति सकला क्षणदा त्रियामा ।
प्राता रवौ प्रकटिते नभसि प्रयाते
संकीर्तनं तदपि नाम विरम्यते नो ।। ६५९।।

एकैकक्रमतस्तथाहि बहवो द्वीपे नवे भावुका
भक्ता वासमकुर्वतात्र रसिकाश्चागत्य संकीर्तने ।
श्रीवासस्य गृहे मिलन्ति सुहृदा नन्दन्ति भक्तात्मना
तत्तेषां घटित: शनै: परिकरश्चोल्लेखनीयोऽतुल: ।। ६६० ।।

श्रेष्ठास्ते निखिला: किमत्र सुहृदां गौणप्रधानस्थिति–
र्भक्तश्रीहरिदासनित्ययतिकाऽद्वैतास्तथापि त्रय: ।
भक्ता मुख्यतया विरक्तपरमा: सर्वस्वकत्यागिन–
स्ते चासन् बहु चान्तरङ्गहृदया भक्तेषु तत्र प्रभो: ।। ६६१ ।।

श्रीवासञ्च विहाय तत्त्रितयकेऽत्यन्ता कृपा श्रीप्रभो–
स्तैरेवात्र समस्तकार्यघटनं सोऽयं ववाञ्छात्मन: ।
अद्वैतप्रभुनित्ययो: परिचय: सामान्यत: पाठकै:
प्राप्तस्तेषु तु, साम्प्रतं प्रियहरिश्रीनामदासक्रम: ।। ६६२ ।।

यावान्नामजपस्य चात्र महिमा भक्तादमुष्माद्भरे–
र्लोके श्रीहरिदासत: प्रकटित:, केनापि तावान्नहि ।
ज्ञेयश्चेतनविग्रह: स भगवन्नामप्रभावस्य तत्–
संक्षिप्तोऽस्य हृदा तथापरिचयोऽध्यायेऽग्रिमे चीयताम् ।।६६३।।

भक्त-हरिदास:

**४५. जिह्वारसनेन्द्रियतासिद्धि: श्रीनामप्रियतायाम् ।
लोके विजिते रसनास्वादे सर्वविजयसम्पत्ति:
निराहारत: केवलविषया, रसोऽपि परदर्शनत:
विनिवर्तन्ते, किन्तु च सिद्धि: सर्वशरणसंस्मृतित: ।
तीर्थस्नानं वेदाभ्यासो हवनतपोऽनुष्ठानम्
सर्वे श्रेयोमार्गा:, फलमिह सर्वेषां परनिष्ठा ।
कलिकलिते विकराले काले सरल: कीर्तनमार्ग:
श्वपचोऽपि प्रियहरिकीर्तनत: साधुर्व्यवसितबुद्धि: ।।**

संसारोऽल्पकृपाकटाक्षबलतो यस्य स्थित: पूर्णतो
भ्रूभङ्गात्प्रकृतिर्निजव्यवहृतिं सर्वां समाप्नोति च ।
तस्यानन्तविलासरासभगवन्नामप्रभावाऽऽकृति–
ख्यातिञ्चात्र किमेव कर्तुमयतां भाषा वराकी खिला ।।६६४।।

लोके श्रीहरिनामसंस्मरणतोऽशक्यं न किञ्चित्तथा
सिद्धिर्नामजपेन तद्भगवत:, कार्यस्य कस्यात्र नो ? ।

यज्जिह्वा मधुनामरूपरसनाऽऽसक्तिः कृपोत्पादिता
स्वाद्यं प्राप्यमथात्र वस्तु किमपि स्थाने न वै तत्कृते ।। ६६५।।

यज्ञध्यानसमाधिपूजनतपोनिष्ठाजपादेः फलं
प्रीतेरुद्धवनं तथैव भगवन्नाम्न्यस्ति सर्वोत्तमम् ।
प्रीतिर्नाम्नि यदीह नाजनि ततः सर्वं त्विदं व्यर्थकं
तेषाञ्चाखिलकर्मणां फलमतस्तन्नामनिष्ठाऽन्तिमम् ।। ६६६।।

तन्नामैव तु साध्यमस्ति, निखिलं कर्मास्ति तत्साधनं
श्रीमन्नामजपे न पात्रसमयस्थानस्य निर्धारणम् ।
यत्र क्वापि कदापि कोऽपि मधुरं तन्नामसंकीर्तनं
स्थाने वै समये जनोऽमृतमयं शक्नोति कर्तुं हितम् ।। ६६७।।

पापात्पापतमोऽपि नामजपतोऽत्यन्तं भवेत्पावनो
नीचान्नीचतमोऽपि तेन नियतं सर्वत्र पूज्यस्तथा ।
सर्वश्रेष्ठपदं लघोर्लघुतमस्तत्प्रेमतोऽप्यश्नुते
दुष्टाद्दुष्टतमोऽपि चात्र भगवद्भक्तो महाञ्जायते ।। ६६८।।

४६. लोके केवलभगवत्कृपया नरतनुसम्पत्प्राप्तिः ।
भावव्यञ्जनचिन्तनसाधनवाक्चेतःसम्पत्तिः
शुभसंस्कारग्रहणसमर्था नरतायामेवाप्ता ।
परगुणदोषाऽऽख्याने वाणी चित्तमसच्चिन्तायाम्
श्रीमद्वर्णनसंस्मरणे भुवि यस्य नरः स तु धन्यः ।
श्रीमद्भगवन्नामजपे यः, कुष्ठी सन्नपि शस्तः
रामो नास्ति सुवर्णमुखे यदि, शप्तः सोऽस्ति 'कवीरात्'।।

भक्ताग्रगण्य 'हरिदास' पवित्रनामा
जातः कुलेऽपि यवने प्रभुनामभावात् ।
श्रीवैष्णवेषु कलितस्मरणीयकीर्ति–
'र्लोकोत्तराऽस्य दयिता हरिनामनिष्ठा ।।६६९।।

वङ्गे ह्यत्र यशोहरस्य बुडनग्रामे कुले मुस्लिमे
जन्म श्रीहरिदासभक्तशशिनश्चासीत्प्रसन्नात्मनः ।
बाल्येऽस्यैव दिवङ्गतौ च पितरौ तस्मात्स्वजन्मस्थलं
त्यक्त्वा श्रीहरिनामकीर्तनरतो भ्राम्यन्नभूद् ज्ञायते ।।६७०।।

तदन्यः संस्कारो व्यवसितशुभः पूर्वरुचित–
स्तथाऽखण्डश्रीमद्भगवदमिताऽऽत्यन्तिककृपा ।

अहो! बालस्याऽऽस्था यवनकुलजस्यापि भगव–
त्पवित्रश्रीनामस्वविरलजपेऽभूत्प्रकृतितः ।।६७१।।

४७. चौराद् धनिनां भुवि संग्रहिणां गृहिणां भीतिरुदेति ।
धनसंग्रहणे गृहिणोऽधिकृताः शास्त्रेऽखिलमनुकर्तुम्
तत्राभावाद् दुर्व्यसनाद्वा तद्धनचौराः केचित् ।
संहर्ता नियमेन हरति वै पुनर्नवञ्च विधातुम्
आतनुते मधुरं स्ववतारी नवनीताम्बरहरणात्
पुष्टिर्भागवताऽनुग्रहणं शनैः शनैर्धनहरणम् ।।

उक्तिर्भागवती, 'करोमि शरणे स्वे यं निजानुग्रहात्–
सर्वस्वं हि हरामि तस्य शनकैः किञ्चिन्न हाता धनम्' ।
एवञ्चादित एव तत्र महती श्रीमत्कृपाऽऽसीत्प्रभो,–
र्दासः स्वप्रकृतेरतोऽस्य जगतः सर्वोऽप्ययं श्रीहरेः ।। ६७२।।

तत्काष्ठस्य धनं कमण्डलुरपि ह्यासीन्न पार्श्वेस्य तत्–
प्राप्तायां क्षुधि, भिक्षणं जनपदे, भिक्षान्नमात्राऽऽश्रयी ।
यल्लब्धञ्च तदेव रात्रिदिनयोर्वारं तथैकं परं
भुक्त्वा श्रीहरिनाममात्रजपनं कुर्वन् बभूवानिशम् ।।६७३।।

एकाकी च गृहं विहाय च वनग्रामस्य पार्श्वेऽवसद्–
वेनापोलपदाख्यनिर्जनवने निर्माय शष्पैः कुटीम् ।
सर्वप्राणिषु तस्य शान्तिरतुला तेजःप्रभावाद्वने
जीवः सम्मुखमागतोऽस्य ननु यो भावान्वितः सोऽभवत् ।।६७४।।

तत्र व्याप्य दिवानिशं भगवतो नाम्नां त्रिलक्षं जपं
कुर्वन्नस्ति स, मन्दतस्तदपि नो, किन्तु स्वरादुच्चतः ।
उच्चैस्तस्य जपेऽत्र कारणमिदं, स्पष्टं पवित्रं, प्रभोः
सन्नामश्रवणाच्चराचरजगत्सर्वं भवेत्पावनम् ।।६७५।।

काले निष्कृतिसाधनं हि भगवन्नामाऽत्र तत्केवलं
स्वल्पैरेव दिनैस्ततोऽस्य विततं दूरं यशःसौरभम् ।
एतद्दर्शनहेतुकाऽत्र जनताऽऽयान्ती विदूरादभू,–
ल्लोके ह्युत्सुकता गतानुगतिका भद्रेऽनुकम्पा प्रभोः ।।६७६।।

तावत्तस्य यशस्त्वसह्यमभवच्चेर्ष्यालुदुष्टात्मनां
दासायात्र हरेर्नकारणमहोऽद्विक्षंश्च तेऽसाधवः ।
तेष्वेको धनिकोऽपि भूमिपतिकः खाँरामचन्द्राऽभिधः
कर्तुं तं पतितं यशोऽस्य मलिनं केनापि सोऽचिन्तयत् ।। ६७७।।

द्वे स्त: साधकपातनाय गरले, ते कामिनीकाञ्चने,
तत्र प्राकृतवासनाकलुषितेऽमोघच्छटा कामिनी ।
तद्द्वारा हरिदासपातनविधौ खाँभूपतेर्निश्चयो
दास: स्वामिसुरक्षितस्तु, किमहो! स्वामी नु दासोऽन्यथा ।। ६७८।।

संसारो निखिलो भवेत्परमयं दासस्य कामं रिपु—
स्तस्मिन् स्वामिनि कर्हिचिज्जगति नो बालोऽपि तस्याऽऽनत:।
एवं सत्यपि चात्र नीचपुरुष: स्थाने निवृत्त: कथं ?
संसारे निजनीचताव्यवहृते,र्नीचात्मता नीचता ।।६७९।।

एका षोडशवत्सराऽतिललिता वेश्याऽमुना प्रेषिता
खाँचन्द्रेण मनोहराऽस्य भजने भङ्गं विधातुं तथा ।
वेश्या सापि च रूपगर्वितमना: पातप्रतिज्ञात्मना
शृङ्गारोचितसज्जिता बहु हरेस्तस्याश्रमे चागता ।।६८०।।

रूपान्मे ललितात्तथाहि पुरुष: कोऽप्यत्र लावण्यतो
नासक्तो न च लोकनादपि भवेत्तस्यास्तथा मान्यता ।
किन्तु श्रीहरिनाम्नि यश्च निरतस्तुच्छञ्च सांसारिकं
लावण्यं ननु तस्य, तद्धरिजनोऽक्ष्णाऽप्यत्र नो चेष्टते ।।६८१।

वैराग्यं कियदत्र चास्ति च महांस्त्यागो मनोनिग्रहो
हस्तं स्वे हृदये निधाय तदहो! मात्वल्पकं पाठक: ।
स्थानं निर्जनकाननं ननु हरेरभ्युद्यतं यौवनं
लावण्यातिशयान्विताऽत्र पुरतश्चोपस्थिता सुन्दरी ।।६८२।।

साप्यत्र प्रणयार्थनाञ्च कुरुते यून: स्वयं सम्मुखे
किञ्चिन्नात्र तथापि भक्तहृदये जातो विकारोदय: ।
आसीन्मग्नमनास्तथैव सुमना: श्रीकृष्णसंकीर्तने
सामान्यस्य नरस्य चैष विषयो बुद्धेस्तु पारे परम् ।।६८३।।

गत्वा वाराङ्गना तत्र मौनं सीदति सुन्दरी ।
महामन्त्रं जपन्नास्ते हरिदासो निरन्तरम् ।।६८४।।

"श्रीधर्मोऽथ हरेऽत्र राम! च हरे! राम! स्वदासप्रिय:
श्रीरर्थो ननु राम! राम! सखिता काम्या हरे! ते हरे! ।
वात्सल्यञ्च हरेऽव कृष्ण! तु हरे! कृष्ण स्वकाम: सतां
मोक्ष: कृष्ण! च कृष्ण! सन्मधुरताभावो हरे! वै हरे!" ।।६८५।।

यातं तच्च दिनं, ततोहि लसिता संध्या, व्यतीता निशा
प्रातोऽभूच्च पुनस्तथैव दिवसा याताश्चतु:संख्यका: ।

आयात्यत्र यथा, तथा प्रतिदिनं वाराङ्गना याति सा,
चौरश्चोरयते धनं लुटति वा दस्युर्यदि स्याच्चितम् ।। ६८६।।

मध्ये किञ्च कदापि साहसमियं कृत्वा मनाक् चेष्टते
वक्तुं श्रीहरिदासमत्र किमपि, श्रीदासनम्रोत्तरम् ।
'तिष्ठेद्वै भवती, सुनामजपने संख्याऽत्र संकल्पिता,
यावन्मे ननु पूर्यते, तव वचः श्रोतुञ्च शक्ता ततः' ।। ६८७।।

संख्या नामजपस्य किन्तु दश वा नासीत्सहस्रं तथाऽऽ—
सील्लक्षत्रयनामजापकरणं तच्चापि गानस्वरात् ।
चत्वारोऽपि गतास्ततोहि दिवसास्तस्या निराशामयाः
प्रातस्तिष्ठति चागताऽर्धदिवसं, दासोऽस्ति गायँल्लयात् ।।६८८।।

"श्रीमन् हरे! द्रवतु राम! हरे! च राम!
श्रीराम! राम! च हरे! च हरे! प्रसीद ।
प्रेमन् हरे! लसतु कृष्ण! हरेऽत्र कृष्ण!
श्रीकृष्ण! कृष्ण! च हरे! च हरे! सदैव" ।।६८९।।

तिष्ठन्ती स्वयमत्र चापि भजते मंत्रं वराकी त्वमुं
सायं तिष्ठति चागताऽर्धनिशकं दासोऽस्त्यजस्रं जपे ।
"रामो राम! हरे! हरे! मम हरे! श्रीराम! रामो हरे!
कृष्णः कृष्ण! हरे! हरेऽवतु हरे! श्रीकृष्ण! कृष्णो हरे!" ।। ६९०।।

चत्वार्यत्र दिनानि चाविरलकं नामस्मृतेः श्रीहरे—
स्तस्याः पापचयक्षयाऽखिलमभूद् बुद्धिस्ततो निर्मला ।
भूयो धिक्कुरुते तदीयहृदयं तस्यै तथा साम्प्रतं,
पार्श्वे चास्य तथाहि साधुमनसः किंनिन्द्यभावादिता ? ।।६९१।।

संस्मृत्येदमसौ निजात्मनि ततोऽत्यन्तं तथा दूयते
नान्तेऽतिष्ठदियं स्थिरा, चरणयोर्दीना हरेश्चापतत् ।
ऊचे गद्गदितस्वरा नयनयोस्तापाश्रुकं मुञ्चती
'सत्यं त्वं पतितात्मपावनतपाः सिद्धो महाभाग! हे! ।। ६९२।।

साधुर्नित्यमहैतुकीं निजकृपां लोके करोति स्वतः
पात्रापात्रविचारणाविरहितः सामान्यतः सर्वदा ।
तावांस्त्वं परमो दयालुरधुना, क्षुद्राऽधमा मादृशी
नारी लोकविनिन्दिताऽत्र पतिता किंबुद्धिभावात्मिका ।।६९३।।

एतस्यामपि ते स्फुटं प्रकटिताऽसीमानुकम्पा त्वया
प्राप्ता चात्र कुबुद्धितो हि भगवन्! स्थाने भवत्सन्निधौ ।

भावो मे परिवर्तितस्तु निखिलं सङ्गप्रभावाच्च ते
तन्नाम्नां मधुरश्रुते: कलुषितो भावोऽभवद्भस्मसात् ॥६९४॥

सम्प्रत्यस्मि पदे तवात्र शरणे पापाबलामुद्धर
प्रायश्चित्तमुदाहराद्य मम तद्घोरात्मनाञ्चांहसाम् ।
होपायोऽत्र ममापि कोऽपि भवितुं शक्नोति किं निष्कृते:?'
सा चैवं हरिदाससाधुचरणेऽलोटद्वदन्ती स्फुटम् ॥६९५॥

ऊचे तां हरिदासजी तु वितरंश्चाश्वासनं कातरां
'देव्युतिष्ठ न हि भ्रमस्थितिरिह स्थाने प्रभौ शोचति ।
अस्ति श्रीहरिजी दयालुरपर: सर्वप्रकारात्मना—
मुद्धारं कुरुते स नीचपतितभ्रष्टाऽधमप्राणिनाम् ॥६९६॥

आस्थानेऽस्य कदापि वै भगवतो नो भेदभावस्थिति—
स्तन्नाम्न: पुरतो गुरोरपि गुरु: पापो न तिष्ठेद् ध्रुवम् ।
यावत्पापविनाशशक्तिमहिमा नाम्न्यस्ति सत्ये हरे:
पापं पापतमोऽपि तावदवनीमध्ये न कर्तुं क्षम: ॥६९७॥

यद् द्रव्यं ननु पापकर्मभिरतश्चोत्पादितं तत्स्वत:
कर्तुं श्रीहरिनामगानमनिशं ह्यभ्यागतेभ्य: किर ।
सर्वं पापमतो भविष्यति परं दूरं तव श्रीहरे—
र्गाढप्रीतिरवश्यमेव च तथा श्रीमत्पदाम्भोजयो: ॥६९८॥

"अष्टौ नाम हरेश्चतु:परिमितं रामस्य कृष्णस्य च
त्राणे षोडशनामभि: स भगवाञ्छ्लोके हि सम्बोधित: ।
तद्वर्णाश्रमभक्तिभावपुरुषस्वार्थप्रतीकात्मना
श्रीमन्नाम सुचारु गुम्फितमहो! तत्कीर्तनप्रेमिणाम्" ॥६९९॥

सामर्थ्यं हि विराजमानमखिलञ्चास्तेऽत्र मन्त्रे हरौ
त्वञ्चास्यैव निरन्तरं प्रियजपं स्थानेऽस्तु वै कुर्वती ।
कुट्याञ्चात्र वसामि नाहमधुना तिष्ठ त्वमेवात्मना',
कार्यं ह्यत्र कदापि किञ्चिदवधिं सिद्ध्यै रह:सेवनम् ॥७००॥

वेश्यां तामुपदिश्य शान्तिपुरकं भक्तो ययौ तत्परं
सोऽवक्रं हरिदासजी प्रियहरेरारब्धुमध्यायकम् ।
गत्वाऽद्वैतगुरोश्च सन्निधिमसौ लीनो विनीतो मृदु:
श्रीशास्त्राध्ययने सदैव सुमना: श्रीकृष्णसंकीर्तने ॥७०१॥

आदेशानुसृतेश्च दाससुमतेर्वाराङ्गनाप्यत्र सा
सर्वस्वं निजकं वितीर्य तरसा नि:स्वाभवेषं दधौ ।

वस्त्रं जीर्णविदीर्णशीर्णमधुना संवेष्ट्य देहे निजे
भिक्षान्नोदरपोषणानुसरणञ्चक्रे गुरोः पादयोः ॥ ७०२॥

अल्पैरेव दिनैस्तदीयतपसः ख्यातिः ससार स्वतो
दूराद्दर्शनहेतुकाश्च बहवस्तत्सन्निधिञ्चागताः ।
ख्याता सा हरिदासनाममिलिता सर्वत्र सम्मानिता
सत्सङ्गस्य तथैव चात्र महिमा, रत्नं महत्सङ्गतिः ॥ ७०३॥

कवीनां वचनं सत्यं व्याजबुद्ध्या भवेदपि ।
महात्मभिः कृतः सङ्गो व्यर्थं याति न कर्हिचित् ॥ ७०४॥

प्रत्यक्षं स्वकुकृत्यदूषितफलं खाँरामचन्द्रेण त–
च्चात्रैवाधिगतं, तथाहि समये राज्ञे ददौ नो बलिम् ।
तस्मात्सोऽत्र च दण्डितो बहुविधं, तत्रापराधे नृपाद्
गेहेऽखाद्यमथास्य राजपुरुषास्त्वागत्य चादंस्तथा ॥७०५॥

बद्ध्वा तं शिशुकैः समं वनितया निन्युर्नृपस्यामुखं
नानादैहिकयातनां नृपविधेः सेहे तथात्रापि सः ।
सत्यञ्चास्ति, जनो यथात्र कुरुते प्राप्नोत्यवश्यं फलं
तस्यायञ्च तथा, परं हरिजनो नो दूयतेऽसाधुभिः ॥७०६॥

हरिदासस्य नामनिष्ठा

४८. **अधुना ज्ञाता नाम महत्ता ।**
वासुदेवजपसंयतचित्ते ध्रुवे निरुद्धप्राणे
अवरुद्धं ब्रह्माण्डश्वसनं बालनिवेदनभक्तौ ।
भ्रातृमुक्तिविमूढगोकर्णः सूर्यस्तम्भनविधिना
नामपुराणोपायं लेभे भागवतं श्रुतिगुणितम् ।
स्वयं परञ्च ह्लादं परमं श्रीहरिजपनाद्रसयति
तत्प्रह्लादो बालो ब्रूते पश्य तात! मम गात्रे
नामप्रभावादनलोऽप्यत्र सलिलायते हि जपतः ।
'हरे राम'—षोडशनामालीमन्त्रजपोदाहरणम्
यवनशिशोर्हरिदासख्यातिः स्वादयति प्रह्लादम् ॥

कार्ये लौकिकपारलौकिकगते सर्वात्मके सर्वदा
पूजाभक्तितपोजपानुभजने विश्वास एवाङ्गिकः ।
विश्वासो ननु यस्य यत्र च यथा जातो विरूढस्तथा
प्राप्तं तादृशमेव तस्य च फलं तेनैव भावि ध्रुवम् ॥७०७॥

हेतुर्मुख्यतया फलस्य, मनसो विश्वास एवास्ति वै
विश्वासस्य किमप्यसम्भवफलं नास्तीति तत्सम्मुखे ।
पर्यायोऽस्ति परन्त्वसम्भवपदाऽविश्वासभावौ तथा
सर्वं सम्भवमस्ति तत्प्रकटिते विश्वासभावे स्थिरे ।।७०८।।

मत्वा तच्चरणामृतं ननु पपौ विश्वासयोगाद् विषं
मीरा, प्रस्तरमूर्तिमादयति च श्रीनामदेवः स्फुटम् ।
क्षेत्रं वै वपनं विनैव फलितं धन्नाख्यभक्तस्य तद्
रैदासोऽत्र विधाय दर्शयति तन्मूर्तिं सजीवां हरेः ।।७०९।।

विश्वासस्य दृढस्य चैव स चमत्कारोऽस्ति भक्तात्मनां
नो चायं भवतीह वै विचलितो विश्वासतश्चात्मनः ।
अत्यन्तापि विपच्च तस्य घटना साधारणी ज्ञायते
निष्ठा यस्य दृढा तथैव भगवन्नाम्न्यस्ति सत्प्रेमिणः ।। ७१०।।

प्रह्लादध्रुवयोश्चरित्रममलं ह्यत्र प्रमाणं स्फुटं
प्राचीनं बहु, किञ्च तत्कतिपयो ब्रूतेऽर्थवादं ह्यपि ।
अस्ति श्रीहरिदासशुद्धशरणश्रीनामनिष्ठा परं
स्वल्पातीतसमस्य, सम्प्रति गतं दीप्तं प्रमाणन्तथा ।।७११।।

संसर्गश्च सहस्थितिः स्फुटतया तेनात्र यैर्वै कृता
दृष्टा भीषणयातना स्वनयनैस्तस्य स्वयञ्चापि यैः ।
दासस्यात्र हरेश्च तस्य चरितं तैरेव तद्गुम्फितं
सामान्योऽतनुघोरयातनमहो! तत्किं सहेताऽत्र ना ।।७१२।।

निष्ठां नाम्नि दृढां विना भगवतः किं कोऽपि तद्वत्परं
स्थाता स्यान्निजनिश्चयेऽटलमनाः, काले कदाप्यत्र नो ।
यावन्नो हृदि वै भवेन्ननु दृढं विश्वासजन्यं बलं
तावन्नोऽत्र च सम्भवैव दृढता स्यात्तादृशी वस्तुतः ।।७१३।।

वेनापोलवनान्तनिर्जनकुटीस्थाता महात्मा हरिः
शुद्धेच्छाशरणाप्तवारवनितोद्धारं विधायात्मनः ।
कुट्यां ताञ्च निधाय शान्तिपुरकेऽद्वैतं ययौ सङ्गतिं,
त्यागी यच्च जहाति तच्च भगवत्प्रेमी पुनः सेवते ।।७१४।।

पार्श्वे शान्तिपुरस्य तत्र फुलियाग्रामे तथैकान्तकं
मत्वा श्रीहरिगायको लघुकुटीं निर्माय तस्थौ हरिः ।
कुर्वन् कीर्तनमस्ति तत्र भगवन्नाम्नामसौ चानिशं,
श्रीशङ्खध्वनितो हि शुध्यति नभो नानाऽऽरवैर्दूषितम् ।।७१५।।

देशे मुस्लिमसंस्कृतेश्च निखिले प्राबल्यमासीत्तदा
सत्ताधार्मिकताद्वये यवनता वङ्गे विशेषात्तथा ।
शक्तो मुस्लिमतो विरुद्धमधुना कर्तुं न कोऽप्यत्र 'चूँ'
काजी मुस्लिमताप्रचारकरणे स्थाने नियुक्तोऽखिले ।।७१६।।

विघ्नं यं कमपि स्वधर्मसरणे काजी तदा बोधते
घोरं सोऽत्र तमेव दण्डयति वै स्थानीयराजाज्ञया ।
भूयो येन न कोऽपि तद्यवनताधर्मप्रचारे तथा
विघ्नोत्पादनकर्म साहसमपि स्थाने स्वचित्ते क्रियात् ।।७१७।।

कर्ता तत्समयस्य चैकविधिना धर्ता विधाता तथा
काजी चैव बभूव धर्मविधिकृत् पूर्णप्रभावात्पुनः ।
सत्तायां स च शासनेऽत्र समये राजा परं बुध्यते
तन्त्रं राजकृतं प्रजासु हितकं पूर्वापरं प्रायशः ।।७१८।।

गोरा नाम नियोजितोऽत्र फुलियापार्श्वेऽपि काजी तथा–
कार्ये चास्ति, विलोक्य दासहरिजीतावत्प्रभावं क्षणम् ।
ईर्ष्याऽसीमतया तथाऽस्य ववृधे सोऽयं तदाऽचिन्तयद्–
'वृद्धिं यान्तममुं प्रभावमधुना दासस्य रुन्धे न चेत् ? ।।७१९।।

आघातो भविता महान् यवनताधर्मप्रसारे ध्रुवं,
जात्याऽयं यवनस्तथापि कुरुते हिन्दुत्वधर्मक्रियाम् ।
कुफ्रं 'रू' विषये करोति सरहे,नूनं स वै काफिर–
स्तस्मात्काफिरकत्लतोऽपि नियतं धर्मे सबाबोऽस्ति नः ।।७२०।।

अन्योऽप्यस्य तथा करिष्यति कृतिं दृष्टानुदृष्ट्यैव तां
तद्दण्ड्यो दरबारतोऽयमधुना' गोरा विचिन्त्येदकम् ।
काजी सोऽस्य विरुद्धमत्र कृतवान् राज्ञोऽभियोगं पुरो
बद्धस्तद्धरिदासजी प्रियहरी राजाज्ञया सत्वरम् ।।७२१।।

एवं तस्य चचाल मूलुकपतेः पार्श्वेऽभियोगोऽर्पित–
स्तेजश्चास्य विलोक्य तत्र मुलुकस्वामी गतो विस्मयम् ।
सत्तुं सोऽस्य ददौ तथाऽऽसनमहो! तत्र स्थिते वै हरौ
स्वस्वाभाविकधार्मिकानुसरणं ब्रूते दयां दर्शयन् ।।७२२।।

'हे भ्रातस्तव जन्म मुस्लिमगृहेऽत्यन्तं कृपा स्वामिन–
स्तच्चास्ति त्वयि, किन्तु काफिरसमो लोके कथं वर्तसे? ।
मुक्तिस्ते नहि तेन, साधनमतो मुक्तेः कुराने यथा
प्रोक्तं मुस्लिमधर्मपुस्तकमते, धर्मः स्वकीयोऽमृतम् ।।७२३।।

आयाति त्वयि मे दयाऽत्र महती, दण्डाय ते नोत्सहे
तत्तोबां कुरु चाधुनापि कलमामुच्चार्य याहि स्फुटम् ।
श्रीमोहम्मदसाहबस्य शरणं सर्वापराधक्षमां
कर्ताऽसौ तव, तेन मुक्तिपदवीं नो चान्यथा लप्स्यसे' ।। ७२४।।

श्रुत्वा तन्मुलुकोत्तमस्य वचनं सौम्यं तथा सुन्दरं
ब्रूते दासहरि'र्महाशय! परं ते भाषितञ्चात्मनः ।
विश्वासानुसृतेर्यदुक्तमधुना सर्वं तथैवोचितं
विश्वासः प्रतिलोकमत्र भवति स्थाने तु भिन्नः परम् ।। ७२५।।

विश्वासो ननु यस्य यादृशदृढस्तस्यात्मने तादृशो
विश्वासः फलदायकोऽस्ति, परतो लोभात्तु वा त्रासनात् ।
यो विश्वासममुं जहाति निजकं भीरुर्भवत्यत्र स,
प्राप्तिस्तत्परमात्मनो नहि तथा भीरोः कदाचिद् भवेत् ।। ७२६।।

ब्रूते तूचितमेव सम्प्रति भवान् विश्वासतश्चात्मन—
स्त्यक्त्वा दण्डभयाद्यदीह भगवन्नाम्नान्तु संकीर्तनम् ।
पापञ्चैव ततो भविष्यति मम स्थानेऽत्र पुण्यस्य, तद्
गन्ताऽहं नरकं, सुनामभगवन्निष्ठा हि मेऽकृत्रिमा ।। ७२७।।

त्यक्तुं नेदमहं भवामि नियतं, चेन्मे पुनस्तत्कृते
प्राणानेव कथं न चात्र ,नयतां', तद्युक्तियुक्तं वचः ।
श्रुत्वाऽस्य द्रवितं तथापि हृदयं तन्मूलुकस्वामिनः
सा वाणी सरला हरेश्च मधुरा, तस्यां तथाऽऽकर्षणम् ।। ७२८।।

'वार्ता ते तु ममापि चांशिकतया बुद्धौ समायाति तद्
हिन्दूनामुचितं भवेत्परमहो! त्वञ्चासि वै मुस्लिमः ।
विश्वासग्रहणञ्च मुस्लिमजनैस्तुल्यं तवैवोचितं'
वाण्या तस्य तथाहि मुल्कपतिकश्चाकर्षितोऽवोचत ।। ७२९।।

उक्तं तद्धरिणा 'महाशय! वचस्ते विद्यते चोचितं
विश्वासस्तु निजे वशे नहि, परं पूर्वानुसंस्कारजः ।
तत्संस्कारवशाच्च मेऽस्ति भगवन्नाम्न्येव सोऽयं स्वतः
(पूर्वं कुत्र च केन चात्र मिलितः प्राणी स्वयं वेत्ति नो) ।। ७३०।।

हिन्दूः कोऽपि यदा विहाय निजकं विश्वासमालम्बते
तावन्मुस्लिमतां, तदा स भवता दण्ड्यः कथं जायते ? ।
तिष्ठत्वत्र स हिन्दुरेव विवशं कर्तुञ्च तं चेष्टते ?
(चेष्टा शासनतन्त्रतोऽखिलसमा चेद्यन्त्रिता शस्यते) ।।७३१।।

हिन्दून् मुस्लिमताग्रहे यदि भवान् धर्मं विहायात्मन:
स्वाधीनान् मनुते, ततोऽत्र विषये स्वातन्त्र्यमेतत्स्वत: ।
प्राप्यं मुस्लिमदेहिनामपि, पुन: स्वेच्छाविरुद्धं कथं
मां वक्तुं कलमां करोति विवशं, न्यायोऽत्र किं भाषते'? ।।७३२।।

तन्मौनं मतिमान् गतोऽस्य वचनात्स न्यायकर्ता ततो
दृष्ट्वेदं विपरीतमेति घटना गोरा स काजी द्रुतम् ।
उच्चैराह 'वयं न चाखिलमिदञ्छ्रोतुं वच: संयुता,
येषामाचरणं कुरानवचनादिस्लामधर्मानुगम् ।। ७३३।।

तेषामेव, न काफिरस्य तदितो मुक्तिर्विरुद्धात्मन—
स्त्वं कुफ्रं कुरुषे त्वधर्ममधुना, दण्ड्यो हि नोऽधर्मकृत् ।
तस्मात्स्वीकुरु साम्प्रतं हि कलमापाठक्रियां वान्यथा
दण्डाऽऽस्वादनमत्र चैकमुभयो: स्वीकार्यमस्त्येव ते' ।।७३४।।

आसीद्वै विवशश्च सोऽपि मुलुकस्वामी वराक: पुन—
र्वक्तुं मुस्लिमतो विरुद्धवचनं शक्तो न किञ्चित्तथा ।
काजीनाञ्च विरुद्धमस्य नहि तन्न्यायक्रियासाहसं
सोऽप्याहात्र समर्थयन् प्रियहरिं गोरायिकाजीवच: ।। ७३५।।

'आज्ञास्त्येव तथा, वदेह कलमापाठाय किं प्रस्तुतो'?
ब्रूते दासहरि'र्महाशय! मया निर्भीकभावान्निजम् ।
वक्तव्यं यदपीह तत्तु कथितं द्रागेकवारं स्फुटं
विश्वासान्नहि मे क्रियाद् विचलितं दण्डो गुरोर्मा गुरु: ।।७३६।।

कृत्वा खण्डविखण्डकं मम वपुश्चेच्छेद्यदि क्षिप्यते
तत्तावत्यपि, सन्ति यावदपि मे प्राणा: शरीरे स्वके ।
त्यक्ता नो हरिनाम तावदहकं दण्ड्यो यथा ते रुचि'—
र्निर्भीकञ्च तदुत्तरं हरिमुखाच्छ्रुत्वा विमूढ: कृतौ ।।७३७।।

दण्ड्य: किंविधिना हरि,र्न मुलुकस्वामी गतो निश्चयं,
जिज्ञासामनसा स पश्यति ततो गोरायिकाजीमुखम् ।
ज्ञात्वा भावमसावमुष्य तरसा काजी स गोराऽवदद्
दण्ड्योऽवश्यमयं हुजूर! हरिक:, 'स्वैरेव पीडा सदा' ।।७३८।।

'नासौ सम्प्रति दण्ड्यते यदि तदा स्वेच्छानुसारी भवे—
त्सर्व:, स्थास्यति तेन मुस्लिमपदस्यास्तित्वमेवात्र नो' ।
ऊचे मुल्कपति,'र्नहि स्फुरति मे दृष्टौ किमप्यत्र तद्
दण्ड: किंविधिकस्त्वमेव हरये ब्रूह्यात्मना दीयताम्' ।।७३९।।

'अस्त्येव प्रथमा हुजूर! घटना (गोरायिकाजी स्वकं
तत्पक्षं बलयन् जगाद) हरये देयोऽस्ति दण्डस्तथा ।
सर्वस्य श्रवणं भवेदवहितं नो कोऽपि चाग्रे यतो
भूय: साहसमेव कर्तुमपर: स्यात्तादृशं मुस्लिम: ।। ७४० ।।

तस्मान्मुस्लिमधर्मतोऽस्य भवति प्राणैकदण्ड: सजा
तत्प्राणग्रहणन्तु सौम्यविधिना नान्यस्य शिक्षाप्रदम् ।
पृष्ठस्योपरि तेन मुस्लिमहरिं बेंतं तथा मारयन्
भूयोऽमुं भ्रमयेज्जनैर्जनदृशोर्बाईसबाजारत: ।।७४१ ।।

बेंतप्रहारैरनिशं ह्यमुष्य
प्राणाश्च नेया ननु काफिरस्य ।
स्यादन्यसर्वस्य तदैव चाग्रे
नैतादृशं साहसमेव कर्तुम्' ।।७४२ ।।

आज्ञां मुल्कपतिर्लिलेख विवशो गोरोक्तमेवेदकं
बद्धो बेंतकरप्रहारिभिरयं दासो महात्मा हरे: ।
बाजारे भ्रमयन्ति बेंतकरणै: पृष्ठप्रहारैरमुं
बेंतैर्दीर्णममुष्य कोमलतनोश्चर्माऽनिशं घातितम् ।।७४३ ।।

तत्पृष्ठाद्धरिनामकारणहताद्रक्तस्य धाराऽसर–
त्तेष्वेवास्य पुनर्व्रणेषु विविधं ते घातयन्तस्तथा ।
जल्लादा ननु निष्ठुरा: प्रतिपदं बेंतप्रहारैर्ययु:
साधो: किन्तु मुखात्तदेव सततं नामध्वनिर्जायते ।।७४४ ।।

बेंताऽऽघातजवेदनाऽस्य नहि सा चास्ति प्रतीतौ, परं
बाजारे जनता निमीलति दृशं दु:खाऽसहिष्णुर्हरे: ।
तद्रोदित्यपि कोऽपि, किन्तु 'उफ' नाप्येकं गतं तन्मुखाद्
गायन् कृष्णमसौ समं जनभरै: प्रीत्या हरिर्याति स: ।।७४५ ।।

बाजारे सकलेऽत्र स प्रियहरिस्तैर्भ्रामितो निर्दयै–
र्देह: शोणितलेपित: परमत: प्राणा ययुर्नो हरे: ।
आश्चर्यं निगदन्ति निर्दयहृदस्ते सेवका, 'लोकितो
नैकोऽद्यावधिमेवमत्र परमोऽस्माभि: कठोरो नर:' ।।७४६ ।।

'प्रायो वै दशविंशबेंतपतनै: शेते मनुष्यो मृतो
मूर्च्छामेति तु कोऽपि पञ्चदशकैरेव प्रहारैस्तथा ।
पृष्ठे तेऽत्र महाशय! त्वगणिता बेंतप्रहारा: कृता
नैतावत्यपि (ते ब्रुवन्ति हरिकं) च'ह'ापि ते निर्गतम् ।।७४७ ।।

प्राणास्ते यदि नोऽत्र यान्ति, भविता तत्स्मो वयं दण्डिता:
प्रायो नो भवति प्रतीतिरिह यन्नाम्नस्तवोच्चारणम् ।
तस्यैवास्ति तथाप्रभावमहिमा, यत्तेऽल्पमेतावता
दु:खेनाऽपि न वेदनाऽनुभवनं, कुर्याम किं साम्प्रतम् ?' ।। ७४८।।

आसीत्तत्र हरिर्दयालुहृदय: काले प्रभुं प्रार्थयन्
कल्याणाय तथास्वदण्डविधिकृत्क्रूरप्रहारात्मनाम् ।
'भ्रान्तानां क्षमतां प्रभो! (स्वयमसौ ब्रूते)ऽपराधं', ततो
भूत्वाऽचेतनवद्धरिर्भुवि गत:, सर्वै: प्रतीतं तथा ।।७४९।।

निष्प्राणं ननु सेवकास्तमविदुर्मुल्कप्रभो: सन्निधौ
निन्युस्तत्तदवस्थमेव, चतुरो गोरा च तत्रोक्तवान् ।
'कब्राऽऽधानदिशा बहिश्तगमनं स्यान्मुस्लिमाऽऽचारत–
स्त्यक्त्वा मुस्लिमतामभूदयमतो गच्छेद् बहिश्तं कथम्? ।।७५०।।

गङ्गायामवहेलयैव तदित: क्षेपोऽस्य वै साम्प्रतं'
काजीसम्मतितस्तथा मृदुहृदो मुल्कप्रभोश्चाज्ञया ।
पापोद्धारसमर्थनिर्मलकृपासुस्निग्धभागीरथी–
धारायां हरिदासजीवपुरिदं तत्सेवकैर्वाहितम् ।। ७५१।।

गङ्गामातृदयालुशीतलजलस्पर्शात्सचेता हरि–
र्धारायां प्रवहन् पुनश्च फुलियाग्रामस्य घाटेऽलगत् ।
अत्रैतस्य च दर्शनेन मुमुदे तद्ग्रामवासी परं
सर्वत्र प्रसृतश्च हर्षदसमाचारोऽयमत्र क्षणात् ।।७५२।।

औत्सुक्याद्धरिदर्शनाय जनताऽऽयान्ती बभौ तद्बहो–
र्यत्र क्वापि जन: शृणोति स ततो धावत्यमुष्यान्तिकम् ।
दूराद्दूरतराज्जनाऽऽगमनतो वृत्तञ्च दूरङ्गतं
शुश्रावेदमथापि मुल्कपतिको गोरा स काजी तथा ।।७५३।।

चित्तं तद्द्रवितं तयोरपि तथा जज्ञे सुभावो हृदि
श्रद्धा चापि दृढप्रतिज्ञभगवन्निष्ठेऽत्र साधौ हरौ ।
प्राप्तौ श्रीहरिदर्शनाय फुलियाग्रामं ततो तावपि
प्रार्थी नम्रतयाऽऽह मुल्कपतिको'ऽमोघो हि सत्सङ्गम:' ।।७५४।।

'दण्डं दातुमहं महाशय! पराधीनस्तदा, तद्वशाद्
भावज्ञेन तव प्रभावतपसोऽज्ञेनैव मे दण्डित: ।
कार्यं ते हरिनामकीर्तनमत: क्षम्योऽपराधो मम
स्थाने सम्प्रति कोऽपि नात्र भविता ते विघ्नकर्ता सत:' ।।७५५।।

ऊचे नम्रतया महाशय! हरिः 'किं तेऽपराधोऽत्र वै ?
तद्दुःखं सुखमत्र लोकनिवहः कर्मैव भुङ्क्ते स्वकम् ।
अन्यस्तस्य निमित्तमेव भवति स्थाने तथाऽऽकस्मिकं
कर्मैवाद्य भवेत्तथा मम हरेर्दासस्य कान्या गतिः ? ॥७५६॥

तच्चिन्तां न भवान् करोतु किमपि क्षोभो भवन्तं प्रति
स्वान्तर्मे न मनागपि', प्रमुदितो मुल्कप्रभुर्निश्छलम् ।
श्रुत्वा तद्धरिदाससाधुवचनं यातोऽस्य नत्वा पदे,
साधुः कष्टसहिष्णुरत्र खलतां जेतुं परं जीवति ॥७५७॥

आगत्य द्विजवैष्णवैश्च फुलियाग्रामस्य चान्यैरपि
ध्यात्वाऽक्ष्णा हरिदासतादृशदशां दुःखप्रकाशः कृतः ।
दृष्ट्वा तद्व्रणजातमत्र विकलः कश्चित्तु रोदित्यलं
सत्येवं स्वयमेव बोधति हरेर्दासस्तथा सान्त्वयन् ॥७५८॥

'स्थाने विप्रगणा! लसन्ति निखिला यूयञ्च धर्मप्रिया
जानन्त्यत्र हि शास्त्रमर्म सुतरां, सर्वं फलं कर्मणाम् ।
एतत्कर्णपथेन चात्र भगवन्नाम्नां श्रुतं निन्दनं
तस्यैवाद्य फलं स्वयं मम हरिर्दासाय साक्षाद् ददौ ॥७५९॥

चिन्तां मा कुरुतात्र यूयमधुना देहस्य दुःखं त्विदं
क्लेशो नाल्पमपि प्रतीतिविषयो मेऽस्यास्ति तत्केवलम् ।
आस्तां स्थायि सदैव चात्र भगवन्नामस्मृतिर्हार्दिकी
सर्वस्यास्ति सुखस्य सौख्यममलं तच्चेदमेवामृतम् ॥७६०॥

तत्सर्वाधिकदुःखमत्र, नहि तन्नामस्मृतिर्यत्क्षणे
क्लेशश्चास्तु तनोः कियानपि, परं ज्ञेयं सुखं तत्स्मृतौ' ।
सन्तुष्टाः परमं तथोत्तरमिदञ्छ्रुत्वा हरेर्ब्राह्मणा—
स्तस्यादेशमवाप्य चात्मवसतिं सर्वे स्तुवन्तो ययुः ॥७६१॥

एवञ्छ्रीहरिदासजी भगवतीभागीरथीपावित—
ग्रामश्रीफुलियासमीपमवसत्सौविध्यमत्राखिलम् ।
नित्यं शान्तिपुरं स याति गुरुकाऽद्वैताऽऽमुखं प्रायशः
प्राज्ञः पुत्रसमं पितुश्च गुरुकं गृहणाति धत्ते हरिः ॥७६२॥

सर्वे ब्राह्मणवैष्णवाऽऽढ्यपुरुषाः सत्कारमस्यादरं
कुर्वन्ति स्म सदाशयाश्च फुलियाग्रामस्य भद्रात्मनः ।
कुर्वन् कीर्तनमेष भाति मुखतो नाम्नां सदा श्रीहरे,
रोमभ्योऽस्य हरिध्वनिश्रुतिरिवाऽऽभाति प्रभावादतः ॥७६३॥

श्रीलीलाश्रवणक्षणे भगवतो मूर्च्छत्ययं निश्चितं
जायन्ते निखिलास्तथास्य युगपद्भावास्तनौ सात्त्विकाः ।
वार्ता ह्येकदिनस्य, चाभवदयं गच्छन् कुटीतो बहि–
र्मर्गेऽस्य श्रुतिमेति वाद्यमुरजध्वानस्तथाऽऽकस्मिकम् ।।७६४।।

तद्बुद्ध्वा हि चचाल तन्मुखमसौ श्रीकृष्णसंकीर्तनं
तत्राऽऽसीन्ननु डङ्कजातिपुरुषो नृत्यन् स्ववर्गान्तरे ।
वङ्गे तेषु दिनेषु वाद्यमुरजैः डङ्काख्यजातेर्जनाः
कुर्वन्तः स्म भवन्ति नृत्यसहितं लीलानुगानं हरेः ।।७६५।।

तत्रागाच्च यदा, तदा हरिरयं, डङ्को हि गायन्नभू–
च्छ्रीकृष्णामृतकालसर्पदमनालीलानुगीतं पदम् ।
डङ्कः कोमलकण्ठगाननिपुणो नृत्यप्रवीणस्तथा
कुर्वन्नन्दयशोदयोर्मधुलयादासीद्विलापाऽऽलपम् ।।७६६।।

कृष्णोऽकूर्दत कालियह्रदमधस्तत्कन्दुकव्याजतः
श्रुत्वाऽत्र व्रजवासिनो द्रुतमियुर्नन्दो यशोदा तथा ।
वंशीं वादयति त्रिभङ्गगतितः श्रीबालकृष्णः स्मयन्
मन्दं कालियभोगमण्डलशिरोविन्यस्तपादाब्जकः ।।७६७।।

नागो मुञ्चति फूङ्कृतिं विषमयीमुच्चैर्मुरारिः समं
फूङ्कारैः शनकैश्च नृत्यति परं दृष्ट्वा यशोदाऽऽतुरा ।
तल्लोकाभिमुखञ्च कातरदृशा दिक्ष्वत्र सा पश्यति
'क्रूरान्मे वनवारिणं त्वहिपतेः कश्चिन्मुखान्मोचयेत्' ।।७६८।।

अन्यत्र व्रजवासिभिश्च विकलो नन्दोऽपि बाबाऽश्रुणा,
श्रावं श्रावममुं स भावमपतद्दासो हरिर्मूर्च्छितः ।
ड़ङ्कः सात्त्विकभावमस्य बुबुधे दृष्ट्वाऽस्ति कश्चिन्महां–
स्त्यक्त्वा नृत्यमता रजोऽस्य पदयोः शीर्षे करोति स्तुवन् ।।७६९।।

नीत्वा मूर्ध्नि विधाय तत्र बहवो भक्तास्तथोपस्थिता
जग्मुस्तां हरिदासपादतलतो धूलिं स्वगेहं प्रति ।
तत्रैको ननु मानलोलुपमनाश्चासीत्स्थितो ब्राह्मणो
'मानं मूर्च्छितभावभूमिपतनादेवं विधत्ते जनः' ।।७७०।।

'सोऽयं हस्तगतः कथं न्ववसरो याया'द्विचिन्त्य द्विजः,
डङ्के तत्र पुनश्च नृत्यति, तदाऽचेताः स मिथ्याऽपतत् ।
डङ्को वेत्ति तु सर्वमेव, पतिते तस्मिन्नसौ तत्क्षणं
दीर्घं ताडयति स्म, ताडनभयाद्भूतोऽपि याति द्रुतम् ।।७७१।।

दम्भी त्वेष पलायितोऽसहनतस्तत्ताडनस्य क्षणात्,
'किं वा कारणमत्र दासनमने भावे तथोपस्थिते ? ।
तुल्ये ब्राह्मणताडने'? सहृदयैः डङ्कश्च पृष्टो जनै—
'र्दासो भागवतो महान्, परमयं दम्भी तथासीद्द्विजः ।।७७२।।

(डङ्केनोक्त)मतोऽमृषा हरितनौ भावोदयः सात्त्विकः
पाखण्डं कृतवानसौ तु वितथञ्चात्मप्रशंसामनाः ।
दासः सम्प्रति संस्तुतोऽत्र तु मया विप्रः परं ताडितः,
क्रामत्यत्र कदापि मूर्खनिवहे, सर्वत्र किं दम्भता ? ।। ७७३।।

काले मूर्खजनेऽपि तस्य भवति स्पष्टे रहस्येऽस्तुती,
रत्नं दासहरिस्तथाऽस्य वसनाद्देशोऽखिलः पूयते ।
धन्या यूयमहो!, यतो नरवरं पश्यन्त्यमुं नित्यशः'
श्रुत्वा डङ्कवचः प्रमोदमतुलं प्रापुश्च ते प्राश्निकाः ।।७७४।।

भूम्ना तैर्हरिभक्तिभावभजनप्रीतेः प्रशंसा कृता
ह्रीणोऽसौ मुखदर्शनेऽपि च परं लोके द्विजो लज्जते ।
सत्यञ्चास्ति हि कृत्रिमस्य भवति स्थाने तथा दुर्दशा,
ज्ञानोपासनकर्मणाञ्च भजनं प्रेम्णाऽत्र सेव्यं नृभिः ।।७७५।।

४९. योगः साध्यो नहि सर्वेषाम् ।
बुद्धिनिश्चये मनःसङ्गतौ वपुषस्तत्परतायाम्
साध्यसिद्धिविद्याऽहङ्कारे योगः सिध्यति कृतिनः ।
भोगासक्तिः सुतरां लोके योगरुचिस्तु सहस्रे
संस्कारी लभते खलु सिद्धिं त्वनुकारी तनुरोगम् ।।

वस्तुतो हरिदासस्य नामनिष्ठा ह्यलौकिकी।
तस्या विचारणाप्यत्र मनुष्यबुद्धिबाह्यगा ।।७७६।।

हरिदासजीद्वारा नाममाहात्म्यम्

५०. देवा नियतं मानवपूज्या, भक्तस्तैरपि वन्द्यः ।
श्रीहरिकीर्तनशीलो भुवने तज्जनदयितो वा स्यात्
महतां शुश्रूषुर्वा पुरुषो वन्द्यो नः, सुरगीरिति ।
कीर्तनरागी सदनुग्रहवान् दासानुदासस्तस्य
शान्तिं तुष्टिं प्रीतिं क्रमशो यत्स्वाभाविकमयते ।।

हेतुः शोचनमोहयोर्हि, विविधं भावस्य चारोपणं
प्राणिष्वत्र, यदा स्वकञ्च सुखदञ्चैकं प्रियं बोधते ।

मत्वा द्वेष्टि परञ्च दु:खदमहो तस्मै मनुष्यो रिपुं,
नूनं तर्हि भवेदमुष्य हृदये तच्छोकमोहोदय: ।। ७७७।।

तस्यैकस्य यदा भवेदनुभव: सर्वत्र पूर्णात्मनो
मत्वा श्रीप्रभुपुत्रमेव निखिलं स्निह्येच्च भावाप्लुत: ।
लेशोऽप्यस्य न साधकस्य हृदये स्याच्छोकमोहात्मक:
प्रीत: स प्रभुकीर्तनस्मृतिरत: स्यात्केवलं सर्वदा ।। ७७८।।

मत्वाऽसौ निखिलं निजप्रियतमस्निग्धप्रियस्वात्मजं
विन्देद् भ्रातृधियाऽत्र जीवनिवहं, क्लिश्याच्च तं कोऽपि नो ।
संसारे नहि कोऽपि शत्रुरथवा मित्रं तथास्याऽऽमुखे
सर्पोऽपि प्रकृतिं त्यजेच्च, भगवन्नामप्रभावस्तथा ।।७७९।।

गङ्गामातृपवित्रवारिपुलिने वस्ता महात्मा हरि–
र्निर्मायैकगुहां बभूव, सरति ख्याति: स्म दूरं सत: ।
तन्नित्यं शतशो जनास्त्रिपथगास्नानाय तस्याऽऽस्थया
स्माऽऽयान्त्यस्य च दर्शनाय निकटे तत्राश्रमस्याऽऽबभु: ।।७८०।।

योऽप्यस्यात्र गुहासमीपमगमद्देहेऽस्य नूनं द्रुतं
कण्डूतिर्भवतीति, कश्चिदपि नो तत्कारणं वेत्ति तु ।
स्थाने तत्र गते तु चेतसि परा सर्वस्य शान्तिस्तथा
कण्डूतेर्ननु खिन्नतापि नियतं, तत्क्लेशमूलं सुखम् ।।७८१।।

लोकश्चानुमितिं करोति विविधं तत्र प्रसङ्गे क्रमाद्
वार्तेयं प्रसृताऽत्र तत्र बहुभि: स्थानीयवैद्यैस्तथा ।
उक्तं तज्जलवायुशोधनविधेर्निष्कर्षरूपं मतं
'गूढं कोऽपि तथामहाविषधर: सर्पो वसत्यत्र वै ।।७८२।।

जाने नो हरिदासजी कथमसौ चाऽऽस्ते तथाद्यावधिं
श्वासेनैव च शक्यतेऽस्य भवितुं मृत्युर्मनुष्यस्य नु ? ।
स्थित्वाऽन्तर्बहु कुत्रचित्स निजकश्वासं हि धत्ते परं
तस्याप्यत्र च तावती परिणतिर्ज्वाला तनौ तिष्ठताम् ।।७८३।।

उच्चै: फूङ्कृतिमेव चेत्स कुरुते भूत्वा बहिर्मानव:
फूत्कारेण न जीविताऽस्य, हरिजी स्थानादमुष्माद् द्रुतम् ।
अन्यत्राऽस्तु न चान्यथाऽत्र वसत: प्राणस्य भीति: परं'
तच्छ्रुत्वाऽद्य वदन्ति साधुहरिकं सर्वे तथा साऽऽग्रहम् ।।७८४।।

'एतत्स्थानमवश्यमद्य भवता त्याज्यं, महात्मा भवान्,
कामं कष्टमथात्र नोऽस्तु भवतो, लोक: परं दूयते ।

आयान्ती भविता तथात्र जनता ते दर्शनार्थं सदा
तद्देहव्यथया ततः स्वसुहृदां हातव्यमेतत्स्थलम्' ।।७८५।।

सर्वेषाञ्च तथाऽऽग्रहेऽद्य हरिजी त्यक्तुं त्विदं स्थानकं
स्वीचक्रे वदति स्म सम्प्रति ददत्सर्वस्य चाऽऽश्वासनम् ।
'कष्टं तन्मम हेतुनाऽस्तु भवतां नेच्छामि तच्छ्वो ध्रुवं
सायं यावदितो न याति भुजगस्त्यक्ताऽहमेतत्स्थलम् ।।७८६।।

सर्पः स्थास्यति केवलोऽत्र ननु वा स्थाताऽहमेवाऽधुना,
स्थातारौ नहि सार्धमेव नियतं द्वौ चात्र भिन्नस्वनौ' ।
श्रुत्वा निश्चयमस्य तञ्च निखिलाः प्रीताः स्वगेहं ययुः,
संसारे भजनस्य साधुमनसो दृश्यः प्रभावः सदा ।।७८७।।

संयुक्ता हरिसन्निधौ च बहवो भक्ताः परस्मिन् दिने
कुर्वन्तोऽत्र यथाऽभवन् प्रतिदिनं श्रीकृष्णसंकीर्तनम् ।
स्थानेऽन्धे च तदाहि तत्र विपुलो दृष्टः प्रकाशो यथा
साश्चर्यं निखिलाः प्रकाशमतुलञ्चाऽऽलोकयन्तः स्थिताः ।।७८८।।

एकश्चित्रविचित्रवर्णभुजगो निःसृत्य दीर्घस्ततो
गङ्गातीरमुखश्च याति, विपुलो यन्मूर्ध्नि चैको मणिः ।
तस्यैवास्ति, (विलोकितञ्च निखिलै) स्तीव्रः प्रकाशोऽद्भुतो
दृष्ट्वा सर्पममुं भयङ्करमहो! सर्वाऽऽनने विस्मयः ।।७८९।।

गङ्गातीरपथेन दूरमगमत्सर्पः शनैर्वा शनैः
कण्डूतिर्भवति स्म नोऽत्र दिवसात्कस्यापि देहे ततः ।
वार्ता का भुजगस्य, भक्तपुरतो देवाधिदेवो महा—
देवोऽप्यत्र बिभेति सागरगराऽऽभक्षी, प्रभावस्तथा ।।७९०।।

भक्तानां भवतीति, सा हि भगवद्भक्तेर्महत्ताऽखिला
सोऽयं श्रीहरिदासजी च फुलियावासी महात्मा तथा ।
आचार्याद्वयसङ्गतेरविरलं भागीरथीसेवनं
कुर्वन्नेवमभूदलौकिककृतेरानन्दमास्वादयन् ।।७९१।।

सर्वस्वं गुरुराश्रयप्रदपिता सोऽद्वैत एवास्य तद्—
भक्तिः प्राकृतिकी च तत्र महती दासस्य चासीद् बुधे ।
जन्माऽभूच्च महाप्रभोरिह नवद्वीपे च यस्मिन् दिने
नृत्यन्मत्तसमस्तदाऽयमतुलोऽद्वैतेन सार्धं बभौ ।।७९२।।

आचार्यस्य सुभाषितं 'ननु जगन्नाथात्मजोऽयं जनो—
द्धारं तां भुवि कृष्णकीर्तनततिं कर्ता च गौरात्मना' ।

विश्वासोऽखिलमस्य साधुमनसोऽद्वैतात्मवाक्ये ततो
गौराङ्गस्फुटताप्रतीक्षणमयञ्चात्येति तत्कीर्तनात् ॥७९३॥

सप्तग्रामभवौ तदाहि धनिकौ गोवर्धनो भूपती
नाम्नाऽऽस्ताञ्च मजूमदारपदवीरूढौ हिरण्यस्तथा! ।
तद्भ्रात्रोर्बलरामनामसुमतिश्चासीत्पुरोधाः कुले
साधोः सत्कृतिमादरं बहु बलाऽऽचार्यो विधत्ते गृही ॥७९४॥

तस्यात्यन्तघनिष्ठताऽभवदहोऽद्वैतेन, तौ द्वावपि
प्राज्ञौ सत्कुलजौ तथा भगवतो भक्तौ च मर्मज्ञकौ ।
सप्तग्राममवाप्य रामवसतौ स्थाता यदाऽसौ तदा
निष्ठां नाममयीं विलोक्य भगवद्भक्तिञ्च दासस्य तत् ॥७९५॥

प्रीतः पुत्रसमञ्च लाडयति तं प्राज्ञो बलः सर्वदा
तत्प्राज्ञस्य गृहे यदाऽपि पठितुं गोवर्धनस्यात्मजः ।
प्राप्तः पश्यति नामजापनिरतं दासं सदा तं रघुः
श्रद्धालुर्मनसि स्वकेऽधिकतया नाथोऽभवत्तं प्रति ॥७९६॥

आचार्यो बलरामजी हरिममुं निन्ये सभायां तयोः
श्रद्धाऽतीव पदे निजान्वयगुरोः श्रीवैष्णवेष्वादरः ।
प्राप्तं तं गुरुणा समं हरिजनं दृष्ट्वा तथोभ्युद्यतौ
शिष्टौ सुन्दरमासनञ्च ददतुः स्थातुं तयोरेकदा ॥७९७॥

तत्रौच्चैर्हरिदासजी ह्यविरतं स्वं मंत्रमासीज्जपन्
यत्र श्रीहरिरामकृष्णमधुरस्वानेन संबोधनम् ।
सर्वे संभ्रमभावतोऽनिमिषतः सभ्यास्तमेवोन्मुखाः
पश्यन्तोऽविरलन्तु नामजपनं दृष्ट्वाऽस्य तौ भ्रातरौ ॥७९८॥

श्रद्धालू स्वत एव सम्प्रति गतौ दासं प्रति श्रीहरिं
तत्राऽन्येऽपि च पण्डिताश्च बहवश्चासन् सभोपस्थिताः ।
वार्तायां हरिनामजापविषये प्राप्तेऽत्र पृष्टं बुधैः
'किं तन्नामजपस्य चान्तिमफलं तत्सौख्यरूपञ्च किम्? ॥७९९॥

दुःखात्यन्तहतिर्भवेच्च निखिलं नामस्मृतेः किं हरे—
र्मोक्षः केवलनामजापविधिना लभ्योऽत्र किं वा नृणाम्'? ।
ऊचे बद्धकरो विनम्रवचनो दासो हरिः पण्डितान्
'हे शास्त्रज्ञमहानुभावविबुधा! हे धर्ममर्मान्तगाः ॥८००॥

सर्वे वैष्णवशास्त्रधर्मविषयग्रन्था भवद्भिः स्मृताः
किं ब्रूयां भवतां पुरः परमहं कुर्वे तथा साहसम् ।

यत्तन्नामजपेन चात्मनि सुखं प्राप्नोमि तद्धार्दिक–
प्रीतिस्वादनमेव चोत्तममथ श्रेष्ठं फलं तत्स्मृते: ।।८०१।।

दु:खात्यन्तविनाशमोक्षमथवा नेच्छत्यहो! कर्हिचि–
च्छीनामस्मृतिसाधकोऽत्र, सगुणाद् दूरे तथा निर्गुणात् ।
ध्येयस्तस्य तथान्तिमो हि भगवन्नाम्नो जप: केवलं,
तन्नाम्नोऽस्तु निरन्तरस्मृतिरसो न स्यात्कदाचित्पृथक् ।।८०२।।

कुत्रापि, स्थितिरत्र कापि, मिलिता काप्यस्य योनिर्भवे–
त्साध्यं साधनमस्य चोभयमपि श्रीनाममात्रं हरे: ।
अन्यन्नामजपाच्च नेच्छति फलं नामप्रिय: साधको
जाने केवलमेतदेव तदितो ब्रूह्यत्र यच्चाधिकम्' ।।८०३।।

श्रुत्वाऽस्यात्र सयुक्तिसारवचनं सर्वे प्रसन्ना: परं
तस्यैवास्ति धरापतेरिह तदा चैक: स्थित: कर्मकृत् ।
तर्काऽऽस्थानकचक्रवर्तिपदवीगोपालचन्द्राऽभिध:
कुर्वन् दासमतस्य खण्डनमभू,त्स्थाता न मौनं खल: ।।८०४।।

'एतद्भावुकतावचोऽस्ति निखिलं, योऽधीतिलेखेऽपटु–
स्तन्नामात्र स एव चाटति मुखाद् दीर्घं तथैवं रटन् ।
शास्त्राधीतिधराऽध्वनैव भवति ज्ञानं यथार्थं तथा
दु:खानां नशनं, भवेत्कथमहो! कुत्रापि तन्नामत: ।।८०५।।

तन्नाम्नां मिलति प्रशंसनमियच्छास्त्रेषु यत्कुत्रचिद्
याथार्थ्यं त्वपरञ्च तत्र घटते, तत्सोऽर्थवाद: परम्' ।
'अध्यारोपणमस्य नाम्नि कुरुते शष्क: स वै तार्किको,
वेत्तुं न प्रभवेच्च नामगुरुतां, नाम्न्यर्थवादोऽघट:' ।।८०६।।

एवं दासवचस्यमुष्य तरसा भूय: कुतर्कोऽपरो,
'वार्ता मूर्खजनप्रवञ्चनपरा चेयं, यथाऽजामिल: ।
पापी स्वात्मजनाम्नि चैव गदिते मुक्तोऽत्र 'नारायणे',
तावच्चापि न वेत्ति किं घट–घटव्यापी, स्वपुत्र: स्मृत: ।।८०७।।

एतन्नोऽर्थवचस्तदास्ति किमिदं'?,'स्थानेऽर्थवादोऽस्ति यद्–
बुद्धौ, सोऽयमनर्थवाक्, किमपि नो तत्र प्रयुञ्जे वच:' ।
'तन्नामस्मृतितो मनुष्यवपुषो नश्येत्तु चेन्नीचता ?
(चक्राऽऽवेशवच:) करोमि निजकं तन्नासिकाकर्तनम्' ।।८०८।।

आवेशे हरिणापि चात्र कथितं 'नश्येन्न चेन्नीचता
मूलान्नामजपेन, तर्हि निजके नासाश्रुती कर्तिता' ।

दृष्ट्वा तद्बहुवादवर्धनमिदं लोकैरुभौ शामितौ
भूस्वामी स्वकुतर्कनास्तिकजनात्स्थाने विषण्णो बहु ॥८०९॥

साधूनामपराधिनञ्च भगवन्नाम्नां तथादूषकं
ज्ञात्वा, त धरणीपतिश्च कृतवान् सेवापदाद्वै पृथक् ।
छिन्नाऽमुष्य हि नासिका कुवचसः कालान्तरे श्रूयते,
निन्दा भागवती न दण्डयति तत्साधोर्मनःखेदनम् ॥८१०॥

तज्जाता घटनाऽपरा हरिनदीग्रामे तथैवंविधा
तत्रैको बहुदर्पितो द्विजपतिश्चासीत्कुतर्की तथा ।
तस्यासीन्निजशास्त्रबोधविषये गर्वः परं मानिन,—
स्तिष्ठन् चान्नथवा हरिर्निजमहामन्त्रं जपन्नस्ति वै ॥८११॥

५१. दासो जपन्नस्ति निजमंत्रम् ।
प्रभुनाम्नां षोडशसम्बोधनमाला सरला विमला ।
आदौ हरिसंपुटितो रामः कृष्णस्तथोत्तरार्धे
ततो रामकृष्णत्रयपाठः पूर्वोत्तरयोर्मध्ये
अन्ते हरियुगलं संबोधितमुभयस्मिन्निह मंत्रे ।
श्रीहरिरष्टौ श्रीरामश्च श्रीकृष्णश्च चतुर्धा
एवं संबोधनरसकलिता षोडशनाम्नां माला ॥

बुद्ध्वा श्रीहरिदासमत्र यवनं स ब्राह्मणः पृच्छति
श्रीमंत्रानधिकारिणन्तु 'लिखितः कुत्रास्ति चैतज्जपः ।
तावद्वै यवनस्य चोपनिषदो मंत्रस्य, तत्ते ह्यसौ
चेष्टा नाधिकृता, तवार्चकजनो भक्तस्य वै पापभाक् ॥८१२॥

यत्राऽपूज्यजन,स्तथाहि लिखितं शास्त्रेषु, चेत्पूज्यते,
पूज्यानां तदुपेक्षणं, जनपदस्थाने तथा जायते ।
दुर्भिक्षं मरणं भयं परिणतिर्दारिद्र्यमस्य ध्रुवं,
तच्चैतज्जहि सर्वथा जनहितेऽशास्त्रीयकर्मेदकम्' ॥८१३॥

ऊचे नम्रगिरा हरि'र्द्विजपते! नीचोऽत्र विद्याञ्च किं ?
शास्त्राणां ननु मर्म, किन्तु कलितं त्वत्तुल्यविद्वन्मुखात् ।
वेदानां द्विजवर्गबाह्यजनताऽधीतौ मता नो, परं
श्रीनाम्नामधिकारिणः समतया सर्वेऽपि ते पापिनः ॥८१४॥

५२. पापा यदुपाश्रयाश्रया वै शुध्यन्ति नमस्तस्मै ।
श्रीमद्भगवद्भक्तभागवतवरगायकशुकवक्ता

द्वितीयस्कन्धे सत्कथाऽऽरम्भे मञ्जुलमङ्गलमातनुते ।
आचारहीनकिरातहूणाः सङ्गात्तेऽपि शुध्यन्ति
यदि तन्नामश्रद्धावन्तः तच्छुद्धौ का शङ्का ? ।
इह कश्चित्सुदुराचारोऽपि प्रभुमनन्यमनुभजते
सम्यग्व्यवसायेन स साधुः, श्रीमद्गीतनिदेशः ॥'

श्रुत्वा तद्धरिशास्त्रसम्मतवचः पप्रच्छ स ब्राहमणः
'कामञ्चास्तु तदीयनामविषये सर्वाधिकारः परम् ।
दीर्घोच्चारणतोऽस्ति मंत्रजपने लाभः . किमेवं ? तथा
शास्त्रोक्तो ननु मानसस्त्रिकजपश्चोपांशुको वाचिकः ॥८१५॥

श्रेष्ठो वाचिकतः सहस्रगुणितश्चोपांशुको लक्षित—
स्तस्माल्लक्षगुणोऽस्ति मानसजपस्तन्मानसं त्वं कुरु ।
जापोऽयं तव मानसो न वदितुं वोपांशुको वाचिक—
स्त्वज्जापो ननु वैखरी तु गणितश्चात्यन्तनिम्नो हि यः' ॥८१६॥

उक्तं तद्धरिणा तथैव मृदुना 'श्रीमन्! महाराज! हे!
जाने किञ्चिदपि स्वयन्तु न, परं स्वल्प श्रुतं तद् बहु ।
स्पष्टं शास्त्ररहस्यकं निजगुरोरद्वैतविद्वत्प्रभोः,
स्थाने शान्तिपुरे तथा भुवि नवद्वीपेऽत्र यो गीयते ॥८१७॥

जापो यो भवता त्रिधाऽत्र गदितः श्रेष्ठस्तथा मानस—
स्तन्मंत्रस्य जपेऽत्र सोऽस्ति नियमः, शास्त्रोक्तदीक्षाऽध्वना ।
साङ्गोपाङ्गगुरूपदिष्टविधिना यो जप्यते केवलं
पूतस्थानदशेन, चान्यपुरतो गोप्योऽप्रकाश्यस्त्वसौ ॥८१८॥

उक्तः कोऽपि विधिस्तु नो भगवतः शास्त्रेषु नाम्नां जपे,
सर्वत्रैव विधीयतेऽस्य जपनं स्थाने च काले स्थितौ ।
कामं मन्दजपे महत्त्वमधिकं मंत्रान्तरस्याऽऽस्तु, त—
न्माहात्म्यं गदितं परन्तु भगवन्नाम्नां तथोच्चारणे ॥८१९॥

यावद्दीर्घरवेण चात्र भगवन्नाम्नां भवेत्कीर्तनं,
भावी तस्य हि तावदेव गतिमल्लोके प्रभावोऽधिकः ।
यन्मन्दं ननु नामजापकजनः स्वं केवलं पावये—
त्किन्तूच्चस्वरजापकस्तु पवते श्रोतॄंश्च सर्वात्मकान्' ॥८२०॥

५३. सिद्धौ जपसाधनमतिशयितम् ।

बन्धनमुक्त्योरत्र कारणं मन एवास्ति जनानाम्

यन्मननान्मनसः शुद्धिस्तत्त्राणकरो वै मंत्रः ।
तपोऽनुष्ठानस्वाध्यायेषु जपविधिरेव श्रेष्ठः
सिद्धौ तद्वरसाधनतायां शास्त्रगीतप्रमाणम् ।
वाचिकोपांशुमानसभेदो दीक्षामंत्रजपस्य
परमुच्चैःश्रीनामसुकीर्तनमिह मर्त्याऽमृतरसनम्
गायकरसनानिःसृतधारा श्रोतृहृदयगतराधा ॥

श्रुत्वेदं वचनं हरेरकथयद् विक्षुभ्य स ब्राह्मणः
'शास्त्राणामियमर्थवादपदतो वार्ताऽखिला कथ्यते ।
श्रद्धा चास्तु तथाहि नामजपने लोकस्य संकीर्तने
तस्मात्तादृशवाक्यमत्र कथितं कुत्रापि-कुत्रापि वै ॥८२१॥

दैवीसम्पदमन्तरेण जपतो नाम्नाञ्च याथार्थ्यतो
नो किञ्चिद् भविता, तथैव जपनाच्चेज्जायतां प्राणिनाम् ।
उद्धारो, रचितं कथं पुनरियच्छास्त्रं तथाऽसंख्यकं',?
शास्त्रं यन्त्रयतीह कालचलितं लोकं दुराचारणात् ॥८२२॥

ऊचे 'पण्डितजी!' तथैव हरिजी तन्नम्रतासंयुत—
'स्तच्छ्रद्धास्थितिरेव चास्ति कठिनश्चेत्पूर्णतो वस्तुतः ।
श्रद्धा केवलनाम्नि तिष्ठति दृढं, तच्छास्त्रवृन्दैरलं,
श्रद्धापुष्टिकृते परं भगवति श्रीशास्त्रविद्याऽखिला' ॥८२३॥

'सिध्येत्केवलनाममंत्रजपनादेवात्र सर्वं यदि,
च्छेता तन्निजनासिकाश्रवणके चाविष्टविप्रोऽवदत् ।
'विश्वासो यदि नास्ति ते,ऽस्तु न तथा, विश्वासवार्ताऽऽत्मन—
श्चोक्तेयन्तु मया', वदन्निदमगान्नामानुरागी हरिः ॥ ८२४॥

नासा पीनसरोगतो हि गलिता तद्ब्राह्मणस्य श्रुतं,
साऽल्पा नामविरोधिनो भगवतो याप्यस्त्ववस्थाऽधमा ।
दुःखानामतिमूलमत्र भगवन्नाम्नो हि वैमुख्यकं,
संसारे वचसा कृतज्ञहृदयैर्गेयः प्रभुर्मानवैः ॥ ८२५॥

माहात्म्यं हरिदासजी भगवतो नाम्नस्तथा स्थापयन्
गङ्गाजीपुलिने बभूव निवसन् गायन् महात्मा हरिम् ।
श्रीगौराङ्गशशी निषिञ्चति नवद्वीपाख्यभागोदितो
भक्तानां हृदयं स्वशीतलकृपाप्रेमांशुभिः साम्प्रतम् ॥८२६॥

द्वीपेऽसावपि तन्निशम्य शशिनः पूर्णस्य चाभ्येत्य त—
च्छायायामवसत्तथागुरुकृपापात्रं त्वसौ पूर्वतः ।

कालेनाल्पतमेन तेन गणितो भक्तान्तरङ्गं प्रभोः
कुर्वन्त्यस्य तथाऽखिला बहु हरेस्तन्नामनिष्ठाऽऽदरम् ।।८२७।।

दासं तं बहु वाञ्छति प्रभुरयं स्थानेऽमुनाप्यर्पितं
सर्वस्वं प्रभुपादपद्मयुगले दासेन सर्वात्मना ।
सर्वाऽस्य प्रभुवाञ्छयैव ददृशे दासस्य चेष्टा हरे–
र्नृत्यन् भक्तजनैः स भूमिमयते संकीर्तने मूर्च्छितः ।।८२८।।

श्रीवासस्य गृहं प्रधानमभवच्छ्रीकृष्णसंकीर्तन–
स्थानं, यत्र समेति भक्तनिवहः सायं क्षणेन स्वयम् ।
आरब्धं पिहिते कपाटयुगले संकीर्तनं जायते
कोऽप्यायातु पुनश्च तस्य तु कृते द्वारं न चोद्घाट्यते ।।८२९।।

तस्मात्तेन निवर्तते बहुजनो द्वारान्निराशां गतः
सम्बन्धे हरिकीर्तनस्य तनुते नानापवादं तथा ।
एकत्र प्रथते रसेन सुजनः संकीर्तनस्याम्बुधेः
स्वात्मानं कुरुते खलश्च मलिनञ्चान्यत्र तन्निन्दया ।।८३०।।

साप्तप्रहरिको भावः

५४. **सूर्यो भगवतः सहस्रांशः ।**
श्रीनारायणदक्षिणलोचनसूर्यो दिनं विधत्ते
तस्मिन्नस्ते वामविलोचनचन्द्रस्तस्योदयते ।
सूर्यचन्द्रनिजनयनविभावैरहोरात्रमयमेतान्
पश्यन् कारुणिकोऽखिलजन्तून् वत्सलतां पारयते ।।

पार्थप्रार्थनयैव भारतमृधक्षेत्रे स्वरूपं विराट्
श्रीकृष्णेन तु, दृष्टिगोचरमभूत्तस्यैव तद् दर्शितम् ।
आसंस्तत्र तु लक्षसंख्यकजनास्तत्सेनयोः संस्थिता–
स्तद्रूपं नहि तत्र चक्षुषि गतं पार्थं विना कस्यचित् ।।८३१।।

पार्थस्यापि तदीयदर्शनमभूद् ग्राह्यं न चात्मेक्षणैः
प्रीतः श्रीभगवांस्ततोऽस्य कृपया तद्दिव्यदृष्टिं ददौ ।
तत्प्राप्त्यैव विलक्षणस्य कलने जातः समर्थोऽर्जुनः,
सख्यं सत्यमभूत्तदैवमुभयोर्वेदोक्ततत्पक्षिणोः ।।८३२।।

दृष्टिः सैव च सञ्जयाय मुनिना व्यासेन दत्ताऽभवत्
तद्रूपं स ददर्श हास्तिनपुरस्थाताऽपि लोकोत्तरम् ।

दिव्याऽऽलोकनमत्र दुर्लभमहो तद्दिव्यदृष्टिं विना
बाह्यं लौकिकवस्तु चैव नयनैस्तद्भौतिकैर्दृश्यते ॥८३३॥

यावन्नान्तरलोचनं स्फुटति तद्, यावन्न दिव्यां दृशं
श्रीकृष्णः कृपया ददीत मुदितो मर्त्यस्य, तावत्कथम्? ।
स्याल्लोकोत्तरमत्र वस्तु परमं दृश्यं ·प्रकाशात्मकं,
भोक्तुर्भोजकबोधनाय भुवने चापेक्षिता तत्कृपा ॥८३४॥

भक्तानां ननु लोक एव नियतं भिन्नोऽत्र, भाषा तथा
भिन्ना कार्यपरम्परा हि निखिला भिन्नैव भक्तांऽवनी ।
प्रीतो यं कृपया वृणोति भगवान् यं स्वीकरोति स्वय,—
ञ्चान्तर्दृष्टिमिहास्य वै रतिमयीमुद्घाटयत्यात्मनः ॥८३५॥

यस्यैवास्य निजेष्टदेवकलनं ध्येये पदार्थे स्वके,
तस्यैवात्र पुरस्तथा भवति तद्भावो यथावत्स्फुटम् ।
विस्वासस्थिरतां विना कथमपि स्वेष्टोऽत्र नो दृश्यते,
विश्वासं भजतां नृणां हि भगवान् प्रेमा कृपालुः स्वतः ॥८३६॥

गौराङ्गो ननु पूर्वमेव कथितो द्वैविध्यभावोदयो
यद्यप्यत्र स भक्तभावकलितस्तिष्ठत्यमानी सदा ।
देहे किन्तु कदापि तस्य भगवद्भावोऽपि संकाशते
तस्यैश्वर्यमयं तदाहि निखिलञ्चेष्टादिकं जायते ॥८३७॥

भावस्तिष्ठति नो स कालमधिकं, किञ्चित्क्षणेनायते
सामान्ये पुनरेव सोऽत्र भगवद्भक्तस्य भावे तथा ।
भावो भागवतोऽस्य चाल्पसमयं जातस्तथाद्यावधिं,
तस्मिन्नेव स यामसप्तकमहो! तस्थौ च किन्त्वेकदा ॥ ८३८॥

भावोऽयञ्च महाप्रकाशपदतो भक्तैश्च सद्वैष्णवै—
र्वा साप्तप्रहरामिधोऽत्र विशदं श्रद्धालुभिर्वर्णितः ।
भावोऽभूदयमेव चास्य वपुषि द्वीपेऽत्र सर्वाधिको,
दिव्योन्मादमयः पुरीस्थितमहाभावो निमायिस्थितिः ॥ ८३९॥

तेऽमी तत्र महाप्रकाशसमये गुप्तो मुरारिस्तदा
स्थातारश्च मुकुन्ददत्तसुमनाः श्रीवासुदेवस्तथा ।
एते च त्रय एव तत्पदकराः श्रीवैष्णवेषु स्तुताः,
श्रीचैतन्यमहाप्रभोः सुचरितञ्चैभिस्त्रिभिश्चित्रितम् ॥ ८४०॥

प्रत्यक्षस्ववलोकितञ्च ललितं तैर्वर्णितं तादृशं
तत्तावत्यपि नात्र विश्वसिति तद्विश्वासहीनो जनः ।

यस्मात्ते नितरां भवन्ति विषये चात्राऽनभिज्ञास्तथा,
संस्कारे विषये ततोऽत्र विविधे लोको विभिन्नात्मकः ॥८४१॥

तेषां भौतिकवस्तुभिन्नविषये बुद्धिप्रवेशो नहि
स्वल्पञ्चापि भवेत्तु यस्य परमे चार्थे मनीषागतिः ।
तस्याऽऽकर्णनतोऽत्र सौख्यमधिकं वृत्तस्य चैतादृश–
स्तास्माच्चाद्य महाप्रकाशविषयोदन्तक्षणः स्वाद्यताम् ॥८४२॥

श्रीवासस्य गृहे तथैकदिवसे तत्प्रातरेव क्रमाद्
भक्ताः संघटिता बभूवुरखिलास्तेषु प्रधानास्त्वमी ।
नित्यानन्दगदाधरौ नरहरिर्दामोदरो माधवो
गोविन्दो हरिदासशिष्यसहितोऽद्वैतो विपश्चित्पुनः ॥८४३॥

सारङ्गः पुरुषोत्तमश्च जगदानन्दो मुकुन्दस्तथाऽऽ–
चार्यो रत्नपदो मुरारिसहितो घोषः स्वरूपोऽपरः ।
गङ्गादाससुधीश्च शेखरबुधो वक्रेश्वरश्चापरे
श्रीवासः स्वयमत्र तेऽपि बहवश्चोपस्थिता भावुकाः ॥८४४॥

एकस्मिन् प्रहरे गतेऽत्र दिवसे प्रायोऽखिलाः प्रेमिणो
भक्ता मुख्यतमाश्च वासवसतौ ह्यासंश्च सर्वे स्थिताः ।
आयातः प्रभुरत्र तत्क्षणमसौ तत्प्राप्तिमात्रक्षणा–
त्संचारो नवजीवनेन सदृशश्चेतस्सु तेषामभूत् ॥८४५॥

अन्यस्मिन् दिवसे परं प्रभुरयं भक्तैः समोऽन्यैस्तथा
स्थित्वाऽऽगत्य च भक्तिभावमिलितः संकीर्तनं तैः समम् ।
कालेनाऽऽचरताऽह्नि तद्भगवदाऽऽवेशोऽभवत्कुत्रचित्
किन्त्वद्याऽऽगत एव चात्र भगवत्सिंहासने संस्थितः ॥८४६॥

तत्सिंहासनमूर्तिकाः प्रभुरहो! स्थानेऽपसार्य स्वयं
गम्भीरो निषसाद तद्भगवतः शान्तश्च तत्राऽऽसने ।
तस्मिन् संस्थित एव भक्तहृदये दृष्टः प्रकाशोऽद्भुतः
सर्वे संभ्रमभावतोऽस्य वदनं पश्यन्ति ते विस्मिताः ॥८४७॥

कालं दर्शनसाहसं बहु तथा तस्यात्र नो कस्यचिद्–
भक्तानां ददृशे प्रकाशबहुलं तेजोमयं तद्वपुः ।
दीव्येयुश्च सहस्रसूर्यशशिनः स्थाने यथैकत्र नु,
स्थातुं यत्नवतोऽपि दृष्टिरभवन्नोऽतिक्षणं तन्मुखे ॥८४८॥

दीप्यन्ते धवलाश्च दिक्षु विमला ज्योतिर्मयाश्चांशवो
मन्ये घ्नन्ति तमस्तथाग्निधवलज्वालास्फुलिङ्गोत्कराः ।

खे नक्षत्रभरो यथा प्रभुनखज्योति: पृथग्वै पृथग्,
चक्षुर्दीप्तमुखात्परन्तु लुलितं, कर्तुं पृथङ् नेष्यते ॥८४९॥

तत्रैवं बहुकालमद्य निखिलास्तस्थुश्च तूष्णीं परं
भक्ता: प्रस्तरधातुमूर्तितुलिता: स्तब्धा यथाऽचेतना: ।
श्वासश्चापि न कोऽपि दीर्घविधिना धत्ते स्म मध्ये तदा
यद्येका भुवि सूचिकाऽपि पतति स्यात्सर्वकर्ण प्रति ॥८५०॥

गाम्भीर्येण बभाण तां प्रभुरयं निस्तब्धतां भञ्जयन्
'कर्ता तेऽद्य हि भक्तवृन्द! मनस: पूर्णामहं कामनाम् ।
यूयं तत्कुरुताऽद्य मे च विधिवत्प्रेम्णाऽभिषेकक्रिया'—
माज्ञां स्वप्रभुतस्तथैवमियतीं लब्ध्वैव ते नन्दिता: ॥८५१॥

श्रीवासस्य तु साम्प्रतं गृहपतेरानन्दसीमा नहि,
स्थाने विस्मृतवान् स्वकं सहृदय: प्रेम्ण: प्रभो: कारणात् ।
आगच्छेन्ननु भिक्षुकस्य वसतौ प्रीत्याऽस्य वश्यङ्गत:
कश्चिच्च स्वयमेव भद्रवदनो द्राग् चक्रवर्ती नृप: ॥८५२॥

काले तत्र [illegible] दशाऽस्य भवति, श्रीवासभक्तस्य तु
स्थाने प्रेममयी ततोऽप्यतिशयं जाता दशाऽलौकिकी ।
किंकर्तव्यविमूढतेव सुधियश्चानन्दतश्चेतसो
धन्यो यो लभते तथाक्षणमपि प्रीते: स पुण्यै: स्वकै: ॥८५३॥

विस्मृत्य स्वतनुस्थितिं स्वयमहो गङ्गोन्मुखो धावितो
नीत्वाऽयं कलशं, पपात विवश: प्रेम्णा तु मध्येपथम् ।
दासीदासजनस्ततो बहु घटान्नीत्वाऽस्य गङ्गाजलं
भक्तास्तेऽप्यनुयाच्य तांश्च बहव: कांश्चिच्च नेतुं ययु: ॥८५४॥

श्रीगङ्गाजलमागतं बहुषु तत्स्थाने घटेषु क्षणं
भक्तै: सुन्दरपीठिकोपरि ततस्तं तस्य संवेश्य च ।
नानाशोभनगन्धतैलमलनं सम्पूर्णदेहे कृतं
स्नानं कुम्भगतै: सुवासितजलै: पश्चाच्च सम्पादितम् ॥८५५॥

आचार्या वरपण्डिताश्च विधिनाऽद्वैतादिरत्नादयो
मंत्रोच्चारणमत्र हर्षितहृद: स्नानस्य कुर्वन्ति ते ।
भक्ताश्च क्रमश: प्रभो: सुललिते गङ्गाजलं श्यङ्गके
प्रेमाऽऽन्दोलितचेतसा प्रमुदितास्ते चार्पयन्तोऽभवन् ॥ ८५६॥

होरां यावदिदं महाप्रभुतनोस्तत्स्नानमेवाऽभव—
त्स्नाने तत्र निजेच्छयाऽत्र निखिलैर्भक्तैश्च सम्पादिते ।

सम्यक्सुन्दरमम्बरेण तदनु श्रीविग्रहो मार्जित:
श्रीवासो निजगेहतो द्रुतमितो नीत्वा नवीनाम्बरम् ।।८५७।।

भक्तै: स्वै: परिधापिता प्रभुतनुस्तै: सुन्दरैश्चाम्बरै–
र्भूयस्तैर्विनिवेशितश्च मृदुले सिंहासने सज्जिते ।
श्रेष्ठं केसरमिश्रितं मलयजं कर्पूरकस्तूरिका–
युक्तं तत्क्रमतोऽखिलैर्वरतनोरङ्गेषु संलेपितम् ।। ८५८।।

प्रेम्णा तत्पदपद्मयोश्च तुलसीसच्चन्दने चार्पिते
माला: किन्तु गृहे तदा परिमिता विज्ञाय केऽपि द्रुतम् ।
धावन्तश्च ययुस्तथाऽऽपणपथात्क्रीत्वाऽऽययु: शोभना:
सर्वे ता: क्रमश: प्रभोर्वरगले ते चार्पयन्ति स्रज: ।। ८५९।।

आच्छन्नं प्रभुपादपद्मयुगलं पुष्पैश्च भक्तार्पितै–
र्मालाभिर्वरशोभनाभिरधुनाऽऽच्छन्नो गल: पूर्णत: ।
सर्वेभ्यश्च ददौ स्वपद्मकरतो मालाप्रसादं प्रभु:
प्रीत्या सार्धमतो विलभ्य ननृतुर्भक्ता: प्रसादस्रजम् ।। ८६०।।

श्रीवासस्तु विचेतनोऽस्ति च मुदा तस्य स्थितिस्तादृशी
मन्ये जन्मदरिद्रनि:स्पृहहृदा लब्धो मणि: पारस: ।
चेतोऽमुष्य च विह्वलं, कथमहो लोकोत्तरेयञ्छवि:
साधो: सम्प्रति कस्य-कस्य सुहृदो द्राग् दर्शनीया: प्रभो:।। ८६१।।

दृष्टौ चेन्मिलितं तथाहि ललितं, स्वाभाविकीच्छा हृद:
स्थाने द्रष्टुरुदेति तत्प्रियजन: सर्वोऽपि पश्यत्वलम् ।
अद्वैतञ्च विचिन्त्य तत्स्वहृदये वासो बभाण श्रुतौ
'भूयश्चेतयतीह पुत्रविकला माता शची मां सदा ।। ८६२।।

वारम्वारमथाह मां (मम सुत: सर्वैर्निमायी मृदु–
र्युष्माभिर्विपथीकृतोऽस्ति मिलितै:, पूर्वं कियत्साध्वसौ ।
जाने शिक्षयथात्र यूयमधुना किं किञ्च सर्वेऽच्छलं)
सत्यं पश्यतु, दर्शयामि जननीं, यत्ते निमायी त्वयम् ।।८६३।।

नायं तेऽस्ति सुत: परन्तु जगत: प्रेमी पिता वस्तुत,–
श्चेद्वै तेऽनुमतिस्ततोऽहमधुनाऽऽनेता शचीं मातरम्' ।
आचार्यश्च समर्थयन् प्रियमतं प्रोवाच वासस्य त–
'न्नूनं दर्शयितव्य एव मधुरो मातुश्च शच्या: सुत: ।। ८६४।।

श्रुत्वैवं द्रुतमेव विश्वजननीं नीत्वाऽऽययौ वासजी
दृष्ट्वैवात्र जगाद पण्डितगुरुश्चाद्वैतभक्ताऽग्रणी: ।

'मात:! पश्य पुरस्तथेदमधुना यं स्वं ब्रुवाणा ह्यभू:
पुत्रस्ते नहि, दर्शनेन सफलं स्वं जीवनं त्वं कुरु' ॥८६५॥

माता सा चकितेव मौनमबला स्थाने स्थितैवाऽभवत्
कर्तव्यं हि किमस्ति मे, कथमपि स्पष्टं न दृष्टं तया ।
मातुस्तां तु दशां विलोक्य विकलो वासश्चकाराऽर्थनां
'देवी चात्र शची प्रभो! ननु जगन्माता समक्षं स्थिता ॥८६६॥

सौभाग्यं परमं हि लब्धमनया त्वज्जन्मदातृश्रियं
भव्या तेऽत्र कृपा, स्वरूपमधुना पश्येदियं वास्तवम् ।
हुंकृत्या प्रभुराह 'मातरि कृपा शच्यां न शक्या यत:
साधून् कुत्सयते(ऽखिलैश्च मिलितैर्नष्टो निमायी तु मे)' ॥८६७॥

आचार्य: प्रभुमाह 'चात्रभगवन्! वात्सल्यभाव: परं
मातुस्त्वां प्रति, वैष्णवेषु नियतं द्वेषो न चास्या हृदि ।
ब्रूते यत्किमपीह वत्सलतया स्नेहार्द्रचित्तैव तद्—
वात्सल्यस्थिरभावना ध्रुवमनुग्राह्या त्वियं साधना' ॥ ८६८॥

एवं प्रार्थयतीह पण्डितवरेऽद्वैते च वास: शनै—
स्तन्मातृश्रवणे जगाद 'चरणाम्भोजे प्रभोस्त्वं नम' ।
माता सङ्कुचितास्ति पुत्रनमने तच्चाह 'मात'र्गुरु—
'र्विस्मृत्याऽऽत्मनिमायिभावमधुना द्राक् तद्धियैतं नम' ॥ ८६९॥

वृद्धाचार्यगिराऽऽग्रहे सति तथा, मातोपगम्याग्रत:
साष्टाङ्गं प्रभुपादपद्मनमनं कृत्वाऽवदद्गद्गदा ।
'अज्ञाऽहं त्वबला न वेद्मि किमपि स्थानेऽत्र कोऽसि प्रभो!
योऽप्यत्रासि विधेहि तन्मयि कृपां रक्ष्याऽसहाया सती' ॥८७०॥

कुर्वाणां प्रणतिं विलोक्य जननीं तन्मूर्ध्नि वै स्थापयन्
स्वं पादं प्रभुराह 'याहि ममते! सर्वेऽपराधास्तव ।
पूर्वं सम्प्रति वैष्णवेषु विहिता नूनं क्षमायां गता,
जाता पूर्णकृपा त्वयि' प्रभुवच: श्रुत्वाऽरुदत्सा मुदा ॥८७१॥

भक्तास्तु क्रमशोऽधुनाऽर्चनविधिं नाना प्रभोश्चक्रिरे
धूपं कोऽपि करोति दीपमपर: पुष्पं फलं तत्पुर: ।
वस्त्रं सुन्दरनूतनं प्रभुतनौ केनापि संधाप्यते
सर्वै: पूजनमेवमस्य निजकाऽऽकांक्षानुसारं कृतम् ॥ ८७२॥

एवं सम्प्रति चागतोऽर्चनविधौ भोगप्रसादक्रमो
मिष्टान्नं विविधं फलानि मधुरं नानाविधं व्यञ्जनम् ।

स्वस्वेच्छारुचितोऽखिलैरुपहृत स्थालेषु तत्सज्जितं
नानावस्तु ततः प्रभोश्च करयोः प्रेम्णा मुदा चार्प्यते ।। ८७३।।

दत्वा कोऽपि च मिष्टवस्तु वदति 'श्रीमन्निदं भुज्यतां'
तत्प्रेम्णा प्रभुरत्ति, कोऽपि च फलं दत्वैव संयाचे ।
'एतत्स्वीक्रियतां प्रभो!' प्रभुरयं तान्येव भुङ्क्तेऽचिरं
कश्चित्पिण्डकमोदके बहुविधं दत्ते पुरस्तात्प्रभोः ।। ८७४।।

नीत्वा दुग्धकटोरमेव रसिकं ब्रूते 'प्रभो! पीयतां'
सर्वञ्चेदमपि प्रभुः पिबति यत्प्रेमावतारस्त्वयम् ।
दत्तं सम्प्रति येन वस्तु यदिदं प्रेम्णा तदेव प्रभु–
र्भुङ्क्ते स्माऽत्र न वस्तु कस्यचिदपि स्थानेऽमुनाऽस्वीकृतम् ।।८७५।।

अस्वीकारमयन्तु कर्तुमणुकं शक्ताऽपि किं श्रीप्रभु–
'र्दत्ते कोऽपि फलञ्च पुष्पमथवा भक्त्यात्र पत्रं त्वपि ।
पुष्पं पत्रमपीह चाद्मि मुदित'स्तस्य प्रतिज्ञाऽस्ति तद्
भक्तैः प्रेमसमर्पितं त्यजतु किं नैवेद्यमेतत्पुनः ? ।। ८७६।।

भुक्तं तेन कियत्तथात्र दिवसे भक्तैः कियद्भोजितं
नो कोऽपि प्रतिभूस्तथाह्यनुमितौ व्याप्तिग्रहोऽस्यास्फुटः ।
सर्वप्रीतियुतप्रसादरसनप्राप्तिक्रियानन्तरं
वासो वेपितपाणितोऽर्पयति तत्ताम्बूलकं वासितम् ।।८७७।।

प्रेम्णा चाकृत चर्वणं प्रभुरहो ताम्बूलकस्याधुना,
ताम्बूलस्य ततोऽखिलैरुपहृतिर्भक्तैरकारि क्रमात् ।
स्पृष्ट्वा तच्च ददाति भक्तनिवहे प्रीतिप्रसादात्मकं
लब्ध्वा ते प्रभुदत्तपानममृतं भाग्यं शशंसुर्निजम् ।।८७८।।

ताम्बूले ननु चर्विते प्रभुमुखे मन्दस्मिताभाच्छटा
भक्तानामुपरि प्रसादजनिता पूर्णानुकम्पाऽऽकृतिः ।
प्रेम्णा संलपनं तदीयमधुना पीयूषधारोपमं
सर्वं सात्त्विकभक्तचित्तरसधेश्चान्दोलनोत्पादकम् ।।८७९।।

तावत्तत्र तदा प्रभोः समधिकं वाणीगताकर्षणं
तन्निष्पन्दतरस्थिताश्च निखिलाः शृण्वन्ति पश्यन्ति वा ।
प्रायश्चास्य पिबन्ति चन्द्रवदनं सर्वेन्द्रियैश्चातका
नो जानन्ति वसन्ति कुत्र रसिका लोकेऽधुना ते स्वयम् ।।८८०।।

भक्तानामधुना तथास्य जगतोऽभावो यथा वस्तुत–
श्चासीत्तत्परिवर्तनं रविरपि द्रष्टुं प्रतीक्षारतः ।

यातोऽस्ताचलमद्य किन्तु सुहृदोऽलब्ध्वैव भावान्तरं,
तस्थुः प्रेमनियन्त्रिताः सुमनसो भावे तथैव स्थिते ।। ८८१ ।।

दीपः प्रज्वलितोऽत्र पण्डितगृहे भृत्यैः, परं श्रीप्रभो–
र्दिव्यज्योतिषि देहकान्तिफलिते मन्दप्रभो लक्ष्यते ।
आयाता रजनी कदा च दिवसो यातः, प्रतीतं न तै–
र्विस्मृत्यात्मपरात्मभावमधुना दिव्यप्रकाशस्थितैः ।। ८८२ ।।

भक्तानां भगवद्दर्शनम्

५५. यन्त्री रङ्गाकारे लोके नटजन्तून्नर्तयते ।
कर्ता स्वतन्त्रः पदशास्त्रेऽस्तु, न तथाऽस्ति व्यवहारे
स्वेच्छातोऽधिकमनिच्छापरेच्छाजातोऽत्र व्यवहारः ।
अशुभे मार्गेऽसाधुजनानां स्वेच्छातो यत्सिद्धिः
साधुजनानां श्रेयोमार्गे कठिना कठिनतरा सा ।
क्षेत्रे कृषको वपते धान्यं कथमिह घासोत्पत्तिः ?
असतः सतो विवेचनपूर्वकधारणमिह पाण्डित्यम् ।
कंससभायां नन्दकुमारो रङ्गगतो बहु दृष्टः
तद्द्रष्टॄणां बहुधोल्लेखे किं तेषां स्वातन्त्र्यम् ? ।
वयमिह जीवा यन्त्राकारा यन्त्री क्रीडत्यस्माभिः
तत्क्रीडान्तःस्थितिरस्माकं, तत्तोषोऽस्तु सुलक्ष्यम् ।।

श्रीकृष्णो भगवान् यदा बलयुतः कंसस्य रङ्गस्थले
प्राप्तस्तत्र तदा विभिन्नहृदयाश्चासन्मनुष्याः स्थिताः ।
रूपं दृष्टममीभिरद्य भगवद्देहे विभिन्नात्मकं
भावो यस्य यथा, तथा नवरसव्यक्तिः पृथग्वै पृथक् ।।८८३ ।।

भीतः कोऽपि च कम्पितो ननु परः प्रीतो, घृणा कस्यचित्–
क्रोधोऽन्यस्य मुदोऽपरस्य हृदये प्रेमोदयोऽन्यात्मनि ।
शत्रुर्वज्रसमः कठोरतनुको यत्राऽसतां दुर्हृदां,
स्त्रीणां कामसमानसुन्दरवपुस्तत्रैव मित्रं सताम् ।।८८४ ।।

किन्त्वत्राद्य च वासपण्डितगृहे दिव्यप्रकाशे प्रभो–
र्भक्तास्ते निखिलाः समप्रकृतयः प्रेमैकमात्रेच्छवः ।
आनन्दस्तत एव तत्प्रभुमहाभावे समानः सतां
सर्वेषां त्वनुभूतिरत्र सुखदाऽऽलोकेऽस्य लोकोत्तरा ।।८८५ ।।

भावो भागवतो हि केवलमहो! सर्वैः प्रभौ स्वादितः
किन्त्विष्टस्य च भेदतोऽत्र भगवानेको विभिन्नोऽभवत् ।
दृष्टा तत्र तदा प्रभोर्वपुषि तैः स्वस्वेष्टदेवाऽऽकृति,—
र्भावो हार्दिक एव खेलति परं प्रेमा तु भावोऽमृषा ॥ ८८६॥

सर्वादौ प्रभुरत्र वाससुमतौ चक्रे कृपावर्षणं
ब्रूते पण्डितगेहिनं स्वयमहो! 'श्रीवास!' सम्बोधयन् ।
'कुर्वे संततरक्षणं तव सदा त्वं मे कृपाभाजनं
गुप्तं यद्घटितञ्च तावकमहं तत्स्मारयामि क्षणम् ॥ ८८७॥

देवानन्दगृहे यदाहि बहुभिश्चान्यैः स्वशिष्यैः समं
श्रीमद्भागवतीं कथां त्वमभवः शृण्वंस्तदानीं, स्मर ।
भावावेशविमूर्च्छितो ननु तदा मध्येकथं, पण्डितः
शिष्यः कोऽपि न वा विवेद मनसस्ते प्रेमभावस्थितिम् ॥८८८॥

स्कन्धे तावकशिष्यकैस्तव गृहे धृत्वा तदा प्रापितः
संज्ञायां गमितो मयैव सुहृदा मूर्च्छादशातो भवान्' ।
आश्चर्यं परमन्तु पण्डितमतौ श्रुत्वा प्रभुश्रीमुखाद्
गुप्तां तां घटनां, यतः प्रकटिता नो सम्मुखे कस्यचित् ॥८८९॥

अद्वैतं परिलक्ष्य चोक्तममुना'ऽऽचार्य! स्मरत्यत्र किं
श्रीगीतैकविशेषपद्यपदके यच्छङ्कया भोजनम ।
व्यक्त्वा त्वञ्छयितो, मयैव तव तच्छङ्कानिवृत्तिः कृता'

५६. शङ्का जनयति बहुलं दोषं बुद्धिमतामपि लोके ।
अज्ञानामिह परतः शङ्का,ऽद्वैतज्ञानाभावात्
विदुषामद्वैतव्याख्यायां पदे-पदे शङ्काऽऽस्ते ।
तिमिरे शङ्का नेत्रवतामिह रवौ तथोलूकानाम्
असति ज्ञानवतां भावेन्दौ चेतसि शङ्काच्छाया ।
गीतायां त्रयोदशेऽध्याये त्रयोदशाद्यपादस्य
इह 'सर्वतःपाणिपादन्तत्' पाठेऽद्वैतशङ्कायाम्
'सर्वतः पाणिपादान्तः' प्रकृतं, तत्पाठं प्रभुरवदत् ॥

श्रुत्वैवं बहुशो ननाम पदयोरद्वैतजी श्रीप्रभोः ॥८९०॥
भक्तैः सम्प्रति तत्प्रभोर्भगवदावेशस्थितस्यासने
सायङ्कालिकसौभगञ्च रचितं नीराजनाऽऽयोजनम् ।
एकञ्चातिविशालरूपमधुनाऽऽरार्तिक्यमायोजितं
सर्वैः पाणिमुखैर्मनोहररवः शङ्खादिवाद्यैः कृतः ॥ ८९१॥

दत्वा मातृशचीकरे गृहपतिर्नीराजनां भाजनं
कर्तुं प्रार्थितवां,स्ततोऽस्य गृहिणीसाहाय्यतश्च, प्रभो: ।
वृद्धा साऽऽत्मसकम्पपाणिकरणा चक्रेऽत्र नीराजनां,
वाद्यानां सुरवे यथा ननु तथा सम्पादितेयं क्रिया ।। ८९२।।

श्रीवासस्तदनन्तरं गमयति श्रीमातरं गेहकं
भक्तानां वरदानलाभसमय: प्राप्तोऽधुना स्वप्रभो: ।
आसंस्तत्र महाप्रभोस्तु निखिला: प्रायोऽन्तरङ्गास्तदा
नेदानीं परमप्रियोऽस्य सरलो भक्तोऽस्ति स श्रीधर: ।। ८९३।।

गीतानन्तरसाद्यभागमिलितास्ते प्रेमिण: पाठका
भक्तश्रीधरगेहिना परिचिता: सन्त्येव. सम्यक् तथा ।
रम्भाकोमलखोलविक्रयकरो भक्त: स वै भाग्यवान्
कुर्वन् हास्यविनोदनं प्रभुरयं येनाऽभवत्सर्वदा ।। ८९४।।

प्राय: सर्वदिनं घटीं-द्विघटिकां तत्खेदनानन्तरं
मूल्यार्धे तु तदीयखोलपणनञ्चक्रे निमायी सुहृत् ।
श्रीस्तम्भे कदलीद्रुमस्य ललिते बाह्यांशनिष्कासना-
च्छेषांशो ननु कोमलश्च मृदुलो वङ्गे स खोलाऽभिध: ।८९५।।

वङ्गाले हि तदीयशाकपचनं सामान्यतोऽस्ति प्रियं
किन्तु श्रीधरखोलशाकमिलितं गौरप्रियं भोजनम् ।
कश्चिच्च्चापणिकस्तु सीमितधनस्तत्स्तम्भयोग्यत्वचो
विक्रीणाति विधाय खण्डकरणात्स्थालाऽऽकृतिं भाजनम् ।।८९६।।

पूजासाधनभाजनं भवति तन्नारीनराणां तथा
निर्वाहं निजजीवनस्य कुरुते तद्विक्रयाच्छ्रीधर: ।
आयाऽर्धेन करोति भक्तहृदयस्तद्‌देवगङ्गार्चनं
तच्छेषादुदरस्य येन विधिना केनापि जीवात्मन: ।।८९७।।

उच्चै: श्रीहरिनामकीर्तनमसौ कुर्वन्नहोरात्रकं
तिष्ठत्यत्र, समीपवर्तिजनता तच्छ्रीधरात्खिद्यते ।
'वृद्धोऽयं निशि कस्यचिन्न शयितुं दत्ते, ब्रुवन्तो जना-
स्तस्यैवं ननु निर्धनस्य सततं कुर्वन्त्युपेक्षां सत: ।।८९८।।

एतं कोऽपि न भक्तमत्र मनुते किन्तु प्रभोर्हार्दिक:
स्नेह: श्रीधरनिर्धनेऽस्ति, भगवद्‌भक्तिं स वेत्ति श्रिय: ।
सस्मार प्रभुरत्र तत्स्वभगवद्‌भावेऽपि सच्छ्रीधरं,
जीवो विस्मृतिभूमिको हि भगवान् सर्वस्मृतीनां निधि: ।।८९९।।

दूरञ्छ्रीधरगेहमत्र नगरे कोणे द्वितीये परं
धावन्तोऽद्य तु पञ्चषा ययुरतः श्रुत्वैव भक्तास्तथा ।
आनन्दे हरिनामकीर्तनमसौ कुर्वंस्तदाऽऽसीद्धरो
गत्वा तत्र कपाटयोः खट-खटध्वानं पुरा तैः कृतम् ॥९००॥

'श्रीकृष्णं स्वमनोहरं मुरहरं श्रीवासुदेवं हरिं
गोविन्दं करुणालयं जडजगन्नाथञ्च नारायणम्' ।
ऊचे 'कोऽस्ति'? तथाहि नाममधुरं संबोधयन्नेव स,
'स्वेन ज्ञास्यसि' तैरवादि तरसा 'द्वारस्य चोद्घाटनात्' ॥९०१॥

कृत्वा द्वारमनावृतं मृदुगिरा तान् पृच्छति श्रीधरो
हेतुञ्चागमनस्य, तैश्च कथितं 'शीघ्रातिशीघ्रं चल ।
त्वां सस्मार निमायिपण्डितनवद्वीपेन्दुगौरः प्रभुः',
सस्मार प्रभुरद्य भिक्षुकमिमं दीनं निमायी स्वकम् ॥९०२॥

श्रुत्वैवेदमसौ बभूव विकलः संज्ञानहीनस्तथा
प्रेम्णा 'हे'ति गिरा पपात धरणीपृष्ठे द्रुतं श्रीधरः ।
ध्यानञ्चापि न विद्यतेऽस्य वपुषः 'प्राप्ता नवेयं विपद्'
भक्तैश्चिन्तितमत्र तु प्रभुवचस्तत्पूरणीयं ध्रुवम् ॥ ९०३॥

स्कन्धेष्वेव निधाय मूर्च्छितममुं पार्श्वे प्रभोरानयन्
किञ्चासीदधुनाप्यचेतनदशायामेव स श्रीधरः ।
स्पर्शं कोमलपाणिना प्रभुरतः स्वेनाऽकृतामुष्य त-
ल्लेभे चेतनतामसौ मृदुकरस्पर्शे गृहीते प्रभोः ॥ ९०४॥

लब्ध्वा श्रीधरमत्र चेतनमतः प्रोवाच तञ्छ्रीप्रभू-
'रूपं श्रीधर ! पश्य मेऽद्य,मनसः पूर्णा च ते कामना ।
एतावद्दिवसस्य,' तत्प्रभुगिराऽऽश्वस्तः प्रबुद्धो धर-
स्तत्तेजोमयमस्य पश्यति रुदन् रूपं स्म हारि प्रभोः ॥ ९०५॥

स्तोतुं तं दिशति प्रभुर्ननु पुनः, स श्रीधरश्चोक्तवान्
संयोज्य स्वकरौ गलेन भरितो,' दीनश्च हीनोऽधमः ।
कामं लोकबहिष्कृतश्च पुरुषः कुर्यां प्रभोः किं स्तवं?
ज्ञातं ते न यथार्थरूपमधुनाऽतीतेऽपराधी महान् ॥ ९०६॥

पूर्वं बोधितवान् पुनर्ननु पुनस्तन्मां निमायी भवान्
मायान्धस्त्वबुधः स्फुटं न बुबुधे गूढं रहस्यञ्च ते ।
सार्धं तद्भवता सदैव कलहं कुर्वन् बभूवाऽधुना
याचे वास्तवरूपनष्टतिमिरः सर्वापराधक्षमाम्' ॥ ९०७॥

ऊचे गद्गदित: प्रभुस्'त्वयि परं तुष्टोऽस्मि तच्छ्रीधर!
स्वेच्छातो वरमद्य याच ननु मे किं वाञ्छसि ब्रूहि तत् ।
ऋद्धिं सिद्धिमथ प्रभुत्वमममलं वित्तं यथेच्छा तव'
प्रोचे बद्धकर: स दैन्यसहितो रुद्धस्वर: श्रीधर: ।। ९०८।।

'किं लब्धं न मया प्रभोऽद्य, कुरुते सर्वो ममोपेक्षणं
बुद्ध्वा दीनदरिद्रकं मम गिर: पृष्टोऽवहेलामपि ।
एवं तुच्छवराकमत्र कृपया भक्तै: समानीय मां
धन्यञ्चाकृत देवदुर्लभमिदं रूपं प्रदर्श्याऽऽत्मन: ।।९०९।।

किं स्यादेव ममाधुना परमितो, लब्ध्वा करिष्ये च किं
सिद्धिं भौतिकसम्पदन्तु, महती साप्यत्र मायैव च' ।
ऊचे त्वाग्रहपूर्वकं प्रभुरमुं 'याचैव कञ्चिद्वरं
नर्द्धिं सिद्धिमथ प्रियं यदपि ते स्यात्तच्च याचाऽधुना' ।।९१०।।

तस्मिन्नेव जगाद तत्प्रियतमं दीनस्वरे श्रीधर–
'श्चेत्त्वं वाञ्छसि दातुमेव मम तद्देहीदमेव प्रभो! ।
कुर्वन् विप्रसुत: सदैव कलहं खोलक्रयस्य क्षणे
योऽभूदत्र मया, विराजतु स मे रात्रिंदिवञ्चात्मनि' ।।९११।।

एवं नि:स्पृहताऽऽग्रहेण परमं निष्किञ्चनस्य प्रभु:
प्रीतस्तत्स्वयमेव तस्य मनस: प्रीतिं पुपोषाऽधुना ।
सोऽस्ति श्रीमुरलीमनोहरशिशो रूपस्य चोपासक:
श्रीकृष्णादिसुनामधाम सततं गायन्नयं प्रीयते ।।९१२।।

५७. श्रीमन्! विकिरतु करुणाकिरणम् ।
श्रीकृष्ण! त्वञ्छ्रीमद्गीतां शिक्षय भारतमनिशम्
गोविन्द! व्रजगोकुलमृच्छतु हरे! हरतु भवभीतिम् ।
मधुर! मुरारे! कलिमुरतोऽवतु हे नाथ! स्मयतामिह
नारायण! नरसौहृदं स्मरतु वासुदेव! मयि निवसतु ।।

तस्मात्तस्य कृतेऽत्र दर्शयति तच्छ्रीकृष्णरूपं प्रभु–
र्दृष्ट्वा श्रीप्रभुविग्रहेष्टमधुना धन्योऽधन: श्रीधर: ।
आनन्देन स मूर्च्छितोऽत्र पतितो भक्तै: सुखं शायित:
किं बिन्दुर्हि महोदधिं रसनिधिं लब्ध्वा पृथग् लक्ष्यते? ।।९१३।।

प्राप्तश्चात्र मुरारिगुप्तवरणप्राप्तिक्रम: साम्प्रतं
गुप्तो यद्यपि धार्मिकोऽस्ति परम: शुद्धस्तथा वैष्णव: ।

शास्त्रार्थव्यसनन्तु तस्य महती तर्के वितर्के रुचि:,
'शुष्कं वादविवादकर्म जहि' तद्ब्रूते प्रभुर्बोधयन् ॥११४॥

'एकैवेयमपूर्णताऽस्ति तव तद्भक्तिस्थितौ, तत्परं
शास्त्रेऽध्यात्मनि भक्तिपक्षविषयो ध्येयो मुरारे! त्वया'।
'वादं कुत्र विवादमत्र करवै ? तर्कं वितर्कं तथा
पार्श्वे तद्विदुषान्तु वच्मि चलिते किञ्चित्प्रसङ्गे परम्' ॥११५॥

'आचार्येण समं करोषि न च किं ? तर्कं वितर्कं तथा
वेदान्ताद्वयपक्षमत्र बहुधाऽद्वैतेन नो जल्पसि?'।
श्रुत्वा श्रीप्रभुसम्मतिं स्वयमहोऽद्वैतोऽत्र जिज्ञासते,
'वेदान्तस्य विनिन्दिता ननु किमद्वैतस्य, वार्ता प्रभो'!? ॥११६॥

'ब्रूते को ननु निन्दितं, बहु शुभञ्चास्ति' स्मयन् सोऽभणद्
लोका भक्तिपथेऽत्र ये भुवि परञ्छ्रद्धालव: प्रेमिण:।
सिद्धीनां किमहो! प्रयोजनमथ स्थाने तथा प्रक्रिया—
भ्रान्तीनामनुबन्धनस्य सुहृदां तेषां, तथोदाहृतम् ॥११७॥

५८. उद्धव! भक्तिर्मां नर्तयते ।

वृत्तिनिरोधे योगे समाधिरिह कर्मठपुरुषाणाम्
सांख्ये प्रकृते: पुरुषविवेकस्तत्त्वाऽऽलोचनयाऽलम् ।
संसारे पथि धर्मरहस्यं त्वस्ति गुहायां निहितम्
बहिर्मुखानां स्वाध्याय: किल नास्त्यन्त:प्रेरयिता
दैहिकदैविकभौतिकपीडाहतस्तप: किं कुर्यात् ? ।
त्याग: कलिमलदूषितमनसामसतां स्यात्किं विमल: ?
भक्ति: केवलमूर्जितमूर्ति: साधयति श्रीमन्तम् ॥'

आज्ञामेवमसौ निशम्य सुहृदो मूको मुरारि: प्रभो:,
सत्येवं प्रभुरेव बोधयति तं 'ते का मुरारे! पुन:।
तत्सिद्ध्यै शरणग्रहस्य नियतिस्तत्प्रक्रियाणां, यत:
सिद्धो जन्मत एव ते च भगवान्, भक्त: पुराजन्मत: ॥ ११८॥
गुप्त! श्रीहनुमत्समोऽस्ति नियतं भावश्च ते विग्रह:,
साक्षात्त्वं हनुमांस्तथैव घटसे, रूपं पुन: स्वं स्मर'।
इष्टं ध्यायति, रामभक्तभवनाद् गुप्त: प्रभुस्मारित:
साक्षादस्मि (तथाप्रतीतिरभवत्) स्थाने हनूमानहम् ॥ ११९॥

अर्चाम्यत्र तथेष्टदेवमधुना तत्पादपद्मे स्थित:
पश्यत्यूर्ध्वमुख: स तत्प्रभुदिशं दृष्टञ्च रूपं प्रभो:।

सीतारामनिजेष्टदेवदयितस्वस्पष्टमेवामुना,
दृष्ट्वेष्टं प्रभुविग्रहे निजमसौ भूयो धरायां लुठन् ।।१२०।।

साष्टाङ्गं प्रणनाम, गद्गदगलः कुर्वन्नभूत्संस्तुति—
श्चादेशे वरयाचनस्य सुहृदो लब्धे मुरारिः प्रभोः ।
तामेवार्थितवांस्तथाह्यविचलाञ्छ्रीरामभक्तिं निजां
स्वं पादाब्जमसौ निधाय शिरसि प्रीत्या तदस्मै ददौ ।।१२१।।

सर्वेषां तदनन्तरं निजवरप्राप्तिक्रमश्चागतः
सर्वे भक्तिमहैतुकीन्तु ववरुश्चाद्वैतवासादयः ।
स्वात्मानं बहु दीनहीनमधमं दासो हरिर्बोधते
सङ्कोचः प्रभुसम्मुखेऽस्य भवने तद्दूरलीनं स्थितः ।।१२२।।

'कुत्राऽऽस्ते हरिदास—दासहरिकस्तं मे पुरश्चानय'
ब्रूते श्रीप्रभुजी गभीररवतः प्रेमावतारोऽधुना ।
सर्वे तद्धरिदासमार्गणमतः कुर्वन्ति सर्वत्र तु
स्थाने सङ्कुचितः स्थितः सुमनसां पृष्ठेऽखिलानासौ ।।१२३।।

भक्तास्तं प्रभुसम्मुखञ्च भवितुं प्रोचुः स चासीत्परं
मग्नः प्रेम्णि, ततस्त्वयं प्रभुपुरश्चोत्थाप्य भक्तैः कृतः ।
दृष्ट्वाऽमुं हरिदासमत्र पुरतः प्रेम्णा जगाद प्रभु—
'र्नीचं मा हरिदास! बोधय निजञ्छ्रेष्ठोऽखिलानामसि ।।१२४।।

एकैवास्ति च जातिरत्र मम ते, यो ध्यायति त्वां जनो
मामेवार्चति सोऽत्र मानय तथा सङ्गे सदैवाऽस्मि ते ।
सङ्गे तेऽस्मि पुरापि पृष्ठपतितो बेंतप्रहारो यदा
पृष्ठे ते तु ममैव (पश्य)पतित,स्तच्चिह्नमद्यापि च ।।१२५।।

स्वस्यैवोपरि सर्वभक्तसुहृदां गृह्णामि कष्टं सदा
कष्टे तन्महतोऽपि चात्र महति प्राप्ते स नो पीड्यते ।
यो भक्तांस्तुदते स मानय तथा तोत्ता ममैव ध्रुवं
दुष्टोद्धारमहं ततोऽत्र हननस्थाने करिष्येऽधुना ।।१२६।।

त्वं न प्रार्थितवांस्तु मां प्रियतमं तेषां वधार्थं तदा
दुष्टानामपि बुद्धिशुद्धिसहितं तद्भद्रमेवात्मना ।
उद्धारं निजनामकीर्तनरसात्तत्कारयिष्येऽसतां
कार्येऽस्मिन् मम जातिवर्णविषयो भेदो हि न स्थास्यति ।।१२७।।

सर्वं मे पविता चराचरजगन्नाम्नाञ्च संकीर्तनैः
स्वाभीष्टं वरमद्य याच ननु मां भूयो न कांक्षत्यतः' ।

एकात्मा हरिदासजी कथयते दैन्येन बद्ध्वा करौ
'श्रेष्ठाऽऽत्मन्! वरदातृषु प्रियतम! प्रेमावताराद्य हे! ॥९२८॥

चेदिच्छा वरमेव दातुमधुना ते मे दयालो! तदा
मह्यं देहि यथा सदैव भविताऽमानी च निष्किञ्चनः ।
न स्यान्मे प्रभुदासमात्रपदतश्चान्योऽभिमानस्तथा
धूलिं वैष्णवपादयोः स्वशिरसः स्यां मन्यमानः श्रियम् ॥९२९॥

याचे श्रीप्रभुपार्श्वतो वरमिमं प्रीतिः स्थिरा सर्वदा
श्रीमद्वैष्णवसाधुभक्तपदयोः', श्रुत्वा हरेरर्थनाम् ।
आनन्दध्वनिरत्र सर्वककुभो जातस्तथैवंविधां
सर्वे तां हरिभावनां स्फुटतया भूम्ना शशंसुर्मुदा ॥९३०॥

सर्वे सन्ति मुकुन्ददत्तसुधिया हे पाठकाः! संस्तुताः,
सोऽप्यत्राऽनधिकारिणं प्रभुपुरोभावे तु मत्वा निजम् ।
आस्ते दूरमसौ स्थितो ननु रुदन्, वासो ययाचे भिया
'दत्तोऽयं बहु ते, प्रभो! स्वकृपया ग्राह्यो मुकुन्दः, प्रियः ॥९३१॥

एष श्रीप्रभुलोकनेऽपि निजकं योग्यं न वै बोधते'
गम्भीरप्रभुराह त'न्न भवितुं शक्या मुकुन्दे कृपा ।
आत्मानं कुरुते प्रसिद्धमखिलं भक्ताभमापाततो
वार्तां किन्तु सदैव तार्किकसमां कुर्वन् वरीवर्त्ययम् ॥९३२॥

स्थित्वा पण्डितमण्डलीषु भणति क्रीडाञ्च मायाविनो
लीलां वैष्णवसङ्गिनाञ्च विबुधं स्वं बोधते ज्ञानिनम् ।
एतस्यात्र न दर्शनं भगवतो भव्यं भविष्यत्य'सौ
श्रीवासाननतस्ततो ननु रुदन् दत्तस्तु जिज्ञासते ॥९३३॥

'किं भाविन्यपि कर्हिचिद् भगवतो नो मे कृपापात्रता ?'
वासः पृच्छति तन्मुकुन्दनुदितो 'लिप्सुर्मुकुन्दः प्रभो! ।
(मेऽपि स्यादधिकारिता भगवतः काले कृपायाश्च किं?)
ज्ञातुं कांक्षति', तस्य चोत्तरमिदञ्चोपेक्षया श्रीप्रभोः ॥९३४॥

'आम्, पश्चादधिकारिताऽस्य भविता तत्कोटिसज्जन्मना'—
मानन्देऽत्र ननर्त तावति गते मग्नो मुकुन्दः श्रुतौ ।
प्रेम्णा गद्गदकण्ठतः पुलकितो नृत्यत्यथेदं ब्रुवन्
'सत्यं मे भविता कदाप्यवितथं तन्मे भवेत्कर्हिचित् ॥९३५॥

(नृत्यन् गायति) कोटिजन्मवचनं किं वा स्वयं यास्यति
स्वल्पैरन्तमिदं क्षणैस्तु बहुभिः कालैरपि व्येतु वा ।

तत्रान्तेऽपि कदापि तत्प्रभुकृपा प्राप्ता मदीया भवे,–
च्चास्त्वाप्ता भगवत्कृपा, पुनरियञ्चाप्ता कदाप्यस्तु नु' ।।९३६।।

आश्चर्यं महदेव भक्तनिवहे दृष्ट्वाऽस्य मोदस्थितिं
निष्ठाञ्चापि दृढां विलक्ष्य सुहृदः सम्प्रत्यवाचोऽखिलाः ।
प्रेमालिङ्गनमन्ततः प्रभुरतश्चास्मै ददच्चोक्तवान्
'क्रीतोऽहन्तु मुकुन्द! तेऽविचलया चात्मीयया निष्ठया ।।९३७।।

सत्यं, त्वं परमोऽसि वैष्णवजनः, सीमा मुदो नास्ति मे
निष्ठायास्तव कारणात्सुमनसः स्थाने दृढायास्तथा ।
त्वं युङ्क्षे भगवत्कृपांशुनिखिलश्रेष्ठाधिकारी तथा–
चोक्त्वा लक्षगुणाधिकं ननु ममाऽऽनन्दञ्चकर्थाऽधुना ।।९३८।।

अत्यन्तं कठिनं मुकुन्द! जगतीलोकेऽत्र साधारणे
त्वादृग्धैर्यतथोच्चभावभवनं, (धन्या सुपुत्रैर्धरा) ।
तेजोरूपमिदं गतः प्रभुकृपापात्रत्वमालोकय'
स्वं तस्मै प्रभुणा प्रदर्शितमतो रूपञ्च तेजोमयम् ।।९३९।।

तल्लोकोत्तररूपदर्शनहृतो लेभे मुकुन्दो भुवं,
दृष्टं तन्निजभावनानुसरणाच्चान्यैरपि श्रीतनौ ।
रूपञ्छ्रीमुरलीमनोहरमतः श्रीश्यामवर्णात्मकं
राधाकृष्णमथापरं भगवतः श्रीजानकीजीवनम् ।।९४०।।

भगवद्भावस्य समाप्तिः

५९. रूपं द्विविधं भजते लोको भागवतञ्छ्रद्धालुः ।
ऐश्वर्याऽऽकर्षणमिह वैधीभक्त्याऽऽतुरलिप्सूनाम्
माधुर्याऽऽस्वादनमनुरागात्प्रेममात्ररसिकानाम् ।
रमणीयालौकिकविच्छत्तिः पण्डितरसपरिभाषा
तत्स्वैश्वर्यं दर्शयतीशः प्रेमिण्यपि निजकामात् ।
सीमितशक्ती रसनप्रीतिः सहते तन्न च कांक्षति
जगन्निवास! प्रसीद दर्शय मधुरं स्वर्जुनमनसः ।।

संसारे नियमोऽस्ति, यो ननु यथा भारञ्च वोढुं क्षम–
स्तं तस्योपरि तावदेव कृतिनः स्थानेऽर्पयन्ति स्वतः ।
सामर्थ्यादधिकन्तु कोऽपि भरितः केनापि चाज्ञानिना
मध्ये ह्येव स पातयेदथ भरं भूमौ पतेद्वा स्वयम् ।।९४१।।

तत्तेज: कुरुते स्फुटं न भगवान् स्वं प्रेम वा पूर्णतो
गृह्णात्यत्र तथैव रूपमपरं यत्राधिकारी यथा ।
वार्ताऽन्यैव तु तेजसो भगवतो, यो वै मनुष्येष्वपि
श्रेष्ठ: सात्त्विककर्मधर्मनिरतस्तेजस्तपस्वी कृती ।।९४२।।

एतेषामपि सम्मुखे प्रकृतित: क्षुद्रो जनोऽसंयमी
स्थित्वा चेन्द्रियलोलुपोऽतिसमयं वार्ता न कर्तुं क्षम: ।
न सह्यं त्वसतस्तथाऽधिकमुपस्थानं पुरस्तेजस—
स्तत्राऽवश्यमुपस्थितौ स समयो भारो यथाऽस्याऽयते ।।९४३।।

तस्माद्भौतिकदेहतो भगवतस्तत्तेजसो दर्शनं
मायाबद्धशरीरिणोऽत्र भवितुं नो शक्यते कर्हिचित् ।
तेजो यन्ननु दृश्यते भगवतो मायाविशिष्टन्तु तत्—
सङ्केतो विहितोऽन्तत: प्रकटिते स्वे विश्वरूपे तथा ।।९४४।।

'रूपं मायिकमेव दर्शितमिदं दृष्टं त्वया यन्मया'
गीतागायकपार्थसारथिरथ स्पष्टं सखायं जगौ ।
तत्तेज:सहने तथातिसमयं चादेवतानामपि
स्वेच्छातो नहि शक्तिरस्ति, भविता किं मानवानां पुन: ।।९४५।।

एकं ज्योतिरपूर्वमेव सततं भक्तात्मनि द्योतते
तस्यापि प्रकटं न सह्यमधिकं तेज:स्वरूपं प्रभो: ।
आम्, क्रीडन् स निरन्तरन्तु मधुरैर्भावैर्निजप्रेयसा
तिष्ठत्येव समं, परन्तु सुहृदां भावस्तथाऽन्योऽस्ति स: ।।९४६।।

तत्रैश्वर्यमहत्त्वयोश्च महसोऽभावो भवत्येकत:
सर्वस्वं ननु जीवनं स मधुरो भाव: सतां प्रेमिणाम् ।
द्रष्टुं वाञ्छति नैव भक्तपरमस्त्वैश्वर्यतेजोमयं
रूपं, कुत्रचिदिच्छया भगवतो जघ्नौ तदन्यद्वच: ।।९४७।।

यामा: सप्तगता: प्रभोश्च भगवद्भावे स्थितस्याखिला,
यातो वै दिवसस्तथैव समय: प्राप्तो निशान्तस्य च ।
ऐश्वर्ये त्वथवाऽत्र तेजसि मनाङ् नापि प्रभोर्लक्षितं
भक्तैस्तै: परिवर्तनं प्रियतमे मुग्धैर्यथावत्स्थितै: ।।९४८।।

अद्यान्यत्र न कोऽपि भक्तनिवहात्कुत्रापि भोक्तुं गत:
पादौ कोऽपि न च प्रसार्य शयितश्चासंस्तथैव स्थिता: ।
श्रीमन्तं परिवृत्य तत्र परित:, प्राप्त: प्रभातोऽधुना
सम्भ्रान्ता इव सन्ति सम्प्रति, ततोऽद्वैतेन संचिन्तितम् ।।९४९।।

‘तेजोऽलौकिकमस्य नातिसमयं शक्ष्यन्ति सोढुं त्विमे’
तत्कर्णे भणितञ्च वासगृहिणोऽ‘स्माभिश्च संसारिभिः ।
तेजोऽसह्यमिदञ्च सोढुमधिकं नो शक्यतेऽतः परं,
कार्यः कोऽपि यथाऽस्य भावशमनं भूयादुपायस्तथा’ ।।९५०।।

आचार्यस्य तथात्र सम्मतिरियं युक्तं प्रतीताऽभव—
च्छ्रीवासस्य, समर्थयन् गुरुमतं प्रोवाच गेही निजम् ।
‘आम्, सत्यं भवतोदितं समुचितञ्चैतस्य चापेक्षयाऽऽ—
स्माकं द्वीपभुवां निमायिमिलितं तद्गौरमेव प्रियम् ।।९५१।।

ऐश्वर्यान्तरितं प्रभुञ्च मिलितास्तत्प्रार्थयामो वयं—
(सम्प्रत्यद्भुतभावसंवरणतो गौराङ्गमालोकय)’ ।
श्रीवासस्य वचस्तथेदमधुना सर्वस्य जातं प्रियं
चक्रुस्तत्प्रभुसंस्तुतिं सुमनसः संयोज्य सर्वे करौ ।।९५२।।

‘सम्प्रत्यप्रकटं करोतु निजकञ्चैश्वर्यमेतत्प्रभो!
धक्ष्यन्ते ननु तेजसा तव वयं जीवाश्च संसारिणः ।
अस्माकं सहनेऽस्य चातिसमयं शक्तिर्न, सम्प्रत्यतो
रूपं नोऽत्र तदेव दर्शय विभो! गौरं निमायि स्वकम्’ ।।९५३।।

श्रुत्वा भक्तजनस्य हुंकृतिमसौ चक्रे तथा प्रार्थना—
मुच्चैर्हुंकृतितश्च मूर्च्छितदशां यातस्तथेदं ब्रुवन् ।
‘अस्त्वेतन्ननु यामि सम्प्रति’ ततो भूमौ च सिंहासना—
त्संज्ञाशून्यतया पपात तरसा, सर्वस्य धात्री धरा ।।९५४।।

एकस्मिंश्च वरासने द्रुतमसौ चोत्थाप्य तच्छायितो
भक्तैः, किन्तु यथावदेव शयितश्चासीत्तथामूर्च्छितः ।
स्वल्पञ्चापि न कम्पिता प्रभुतनुर्वामेऽथवा दक्षिणे
दृष्ट्वा मूर्च्छितमेव तैर्बहुविधं तस्योपचारः कृतः ।।९५५।।

कश्चिच्च व्यजनेन वायुमकरोत्तैलं सुगन्धं प्रभोः
शीर्षे वाऽस्य लिलेप शीतलरसं, भग्ना न मूर्च्छा परम् ।
अद्वैतप्रमुखैः प्रभोस्तु निखिलैर्भक्तैर्वपुश्चाखिलं
वासेनापि परीक्षितञ्च गृहिणा स्थाने निमाय्यर्थिभिः ।।९५६।।

चक्रे हस्तमथ क्षणं बहु तदा तन्नासिकायाः पुरः,
श्वासः किन्तु चलन्न मन्दमपि वै मन्दात्प्रतीतिङ्गतः ।
प्रत्यङ्गं वपुषस्तथा सुमनसः पादौ च हस्तौ तथा
संज्ञाशून्यसमस्थितं, लयमिते चित्तेऽखिलं लीयते ।।९५७।।

अङ्गं यच्च निधीयतेऽपि च यथा तद्वै तथाऽचेतनं
तिष्ठत्यस्य, कुतोऽपि नाङ्गविधितश्चैतन्यचेष्टाऽल्पकम् ।
एवञ्चास्य दशां विलोक्य सुहृदां भीतिः प्रतीतेव तद्—
भक्तानां बहु, ते पुनर्ननु पुनर्वाक्यं प्रभोः सस्मरुः ॥९५८॥

'अस्त्वेतन्ननु यामि सम्प्रति' तथा तर्को बहूनामतो—
यातोऽस्मानपहाय वास्तवमयं, 'नेदं' परेषां वचः ।
'सम्बन्धे वचनं तदस्य तु तदैश्वर्यस्य तत्तेजसो,ऽ—
स्माकं गौरहरिस्तु लाघवमयं चैतन्यलाभं क्रियात् ॥९५९॥

एतेषामनुमानमेतदपि किं तद्वद्घटद् दृश्यते ?
प्रातःकालपलाच्च मध्यदिवसं प्राप्ता प्रतीक्षाघटी ।
नाप्यल्पं परिवर्तिता प्रभुदशा,ऽसंज्ञः स चाऽऽस्ते तथा,
सौहार्दप्रतिमा सतां प्रियतमे चिन्तामयी चेतना ॥९६०॥

ज्येष्ठे मासि तथाविधस्थितिवतां त्रिंशत्तु होरा गता
भक्तानां क्रमशो मनोविकलता दृष्ट्वा प्रभुं वर्धते ।
शौचस्नाननिमित्ततो न चलितः कोऽप्यत्र, नो कस्यचिद्
ध्यानं क्षुत्तृषयोर्बभूव, परितो मौनं निषण्णाः प्रभुम् ॥९६१॥

आश्लिष्टो ननु निश्चयस्तु बहुभिश्चैतन्यलाभः प्रभौ
नाऽभूच्चेद् वयमप्यभोजनजलाऽऽदानं विनाऽत्रैव हि ।
मोक्ष्ये प्राणमतः' प्रभोश्च परिधौ लक्ष्येन तेनैव ते
धैर्येणात्र समं, विना ववृतिरे तद्रोदनाऽऽक्रन्दने ॥९६२॥

यत्प्रातः पिहितञ्च पण्डितगृहद्वारं त्वतीते दिने
तच्चाद्यापि तथैव चास्ति पिहितं, प्राप्ते प्रभाते परे ।
नो निःसृत्य च कोऽपि कुत्रचिदपि स्थाने गतस्तद्गृहाद्,
बुद्धं नोचितमस्य सम्प्रति शचीमातुः कृते सूचनम् ॥९६३॥

प्रायस्तत्र तु सर्व एव च यतः प्राणार्पणं स्वं पणं
कृत्वाऽऽस्ते, परमत्र कश्चिदपरस्तन्मध्यभक्तोऽवदत् ।
'जातोऽसौ ननु मूर्च्छितोऽत्र बहुशः संकीर्तनस्य ध्वनिं
श्रुत्वैव प्रियमात्मनोऽभवदहो! भूयः सचेताः प्रभुः ॥९६४॥

किन्नो चेतनाप्तिहेतुमधुना चामुष्य संकीर्तनं
ह्यस्माभिः करणीयमत्र' तदहो! सर्वस्य जातं प्रियम् ।
आरब्धं परिवृत्य तैः प्रभुमतः सर्वैश्च संकीर्तनं
वाद्यैः कोमलकण्ठतः सकरुणं तालस्वरेणात्मनः ॥९६५॥

६०. मधुरं प्रियतमनामश्रवणम् ।
सखिमुखतो वा कविरचनातो 'हरे! राम! हरे! राम!'
निजरसनातः संकीर्तनतो 'राम! राम! हरे! हरे!'
रहसि स्मरणं चेतोगत्या 'हरे! कृष्ण! हरे! कृष्ण!'
सेवनमर्चनमनिशमास्यतः 'कृष्ण! कृष्ण! हरे! हरे!'
वन्दनमखिलं वचनक्रमणं दास्यं दैहिककरणम्
चेतनसमतासख्यरसयितुः स्वात्मनिवेदनमात्मनि ।।

अस्याऽऽरब्धमिहाखिलैर्हरिमहामंत्रस्य संकीर्तनं
प्राणप्रेष्ठनवीनजीवनरसश्रीप्रेमसञ्चारिकम् ।
रोमाञ्चा इव जज्ञिरे प्रभुतनौ श्रुत्वा ध्वनिञ्छ्रीहरिं
तद्देहे पुलकप्रतीतिमखिलाः कृत्वा परं नन्दिताः ।।९६६।।

प्रेम्णा विह्वलिताश्च नाम मधुरं त्यक्त्वा जगुस्ते पदं,
भावस्य स्थिरता पदेन रसने, नाम्ना यतो भावना ।
अद्वैतोऽस्य तनोः परीक्षणमना नासोपरि स्वं करं
भूयः स्थापितवान्, विवेद तदितः श्वासप्रणालीं स्फुटम् ।।९६७।।

हुङ्कारश्च तदन्तरे प्रभुरयञ्चक्रे तथोच्चैरिम–
ञ्छ्रुत्वैव प्लवता यथाऽजनि मुदो भक्ते विषण्णेऽखिले ।
उन्मत्तेन जयध्वनिं विदधिरे भावेन सर्वे यतो
गुञ्जन्ति ध्वनिना स्म सम्प्रति दिशः स्थाने नभोव्यापिना ।।९६८।।

पृथ्वी तत्पृथुमत्तभक्तचरणाऽऽघातैर्यथा कम्पते
वायुश्चापि तदा स्थिरो,ऽत्र परितो व्याप्ता मुदो वै मुदः ।
मूर्च्छायां पतितश्च कोऽपि, मुदिताऽऽवेगं न सोढुं क्षमः,
कश्चिन्नृत्यति शङ्खनादसहितः प्रेम्णा विमत्तो यथा ।। ९६९।।

नीत्वा शीतलवारि कोऽपि शनकैर्दत्ते प्रभोः श्रीमुखे
जातो वासगृहं तथैवमधुनाऽऽनन्दाम्बुधिर्विलुप्तः ।
यस्मिन् भक्तमुदां करोति तुमुलं शब्दं दिशो गुञ्जयन्
कल्लोलो बहुधोत्थितः, प्रमुदिता रासे यथाऽऽप्ते हरौ ।। ९७०।।

अल्पेनैव ततः क्षणेन मिलितो नेत्रे मृजन् स प्रभुः
सुप्तोत्थः पुरुषो यथा,ऽत्र परितो भक्तान् स्वमेकत्रितान् ।
सामग्रीं बहु चाभिषेकविहितां पप्रच्छ दृष्ट्वा स्थितां
साश्चर्यं 'किमिदं, कुतोऽहमधुना, यूयं कथं संयुताः?।।९७१।।

सर्वे चापि विचित्रभावकलिताः स्थाने किमत्र स्थिता ?'
भक्ताः प्रश्नमिमं निशम्य सुहृदोऽन्योन्यं स्मयन्ते दृशा ।
दत्तं नोत्तरमत्र केनचिदतः सम्बोधयन् पृष्टवान्
वासं 'पण्डितजी! वद त्ववितथं किञ्चास्ति वस्तुस्थितिः ।। ९७२।।

मत्तश्चञ्चलता न कापि जनिता ? किञ्चापराधस्तथा
जातोऽचेतनतास्थितौ वदसि न स्पष्टं, किमस्ति स्थितिः?'।
'नाऽऽस्मान् वञ्चयतामितस्तु बहु नो रोद्धुं तथा चेष्टतां
कोऽप्यत्राद्य न वञ्चितश्च भविता' हास्यं रुधन् सोऽलपत् ।। ९७३।।

आश्चर्य गुणितद्द्वयं प्रकटयन् स्थाने जगाद प्रभुः
'का वार्ता ननु वञ्चनं किमधुना ब्रूषे कथं न स्फुटम्?' ।
'किञ्चिन्नो, हरिकीर्तने त्वमगमोऽचेता, मिलित्वा तत—
श्चैतन्याप्तिनिमित्तमत्र निखिलाः संकीर्तनञ्चक्रिरे ।।९७४।।

ऊचे 'चास्तु तथा' प्रभुः सुमनसां श्रुत्वा मनाँल्लज्जित—
'स्तज्जातं मम हेतुनाऽत्र भवतां कष्टं महत्क्षम्यताम् ।
कार्यः स्नानविधिस्त्वितश्च चलितैः कालो व्यतीतो महान्
प्रातःकालिकसांन्ध्यकार्यमपि नो जातं तथा ज्ञायते' ।।९७५।।

मधु निशम्य वचो निखिलाः प्रभो—
रखिलदैनिककृत्यनिमित्ततः ।
त्रिपथगां प्रति चेलुरशङ्किताः,
सकलसाधनसिद्धिरहो! प्रभुः ।।९७६।।

प्रेमोन्मत्त—अवधूतस्य पादोदकपानम्

६१. आयुर्घृतमेवोक्तं, लोके सिध्यति तच्चार्पणया
धेनूनामिह हृदयस्नेहः सात्त्विकसितरसदुग्धम्
तद्दधिनवनीतक्रमतो घृतमखिलविलक्षणममृतम् ।
यज्ञज्योतिःसाधनमुख्यं घृतमिव जीवनमखिलम्
यज्ञप्रभुनारायणतृप्त्यै योऽर्पयतीह स साधुः ।
वपुषा वचसा मनसा सततं चुम्बति चूषति चेतति
प्रियतमहरिपदकमलमृदुलतामाजीवनममलात्मा ।।

प्राप्ता भागवती च येन विमला भक्तिश्च योऽत्र प्रभो—
र्मत्तः प्रेम्णि तथाऽस्य कर्म निखिलं संसारबाह्यं भवेत् ।
उद्देश्येन विधीयते भुवि तु या कर्मोच्यते सा क्रिया,
चेष्टा चेत्करणार्थमेव विहिता लोकेऽत्र लीलोच्यते ।। ९७७।।

बालानामखिला तथैव भवति स्थानेऽत्र चेष्टा, सुखं
तेषामिन्द्रियजन्यमासु किमपि स्वार्थो न वोद्देश्यकम् ।
जायन्ते स्वत एव शैशवनिरुद्देश्यस्वभावादमू–
श्चेष्टा भक्तजनस्य तत्समतया लीला जनैरुच्यते ।।९७८।।

चेष्टायां समताऽस्ति चाधिकतया भक्तस्य बालस्य च
प्रायस्तन्नहि कर्म सा ननु पुराकालाच्च लीलाभिधा ।
भावो यत्र घृणाऽन्यवस्तुनि भवेच्चाश्लीलताकारणा–
ल्लज्जा चात्मनि लौकिकी भुवि भयं सम्भाव्यते चान्यतः ।।९७९।।

तत्र प्रेम न वास्तवं विलसति स्थानेऽथवा साधके,
लीला शुद्धतया भवेन्नहि, विना तत्प्रेम नैसर्गिकम् ।
तल्लज्जा च घृणा भयं जनमनोभावो मितस्वार्थजो,
येषां सन्ति न, ते ततोऽमलहृदो **बालाच** भक्तास्तथा ।।९८०।।

प्रेमोन्मत्तजनः कदापि हसति क्रन्दत्ययं गायति
त्यक्त्वा नृत्यति ताण्डवक्षणमहो! नग्नश्च लोकत्रपाम् ।
भावोऽमुष्य विलक्षणश्च चलनं सर्वं विचित्रं तथो–
न्मादश्चापि निरर्थकं प्रतिपलश्चेष्टासु तद्भाषणम् ।।९८१।।

भाषा चापि सदैव साधुमनसः संसारिभाषापरा
प्रेम्णा सर्वजनेषु बालसदृशो भक्तस्तथा वर्तते ।
लज्जा नास्ति कुतोऽपि तस्य न भयं नग्नः सवस्त्रः समो
बाह्यं वस्त्रमपेक्षते न च विधेर्दासो निषेधस्य सः ।।९८२।।

नित्यानन्दयतेस्तथैव हि दशा द्वात्रिंशदायुस्त्वपि
श्रीपादो ननु वर्ततेऽमलमनाः स्वे बाल्यभावे सदा ।
सोऽयं बालसमश्च चूषति मुखे चादाय तन्मालती–
देवीशुष्कपयोधरौ, निजकराद् भुङ्क्ते न भक्तं दलम् ।।९८३।।

रुष्टोऽयं भवति क्षणेन च यतिः स्वल्पासु वार्तासु त–
त्कालं वै हसतीह बालसदृशो ब्रूते तथा पण्डितम् ।
श्रीवासं पितरञ्च सार्धममुना निर्बन्धमेवायते
गौराङ्गः स्वयमेव बोधति परन्त्वेकं न गृह्णात्ययम् ।।९८४।।

पीत्वा प्रेममदं, मदेन सततं मत्तः सदा लक्ष्यते
संज्ञानं वपुषश्च नास्ति, पतितं वस्त्रं ग्रहीतुं पुनः ।
बोधो नास्ति, तथाऽऽपणे भ्रमति वै नग्नः परं सन्नपि
क्रीडंश्चेद् भवतीह, तर्हि निरतस्तत्रैव होरावधिम् ।।९८५।।

बालैः सार्धमसौ कदापि कुरुते क्रीडाञ्च भक्तैः समं
गौरञ्चापि कदापि बालकुतुकैः प्रीणाति नैसर्गिकैः ।
वात्सल्याऽच्छसुखेन नन्दयति च श्रीमालतीं कर्हिचि—
च्चैवं प्रीणयतीह निष्कपटताभावोऽवधूतोऽखिलान् ॥९८६॥

श्रीवासस्य गृहाङ्गणेऽभवदसौ तिष्ठन्नदन्नेकदा
किञ्चित्तत्क्षणमेव तत्र तरसा काकः कुतोऽप्यागतः ।
श्रीमत्ठाकुरदीपभाजनमयं निन्ये यतो मालती—
देवी म्लानमुखी, स्वकैर्गृहभरैर्नारी गृहस्वामिनी ॥९८७॥

नित्यो विलोक्य जननीं वदनेन खिन्नां
ध्वाङ्क्षं प्रदर्श्य शकलं यततेऽर्भकाभः।
गीतस्वरेण पुनरेव पुनश्च काकं
शीर्षं विकम्प्य गदतीह विलोभयंश्च ॥९८८॥

६२. **काक! प्रीणयसे वर्णाभ्याम् ।**
भ्रातर्मातृवदनमवलोकय नेत्रघनाश्रुस्नातम्
प्रियसाधनासाधनाऽवनमिह साधकजीवनमूल्यम् ।
श्रीठाकुरकृष्णार्चनसाधनदीपपात्रमविलम्बम्
एह्येहि मातर्देहि गृहाण वाताशं प्रियमदनम् ।
मे मातुस्तव समस्वभावो वर्णाभ्यां यं धत्से
माताऽर्चनया दधते तमेव भावयितुं विहरामः ॥

श्रुत्वाऽऽह्वानममुष्य वास्तवमसौ चागत्य काको द्रुतं
पार्श्वे पीतलपात्रमस्य निदधौ माता प्रसन्ना बहु ।
तन्नित्येश्वरभावबोधममुना वृत्तेन चक्रे तथा
लब्ध्वोच्चैः करतालिका-खिल-खिला-हास्यैर्बभाषे भवान् ॥८८९॥

६३. मातर्देहि मधुरप्रसादम् ।
मम वचनात्प्रियपात्रं काको, ददौ दीपमधुना ते,
मातः शीघ्रं देहि मोदकं, नन्दत्वखिलश्चैवम् ।
अतिमधुरस्तु मातृप्रसादस्तन्मधुरस्तदुपायः
कोऽपि क्षणेन लभते सुकृती, बहुजन्मभिरपि नान्यः ।
नित्यानन्दमातृप्रसादे काकोऽप्यस्य सहायः
प्रतिकूलः कृष्णोऽपि जायते समये पिता पुत्रस्य ॥

चापल्येन च शैशवेन मुदितां कृत्वा तथा मातरं
गेहाच्छीघ्रमसौ ससार यतिको मत्तो यथा चापणे ।

धावन् याति तनोस्तथा नहि पथश्चिन्ता मनाक् चेतना
गन्तव्यञ्च किमस्ति कुत्र तदपि ज्ञानं किमप्यस्ति नो ।।९९०।।

कौपीनं पथि धावतोऽस्य गलितं शीर्षे बबन्ध द्रुतं
नग्नो यात्यधुना दिगम्बरशिवो नृत्यन् यथा ताण्डवम् ।
तन्मार्गे करतालशब्दसहिता धावन्ति पृष्ठेऽर्भका
नायं किन्त्वनुभावितोऽद्य परतः कूर्दस्तथोच्चैर्ययौ ।।९९१।।

एवं नित्ययतिर्दिगम्बरदशः प्रापत्प्रभोः केतनं
प्रेमालापरतस्तदा प्रभुरभूद् विष्णुप्रियाकान्तया ।
ताम्बूलं ददती बभूव शनकैर्भूयोऽत्र विष्णुप्रिया
तन्मोदार्थमसावपि प्रियपतिर्भुङ्क्ते निषेधं विना ।।९९२।।

ताम्बूलं कियदत्र जग्धममुना नेयं न वेद प्रभु—
स्ताम्बूलव्यपदेशमात्रमिदकं, प्रेम्णस्तदा वस्तुतः ।
खानं पानमभूच्चलन्ननु तथा तन्मध्यमेवागतो
नित्यः किन्तु दिगम्बराऽऽकृतितयाऽपूर्वोऽवधूतोऽधुना ।।९९३।।

आरक्ते नयनेऽस्य धूलिमलिनः सम्पूर्णदेहस्तथा
कौपीनं ननु वेष्टितं शिरसि तद्दूराच्च देवोपमः ।
लम्बाकारवपुर्दिगम्बरतया नित्योऽधुना दृश्यते
सामान्यप्रकृतेस्तथाविरहितो देवो महामानवः ।।९९४।।

आगत्य प्रभुसन्निधौ स कुरुते हुं-हुं तु मत्तोपमो
गेहान्तर्लघुकं दिगम्बरममुं याता विलोक्य प्रिया ।
शीघ्रं सा पिदधौ कपाटयुगलं माता तदानीं गृहे
चर्खायां निरता च पृच्छति वधूं दृष्ट्वा पलाय्याऽऽगताम् ।।९९५।।

'जातं किं ननु किं' निधाय वदने वस्त्रं जहास प्रिया
माता वेद कुतूहलं किमपि तच्चक्रे निमायी ध्रुवम् ।
तस्मात्पृष्टवती 'गृहेऽस्ति ननु वा यातो निमायी बहि'—
र्हास्यं स्वन्तु निरुध्य येन विधिना केनापि सोवाद तत् ।।९९६।।

'पश्य ज्येष्ठसुतं स्वकन्तु, ददृशे भूत्वाऽवधूतः स्फुटं
प्राप्तोऽस्त्यद्य स,' तन्निशम्य गृहतो माता बहिश्चाभवत् ।
दृष्ट्वा चाथ नितायितादृशशिशुक्रीडां हसन्ती बभौ
'श्रीपाद! त्वमिदन्तु रूपमकरोः किञ्चाद्य'? वाक्यं प्रभोः ।।९९७।।

चाञ्चल्यं बहु शोभनं नहि, ततो बध्नातु शीघ्रं स्वकं
कौपीनञ्च', परन्तु कस्यचिदहो! तच्चेतना तर्हि तत् ।

बध्नीयान्ननु, चेतनाऽस्य नहि तत्कुत्रास्ति कौपीनकं
बन्धव्यञ्च तदत्र कुत्र, जगतः पारेऽवधूतोऽधुना ॥९९८॥

दृष्ट्वा तस्य तथास्थितिं स्वयमसौ स्वं पट्टवस्त्रं द्रुतं
कट्यामस्य बबन्ध पाणिधरणात्पार्श्वे निषाद्यात्मनः ।
पृच्छत्यत्र शनैः-शनैः प्रभुरतः 'श्रीपाद! किन्तेऽभवत्—
त्वञ्चायासि कुतस्तथाखिलतनौ लिप्ताऽस्ति धूलिः कथम्? ॥९९९॥

श्रीपादस्तु बभूव लुप्तहृदयो, ध्यानं कुतोऽस्याऽऽत्मनः,
पश्यन् वै परितोऽत्र मत्तसदृशो हुं हुञ्च कुर्वन्नभूत् ।
प्रेम्णश्चास्य तथोन्नतस्थितिमिमामत्यन्तमेव प्रभु—
र्दृष्ट्वाऽसौ मुदितस्तदैव निखिलान् भक्तांस्तथाऽऽहूतवान् ॥१०००॥

आगत्यात्र निषेदुरस्य परितः सर्वेऽवधूतं प्रभु—
र्नित्यं प्रार्थितवान् 'प्रदेहि कृपया चात्मप्रसादं परम्' ।
कौपीनं तरसा तथैव शिरसो नित्यो विमुच्याऽक्षिपत्—
तच्चात्यन्तविशालभावसहितः स्वे मूर्ध्नि चक्रे प्रभुः ॥१००१॥

भूयः खण्डमनेकमस्य स तथा चक्रे लघुं तल्लघुं
सर्वेभ्यो ददेकमेकमधुना खण्डं जगाद प्रभुः ।
'अत्यन्तञ्च सुरक्षितोऽयमखिलैश्चीरप्रसादस्त्वयं
धार्यो,'मूर्ध्नि विधाय तत्प्रभुगिरा सर्वैः स्वकण्ठे धृतः ॥१००२॥

एवञ्चैतदनन्तरं मलयजाऽऽलेपञ्च पुष्पार्पण—
ञ्चक्रे श्रीलनितायिपद्मपदयोः स्वेनैव साधु प्रभुः ।
प्रक्षाल्य स्वकरेण तद्वितरति श्रीनीरमत्राऽखिले
भक्त्या चाधिकमास्थयेदमखिलैः पीतं तथेदं स्वयम् ॥१००३॥

शेषं यन्निखिलं पपौ, ननु पिबन्नूचेऽ'द्य धन्यस्तथा
जातोऽहं सफलो, यथार्थदयितश्रीकृष्णभक्तिर्मया ।
श्रीपादामृतपानतोऽद्य कलिता', सर्वैस्तथा स्वं स्वकं
भाग्यं शंसितमत्र, भाग्यनमनं कर्तव्यमेव ध्रुवम् ॥१००४॥

पूजाऽद्यैव तु वस्तुतो भगवतो जाता, न तुष्यत्सौ
तावत्स्वार्चनतः, स्वभक्तजनतापूजाक्रियातो यथा ।
उक्तिस्तस्य तु, (केवलञ्च भजते मामेव, भक्तः स नो,
भक्तः सोऽत्र यथार्थतो मम तथाभक्तस्य भक्तस्तु यः) ॥१००५॥

६४. अर्जुन! गूढं भक्तिरहस्यम् ।
शूरो भुङ्क्ते, रसयति सुमतिर्हीन: शक्तिमतिभ्याम्
आश्रयते धरणीमेतामिह यो जानाति तु भक्तुम् ।
भागवती यदि भक्तिरनन्या तद्विषये किं वाच्यम् ?
भगवानधिकं प्रीयते त्वत्र भागवतानां भक्तात् ।।

भक्तोऽत्यन्ततया प्रियो भगवतो यस्मा,त्तत: कोऽपि य:
कृत्वा तत्प्रियहेलनं तु तनिता तत्पूजनं केवलम् ।
भूयाद्वै भगवत्प्रिय: कथमसौ? तद्विष्णुपूजोत्तमा
नूनं, किन्तु ततोऽपि विष्णुभगवद्भक्तार्चनं वै वरम् ।। १००६ ।।

लीलेयं प्रभुणा कृता भगवत: स्थाने महिम्न: कृते
भक्तानान्तु विभावनस्य नियतञ्छ्रीनित्यपादाम्बुन: ।
पानादेकविशेषिताऽऽन्तरगता शान्ति: प्रतीताऽभवद्,—
भोक्तृणामिह शान्तिरस्ति सरले भोज्येऽमले भोजके ।। १००७ ।।

संज्ञानन्तु नितायिनोऽल्पगतित: प्राप्तं यथा साम्प्रतं
दीनो बालसमो जगाद परित: पश्यञ्छचीमातरम् ।
'अम्मा! पीडयति क्षुधाऽतिमहती किञ्चिद्ददीताशितु'—
ञ्छ्रुत्वा तद्वचनं जगाम तरसा माता गृहाभ्यन्तरम् ।। १००८ ।।

मिष्टान्नं गृहनिर्मितं रुचिकरं नीत्वाऽस्य हस्तेऽधरत्—
खादत्यल्पमसौ द्रुतं शिशुसमश्चक्रे तथाऽल्पं क्षितौ ।
खादन्नेव दधाव मातृचरणौ स्प्रष्टुन्तु भीताऽधुना,
तल्लोकोत्तरलीलयाऽकृत मुदाऽऽविष्टान्नितायी सत: ।।१००९ ।।

६५. किमहो! परमाराधनरूपम् ?
मन:पूतमाचरणं विहितं, स्वार्थे पृथिवीत्यजनम्
दृष्टत्यागोऽदृष्टार्थे भुवि परं सनातनधर्म: ।
जगतो जगत्पतेराराधनमिह सोपानं प्रथमम्
तत्प्रियरचनाऽखिलजन्तूनामाराधनमत्यन्तम् ।।

गृहे-गृहे हरिनामप्रचार:

६६. केवलमधुना कुटिले काले हरिनामैकञ्छरणम् ।
व्यवहारे जीवस्थितिविषये भक्तिपथे माधुर्ये
गतिरिह गमनं गम्यस्थानं परमार्थो हरिरेव ।
हरणमखिलदु:खानामस्मादयनमनन्तरसाब्धे:
तन्नामश्रुतिकीर्तननचिन्तनममृतं त्रिविधं नियतम् ।।

आसन् सत्ययुगे हि धर्ममनसः प्रायः समस्ता जना—
स्तद्वर्षाः कृषिमूलमत्र समये धर्मप्रभावादभूत् ।
योगक्षेमगता न कस्यचिदतश्चिन्ता, तथा शुद्धताऽऽ—
सीद्देशे समये परं विलसिता खाद्ये पदार्थेऽखिले ।। १०१० ।।

काले तत्र भवन्ति शुद्धमनसो ध्यानप्रधाना नरा
मुख्यं साधनमाश्रुतं प्रभुगतौ तद्ध्यानमेवामृतम् ।
प्राचुर्ये ननु भोगवस्तुजगतां त्रेतायुगे तत्प्रथा
यज्ञानां महतामनेकविपुलद्रव्यैश्च सम्पादनम् ।। १०११ ।।

यागः साधनमेव तत्र भगवत्प्राप्तेः प्रधानं मतं
तन्निष्कामसकामभावयजनं कुर्वन्ति ते स्म द्विजाः ।
काले भोगपदार्थजातमभवन्न्यूनं ततो द्वापरे
लोकानां नहि भावशुद्धिरधुना तस्थौ तथा तावती ।। १०१२ ।।

जाता सम्प्रतिदेशवस्तुविषया पावित्र्यशङ्का ततो
मुख्यं साधनमाततं भगवतः पूजा तथा सत्क्रिया ।
सर्वेषां नहि तद्युगान्तरसमं भोग्यन्तु पर्याप्तकं
खाद्यस्यापि तथास्ति न प्रचुरता, कालस्य भावोऽखिलः ।। १०१३ ।।

दुष्टाऽऽवासविदूषितं हि निखिलं स्थानं भुवः पावनं
धर्मस्थानमभूदशान्तिकलहद्वेषाऽऽकुलं केतनम् ।
लोकानां हृदयाच्च धर्मविषया निष्ठा विदूरं गता
जातं सम्प्रति वायुमण्डलमहोऽधर्मेण संदूषितम् ।। १०१४ ।।

नष्टा देशपवित्रताऽत्र सकला वायौ तथादूषिते
सर्वत्रैव तु साधुसङ्गतिलयः काले विलोमे यथा ।
तद्ध्यानक्रतुपूजनानि कठिनं जातानि, तत्साधनं
सर्वेषां सरलं युगेऽत्र भगवन्नामैव मुख्यं वरम् ।। १०१५ ।।

६७. अतुला कलिकालस्य महत्ता ।

कृते युगे श्रीविष्णुध्यानात्त्रेतायां तद्यजनात्
यल्लभते तत्परिचर्यातः प्रियं द्वापरे पुरुषः ।
श्रीहरिकीर्तनतस्तन्निखिलं कलिकालेऽस्मिन् प्रेमी
कर्णमधुरतारसनारुचिताचेतःप्रियतां रसयति ।।

उक्तं धार्मिककृत्यमद्य समये शक्नोति कर्तुञ्च यो
निष्ठापावनतामयेन मनसा कामं स कुर्याद् ध्रुवम् ।

तु श्रेष्ठं सरलं परञ्च सुलभं सर्वस्य साधारणं
नामैवामृतसाधनं, भगवतोऽभेदो हि नामात्मनः ।। १०१६ ।।

तन्नाम्नः शरणं निषद्य भगवत्प्राप्तौ तथाग्रेसरः
कालेऽस्मिन् भवितुं कलौ लघुतया शक्नोति वै मानवः ।
तत्सर्वैः कलिसाधुभिर्बहु बलं दत्तं हि नामोपरि
श्रीचैतन्यमहाप्रभुः स्फुटमभून्नामावतारः परम् ।। १०१७ ।।

संकीर्तनं प्रभुरयं कुरुते स्म भक्तै—
रेतद्दिनं रहसि वासगृहे सहाप्तैः ।
नाम्नो हरेर्वितरणस्य चकार सर्व—
प्राणिष्वतः स्वदृढनिश्चयमुन्नतात्मा ।। १०१८ ।।

सर्वेषां ननु भक्तिभावभजने चाऽऽस्तेऽधिकारः परं,
त्यागी त्वेव महानुभावपुरुषः कार्ये प्रचारे क्षमः ।
त्यागात्मैव हि लोकशिक्षणविधौ नेतोपदेष्टा भवे—
च्छुद्धिर्मानवचेतसोऽत्र भवति त्यागान्न वै संग्रहात् ।। १०१९ ।।

राजा सन्नपि धर्मसङ्घटनकं कर्तुन्त्वशक्ष्यत्पुन—
र्बुद्धः, शङ्करतुल्यसिद्धनुरतोऽपेक्षाऽभवत्किं तथा ? ।
संन्यासस्य च दण्डधारणविधेः, संकीर्तनस्य क्षणे
गौराङ्गोऽपि महाप्रभुः प्रचरणे शक्ता गृहस्थोऽपि सः ।। १०२० ।।

सर्वैः किन्तु महानुभावपुरुषैरेतैस्तथा स्वीकृतो
लोकानामुपदेशकारणमहो! संन्यासधर्मः परम् ।
तत्संन्यासिनि लोकशिक्षणकृतेः सम्पन्नताऽसत्यपि
स्थाने तन्नहि शक्यते तु भवितुं सम्यग् जनग्राह्यता ।। १०२१ ।।

भक्तेष्वत्र महाप्रभोरभवतां संन्यासिनौ द्वौ, तयो—
रेको नित्ययतिस्तु साधुरपरो दासो महात्मा हरिः ।
संन्यासी प्रथमोऽवधूतवृषभो लिङ्गी तु नित्यप्रभु—
र्भक्तश्रीहरिदासजी यवनजो लिङ्गं प्रमाता विना ।। १०२२ ।।

संन्यासस्य विधिस्तथास्ति सुहृदां विप्रेतरस्यापि त—
च्छास्त्रेष्वत्र, परं न तस्य विहितः संन्यासचिह्नग्रहः ।
संन्यासी विदुरोपमः स भवितुञ्छक्नोत्यलिङ्गी कृती
वानप्रस्थसुधर्ममाचरतु वा पुण्येऽत्र वासाद्वने ।। १०२३ ।।

नो चक्रे हरिदासजी कमपि तद्वेषञ्च साधूपमं
तत्प्राप्त्यै नहि बाह्यवेषघटना काप्यस्ति चावश्यकी ।

अन्त:स्थ: प्रभुरस्ति, नान्तरमतोऽव्यक्तं प्रभोर्वञ्चनं
बाह्यैरेव न लक्षणैश्च, जगतीरीतिर्हि चिह्नग्रह: ।। १०२४।।

श्रीनित्यं हरिदासमालपदतश्चाहूय तावत्प्रभु:
'कार्यं सेत्स्यति नेदृशं ननु रह:संकीर्तनेनाऽधुना ।
कर्तव्योऽद्य गृहे-गृहे प्रतिपुरं नामप्रचारो हरे-
र्न्यस्तोऽयं भवतोर्भरो', दयितयो: सङ्गो हि सत्सङ्गति: ।। १०२५।।

६८. मधुरालापो नित्यनिमायी ।
'भगवन्नहि जानात्यवधूतस्तत्प्रचारप्रकारम्'
'नदियानगरीप्रतिपथमटता प्रेम्णोच्चार्य हरे! हरे!' ।
'अटनोच्चारणमेतावदेव कर्तव्यं न्वस्माकम् ?'
'तेषां सर्वेषामपि मुखत: श्रोतव्यं हरे! हरे!' ।।

'प्रत्येकं गृहमेत्य सम्प्रति नवद्वीपस्य भागेऽखिले
श्रीमन्नामरसप्रचारमपरं कुर्याद्भवन्तावुभौ ।
लोकानां विनयं विधाय निजकौ संयोज्य हस्तौ तथा
स्पृष्ट्वा तच्चरणौ युवाञ्च कुरुतञ्छ्रीनामभिक्षार्थनाम् ।। १०२६।।

ध्यातव्या हरिनामदानसमये किञ्चिद्भवद्भ्यां न तत्-
पात्रापात्रगतोत्तमाधमभिदा, नामोपदेशं हरे: ।
आविप्रश्वपचञ्च मूर्खविदुषोर्भावाद् विधत्तं समं
सर्वे सन्त्यधिकारिण: समतया नाम्नो हरे: प्राणिन: ।। १०२७।।

जिज्ञासां कुरुतेऽथवा न कुरुते, य: कोऽपि तस्यैव त-
च्छ्रीनाम्नां कुरुतां तथाहि मधुरं संकीर्तनं सम्मुखे ।
कर्तुं प्रार्थयतञ्च तानपि तथा श्रीनामसंकीर्तनं
श्रीकृष्णो भगवान् भविष्यति भवत्कार्येऽत्र साहाय्यक:' ।। १०२८।।

लब्ध्वाऽऽदेशमथ प्रभोश्च परमप्रीत्याऽवधूतावुभा-
वेव श्रीहरिनामकं वितरितुं द्वीपे नवे जग्मतु: ।
एकोद्देश्यतथैककर्मकरणे यातौ परं सङ्गिना-
वासीदन्तरमत्र किन्तु च तयोराकाशपातालवत् ।। १०२९।।

गौरो नित्ययतिर्बभूव तु हरिर्वर्णेन कृष्णो मना-
गाद्यो लम्बकृश: परश्च वपुषा स्थूलस्तथा वामन: ।
उद्दण्डो ननु चञ्चलप्रकृतिक: शान्तो गभीराऽऽकृति-
र्धूत: पूर्णयुवा पुन: परिणमत्कायोऽद्य दासस्तथा ।। १०३०।।

वार्तामेव न केनचित्तु कुरुते नित्यो विना नोदनं
नम्रोक्त्या हरिदासजी कृतिकरो, भिन्नस्वभावात्मनोः ।
योगो, नामरसं तथा वितरितुं द्वीपे नवे चेलतां,
यान्तौ सम्प्रति ताविमौ प्रतिगृहञ्चोच्चैर्ब्रुवाते तथा ।। १०३१ ।।

हरे! राम! भूयो हरे! राम! रामाऽ—
ऽसा राम! गीत्वा हरे! वै हरे! वै ।
हरे! कृष्ण! चाग्रे हरे! कृष्ण! कृष्णाऽऽ—
त्मना कृष्ण! यातो हरे! त्वं हरेऽद्धि ।। १०३२ ।।

मत्वा तौ ननु भिक्षकौ च जनता भिक्षां गृहीत्वाऽनयोः
पार्श्वे सम्प्रति चाऽऽययौ बहुविधां, 'नो भिक्षुकौ वस्तुनः ।
(युक्तं तौ वदतस्तथाहि) भगवन्नाम्नस्तु वर्तावहे
यूयं केवलमेकवारमधुना श्रीमद्धरेः स्वाऽऽननात् ।। १०३३ ।।

श्रीकृष्ण! प्रिय! वासुदेव! च हरे! हे नाथ! नारायण!
श्रीगोविन्द! विधाय नाममधुरोच्चारं मुरारे! तथा ।
अस्माकं कुरु शीतलञ्च हृदयं भिक्षाऽत्र सैवोत्तमा'
श्रुत्वा तद्वचनञ्च मार्मिकमिदं लोकाः प्रभावान्विताः ।। १०३४ ।।

कुर्वन्तो हरिनामकीर्तनमतश्चोच्चैः स्वरेणाखिलाः
सम्भूयाभुरनेन तौ च ययतुर्द्वारात्परं द्वारकम् ।
तौ यत्रापि च गच्छतोऽत्र जनताऽऽमर्दस्तथैको महां—
स्तत्सङ्गे त्वनुयाति कीर्तनममुं कर्तुं हरेर्याचतः ।। १०३५ ।।

कुर्वन्तो हरिनामकीर्तनमहो! सम्भूय पृष्ठेऽनयोः
सर्वे यान्ति, तथाखिलोपवसतौ प्रत्यापणे सर्वतः ।
नाम्नामेव रवः प्रियो भगवतो व्यक्तो रसः शुश्रुवे,
गौरेन्दौ सति तन्निमायिनि नवद्वीपाम्बुधेर्व्यञ्जनम् ।। १०३६ ।।

मार्गे नित्ययतिश्चलन्नपि निजञ्चाञ्चल्यकं नो जहौ,
सङ्गे यान्तमसौ कदापि शनकैः कञ्चिल्लुनात्यर्भकम् ।
तत्पश्यन् परितस्तु सोऽस्ति चकितो, नित्यो हसंश्चाबभौ,
धृत्वा द्राक् शिरसी तयोः पुनरसौ तेऽन्योन्यकं बाधते ।। १०३७ ।।

नृत्यत्येव कदापि तैश्च मिलितो, यत्रापि पश्यत्यसौ
गेहद्वारमुखस्थितान् लघुशिशून् कृत्वा यथा वानरः ।
खों-खों शब्दमुखञ्च तन्मुखमयं तांस्त्रासयन् घूर्णते,
क्रोशन्तः शिशवस्तु यान्ति जननीक्रोडेऽवधूतोऽसरत् ।। १०३८ ।।

कश्चिद्भर्त्सयते तथेत्य यतिकं, किन्त्वस्य तच्चोभयं
तुल्यं भर्त्सनलाडनं समदृशो, दृष्ट्वा च रोषान्वितम्
ब्रूतेऽयं तमुपेक्षया 'हरि-हरि-श्रीकृष्ण-कृष्णाऽऽलप
व्यर्थं पीडयसे कथं स्वरसना'श्चोक्त्वा स्वयं गायति ।। १०३९।।

दयित! राघव! राम! हरे! हरे!
दयित! सागर! राम! हरे! हरे! ।
दयित! माधव! कृष्ण! हरे! हरे!
दयित! केशव! कृष्ण! हरे! हरे! ।। १०४०।।

रोषो नश्यति कुप्यताञ्च निखिलं सम्भूय सर्वेऽमुना
कुर्वन्तोऽत्र भवन्ति तन्मयतया श्रीकृष्णसंकीर्तनम् ।
नारीणां निकरे विवेश सहजं निर्भीकभावो यति–
'र्युष्माकं ननु मातरोऽस्मि तनयो' ब्रूते प्रियं तास्तथा ।। १०४१।।

'स्वीकार्यं हि सुतार्थनां, भगवतो नाम्नस्तु संकीर्तनं
कृत्वा तत्कुरुतैकवारमधुना चेतो ममाऽऽनन्दितम्' ।
एवं याचनयाऽस्य निष्कपटया स्थानेऽखिलानां द्रुतं
मातॄणां हृदयं तथाहि मिलिता मज्जन्ति ताः कीर्तने ।। १०४२।।

प्रातस्तौ भ्रमतस्तथा प्रतिगृहं यावत्तथास्तं रवे–
र्द्वारं द्वारमुभौ शुभञ्च लपतः सन्देशसंकीर्तनम् ।
वृत्तान्तं प्रभुमेत्य सायमपरौ ब्रूतः प्रचारस्य त–
च्छुत्वा शंसति साहसं सफलतावार्तां तयोश्च प्रभुः ।। १०४३।।

प्रोत्साहितौ च विविधं प्रभुणा पुनस्तौ,
नामप्रचारकरणेऽतिमुदस्तयोश्च ।
त्यक्तं तथान्नजलभक्षणपानमाभ्यां,
प्रेमी स्वकं दयितनामकृते जहाति ।। १०४४।।

सर्वत्र प्रसरद्बभौ प्रभुयशो दूरात्तु दूराज्जनाः
प्राप्ताः श्रीप्रभुदर्शनार्थमधुना, गन्धोऽलिमाकर्षति ।
साक्षाद्भक्तजना वदन्ति भगवत्प्रेमावतारं परं,
केचिद्भागवतं प्रमाय परमं कुर्वन्ति चास्याऽऽदरम् ।। १०४५।।

विद्वद्भक्तममुञ्च बोधति परः, केचित्प्रभावान्विता
भावेनास्य च कुर्वते स्तुति,महो प्रेमी निसर्गात्प्रियः ।
पूजां स्वप्रकृतेस्तथास्य कुरुते लोकोऽत्र नानाविधां,
वस्तूनि प्रभवे बहूनि नयति प्रीत्योपहारं तथा ।। १०४६।।

गृह्णाति प्रभुरत्र भावमुदिताहेतोस्तथैवाखिलं,
घाटे निस्सरतीह वाऽऽपणपथे स्थाने च यत्राप्यसौ ।
दृष्ट्वा तद्गत एव लोकनिवहः शीघ्रं तथोत्तिष्ठते,
तद्दण्डप्रणतिं करोति विविध,ञ्छ्रद्धा नयत्याऽऽनतिम् ।। १०४७ ।।

एवञ्चात्र यथा-यथा प्रचरितं तन्नामसंकीर्तनं,
व्याप्तं दृष्टिगतं प्रभोर्बहु तथा द्वीपे यशःसौरभम् ।
सर्वैर्नम्रतया प्रभुर्मिलति स ज्येष्ठान्नमत्यास्थयाऽऽ—
लिङ्गत्यात्मसमानमेव कुशलक्षेमं लघून् पृच्छति ।। १०४८ ।।

तं मूर्खपण्डितदरिद्रधनाढ्यवर्गा
निम्नोन्नताऽवरवरा निखिला हि लोकाः ।
पश्यन्ति चादरदृशा मधुरस्वभावं,
भक्तान्मनामपि तथा ववृधेऽतिभावः ।। १०४९ ।।

नित्यश्रीहरिदासयोः प्रतिदिनश्रीमत्प्रचाराञ्जनं
प्रत्यक्षं ननु दृष्टिगोचरमभूद्, बालाश्च विद्यालयम् ।
कुर्वन्तो हरिकीर्तनं नियमतो गच्छन्ति दीर्घस्वरा,—
न्मन्त्रं गायति 'नाम' धेनुमहिषा गोपाकरो वै हरन् ।। १०५० ।।

याति श्रीहरिकीर्तनं त्रिपथगां कुर्वंश्च यात्रीजनः,
कुर्वत्यो हरिगानमेव मिलिताः पर्वोत्सवेषु स्त्रियः ।
का वार्ताऽत्र नृणां, जनैरधिगता हट्टेषु नार्योऽपि ता
नृत्यन्त्यो हरिनामकीर्तनकृतौ चोद्यम्य हस्तौ निजौ ।। १०५१ ।।

श्रूयते सर्वतः । स ध्वनिः 'श्रीहरिः' ।। १०५२ ।।

६९. **मङ्गलमच्युतनामश्रवणम् ।**

हे कृष्ण! केशव! कृष्ण! केशव! कृष्ण! केशव! पाहि माम्
हे राम! राघव! राम! राघव! राम! राघव! रक्ष माम् ।
अवधपतिरघुपतिराघवराम! नृपतिवर! सीताराम!
पतितचरित्रोद्धारक! पृथ्वीसुतवर! दशरथनन्दन!।
प्रियवर! हरे! राम! हरे! राम! राम! राम! हरे! हरे!
प्रियतम! हरे! कृष्ण! हरे! कृष्ण! कृष्ण! कृष्ण! हरे! हरे!।
प्रिय! श्रीकृष्ण! गोविन्द! हरे! मुरारे! हे नाथवर!
देहि मधुरचरणस्मृतिशरणं वासुदेव! नारायण! ।।

जगायि-मधायि-क्रूरता
(नित्यानन्दस्य तदुद्धारनिमित्तप्रार्थना)

७०. **मन्ये भागवतानां मनसां नहि किञ्चिदिहाऽऽश्चर्यम् ।**
साधुमहात्मा सहते सर्वं सद्भावात्सौहार्दात्
अन्यापेक्षोपेक्षेऽज्ञानादभिमानान्नहि विदुषाम् ।
देवकीहननोद्यतकंसस्य कदर्यतायां हेतुः
गगनभाषितं स्वप्रकृतिर्वा स्याद्विवादप्रसङ्गः ।
क्रूराणामपि भागवते पथि संवादः कमनीयः
कंसहिरण्यादीनां वृत्तौ सद्भावोदाहरणम् ।
काव्यशास्त्रतो भावाभासः, काव्यात्मा स्वव्यक्तिः
धृतात्मनां किं दुस्त्यजमथवाऽऽश्रितभगवच्छरणानाम् ॥

अस्तित्वं यदि नो भवेत्सुमनसां स्वार्थाकुलायां क्षितौ
नो चैतां परमार्थिनोऽङ्घ्रिरजसा ते पावयेयुः क्षितिम् ।
स्वस्वार्थैकविसारिणो जगति चेत्सर्वे भवेयुर्नरा–
स्तर्हीदं ननु रौरवाख्यनरकच्छायं समस्तं भवेत् ॥ १०५३॥

अत्यन्तं परमार्थिभिर्जगदिदं दुःखात्मकं स्वस्थितेः
स्थाने साधुभिरेव तत्सुखमयं काले कृतं विद्यते ! ।
एतच्चास्ति महात्मभिर्ननु निरानन्दं स्वभावेन त–
न्निःस्वार्थेन कृतं तथाममतयाऽऽनन्दस्वरूपं सदा ॥ १०५४॥

उल्लासः परमार्थकर्मणि परं स्वार्थेऽस्ति चिन्ता तथा
त्रासः सन्ततमेव तिष्ठति निजाऽऽसक्त्यैव दैन्योद्गमः ।
धैर्यं तत्परमार्थसेवनपथाद् भूयोऽधिकं वर्धते
निर्भीकाः परमार्थिनः, पुनरपि क्रूरा वसन्ति क्षितौ ॥ १०५५॥

न स्युश्चेदविचारिणोऽत्र पुरुषाः क्रूरास्तथा पापिनो
भूमौ तर्हि महात्मनां सरलता सा जीवमात्रं प्रति ।
तेषां तावदहैतुकी च करुणा गच्छेत्प्रकाशं कथ–
ञ्छ्रीसूर्यस्य महत्त्वमत्र तमसो व्याप्त्याऽधिकञ्चीयते ॥ १०५६॥

स्वक्रूराचरणात्तथाह्यवसरं क्रूरोऽत्र दत्ते सतां
सद्वृत्तीर्यदमी तु लोकनिवहे संकाशयेयुः स्वकाः ।
लोके तास्त्वनुसृत्य ते च पुरुषाश्चिन्ताकुला दुःखिनः
कुर्युस्तन्निजजीवनं सुखमयञ्चानन्दपूर्णं तथा ॥ १०५७॥

सृष्ट्यादौ तत एव तु प्रथमतो द्वौ राक्षसावेव तौ
संजातौ मधुकैटभौ, पुनरयं सत्येव तद्घातने ।
श्रीविष्णुर्मधुकैटभारिरवनीमध्ये बभूव स्फुटं
विद्यात्कोऽसति रावणे ह्यनुपमञ्छ्रीरामजीविक्रमम् ।। १०५८ ।।

तस्याऽसीमदयालुतापरिचयः स्यान्नाऽत्र चेत्पूतना,
स्यान्मुक्तः? शिशुपापशब्दवचनो नो कृष्णचक्राऽऽहतः ।
"तत्क्रोधोऽपि वरेण वै भगवतो देवस्य तुल्यस्तथा"
मर्त्यस्यात्र कथं भवेन्ननु महामंत्रप्रचारोऽमृतम् ।। १०५९ ।।

पापी निम्नकृतिस्त्वजामिलसमः पुत्रापदेशेन स
श्रीनारायणनामकण्ठवचनान्न प्राप्नुयात्सद्गतिम् ।
माहात्म्यं विधिनाऽत्र केन भगवन्नाम्नस्तदा स्यात्स्फुटं ?,
वृत्तेषु प्रतिनायको हि बलवान् स्यान्नायकत्वोन्नतौ ।। १०६० ।।

तच्चावश्यकता यथाऽत्र महतां भूमौ नराणां सतां,
दुष्टक्रूरतयापि चाल्पमधिकं सम्पद्यतेऽस्यास्तथा ।
क्रूराचारजना यदात्र बहवः काले भवन्ति क्षितौ
माधुर्येश्वरतानिधिः स भगवान् धत्तेऽवतारं तदा ।। १०६१ ।।

स्वक्रौर्यान्न निवर्तते जगति वै स क्रूरकर्मा नरः
स्वं धर्मं परमार्थकं त्यजति नो साधुर्महात्मा तथा ।
धर्मस्यैव जयोऽन्ततो भुवि यतो धर्मस्ततो वै जयो,
धर्मः, प्रेम-सहिष्णुता ननु सतां भावे तथा व्याहृतौ ।। १०६२ ।।

श्रीगौराङ्गमहाप्रभोरपि तथा काले च विप्रात्मजौ
क्रूरौ द्वीपनिवासिनौ 'जग-जगन्नाथो' 'मधा-माधवः' ।
जायन्ते कलिमाश्रिता द्विजकुले शास्त्रोक्तितो राक्षसा,
भ्रात्रोस्तादृशजीवनेऽस्य वचसः स्पष्टप्रमाणं तयोः ।। १०६३ ।।

तौ गौडेश्वरयोजितौ च नदियाक्ष्माकोटपालौ तदा
द्वीपेऽच्छत्रकबादशाहसदृशौ किं कोटपालौ तु तौ ? ।
तद्दुष्कर्म न शेषमस्ति कुरुतस्तौ यन्न किञ्चित्तथा
प्रोक्तं यन्मनुताविनाशकरणं तत्सर्वकर्माऽनयोः ।। १०६४ ।।

७१. किं वा भद्रमभद्रं लोके ?

देवार्चनसात्त्विकतालाभः श्रुताधीतिमतिमत्ता
गोसेवनममताऽखिलजीवे विप्राऽऽस्थाऽऽशीर्वादः ।

साधूनां सङ्गतितः शुद्धिर्धर्मपालनस्थिरता
प्रीतिर्भगवति तत्सुखसुखिता सिद्धानामपि सिद्धिः ।
असौ भद्रताक्रमिकोत्तमता भागवते निर्दिष्टा
द्वेष्टा देवादेर्भगवत्यपि नूनञ्चाशु विनश्यति ॥

नासीच्छेषमिहानयोः किमपि तच्छ्रीदेवतामन्दिरे
ताभ्यां जन्मत एव किञ्च गमनं नो शिक्षितं कर्हिचित् ।
वित्तो ब्राह्मणगोत्रजावपि न तौ वेदस्य नामाक्षरं
मांसं भोजनमेव नित्यममुयो,रन्तः क्षुधाया नु किम् ? ॥ १०६५॥

साधूनामवहेलनन्तु सहजञ्च ब्राह्मणानां तयो,—
र्यो वा कश्चिदुपानहा परिकरैः कृत्वाऽऽपणे ताड्यते ।
जानीतो नहि तौ तु कस्यचिदपि द्वीपेऽत्र सम्माननं,
कम्पन्ते श्रुतकर्मकाश्च सुधियो विप्रास्तयोर्नामतः ॥ १०६६॥

कस्याप्यत्र न साहसन्तु गमने यावच्च तत्सम्मुखं,
धर्मः कस्य खगस्य नाम, वसति स्थाने च कस्मिन्नयम् ।
सङ्केतोऽपि न विद्यतेऽस्य च तयोः श्रीमद्गृहाऽऽलुण्ठनं
नारीभञ्जनलोकहिंसनमपि द्वारा च साधारणम् ॥ १०६७॥

केनाप्यालपनं कदापि सरलं, नैवोपवेशः समं,
कृत्वा केवलमद्यपानमधिकं मत्तौ तथा तन्मदे ।
पापे कर्मणि सर्वदैव निरतौ, काजीकृते चाधिकं
दत्तो वित्तमतो न सोऽपि किमपि ब्रूते विरुद्धं तयोः ॥ १०६८॥

यद्यप्यत्र गृहं तयोर्भगवतीभागीरथीतीरगं,
तत्रेमौ न तु तिष्ठतश्च, सततं तम्बूयुतौ धावतः ।
ग्रामाद्ग्राम,मिहानयोर्हि वसतिः स्थाने च तत्राधुना,
प्रत्येके दश—विंशतिश्च वसतो ग्रामे तथाऽहानि तौ ॥ १०६९॥

यत्क्षेत्रे वसतिस्तयोः पतति, तत्क्षेत्रे नृणां शुष्यति
प्राणः, कोऽपि न सम्मुखात्सरति तन्नेत्रेऽपवार्याऽनयोः ।
एवं प्राप्तमभूत्तयोर्ननु पराकाष्ठाञ्च पापं, भवे—
दत्युच्चैः पतनं, परन्तु नदियामार्गे भवत्युन्नतिः ॥ १०७०॥

अत्याचारपथेन तत्र समये द्वीपे नवे भ्रातरौ,
दुष्टौ रावणकंससतुल्यकलितावास्तां प्रसिद्धौ तथा ।

ईर्ष्यायां शिशुपालवक्त्ररदनौ तौ डायरोडायरौ क्रूरौ
नादिरशाहयुक्तगजनीतुल्यौ, न कस्योपमा।। १०७१।।

एकस्मिन् दिवसे हि रक्तनयनौ मद्येन मत्तोपमौ
कुर्वन्तौ वचनं प्रलापसदृशं कुत्रापि तौ जग्मतुः।
ताभ्यामध्वनि लोकितौ प्रथमतो नित्येन दासेन, तद्—
दृष्ट्वाऽसाधु तयोस्तथाहि विकलामाशोचनीयां दशाम् ।। १०७२।।

नित्यानन्दयतिश्च पृच्छति जनान् द्वीपे नवागन्तुकः,
'किं भद्रा! ननु काविमौ? प्रलपतो यातः कथं मत्तवत्? ।
गम्येते तदिमौ तु सभ्यपुरुषौ वेषेण वै भूषया'
लोकैरुत्तरमत्र दत्तमचिरञ्छुष्कं हसद्भिर्मनाक् ।। १०७३।।

'जानेऽद्यावधिमत्र ते न पतितः पाशस्तथा चानयो—
स्तस्मादेवमिदञ्च पृच्छति, यमो द्वीपस्य साक्षादिमौ।
प्रायस्तादृशपापिनामपि भयं स्यान्न प्रतीतं यमाद्,—
यावद्द्वीपनिवासिनामनुभवेऽदःकिन्नराभ्यां कृतम् ।। १०७४।।

लब्धं जन्म हि विप्रतस्तु कुरुतः कार्यं परञ्चाधिकं
चाण्डालादपि, तत्कदापि पुरतो यातं युवां नानयोः।
साधुभ्योऽतिघृणा, ततो न कुशलं दृष्टावपि स्वच्छयो,—
र्बुद्ध्वा तत्परदेशिनौ च भवतो,वृत्तं तयोर्बोधितम्' ।। १०७५।।

लोकानां मुखतो निशम्य तदिदं नित्यो दयावांस्तयोः
शोचन् सोऽत्र बभूव 'नाम्नि ननु यः श्रद्धायुतो विद्यते।
सत्कर्माणि च कर्तुमत्र सततं चेष्टंस्तथा पद्यते
लोकस्तादृश एव चेद्भगवतो नाम्नः क्रियात्कीर्तनम् ।। १०७६।।

अस्माकं कथनात्, तदत्र न बहु ख्यातिः प्रभोर्वर्तते,
त्यक्त्वा पापपथं यदाहि भगवन्नामाश्रयेण प्रभोः।
आगच्छेच्छरणे तदेदृशमहान् पापी, प्रशंसास्थितिः,
स्पष्टं वास्तविकं तदैव भगवन्नाम्नो महत्त्वं भवेत् ।। १०७७।।

लोकश्चेदृश एव पात्रमधिकं भूमौ कृपायाः प्रभो—
स्तन्नूनं परमेदृशान्तु भगवन्नामोपदेशार्हता।
उद्धारो भवितव्य एव विधिना केनापि तल्लोकयो'—
र्नित्यानन्दविरक्तमानसतले जज्ञे विचारस्तथा ।। १०७८।।

उत्पन्ना शुभकामना हृदि भवेद्यस्मै सतां प्राणिने,
भद्रायात्र विचारतत्परमना येषां महात्मा भवेत्।

बोधव्यं भुवि तस्य जातमधुना कल्याणमत्र ध्रुवं
तन्मोहस्थितितः पुनर्ननु तदुद्धारे विलम्बो नहि ॥ १०७९॥

इच्छायान्तु महात्मनां भुवि नृणां सत्यां तथैव ध्रुवं
सङ्कल्पे सति वा भवेदघमयः प्राणी महापुण्यवान् ।
पापात्पापमयोऽपि चात्र परमः संसारिणां पावन,—
स्तावत्तामसजन्तुरत्र रमते यावन्न सूर्योदयः ॥ १०८०॥

चिन्तोद्धारकृते नितायिहृदये भ्रातृद्वयस्यास्य यद्—
जज्ञे, ज्ञेयमतः क्षणोऽतिनिकटः पापंक्षयस्यानयोः ।
अल्पेनैव तथाक्षणेन भविता सौभाग्यभानूदयो
मन्ये सम्प्रति तद्द्वयस्य, समयः सर्वैः प्रतीक्ष्यः सदा ॥ १०८१॥

नित्यः स्वं प्रकटञ्चकार मनसो दासे विचारं हरौ,
तेनोक्तं 'करमिच्छसीह वरटाकोशे विना चिन्तनात् ।
दातुं त्वन्तु यते! किमुक्तमधुना लोकैः, श्रुतं न त्वया?'
तन्नित्योऽल्पगभीरतायुतगिराऽवोचत्तु 'सर्वञ्छ्रुतम् ॥ १०८२॥

अस्माभिस्त्वियतैव चात्र विषये भीतैर्न भाव्यं, पर—
श्चास्माकं करणीय एव भगवन्नामप्रचारस्तथा' ।
'ब्रूयान्तु क्व यदत्र रुन्धि भगवन्नामप्रचारं, यथा
कुर्वो,ऽन्यत्र तथा प्रचल्य निजकं कुर्याव तत्कर्म वै ॥ १०८३॥

को लाभस्त्वनयोः प्रबोधनकृतेस्तत्सिंहयोः सुप्तयो'—
'स्ते वार्तोचित्तमेव, किन्तु विषयेऽत्राज्ञा तथाऽस्मत्प्रभोः ।
पात्रापात्रविभेदनं न भगवन्नामप्रचारे क्रियाः,
सर्वेषामुपदेशनं समतया कार्यं, (हि सोऽयं समः) ॥ १०८४॥

पापी वा सुकृती तु नामकलने सर्वोऽधिकारी हरे—
स्तत्कार्यं कथमेतयोर्न भगवन्नामोपदेशामृतम्' ? ।
दासोक्तिर्विनयेन, 'तूचितमिदं दृश्येत्पुरो योऽपि ते
तस्यैवात्र करोतु वस्तुभगवन्नामोपदेश,न्तु तौ ॥ १०८५॥

कृत्वोद्देश्यविशेषमेवमनयोः पार्श्वे गतिर्नोचिता,
गन्तव्यं हठपूर्वकन्तु निकटे कस्मात्तयोरेव च ? ।
सन्त्यन्ये बहवो नराश्च भगवन्नामोपदेशाय ते,
कुर्यात्तानुपदेशमेत्य', हठता स्यान्नोपदेशार्हता ॥ १०८६॥

नित्येनोक्तमतो मनाग् दृढतया 'यः(पश्य)रुग्णोऽधिकं
यस्यौषध्यनिवार्यता बहु भवेदन्याऽऽतुरापेक्षया ।

तस्यैवात्र तु रोगिणः प्रथमतो वैद्यस्तथा बुद्धिमान्
भैषज्यञ्च वितीर्य पश्यति कृती नाडीं ततोऽन्यस्य वै ।। १०८७।।

अत्यावश्यकताऽनयोस्तु भगवन्नाम्नः परापेक्षया
प्रायश्चित्तमनन्तनिर्दयकृतेर्नाम्नैव शक्यं तयोः ।
मार्गः कोऽपि न निष्कृतेर्ननु परो भ्रातृद्वयस्योचितं
किं स्थानेऽस्ति भवान् मया सहमतो'?, वृद्धो ह्यपेक्ष्यः सदा ।।१०८८।।

'इच्छा तेऽत्र यथा, यदीह भगवन्नाम्नस्तु सर्वाधिक–
न्त्वर्हौ तौ ननु चैव बोधसि ततो नापत्तिरत्र क्वचित्' ।
उक्त्वेदं हरिदासजी 'प्रियहरे! रामेति कृष्णेति' च
श्रीमत्षोडशनाममन्त्रमधुना गायन् प्रियं सुस्वरात् ।। १०८९।।

तद्भ्रात्रोर्वसतिञ्चचाल, नृपतः प्राप्तं बभूवानयो–
रल्पं सैन्यमपीह, तच्च सततं सङ्गे दधातेऽत्र तौ ।
कुर्वन्तौ हरिनामगानमधुना संन्यासिनौ तावुभौ
निर्भीकौ ययतुर्निवासनिकटे, भीतिः कुतो वै सतः ।। १०९०।।

दैवात्तौ पुर एव मद्यभरितौ पल्यङ्कयोः संस्थिता–
वास्तां, तौ हरिनित्यकौ स्वपुरतो दृष्ट्वाऽत्र गानक्रियौ ।
पश्यन्तावतिरक्तया ननु दृशा तावूचतुस्तन्मुखं
'कौ वा स्थोऽत्र युवां, स्पृहा हृदि च का?' चेष्टाऽखिला सस्पृहा ।। १०९१।।

'कृष्णं ब्रूहि च कृष्णमद्य भज च श्रीकृष्णनामाऽऽलप
श्रीकृष्णो जननी च कृष्णजनकः प्राणाश्च कृष्णो धनम्' ।
गीत्वेदं मधुरस्वरेण तु पुनर्नित्यो जगादाऽनयो–
'भिक्षां याचितुमत्र, तन्निजमुखा,त्प्राप्तौ हि भिक्षू, युवाम् ।।१०९२।।

श्रीमत्कृष्ण! हरे! मुरारिमधुभिद्गोविन्द! नारायण!
श्रीमन्माधव! वासुदेव! नृहरे! हे नाथ! राधाप्रिय! ।
एतेषां कुरुतं रसालभगवन्नाम्नां प्रियोच्चारणं
भिक्षा सम्प्रति चेयमेव भवतोः स्थाने भवत्वावयोः' ।। १०९३।।

तावत्येव तथा श्रुतेऽतिशयितक्रोधेन रक्ताननौ
तावुत्थाय परं तयोरभिमुखौ द्राग् धावितौ भ्रातरौ ।
धावद्भ्यां कथितं 'न कश्चिदिह किं? गृह्णातु जाल्माविमौ'
श्रुत्वा तत्क्षणमेव नित्ययतिकस्तस्माद्दधाव द्रुतम् ।। १०९४।।

तद्दासोऽप्यधिकं श्वसंस्तदनुगो धावन्नभूत्किन्तु स
स्थूलश्चातिवयाः कृशेन वपुषा नित्येन यूना पुनः ।

सार्धं स्यान्ननु चञ्चलेन तुलितः क्रूरात्मनोर्धावने ?
तज्जग्राह हरेर्भुजं दृढमयं कर्षस्तथा धावते ।। १०९५।।

श्रीनित्येन समं तथापरिपतन् गच्छन्नभूद्दासजी
तौ धर्तुं तु जगायिमाधवजना मार्गेऽल्पदूरं ययुः।
भूयस्ते 'लपतः सदैव तदिमौ' तादृग् विचिन्त्याऽगता–
'स्तत्साधुग्रहणेन चाल'मधिकं दूरं न पृष्ठानुगाः ।। १०९६।।

आसीद्दीर्घमसौ श्वसंश्च हरिजी पश्यन्नसौ भूयसा
पृष्ठेऽया,दतिमात्रमेव तु परिश्रान्तस्तथाऽन्तेऽभवत्।
खिद्यन्नित्यमुवाच 'सम्प्रति जहि श्वासोऽतियाति द्रुतं
नीत्वा जीवितमेव हास्यसि तु किं? नो कोऽपि पृष्ठेऽधुना ।। १०९७।।

तावन्मे मणिबन्धमत्र सुदृढं जग्राह यच्चाधुना
पीडातो म्रियते मया' 'कुरु परं किञ्चित्तथा साहसम् ।
यावो यावदिदं सरस्त्वभिमुखं ' धावंस्तु नित्योऽवदद्
भ्राष्ट्रेऽयात्तव वै सरः', परमणुक्षोभेण दासोत्तरम् ।। १०९८।।

'प्राणाऽऽपन्निह, लक्ष्यते तव सरः ?, पाणिं परं मुञ्च मे'
वृद्धस्तद्धरिजी निवेद्य गुरुकाऽऽकृष्टिं तथैकां ददौ ।
शक्तः स्यात्किमसौ नितायिकरतो मुक्तौ स्वपाणेः परं ?
तस्थौ नित्ययतिस्तदा तु विहसन्, साधोर्विनोदोऽद्भुतः ।। १०९९।।

मूर्च्छातः पतितो हरिर्भुवि ततो दीर्घं जगाद श्वस–
'न्नास्तां, चञ्चलतां सदैव कुरुषे, पूर्वं मया वारितम् ।
मेने नैव भवांस्तु तत्र गमनञ्चक्रे तथैकं हठा,–
दाकृष्याऽर्धमरं द्वितीयमधुनाऽऽकृष्यात्र मां धावनात्' ।। ११००।।

'यातः सम्मतितस्तवैव, यदि न प्राप्ता भवेत्सम्मति–
र्यानं तन्मम किं?शिशोर्हि शरणं वृद्धस्त्वमेवाऽऽवयोः' ।
श्रुत्वेदं हसतो यतेर्ननु हरिर्यातोऽल्परोषेऽवदद्–
'वृद्धोऽश्मास्मि, तु सम्मतेर्मम गतः कस्मात्ततो धावितः? ।। ११०१।।

किं जग्राह न सम्मतिं मम तदा' ? ब्रूतेऽयमुच्चैर्हसन्–
'मृष्टा स्यान्निखिला स्थिति,स्तव तदा मत्याः प्रतीक्षाकृतौ' ।
प्रेम्णैवञ्च परस्परञ्च तदिमावारोपयन्तौ गतौ
स्थाने श्रीप्रभुसन्निधौ, हि गुणिना युक्ता गुणाः सार्थकाः ।। ११०२।।

स श्रीकृष्णकथां तदाऽत्र कथयन्नासीत्स्वभक्तैः समं
दृष्ट्वेमौ च मुदा प्रचारकतपोमूर्ती जगाद प्रभुः।

'गृह्णन्तु स्वजना:! प्रचारकसभामुख्यौ च युक्तावुभौ
प्राप्तौ तन्मुखतोऽधुना शृणु पुरो वृत्तं प्रचारस्य तत्' ।। ११०३ ।।

एवं तद्वदति प्रभौ हरिवच: 'श्रीपादनित्य: प्रभो!
चाञ्चल्यं कुरुते बहु स्वयममुं कुर्यादणुं बोधय ।
'किं किं का घटना? किमस्ति वचन,ञ्चाञ्चल्यमद्याऽमुना
नूत्नं किं विहितं? तथा बहु युवाञ्छ्रान्ताविवाद्याऽऽगतौ ।। ११०४ ।।

सर्वं तच्च निशामय', प्रभुहुतश्चोक्त्वा समस्तं हरि–
र्ब्रूते 'यद्यपि पूर्वमेव बहुधा लोकैस्तयोर्वारिता ।
भ्रात्रो: पार्श्वगतिस्तथापि सुहृदा नित्येन नो मानितं
बालाभस्तु पलायितो द्रुतमयं ताभ्यां यदा भर्त्सित: ।। ११०५ ।।

तावत्कीर्तनकारिणां न कुशलं, लोका वदन्ति स्म ते
सर्वान् बन्धयतोऽद्य कीर्तनकृतस्तौ राक्षसौ भ्रातरौ ।
ऊचुस्तत्र परस्परं ननु तथावार्ताञ्चि सर्वे जना',
नित्यानन्दमुवाच दासवचनञ्छ्रुत्वा स्मयञ्छ्रीप्रभु: ।। ११०६ ।।

'ते काऽवश्यकता समीपगमना श्रीपाद! चासीत्तयो: ?
कुर्याच्चिचञ्चलतां मनागणुमत:, कोऽर्थश्च चाञ्चल्यत:' ।
किञ्चित्कृत्रिमरागकोपधरणं कुर्वंश्च नित्योऽवद–
'त्कर्मेदं भवतो मया न भवितुञ्छक्यं तथैवंविधे ।। ११०७ ।।

गेहे तिष्ठति तु स्वयं कठिनतां जानातु किं तद् भवां–
स्तां तावन्नगरप्रचारकृतिनां, ब्रूते तु पूर्वं स्वयम् ।
सर्वेषां कुरु भेदबुद्धिरहितं नामप्रचारं, यत:
सामान्येन हि सर्व एव भगवन्नामाधिकारी भुवि ।। ११०८ ।।

आब्रह्मश्वपचं नृणामिह तथाऽऽपापात्मपुण्यात्मकं,
ब्रूते सम्प्रति चाथ तत्किमगम: पार्श्वे तयोर्मत्तयो: ।
तावेव त्वधिकारिणौ श्रुतिकृते सर्वाऽनिवार्यौ तथा,
(कर्णे यन्न गत: कथन्नु रसनावस्तु प्रभुस्तद्भवेत्)? ।। ११०९ ।।

त्यक्त्वाऽऽजन्मत एव पैतृकगृहद्वारं भ्रमामो वयं
भिक्षान्नं ननु याचितुं परगृहं नित्यं विरक्ता: स्वत: ।
अस्माकं भवतस्तथा कथमिव ह्युद्धारकार्ये यश,–
(श्चन्द्राऽऽह्लादकताऽत्र रात्रितमस: किं दूर एव स्थिता?) ।। १११० ।।

उद्धारं यदि तादृशामघवतां दुश्चेष्टघोरात्मनां
कुर्यास्तत्पतितात्मपावनमत: स्यान्नाम ते सार्थकम् ।

भक्तान्नो कुरुषेऽत्र नाम शरणे नीत्वा तथापापिनो,
लोकस्तावदयन्तु बोधतु कथं नाम्नो महत्त्वं हरे: ? ।। १११११ ।।

एवं नाद्य गृहोपवेशनविधे: कार्यं तथा सेत्स्यति'
'श्रीपादात्मनि यस्य सम्प्रति बहूद्धारचिन्तेयती ।
ते के भागवता भवन्ति परमा ?' भक्तान् स्मयन्नाह स
'क्रूरौ तौ ननु राक्षसौ प्रकृतितो विप्रान्वये कण्टकौ' ।। १११२ ।।

भक्तैरुक्तमथ 'प्रभो! न परमौ' श्रीवासगङ्गादिभि–
'र्न स्तो भागवतौ परञ्च नगरे सर्वत्र शुद्धात्मनाम् ।
आतङ्क: प्रसृतोऽस्ति सम्प्रति तयो'श्चोक्त्वा तथेदं बहु
प्रत्येकैश्च जगायिमाधवकृताऽतिक्रूरता वर्णिता ।। १११३ ।।

'कर्तुं सम्प्रति तौ दिनानि कति वा स्वक्रूरतां शक्नुत: ?
श्रीपादस्फुटदर्शनन्त्वधिगतं याभ्यां, विचारस्तथा ।
उद्धारस्य ययोरमुष्य हृदये तौ किं पुन: पापिनौ ?
श्रीपादोऽभिलषेत्तथा यमपि तु भक्तं विधातुं प्रभु: ।। १११४ ।।

कामं स्यात्स पुन: कियानपि महान् पापी कथं नो भुव:'
सङ्केतेन तथा प्रभोस्तु निकटे स्थाने नितायीकृते ।
उद्धारस्य निवेदने, स्वयमपि स्वाश्वासनं तत्तयो:
श्रीपादस्तुतितो ददौ, ध्वनिभिदा काव्यं हि लोकोत्तरम् ।। १११५ ।।

सत्यं, सत्पुरुषात्मनि प्रकृतितोऽन्यस्मै दया जायते,
केनाप्यर्थित एव सोऽत्र दयते, नैवंविधा तत्स्थिति: ।
दीने दु:खिनि तद्दयाऽतति, यतस्तेषां स्वभावस्तथा
कल्प्या नैव विना दयाकृतिविधिं भूमौ सतां संस्थिति: ।। १११६ ।।

७२. **सन्त: परहितसाधननियमे स्वयमेवोद्यतसत्त्वा: ।**
दिनकर्ता निजकरसंस्पर्शाद् धरणीनयनसरोजम्
विकचं, कुरुते परिमलमतुलं करितुं सुरभितमनिलम् ।
निशाकुमुदं विकासयतीन्दु: किरणौषधिरसवृष्ट्या
जलधरवृन्दं प्रकृतिविघटितं रसमर्पयति रसोरसि ।
ज्ञाताज्ञातस्थितौ यथा भुवि सततं जीवश्वसनम्
सत्पुरुषाणामखिला चेष्टा तथा लोकहितमात्रम् ।।

जगायि-मधायि-उद्धारः

७३. पुण्यं दर्शनमिह साधूनाम् ।
अनुकूला देशस्थितिकाला व्यक्तिसमुदये हेतुः
अन्योन्यापेक्षा तेषामिह, कार्यकारणव्यक्तिः ।
देशः काले, कालो देशे फलति स्थितिसंयोगात्
तत्त्रितये चैतन्याभावो रसभग्नावरणाचिद् ।
लोकावरणमलौकिकयोगाद् भज्यते तमोऽर्कादिव
साधुसङ्गतिः फलति तु सद्यः सङ्गतिचैतन्याप्तिः ।।

सत्यं यस्य सुकोमलन्तु हृदयं, द्वेषेण बुद्धिः सती
नो जाता मलिना तथैव घृणया, प्रेम्णाऽखिलान् पश्यति ।
यस्यैव व्यसनं परोपकरणं जातं, तथासज्जनः
कल्याणं यदि पापिनोऽपि महतो वाञ्छेत्तदा निश्चितम् ।। ११९७ ।।

धर्मात्मा भविता तथा स, महतामिच्छा ह्यमोघा स्वतः,
पश्येदेव स कस्यचित्त्वभिमुखं प्रीत्या तदैव क्षणे ।
श्रेयो निश्चितमेव तस्य भविता, सङ्गः कृतः साधुभि–
र्बुद्ध्या दूषितयापि, नोऽर्थरहितः स्या,त्किन्तु साधुः क्वचित् ।। ११९८ ।।

सद्भ्यस्तु द्विषतामपीह जगति श्रेयो भवल्लक्षितं
कस्मादप्यपराधतो यदि सतामक्रोधिनां दैवतः ।
क्रोधः पापिनि सम्भवे,त्पतति तत्सर्वस्वमेवास्य तत्,
सत्कोपानलहेतुरिन्धनधनं तिष्ठेदसाधोः कथम् ? ।। ११९९ ।।

क्रोधस्तु क्षणिकः कदापि महतामायाति नामात्मनां,
ते स्वस्याऽहितकारिणामपि सदा कुर्वन्ति मात्रं हितम् ।
आक्षिप्तोऽपि ददाति सत्फलमसौ सुस्वादु वृक्षोपमो
यस्मात्तद्हृदयं दयालय,महो! साधुर्भुवो भास्करः ।। ११२० ।।

नित्यानन्दकृपाऽभवन्ननु जगामध्वोस्तथापापगो–
श्चिन्तोद्धारकृते तयोरुदपतत्स्थानेऽवधूतात्मनि ।
मन्ये तद्द्वयपापकर्मजगतः प्राप्तोऽन्तकालोऽधुना,
लोकः पुण्यविधौ प्रवेशमयते द्वारैव पुण्यात्मनाम् ।। ११२१ ।।

लब्धं दर्शनमत्र यत्र दिवसे नित्याऽवधूतात्मनः
साक्षाद्दासमहात्मनश्च सुहृदोस्ताभ्यामुभाभ्यां सतोः ।
तस्मिन्नेव दिने तयोः शुभदिनश्रीमद्गणेशोऽभव,–
त्कालोऽयं समुदेति साधुकृपया व्यक्तौ हि पात्रात्मनः ।। ११२२ ।।

संयोगादधुना स्ववासमकरोद् भ्रातृद्वयं तत्र, तद्
गेहं यत्र महाप्रभोस्तु मुहले, भीतास्ततः स्थानिनः ।
अन्योन्यञ्च वदन्ति 'कीर्तनकृतामापत्तिरद्याऽऽगता,
कर्तारौ ननु कीर्तनेऽत्र कदनं तौ राक्षसौ भ्रातरौ' ।। ११२३।।

ब्रूते कोऽपि, च कोऽपि कीर्तनहरिप्रेम्णो विरोधी जनो
'भ्रातः! शोभनमस्ति, कीर्तनजनः सुप्तेर्न दत्ते क्षणम् ।
तत्कोलाहलकारणान्निशि दृशोर्निद्रैव नायाति तद्-
भद्रं सम्प्रति शेमहे तु सुखतो', निद्रासुखं ह्यव्ययम् ।। ११२४।।

ब्रूते कोऽप्यनुमानतः स्वमनसः 'प्रायोऽस्ति तत्सम्भवं
त्यक्ष्यन्ति स्वयमेव कीर्तनमिमे संकीर्तकाः साम्प्रतम् ।
नो चेत्तत्स्वकृतस्य मत्तफलनं ते स्वादयिष्यन्ति त'-
च्चैवं तर्कवितर्कमद्य कुरुते लोकोऽत्र नानाविधम् ।। ११२५।।

गङ्गाजीनिकटेऽभवत्प्रभुगृहं, यस्मिंश्च घाटे प्रभुः
स्नानाय प्रतियाति तत्पथि तयोर्वासोऽपतत्क्रूरयोः ।
एकाकी नहि कोऽपि गाङ्गपुलिनं स्नानाय गच्छत्यतः
संयुक्ता दश विंशतिश्च सरितो यान्त्यद्य घाटे नराः ।। ११२६।।

रात्रौ तु स्वगृहान्न कोऽपि च बहिर्यात्येव तत्कारणं
भ्राम्येतां किमितस्ततो ननु मदोन्मत्तावुभौ भ्रातरौ ।
यो वै कोऽपि च लभ्यते प्रहरतः क्रूरौ तमेव द्रुतं
यत्सर्वेऽत्र नृशंसतापरिचिता द्वीपे तथाऽऽसंस्तयोः ।। ११२७।।

तत्सायं क्षणतो विशन्ति विहगाः स्वे स्वे कुलाये यथा
प्रातश्चैव ततो भवन्ति च बहिः स्थानीयलोकास्तथा ।
विस्मृत्यापि न निःसरन्ति गृहतश्चास्तङ्गते भास्करे,
किं घोरे सुकनीनिकेऽत्र तमसि स्थाने नरे क्रीडतः ? ।। ११२८।।

कुर्वन्ति स्म सुकीर्तनं नियमितं भक्ता हि सायं क्षणे
रात्रिं व्याप्य कदापि तद्वदभूत्तेषाञ्च संकीर्तनम् ।
आसीत्तद्वदेव पूर्ववदहो! जातेऽपि वासे तयो,-
श्चर्यायामवरोधकारणभयं न क्वापि तत्प्रेमिणाम् ।। ११२९।।

तत्तेनैव निशि क्रमेण मिलिताः सर्वेऽत्र भक्तास्तथा,
जातं वाद्यलयप्रियध्वनियुतच्छ्रीनामसंकीर्तनम् ।
प्राप्तः स प्रथमं त्रितापशमनोऽनन्ताऽघहारी तथा
तद्भ्रात्रोरपि कर्णयोः सुमधुरः संकीर्तनस्य ध्वनिः ।। ११३०।।

आस्तां पूर्वत एव चासवमदे मत्ताविमौ साम्प्रतं
जातौ तच्छ्रुतिमात्रतोऽधिकतयोन्मत्तौ प्रियस्य ध्वनेः ।
आसन् ग्रीष्मदिनानि तेन शयितौ बाह्येऽत्र पल्यङ्कयोः
श्रीमल्लोकपवित्रकीर्तनरसाऽऽस्वादे च मग्नावुभौ ।। ११३१ ।।

हुङ्कारं कुरुतः कदापि रसतो मग्नौ, कदाचित्तथा
संमोदाद् वदतस्त्वहा! पुनरहा! शय्यास्थितावेव तौ ।
भावावेशगतौ च कीर्तनलयाऽऽसङ्गेन संनृत्यतो
माहात्म्यावगमं विनैव तदिमौ संकीर्तनस्याधुना ।। ११३२ ।।

तन्मात्रश्रुतितो हि मत्तसदृशौ जातावुभौ भ्रातरौ
दूरादेव सुकीर्तनप्रियरवञ्छ्रुत्वाऽनयोश्चित्तयोः ।
अल्पाऽभूच्च कठोरताऽधिकतया, नामप्रवेशो हरे–
र्यच्चित्ते श्रुतितोऽभवत्त्वमृदुता तिष्ठेत्कथं तत्र वै ? ।। ११३३ ।।

कुर्वन्तो हरिकीर्तनश्रवणकञ्चोभौ शयाते तथा
श्रीगङ्गां प्रति गच्छतः प्रियहरीन् सुप्तोत्थितौ पश्यतः ।
तत्रैवाऽध्वनि यान्महाप्रभुरपि स्थाने बभूवैकदा
श्रीसंकीर्तनजीवनप्रभुरसावेवेति तद्विश्रुतम् ।। ११३४ ।।

तद्दृष्ट्वैव जगाद गर्वितरवः किन्तु प्रसन्नस्वरः
श्रीमन्तञ्च, 'निमायिपण्डित! वरं रात्रौ तु गायन्नभूः ।
चण्डीमङ्गलगीतमस्ति किमिदं ? तत्सङ्गिभिश्चैकदा
सर्वैः स्वैः सहितो ममापि वसतौ गानं तथा त्वं कुरु ।। ११३५ ।।

सामग्रीं कथयिष्यसि त्वमधुना यां यान्तु सर्वाञ्च तां
क्रेतास्मः स्वजनैर्वयं, ध्रुवमिदञ्छ्रीचण्डिकामङ्गलम् ।
अस्माकं भवितव्यमेव वसतौ, त्वत्सङ्गतश्चैकदा
गीतं ते बहु रोचते श्रवणयोः', सोपानमाद्यञ्छ्रुतिः ।। ११३६ ।।

श्रीमन्नामसुकीर्तनस्य किमसावस्ति प्रभावोऽद्भुतो,
यत्राऽनिच्छतया श्रुतेः फलमिदं, स्वेच्छाप्रवृत्तस्य किम्? ।
वक्तुं केनचिदत्र नो विविदतुर्यौ भ्रातरावक्रकं,
तावेवाद्य महाप्रभुं स्ववसतौ गातुं तथायाचतः ।। ११३७ ।।

प्रभुर्ददौ नोत्तरमत्र चानयो–
र्गिरान्तथासोदरयोर्मनागपि ।
ययावुपेक्षां स विधाय चाग्रतो,
वचःप्रयोगः समये विधीयते ।। ११३८ ।।

तद्भक्ता निखिला गृहेऽत्र मिलिता यामे तृतीये प्रभोः
सर्वैः प्रार्थितमद्य' नूनमधुनोद्धारस्तु भव्योऽनयोः ।
उद्धारस्य निमित्तमस्त्यवसरो भ्रात्रोरसावेव त-
ल्लोकानां हृदये महत्त्वमशिता संकीर्तनस्याधिकम् ॥ ११३९॥

सार्थं भावि च दीनबन्धुपतितोद्धारात्मनाम प्रभो!'
'चिन्ता सम्प्रति भक्तवृन्द! भवता'मूचे स्मयंस्तत्प्रभुः ।
'उद्धाराय तथेयती ननु ययोर्यन्मङ्गलायात्मनि
स्थाने तद्बहु कामनाऽद्य, नियतोद्धारस्तयोर्ज्ञायताम् ॥ ११४०॥

उद्धारेऽद्य तयोः किमस्ति सुहृदो! भ्रात्रोर्बिलम्बो, ययोः
श्रीपादस्य च दर्शनस्य विधितः सौभाग्यमत्रार्जितम् ।
तौ स्यातां ननु पापिनौ कथमहो! व्यर्थं तथा कर्हिचि-
च्छ्रीपादस्य न याति दर्शन,मसौ श्रेयस्तु कर्ता तयोः' ॥ ११४१॥

वाक्यमिदञ्चाऽऽश्वासनरूप-
ञ्छ्रीप्रभुतः श्रुत्वाऽखिलभक्ताः ।
स्थानमतः स्वं स्वं लघु जग्मु,-
र्गौरनिमायी शंसति सत्यम् ॥ ११४२॥

नित्यानन्दयतिर्महाप्रभुगृहं प्रत्युन्मुखश्चैकदाऽऽ-
यान्नासीच्च निशाक्षणे, मनसि तत्कृत्वाऽवधूतप्रभुः ।
उद्धारस्य निमित्तमेव च तयोर्भ्रात्रोर्द्वयोः केवलं,
रात्रौ तेन पथा बभूव पथिकः, श्रेयः सतः पथ्यता ॥ ११४३॥

मन्दं मन्दमसौ यतिश्च भगवन्नाम्नस्तथोच्चारणं
कुर्वंस्तद्द्विजबन्धुवासपुरतश्चैवाऽवधूतोऽसरत् ।
आस्तां मद्यमदेन तौ विषयिणौ मत्तौ निषण्णौ तदा
रात्रौ नित्ययतिन्तु यान्तममुना दृष्ट्वा मधायी पथा ॥ ११४४॥

मत्तो मद्यमदेन रक्तनयनः पप्रच्छ 'यान्नस्ति को ?'
नित्यस्तूत्तरदातृकोऽस्ति किमहो ? मौनं स एवाभवत् ।
आहोच्चैर्ननु तर्जनेन तदयं 'गच्छंश्च कोऽस्त्यत्र रे!
ब्रूते नो किम'तो जगाद यतिको निर्भीकभावाच्च तम् ॥ ११४५॥

'किं पृच्छा? त्वहमस्मि', पृच्छति मधुस्'त्वं कोऽसि? नामात्मनो
ब्रूह्यस्मिन् समये क्व यासि निशि?' तन्नित्यो विनोदस्वरः ।
सारल्येन जगाद 'नाम मम वै द्वीपेऽ'वधूत' प्रभो-
र्गेहं यामि तु कीर्तनाय', सततं कार्यं हरेः कीर्तनम् ॥ ११४६॥

रुष्टस्तत्क्षणतो निशम्य मधुको नामाऽवधूतेति तद्–
ब्रूते 'चास्त्यवधूत ? चित्रमधिकं नामाऽवधूतेति ते ।
लोके न त्ववधूतनाम भवति, त्वं जाल्म! रे! किं मया
सार्धञ्चोपहसं करोषि' स तथा चोक्त्वाऽविचारी मधुः ॥११४७॥

उन्मत्तो मदपानतो हि निकटात्खण्डं घटस्यैककं
नीत्वा नित्ययतेर्जघान करेण शीर्षे तदुच्चैर्जडः ।
शीर्षे तच्च नितायिनस्तु लगित तावच्च गत्या यतो
जातं तल्लगनक्षणेन शिरसि स्थाने यतेः खण्डसात् ॥११४८॥

शीर्षेऽप्यस्य नितायिनश्च शकलं विष्टं तथैकं ततो
धारेवास्य च शोणितस्य शिरसः स्थानात्ससार क्षणात् ।
तद्वस्त्रेण शरीरमस्य सकलं रक्तेन चारञ्जितं
क्रोधोत्पत्तिरभून्न नित्यहृदये जाते तु तावत्यपि ॥११४९॥

कुर्वन् गानमसौ मुदा च भगवन्नाम्नस्तु नृत्यन् बभौ
किञ्चास्योपरि तद्दयां प्रकटयन् क्रोशन् ययाच प्रभुम् ।
'आघातोऽत्र तनौ बभूव ननु यस्तस्याणु चिन्ता न मे,
किन्त्वेतद्द्विजपुत्रयोश्च कुदशा दृश्या ममेयन्तु नो ॥११५०॥

अस्त्येवं स्मृतिमात्रतस्तु हृदयं तावद्विदीर्णं भव–
त्तद्भ्रातृद्वयशोचनीयनरतावस्थादशायास्ततः ।
एतौ सम्प्रति रक्ष वङ्गनदियाप्रेमावतार! ध्रुव–
ञ्छीघ्रं निष्कृतिसाधनं त्वमनयोर्मा हे दयालो! वद' ॥११५१॥

नित्यानन्दयतिं तथाविधममुं दृष्ट्वा मधायी मुदा
नृत्यन्तं, कुपितोऽधिकं तदुपरि क्रान्तः प्रहर्तुं पुनः ।
तस्यापेक्षहृदल्पकोमलदयायुक्तस्वभावो जगा
साधोस्तद्दशया दयाक्तहृदयो मध्येऽरुणच्चैव तम् ॥११५२॥

साक्षादत्र तथा प्रहर्तरि जने क्रोधं त्वकृत्वा, मुदा
नृत्यन् प्रत्युत याचते मृदुगिरा कल्याणहेतुं प्रभुम् ।
स स्वस्याप्यपराधिनश्च, हृदयं तद्भ्रातृजग्गोर्द्रुतं,
रुन्धंस्तत्स मधायिनं वदति 'भोस्त्वं किं करोषीदकम् ? ॥११५३॥

स्थानेऽज्ञातमपृष्टमेकमपरं स्वे हंसि संन्यासिनं
वार्तेयं नहि शोभना', ह्युभयतः स्पष्टोऽवधूतः क्षितौ ।
ऊचे तच्च विलोकयंस्तु परितश्चारक्तदृग्भ्यां मधु–
'ब्रूतेऽयं नहि नाम सौम्यविधिना न ग्राममेव स्वकम्' ॥११५४॥

'संन्यासी परदेशिकोऽयमधुना ब्रूयात्स्वकीये नु किं
नामग्रामपदेऽत्र पश्यसि न किं स्पष्टोऽवधूतोऽस्ति वै ।
स्यादत्ता ननु याचनेन, भविता चेत: शयानस्तत:'
सारल्येन जगायिबन्धुवचसा शान्तो मधुर्वारित: ।। ११५५।।

चक्रेऽसौ न पुन: प्रहारमपरं नित्येऽवधूते परं
नित्यानन्दयतिस्तु नृत्यति मुदि ह्युन्मत्त एवाऽनिशम् ।
आसीत्तस्य सरन् यतेश्च शिरसो रक्तप्रणालो यथा
तत्स्थानाखिलमेदिनी यतिशिरोरक्ताम्बुनाऽऽर्द्राऽभवत् ।। ११५६।।

गत्वा शीघ्रमिमं महाप्रभुपुरो वृत्तान्तमूचुर्जना
भक्तै: कीर्तनमेव कर्तुमधुनाऽऽसीदुद्यतोऽसौ समम् ।
नित्यानन्दयतिप्रहारवचनञ्छ्रुत्वा बभूवाऽस्थिर:
प्राणेभ्योऽप्यधिकं करोति हृदये प्रीतिन्तु नित्ये प्रभु: ।। ११५७।।

नित्यानन्दविपत्तिवृत्तमघटञ्छ्रुत्वा क्षणादुत्थित–
स्तद्धावन् घटनास्थलं प्रति ययौ, सर्वेऽपि भक्तास्तथा ।
पृष्ठेऽस्यात्र यथावदेव विकला: प्राप्ता: प्रियस्योत्थिता:,
प्राणैरात्मनि सार्धमेव करणग्राम: सरत्यक्रिय: ।। ११५८।।

लम्बन्ती ननु ढौलकी निजगले कस्यापि चासीत्तदा
बद्धोऽन्यस्य कटौ . परस्य मुरजस्तालश्च हस्तद्वये ।
कश्चिद्युक्तपखावजो बहुकरे मञ्जीरमेवाभव–
न्नित्यो नृत्यपरोऽस्ति मत्तसदृश: प्रेम्णा, ददर्श प्रभु: ।। ११५९।।

शीर्षात्तस्य च शोणितस्य वहते धारा, ततो रञ्जितं
सम्पूर्णं वपुरेव, तत् टप-टपाऽऽकृत्या ह्यध: क्षायति ।
तस्याधोधरणी बभूव निखिला रक्तेन शोणा परं
कुर्वंस्तु प्रियनामकीर्तनमसौ तस्यां दशायामपि ।। ११६०।।

नित्यानन्दतनौ विलोक्य तरसा रक्तप्रवाहं, प्रभो:
स्वं रक्तं क्वथति स्म सम्प्रति तथा याता प्रतिज्ञा स्मृते: ।
दृष्ट्वाऽऽकाशमुखश्च हुंकृतिमसौ कुर्वंस्तथोच्चै: प्रभु
गौर: सन्नपि 'चक्र! चक्र!' पदकञ्चैवं जगाद स्फुटम् ।। ११६१।।

संहाराय सुदर्शनं प्रभुरयञ्चक्रं तयो: पापिनो–
र्मन्ये सम्प्रति शीघ्रमाह्वयति तन्नित्यस्थितेर्व्याकुल: ।
क्रोधाविष्टममुं विलोक्य विकलं नित्यो विनीतोऽवद–
'त्तावत्स्वं स्मर भो:! प्रतिश्रुतमहो! प्रेमावतारस्य तु ।। ११६२।।

उत्पन्नो हृदयेऽस्ति यस्तु भवतः क्रोधोऽनयोः पापिनो–
स्तं दूरं कुरु, चेत्त्वमेव तु दयास्थानेऽसि कर्ता प्रभो! ।
क्रोधं पापिषु, तर्हि कुत्र भवितोद्धारस्तथैषां कथं ?
दीनानाथ! तु पावकोऽस्ति परमः पापापहारी भवान् ।। ११६३ ।।

उद्धाराय च दीनहीनपतितस्त्वेतत्स : प्राप्स्यते
द्वीपे कुत्र, ननु प्रभो! तव कृपापात्रं त्विमौ पापिनौ ।
एतौ गौरदयांशुपात्रमधिकं भव्याऽनुकम्पाऽनयो–
रुद्धारं कुरु मस्तके निजजगद्वन्द्याङ्घ्रिविन्यासतः' ।। ११६४ ।।

एवञ्चापि नितायिनाऽर्थितहृदः क्रोधो न शान्तः प्रभोः
क्रुद्धं तादृशमद्य विस्मित इवाऽऽसीदत्र दृष्ट्वाऽखिलः ।
आश्चर्येण विलोकयन्ति कुपितं तस्यास्यकं संभ्रमा–
त्संसारेऽद्य महालयो हि भविता सर्वप्रतीतिस्तथा ।। ११६५ ।।

सम्पूर्णं जगदेव भावि सुहृदः कोपात्प्रभोर्भस्मसा–
त्तस्यैवं दशयात्र केऽपि निजकं रोद्धुञ्च नाशक्नुवन् ।
संहाराय च पापिनोर्ननु तयोर्भ्रात्रोः स्वयं ते महा–
वीरावेशगता मुरारिसुमुखा भक्तास्तदा प्रस्तुताः ।। ११६६ ।।

भक्तानां हृदये बहूद्गतमभूदेकं यथाऽऽन्दोलनं
दृष्ट्वा तादृशमुग्रभक्तनिवहक्रोधस्वरूपप्रभुम् ।
ते जग्गूमधुसेवकाः थर–थराऽऽकम्पं भिया चाप्नुयुः
प्राप्तास्तद्घटनास्थले बहु नरा नार्यः सहस्रं तथा ।। ११६७ ।।

सम्पूर्णे नगरे विशेषत्रिधिको व्याप्तश्च कोलाहलो
नित्यस्तूग्रमुरारिवृन्दपदयोः शान्त्यै गतो याचते ।
कुर्वन्नस्ति पुनः प्रभोऽपि पुनः'शान्तोऽस्त्विति' प्रार्थना,–
मास्तां मौनमथ स्थितौ पुनिरिमौ भीताविव भ्रातरौ ।। ११६८ ।।

कार्यं सम्प्रतिं किं, तयोः किमपि नो बुद्धौ पुनर्दृश्यते
संहाराय तयोस्तथाऽवतरति भ्रात्रोः प्रतीतं क्षणे ।
मन्ये तत्र सुदर्शनं गगनतश्चक्रं स्फुटं साम्प्रतं
कम्पो दर्शनभावनातिभयतो जातोऽसतोः सुप्तयोः ।। ११६९ ।।

नित्यानन्दयतिर्मनोगतदशां भ्रात्रोर्विदित्वा तयो–
श्चक्रं प्रार्थितवान् दयालुहृदयः स्थातुं नभस्येव तत् ।
भूयो दीनगिरा प्रभुञ्च 'यदि भो! गौरप्रभुः पापिनां
भावी दण्डयिता युगेऽत्र, तु किमुद्धारोऽभवत्पापिनाम् ? ।। ११७० ।।

एवञ्चक्रसुदर्शनस्य विधिना संहार एवाऽभव–
त्पूर्वं स्वं हरिदासमेव हृदयं प्रोवाच चाश्वासनम् ।
(संहारं पतितात्मनां नहि तथोद्धारं विधाता त्वहं),
गौरप्रेमपिपासु सर्वहृदयं भूयात्सताञ्चासताम् ।। ११७१।।

कृत्वोद्धारमथानयोः पतितयोः संतिष्ठतोः सम्मुखे
किं स्वं नाम करोषि नाद्य पतितोद्धारात्मकं सार्थकम् ।
दातव्यो यदि दण्ड एव नियतं, दण्ड्यो मधायी पुनः
किञ्चिन्नापि तथापराधमधुना चक्रे जगायी तव ।। ११७२।।

श्रीमन्! प्रत्युत वै ··धायिनमसौ हन्तुं पुनश्चोद्यतं
सम्यक् साधुजनस्वभाववचनाच्चक्रे निवृत्तं स्फुटम् ।
सत्यं, मेऽस्ति तु रक्षकः स्ववसतिस्थाने जगायी प्रभो!
निर्दोषो ननु सर्वथाऽयमधुना', भेदः प्रकृत्याऽऽत्मनोः ।। ११७३।।

'श्रीपादस्य तु रक्षणं मम हृदश्चक्रे जगायी तथा
स्वस्थानेऽत्र मधायिनस्तदवनभ्राता पराऽऽघातनात्' ।
वृत्तेऽस्मिञ्छ्रुत एव नास्ति मनसस्त्वानन्दसीमा प्रभोः
सम्पूर्णा क्षणतो मुदा पुलकिता गौरामलेन्दोस्तनुः ।। ११७४।।

तत्कण्ठेन जगायिनं प्रमुदितः प्रेम्णाऽऽलिलिङ्ग प्रभु–
स्तं प्रोवाच तथाहि गद्गदगलो 'भ्राताऽवितो मे त्वया ।
त्वं भ्रातुर्मम रक्षकस्त्वदधिकः कः स्यात्परो मे प्रियो ?
मे चायाहि विधेहि कण्ठमिलितस्तप्तां हृदञ्छीतलाम्' ।। ११७५।।

तत्स्पर्शे सति मूर्च्छितः प्रभुतनोः प्रेम्णा जगायी क्षणं
स श्रीमत्पदयोर्लुलोट बहुधाऽचेताश्च भूत्वा प्रभोः ।
एतद्ब्राह्मणबन्धुजन्म सफलं जातं, तथाद्य स्फुटं
भाग्यं भाग्यवतोऽस्य, पापमखिलं क्षीणं तमोऽर्के मुखे ।। ११७६।।

तच्चित्ते हिमतुल्यपापनिकरः स्थानेऽतिजाड्याद्रुतः
प्रेमाग्निद्रवितः ससाग नयनद्वाराऽश्रुधाराऽधुना ।
उच्चै रोदिति पादपद्मशयितो बुद्धो जगायी प्रभोः,
सुप्तिः कालमलं हि कृ··ि, सतः सङ्गेन तज्ज्ञायते ।। ११७७।।

एवं विह्वलितं रुदन्त··म तं दृष्ट्वा निजं भ्रातरं
स्थाने प्रेम्णि, मधोरपि ज्वलति तज्ज्वालाऽनुतापो हृदि ।
तञ्चापि स्वकुकृत्यवस्तुनि दधौ लज्जानुभूतिस्तत–
स्तस्थौ नो समयाधिकं स्थिरतया, ··ानुभूतिः स्थितिः ।। ११७८।।

ब्रूते गद्गदितस्वरोऽश्रुभरिते नेत्रे विधायाऽधुना
'पापं द्वावपि सोदरौ समतयाऽकुर्वाऽनिशं संयुतौ ।
द्वावेवात्र च लोकनिन्दितनरौ तुल्यौ तथा पापिनौ
दत्तं तच्छरणं प्रभो! स्वपदयोर्भ्रातुस्तथैकस्य तु ।। ११७९ ।।

आवां संयुतमेव रक्षतु तथा गृह्णातु हे नाथ! तत्'—
पादे सोऽपि लुलोट नित्यकृपया चेदं मधायी ब्रुवन् ।
तत्स्थानीयरजोऽश्रुवेगभरितं कृत्स्नं त्वभूत्पङ्किलं
पङ्को गाङ्गमृदेव लेपित इव भ्रातृद्वयाङ्गेषु सः ।। ११८० ।।

राजानौ तिलकं विनाऽद्य नदियाद्वीपस्य दृष्ट्वाऽखिला
लोटन्तौ रजसि स्वतो नृवनिता जातास्त्ववाचस्तथा ।
पापानि त्वनयोर्दयालुनयना विस्मृत्य सर्वेऽभवन्
वह्न्याकर्षणमस्ति निश्चितमहो! तन्नम्रतायां भुवि ।। ११८१ ।।

यातो नास्य तथामधायिविषयो रोषस्त्विदानीमपि
'त्वा न क्षन्तुमहं मधो! तु विधितः शक्नोमि तावत्प्रभुः ।
गम्भीरस्वरतो जगाद 'कुपितो नाहं कदापि क्षितौ
स्थाने क्वाप्यपराधकर्तरि निजेऽभूवं भविष्यामि वा ।। ११८२ ।।

श्रीपादस्य तथापराधमकरोर्नित्यावधूतस्य तु
त्वं तेन क्षमितो यदीह, भवितुञ्छक्नोसि तन्मे प्रियः ।
यावत्क्षाम्यति नो यतिः स्वकृपया, दोषी तथैवासि मे,
याहि, त्वञ्छरणं गृहाण यतिकं, नित्योऽवधूतः प्रभुः ।। ११८३ ।।

अस्तव्यस्तमना विहाय चरणौ श्रुत्वा तथाज्ञां प्रभो—
र्नित्यानन्दपदे पपात तरसा गत्वा मधायी तथा ।
उच्चै रोदिति विह्वलः स्फुटतया, लज्जा कुकृत्ये निजे
तस्यात्मन्यनुभूयतेऽद्य महती, चित्तेऽमले स्पष्टता ।। ११८४ ।।

उच्चैः क्रन्दनमस्य सा विकलता तद्ग्लानिहेतोस्तथाऽ—
धीरस्यात्र बभूव, रोदनरवञ्छ्रुत्वाऽधुनास्य द्रवन् ।
ग्रावाऽभूच्च तथैव, दिक्षु परितो व्याप्ता तु निःशब्दता
सर्वाऽऽशैव मधायिरोदनविधेर्मन्ये द्रुता रोदिति ।। ११८५ ।।

आनन्दाद् विसस्मरुर्नु जनाः सर्वे तयोः पापिनो—
र्दृष्ट्वा नान्तु दशां, विदुर्नहि तदा स्वर्गेऽथवा स्मः क्षितौ ।
गौरप्रेमरसप्रवाहवशितास्तेऽभूतपूर्वं नवे
पश्यन्तो मधुदृश्यचित्रमभवन्, गौरो मधुं हन्ति नो ।। ११८६ ।।

नित्यानन्दपदे मधायिनममुं दृष्ट्वा निलीनं प्रभु—
र्ब्रूते नित्ययति'श्चकार मधुकोऽसौ तेऽपराधं यते: ।
श्रीपाद! प्रभुरेव चासि तदिमं क्षन्तुं, न मे तावती
कुत्रापि क्षमताऽस्ति नन्वभयतादानेऽपराद्धुस्तव ।। ११८७।।

ब्रूहि त्वं वदसीह किं ?' तदधुनाऽत्यन्तन्तु दीनात्मना
नित्यानन्दयतिर्जगाद 'भवतो रीति: सदेयं प्रभो! ।
उष्णीषं निजसेवकस्य यशस: शीर्षे निधत्ते,ऽनयो—
रुद्धारस्य निधातुमिच्छति भवाञ्छ्रेयोऽधुना मूर्ध्नि मे ।। ११८८।।

जानातीह तु सर्व एव, नदियागौराङ्गमात्रे परं
सामर्थ्यं मधुपापिनां वसति तूद्धारस्य चैतादृशाम् ।
संसारेऽत्र मधायिनं प्रति न मे विद्वेषभावोऽण्वपि
स्थाने स्वात्मनि विद्यते, निजहृदा चेदं ब्रुवेऽहं प्रभो! ।। ११८९।।

किञ्चिन्मे सुकृतं कदापि विहितं तज्जन्मजन्मान्तरे
भ्रातृभ्यां वितरामि पुण्यमखिलं तेषाममूभ्यामहम्' ।
श्रुत्वैतत्तरसा प्रधाव्य मधुकं स्वाङ्कं तमारोपयत्—
तस्यालिङ्गनमुच्चकैश्च विदधन्नूचे निमायी प्रभु: ।। ११९०।।

'अद्याऽभूर्नदियान्तरे मम मधो! चात्यन्तमेव प्रिय:
श्रीपाद: क्षमिता तवात्र निखिलं पुण्यं प्रदायात्मन: ।
चक्रे भागवतञ्च वैष्णवमयं द्वीपे नवं त्वां पर—
ञ्छ्रीपादेन कृतोऽसि पापरहितो भक्तोऽन्तरङ्गोऽद्य मे' ।। ११९१।।

प्रेमालिङ्गनकस्य तत्त्वधिगमाच्चाश्वासनस्य प्रभो:
सीमा नास्ति मधायिनो ननु मुदोऽसौ मूर्च्छितस्तत्क्षणम् ।
पेदे तत्प्रभुपादपद्मयुगलं मूलं प्रपन्नात्मना,—
मैश्वर्यं सकलं हि याति विलयं माधुर्यभावे सत: ।। ११९२।।

धूलौ तौ पतितौ धृतप्रभुपदौ द्वीपस्य सर्वाधिपौ
कुर्वन्तौ भुवि रोदनं ह्यभवतामेतावुभौ भ्रातरौ ।
भक्ता नागरिका नराश्च वनितास्ते मन्त्रमुग्धोपमा:
पश्यन्तस्त्वभवंस्तथाहि पतितोद्धारस्य दृश्यं त्विदम् ।। ११९३।।

तेषां सम्प्रति तृप्तिरेव न हृद: कम्पात्तु दृश्यादित:
स्वे पादे पतितौ च धूलिमलिनौ तौ भ्रातरौ तत्प्रभु: ।
प्रीत्योत्थापितवान् दिदेश निजकान् कर्तुञ्च संकीर्तनं,
स्थाने पावनकीर्तनं हि सरणी हर्षेऽथवा विस्मये ।। ११९४।।

दृष्ट्वैतादृशदीनताममलयोर्भ्रात्रोस्तयो: पापिनो:
सीमा विस्मयहर्षयो: सुमनसां नासीच्च भक्तात्मनाम् ।
कृत्वा सम्प्रति सम्प्रदायमखिला भिन्नं विभिन्नं तथा
मत्तास्ते हरिनादतो विदधिरे तालस्वरं कीर्तनम् ।। ११९५।।

स्थाने सम्मिलिता: पुरोऽत्र निखिला नार्यो नरा: कीर्तने
तेषान्तु प्रथमो हि कीर्तनदिश: संदर्शनस्य क्षण: ।
तद्भक्तै: सह तेऽपि सम्प्रति 'हरे! रामेति' सर्वे महा–
मन्त्रोच्चारणमद्य हर्षितहृद: कुर्वन्ति भक्त्यान्विता: ।। ११९६।।

आरब्धञ्च मृदङ्गतालमुरजध्वानं मनोज्ञं तदो–
न्मत्ता: कीर्तनसंयुता: प्रमुदिता नृत्यन्ति भक्तास्तथा ।
मध्ये गौरहरेर्जयध्वनिगिराऽगुञ्जन्नभोमण्डलं
तत्काले हरिकीर्तनेऽद्य ददृशेऽपूर्वा विशेषच्छटा ।। ११९७।।

सर्वे प्रेमविमोहिता इव तदा, स्वेदादिभावोदय:
सर्वेषाञ्च बभूव कीर्तनरवाद्गौराङ्गशुद्धात्मनाम् ।
कुर्वन्तो हरिकीर्तनं सुमनस: प्राप्ताश्च गेहं प्रभो–
र्नीतभ्रातृयुगा: समाधवजगन्नाथास्तथासङ्गता: ।। ११९८।।

जगायि–मधायि–प्रपन्नता

७४. अभयञ्छ्रीप्रभुशरणं यच्छति ।
किंकर्तव्यविमूढप्रपन्नशरणागमनाश्वास:
'नारायण'–सुतनामोच्चारणमार्तं रक्षति यमत: ।
शरणागतरिपुरावणसोदरमात्मशरणविन्यासात्
स स्वीकुरुते सह घोषणया 'मे व्रतमागतवरणम्' ।।

मातैका परमा तथाहि भगवद्भक्ता च वृन्दावने
साधुश्रीप्रभुदत्तलेखकवरं ह्यूचे तथैतां कथाम्– ।
भक्तानां भयभञ्जको हि भगवान् भामादिभि: संवृतो
भुञ्जानोऽस्ति च भव्यभोजनगृहे श्रीद्वारवत्यां हरि: ।। ११९९।।

आसीदेकविशेषकाञ्चनमये पट्टे हरि: संस्थित:
स्वादुव्यञ्जनमत्र सज्जितमभूत्स्थालेषु नानाविधम् ।
नानापेयपदार्थजातमभवद्दत्तं कटोरासु तत्
कुर्वाणा व्यजनानिलं स्थितवती श्रीरुक्मिणी सम्मुखे ।। १२००।।

सर्वाऽन्या ननु तत्र पट्टमहिषी स्थाने निषण्णा पुरो
भुञ्जानः सहसा तथाहि भगवान् कृष्णो व्यरंसीद् गृही ।
ग्रासस्तस्य मुखस्य सम्प्रति मुखे हस्तस्य हस्ते तथा
तस्थौ स्तम्भित एव चासनगतो निर्जीवमूर्तिर्यथा ।। १२०१ ।।

तस्याम्भोजसमप्रफुल्लितमुखं जातं क्षणान्म्लानतां
पश्यन्नस्ति तथाश्रुपूरितदृशा श्रीरुक्मिणीसम्मुखम् ।
त्रस्तास्तत्र विलोक्य तं भगवतो भावं महिष्योऽखिलाः
पश्यन्त्यास्यममुष्य भाविसमयाऽऽशङ्काभयेनाऽऽकुलाः ।। १२०२ ।।

मन्दं कम्पितकण्ठतो हि सभया पृच्छत्यमुं रुक्मिणी
'कस्मात्ते क्षणतो दशेयमधुना जाता ? तथा ज्ञायते ।
कस्मिंश्चित्परमे प्रिये तव तथाभक्तेऽपतद्वै विपत्—
तस्मात्खिन्नमुखस्त्वियन्ननु भवान्, सत्यं कथं मेऽनुमा'? ।। १२०३ ।।

'सत्या तेऽनुमितिस्तु' रुक्मभगिनीं पश्यञ्जगाद प्रभुः
साऽधीरा द्रुतमेव पृच्छति, 'महाभागस्य भक्तस्य तत् ।
हे प्राणेश्वर! नाम तस्य विपदं ज्ञातुं त्वरा चास्ति मे'
पृष्टो भीष्मककन्ययैव भगवानूचे विषण्णस्वरः ।। १२०४ ।।

'चीरं कर्षति राजसंसदि महादुष्टो हि दुःशासनः
पाञ्चाल्या निजपूज्यवृद्धजनतालोकान्वितायां तथा ।
इच्छत्यत्र पतिव्रतां गुरुजने नग्नां विधातुञ्च ता'—
ञ्छ्रुत्वा तद्द्रुपदात्मजार्तिमबलापक्षीयवार्तामिमाम् ।। १२०५ ।।

सार्धं भीरुतयाऽतिकातरतया स्थानेऽवदद्भीष्मजा
'तत्किं चिन्तयते? कथन्न कुरुते? तस्याः सहाय्यं द्रुतम् ।
तल्लज्जाऽस्तु सुरक्षिता ननु यतो, नारीञ्च दीनां प्रभो!
शीघ्रं रक्षतु नाथ! मेऽत्र हृदयं तद्दुःखतो वेपते' ।। १२०६ ।।

ऊचे गद्गदकण्ठतस्तु भगवान् 'कुर्यां सहाय्यं कथं,
दन्तैः सोऽस्ति विगृह्य सम्प्रति निजं चीरैकभागं स्थिता ।
धत्ते दन्तसहायतां, नहि तु मां सा सर्वतोभावतो,
(यावद्वस्तुनि तिष्ठतीह ममता तावन्नहि स्वस्थितिः) ।। १२०७ ।।

सर्वाशां हि विहाय यावदधुना मय्येव नो निर्भरा
स्यात्तस्यास्तु सहायतां कथमहं तत्कर्तुमेव क्षमः' ।
एवं द्वारवतीश्वरे वदति सा बुद्ध्वाऽसहायं स्वकं
सर्वेभ्योऽकृत निश्चयं भगवतो धर्तुं तथैवाश्रयम् ।। १२०८ ।।

आस्यान्निःसृत एव य'त्कृषि' ततश्चीरन्तु दन्तान्तरा–
न्मुक्तं, 'णा'ऽक्षरपूर्वमेव भगवांस्त्यक्तेऽत्र दन्ताश्रये ।
साक्षात्तावदुपस्थितो द्रुपदजाचीरञ्चकाराऽक्षयं
तस्यैव प्रभुनीतिवर्णनकविः श्रीसूरदासोऽभणत् ।। १२०९ ।।

७५. (अ) श्रुतमिति निर्बलबलमिह रामः ।

अबलारक्षणपरिणयविधितो नरवरकन्यादानम्
शूरधुरन्धरपञ्चपतिष्वपि कालक्रूरविलासः ।
द्रुपदसुताऽबलतास्फुटता यद्बलपूर्वकमभिनीता
नीतिविवेकरहितनृपसंसदि क्षत्रियवृद्धसमक्षम् ।
अन्धभूपपरिषदि दुःशासनचीराकर्षणवृत्तौ
श्यामेऽनन्तचीरावतारे श्रान्तोऽतुलबलबाहुः ।

यावद्वै स्वबलाऽऽश्रयो भुवि नृणां, मत्वा स्वमेव स्थितो
यावद्वै बलिनं समर्थमपि स स्थानेऽत्र तावत्कथम् ।
कुर्यात्तस्य सहायतान्तु भगवांस्तन्निर्बलानां हरि–
र्हर्ताऽकिञ्चनधर्मिणाञ्च विपदां, सूरेण चोक्तं ततः ।। १२१० ।।

७५. (आ) श्रुतिमिति निर्बलबलमिह रामः ।

बलमात्मा तु ज्ञानवतामिह तपोबलं युक्तानाम्
बलमिह बाहुः स्थूलमतीनां द्रव्यञ्चाऽऽदातॄणाम् ।
अखिलं काले सिध्यत्यबलं, सूरकिशोरकृपातः
सर्वेषामपि बलतासिद्धिः,'नाम'बलं संस्मरताम् ।।

अन्यायेन तथार्जितं धनमभूत्पार्श्वे यथेष्टं पुन–
र्देहः सोदरयोस्तथा जग–मधु–भ्रात्रोः सुपुष्टस्तयोः ।
द्वीपे शासकपक्षतो ननु नवे प्राप्तोऽधिकारस्ततः
कर्तारं निजमेव सर्वविधितो मत्वा तथाऽऽस्तां मदात् ।। १२११ ।।

आसीत्तद्द्वयदूरमेव निभवन् प्रेमी तथापि प्रभुः
किन्त्वेतौ ननु यत्क्षणेऽत्र निखिलं प्राप्ताधिकारं बलम् ।
विस्मृत्याभवतां बलेन रहितौ स्थाने तथाऽकिञ्चनौ
तस्मिन्नेव भुवः क्षणे स्वशरणे जग्राह तौ श्रीप्रभुः ।। १२१२ ।।

तस्मात्तौ क्षणमात्रिकोपशमनाज्जातौ कृपाभाजनौ
प्राचीनौ ननु सर्ववैष्णवसतामाजन्मतः पापिनौ ।
अस्त्येवं शरणागतौ शुभचमत्कारः प्रपत्तौ तथा
कुर्यात्तस्य 'तवास्मि' शुद्धहृदयादुक्त्वाऽर्थनां यत्क्षणे ।। १२१३ ।।

स्वं तत्रैव तमर्थिनं स कुरुते चात्मीयरूपं क्षणे
भक्तानान्तु कृते बुभुक्षुरिव स स्थाने सदाऽस्ति स्थितः ।
लोकानां मुखमुन्मुखो भवति वै पश्यन् वदेत्साम्प्रतं
यत्कोऽप्यत्र तथा तवास्म्यह,महो! को वा दयालुस्तथा ।। १२१४।।

मिथ्यैव पुत्रमिषतोऽत्र जगाद शब्दं
'नारायणं' परमजामिलनामपापी ।
एतावतैव हरिरस्य चकार रक्षा—
माजन्मसञ्चितमघञ्च तथाऽक्षमिष्ट ।। १२१५।।

प्राप्ता भक्तगणा जगायिमधुकौ नीत्वा स्वसङ्गे प्रभो—
र्गेहं,तत्र तथा स्थिता ननु यथास्थानं प्रभुप्रेमिणः ।
एकस्मिंश्च विराजितः प्रभुरयं स्थाने तथोच्चासने
नित्यानन्दगदाधरौ विलसितौ भागे प्रभोर्दक्षिणे ।। १२१६।।

वृद्धाचार्यगुरुः पुरश्च लसितोऽद्वैतस्ततोऽन्ये तथा
श्रीविद्यानिधिपुण्डरीकगरुडश्रीवासगङ्गाधराः ।
श्रीवक्रो हरिदासचन्द्रललितौ सेदू रमापण्डित—
स्तेऽनेकेऽपि तदा प्रभुन्तु परितो मध्ये च तौ भ्रातरौ ।। १२१७।।

मुञ्चन्तौ नयनाश्रु निम्नवदनावास्ताञ्च जग्गामधू
ज्वालेवाङ्गसमूहतोऽत्र ददृशेऽद्धा निःसरन्ती तयोः ।
पश्चात्तापविषादयोः, पुलकितं भ्रात्रोः शरीरं भव—
च्चासीत्तौ प्रभुनित्ययोरतिकृपाभाराद्ध्वसन्तौ यथा ।। १२१८।।

नो देहस्य तयोः प्रतीतिरधुना दृष्ट्वा विषण्णौ प्रभु—
स्तावूचे 'भगवत्कृपाऽद्य युवयोर्जाताऽद्भुता भ्रातरौ! ।
श्रीपादः समवेतयोरकृत तां नित्यावधूतः कृपां,
निष्पापौ यदभूस्ततस्त्यजतमाः! शोकञ्च मोहन्तथा' ।। १२१९।।

श्रुत्वा गद्गदकण्ठतः प्रभुवचस्तौ भ्रातरावूचतुः
क्रन्दन्तौ तु, 'तथावयोः पतितयोरुद्धारमद्य प्रभो! ।
कृत्वा, नाम यथार्थतोऽकृत निजं पापात्मनां पावनं
स्पष्टं सम्प्रति सार्थकं ननु भवान्, (गौरो हि पापिप्रियः) ।। १२२०।।

नासीत्काचिदजामिलस्य तरणे ते वै प्रशंसा, यतः
सर्वाऽघक्षयकारि 'नाम' भवतो 'नारायणेति' स्फुटम् ।
तेनाक्तं चतुरक्षरन्तु, गणिका स्वं पाठयन्ती शुकं
तस्योच्चारणमेव सा कृतवती 'रामेति' नाम्नोऽमृतम् ।। १२२१।।

केनाऽप्यस्तु, भवत्त्वभूच्च भगवन्नाम्नो हि तज्जिह्वया
तत्रोच्चारणमेव, नामजपनं वर्ष सहस्रावधिम् ।
वाल्मीकिस्तु विलोममेव कृतवान्, जातं त्ववश्यं भवेद्
बीजं, वा सरलं पतेदसरलं, कस्मात्प्रकारादपि ।। १२२२ ।।

कंसोऽघासुरशम्बरासुरबकाः कुम्भश्रवा रावणो
दन्तास्यः शिशुपालकादिरसुराः सर्वे तथा राक्षसाः ।
चक्रुस्ते तव रूपचिन्तनमहोऽस्तु द्वेषबुद्ध्यैव तु
स्वप्ने जाग्रति सर्वदा तु विहितं ध्यानं स्थितावुत्थितौ ।। १२२३ ।।

एतेषां भवितव्यमेव जगतो बन्धात्तथा मोचनं
ते मुक्तेरधिकारिणो हि भगवत्सम्बन्धिहेतोः परम् ।
दीनानाथ! कृपासमुद्र! पतिताऽऽधारैकमात्रप्रभो!
हेऽनाथावन! पापिनाविक! निराधारक्षमाधारक! ।। १२२४ ।।

विस्मृत्यापि कदापि 'नाम' भवतो नौ नो गृहीतं तथा—
पापिभ्यां, ननु पापकर्मणि सदा मत्तौ प्रवृत्तावुभौ ।
नासीज्ज्ञानमपि त्वदीयविषये किञ्चित्परन्त्वावयोः
कृत्वाऽनुग्रहकं प्रदर्शितमिदं प्रत्यक्षमेव त्वया ।। १२२५ ।।

संसारे भजनं करोतु यदि वा कश्चिन्न कुर्यात्प्रभोः
पापी कोऽपि न किं कियानपि महान् स्याद्वै, प्रभुः कर्हिचित् ।
कर्ताऽस्योपरि नूनमेव च कृपान्तु प्रार्थयावः प्रभो!
भोक्तुं तन्निजसर्वपापमधुना देहि क्षणं त्वावयोः ।। १२२६ ।।

यावच्चार्बुदखर्ववर्षमथवाऽसंख्यन्तु संवत्सरं
भोक्तुं भीषणनारकीयविपदश्चावां स्वतन्त्रौ कुरु ।
शक्ष्यावो नहि ते त्वहैतुककृपामेताञ्च सोढुं तथा
नौ हे नाथ! दलद्यथाऽस्ति हृदयं, (भानौ हिमं सीयते) ।। १२२७ ।।

एतावती प्रभुकृपावरपात्रता नो
नौ कोटिजन्मभिरपीह कदापि शक्या ।
यावत्प्रदर्शयसि भोरधुनाऽवयोर्वै,
सिंहीपयो जगति तिष्ठति हेमपात्रे ।। १२२८ ।।

ह्यः पर्यन्तमभून्न पानविषयादन्यस्य किञ्चिद्वयो—
र्ज्ञानं तादृशबोध एव, चकितास्तस्थुर्निशम्याऽखिलाः ।
ताभ्यामेव विलक्षणस्तुतिमिमां, पश्यन्ति तेऽन्योन्यकं
साश्चर्यं, प्रणतिं जगौ प्रभुपदेऽद्वैतस्तदैवामुना ।। १२२९ ।।

७६. मूकं कुरुषे त्वं वाचालम् ।
माधव! परमानन्दनिकेतन! नवनीरदघनसुन्दर!
आत्मेच्छाकृतिकृपात्रिभङ्गैस्तनुषे जगद्विचित्रम् ।
सुप्तं स्तब्धं भुवि तूष्णीकं वाग्बोधनप्रगल्भम्
वक्ररुचिरवाणीविन्यासात्समलङ्कुरुषे कञ्चित् ।
वाचालं बुधपरिषद्रञ्जकचितिमन्तं मानवमपि
तं मूकं जडभरतं कुरुषे नौमि कृपां ते त्रिविधाम् ॥

ऊचे सम्प्रति तां मधायिजगतोः श्रुत्वा स्तुतिं तौ प्रभु—
'भक्तानां चरणौ तथाऽत्र नमतं स्थाने युवां भ्रातरौ ।
तेषां पादरजोभिरेव पुरुषः पापोऽपि पापात्तथा
पुण्यात्मा ननु पावनश्च भवितुञ्छक्नोति भावात्मना' ॥ १२३० ॥

लब्ध्वाऽऽदेशमतोहि भक्तचरणौ तौ क्लेदयन्तौ दृशो—
र्वाष्पैस्तन्नमनं क्रमात्सुमनसामच्छात्मनां चक्रतुः ।
सर्वे 'भागवतस्तथाऽस्तु परमः' सर्वोत्तमन्त्वाशिषं
भ्रातृभ्यां प्रददुर्हृदा, समतया सन्तश्चरन्ति क्षितौ ॥ १२३१ ॥

शान्त्यै चिन्तितवांस्तयोः प्रभुरहो! सम्प्रत्युपायान्तरं
सर्वेषामघजालकं भगवतीभागीरथी मूलतः ।
उत्पाट्य ध्रुवमेव नाशयति सा, माता पयोवाहिनी,
यातुं सम्प्रति जाह्नवीतटमतः सर्वानवोचत्प्रभुः ॥ १२३२ ॥

आसीद्ग्रीष्मदिनं हि चन्द्रधवला साऽपि त्रियामाऽमला
केचिद्वै शयितास्तथा च शयितुं केचिज्जनाः प्रस्तुताः ।
तस्मिन्नेव निशाक्षणेऽत्र पुरतः कृत्वा तु तौ भ्रातरौ
भक्ताः कीर्तनगाननृत्यनिरताः स्नानाय चेलुस्तटम् ॥ १२३३ ॥

श्रुत्वा तज्जयकारशब्दतुमुलं संकीर्तनस्य ध्वनिं
गङ्गाजीपुलिने सहस्रजनता नारीनराः सङ्गताः ।
आयातस्तदवस्थ एव कतिचित्खट्वोत्थितस्तत्क्षणं
वस्त्रोर्ध्वग्रहणं विना कतिपयो धावन्नदन्नेव तु ॥ १२३४ ॥

पत्नी स्वं पतिकं विहाय जननी पुत्रञ्च गेहे वधूः
कृत्वा श्वश्रुननान्दृहेलनमहो! द्रष्टुन्तु संकीर्तनम् ।
धावन्त्यः क्षणमागताश्च मिलिता भक्तैः समं कीर्तने
तत्राऽपूर्वविशेषकर्षणवशा याता निजात्मस्मृतेः ॥ १२३५ ॥

कृत्वा कीर्तनरोधनं प्रभुरतो नीत्वा च तौ भ्रातरौ
सङ्गे मातृनदीजले स्वयमयं स्थाने जगाहेऽपरे।
नित्यानन्दगदाधराद्वयगुरुश्रीवासभक्तादिकः
सर्वोऽप्यत्र जलप्रवेशमकरोद्, बोधः समाऽऽधारतः ॥१२३६॥

तावूचेऽम्बुगतः प्रभु'र्ननु जगन्नाथाऽधुना माधव!
स्वे स्वे हस्तयुगे युवां सुसरितो गृह्णीतमच्छाम्बुकम्'।
तामाज्ञामधिगम्य तौ जगृहतुर्गङ्गाम्बु हस्तद्वये
गम्भीरस्वरतस्ततः प्रभुरयं स्निग्धं दयार्द्रोऽवदत् ॥१२३७॥

'अस्मिंश्च जन्मनि पुरा ननु कोटिसंख्ये
जन्मान्तरेऽघमकरोर्यदपीह चौभौ।
दानेन दत्तमधुना सकलन्तु मह्यं',
दातुः कदापि समता भवति ग्रहीतुः ॥१२३८॥

दैन्येनातिशयेन कातरगिरा तत्प्रक्षिपन्तौ द्रुतं
स्थाने हस्तजलं तथा जगदतुस्तौ भ्रातरौ सोदरौ।
'दीर्णं नौ हृदयं भविष्यति विभो! चावां म्रियेतां प्रभो!
घोरं कर्म पुनस्तथेदमधुना कर्तुञ्च नौ माऽऽदिश ॥१२३९॥

शक्ष्यावस्त्वियतीं कृपाञ्च भवतः सोढुं कदापि प्रभो! ?
दीनानुग्रह! यत्र पादयुगले नित्यं हि भक्ता जनाः।
नाना वासितचन्दनञ्च कुसुमं प्रेम्णार्पयन्ति क्षितौ
तत्रासंख्यनिजाघदानविधिकं स्थानेऽत्र नौ माऽऽदिश ॥१२४०॥

कर्ता धिक्कृतिमत्र नौ जगदिमौ यत्पामरौ प्राणिनौ
चक्राते निजपापपुञ्जतरणञ्छ्रीपादपद्मे प्रभोः।
यावोऽधः श्रुतिमात्रतो, वितरणं पापस्य दूरं, तथा—
कर्मेदं नहि सम्भवं कथमपि भ्रात्रोः कदापि प्रभोः' ॥१२४१॥

ऊचे धैर्यनिबन्धनार्थमनयोर्गौरप्रभु'र्भ्रातरौ!
चिन्ता माऽस्तु तथाह्यघग्रहणतः स्यां पावनः प्रेमिणोः।
तज्जन्मग्रहणं भविष्यति च मे द्वीपे नवे सार्थकं
संकोचं कुरुतं नही'ति वचनञ्छ्रुत्वा तथेदं प्रभोः ॥१२४२॥

नित्यानन्दयतिर्जगाद तदिमौ स्वस्नेहिनौ भ्रातरौ
'संकोचं कुरुतं न चेयदधुना सोऽयं जगत्पावकः।
पापोऽमुष्य तु किन्नु हानिकरणे शक्ताऽत्र कालत्रये ?
संकल्पं कुरुतं निजाघजगतस्त्रैलोक्यपापापहे' ॥१२४३॥

क्रन्दन्तौ वचनं निशम्य तदिमौ नित्यस्य तौ भ्रातरौ
गङ्गावारि पुनः करे ज़गृहतुर्नित्यावधूतः स्वयम् ।
संकल्पन्तु पपाठ, लोकविधितो हस्तौ प्रसार्य प्रभुः
सर्वाघग्रहणञ्चकार नदियाबन्धुस्तयोः स्वात्मनोः ।। १२४४।।

आदर्शोऽस्ति विलक्षणो ननु कियान्? पापात्मनां पावनो
गौराङ्गः कथितस्त्वघग्रहणतो द्वीपे परेषां नवे ।
धृत्वा पापमथाऽनयोः प्रभुरसावूचेऽधुना 'भ्रातरौ
निष्पापौ परमप्रियौ मम युवां जातौ तथावैष्णवौ ।। १२४५।।

तच्चाद्यप्रभृति स्मृतेस्तु युवयोः प्राचीनपापस्रजां
कर्ता कोऽपि घृणां स वैष्णवसतां द्रोही त्वबोधिष्यत ।
तस्य स्यान्ननु वैष्णवापकृतिनां घोरं तथापातकं',
तौ कण्ठेन पुनः प्रभुर्लगयति स्थाने तथेदं ब्रुवन् ।। १२४६।।

प्रेमालिङ्गनलब्धितः प्रभुसतः संमूर्च्छितौ तावपि
श्रीगङ्गाम्बुनि पावनेऽत्र पतितौ, पूतः पुनः पूयते ।
काले तप्तसुवर्णवर्णतनुकं कृष्णं प्रतीतं मनाक्
तत्रात्यन्तहृदन्तरङ्गमनसां गौरप्रभोः प्रेमिणाम् ।। १२४७।।

(तत्पापग्रहणादिदं कथमहो! गौराङ्गकृष्णायितं ?
किन्तु प्रेमनिमग्नमंत्तमनसां तिष्ठेत्प्रतीतिस्तथा) ? ।
तत्पश्चान्निखिला बहु त्रिपथगास्नानं मुदा चक्रिरे
कुर्वन्तोऽम्बुनि पावने त्रिजगतः क्रीडामतीयुः क्षणम् ।। १२४८।।

यातेऽर्धरात्रिसमयाधिकमत्र काले
सर्वे ययुर्निजगृहं न तु तौ स्ववासम् ।
तस्मादिनान्ननु जगायि-मधायिसंज्ञौ
श्रीवासपण्डितगृहे सुजनौ निषेदुः ।। १२४९।।

जगायि-मधायि-पश्चात्तापः

७७. राधाकान्तः किं नाराधि ?
ललितोचितमधुरेश्वरतायुतचरितमुदारघनाभम्
हृदय! रसामृतवितरणनिपुणं मिलितं साधनमन्यत् ?
शेषशयनसततोद्यतरक्षणकेवलसात्त्विकमूर्तिः
सुभक्तभक्तिविलक्षणकीर्तिर्माधवोऽपि वा पेयः ।

आशुतोषभवशङ्करकरुणाधृतलिङ्गाकृतिभक्ति:
अर्चनवन्दनसेवनविधिना सुकरा वाऽऽचरणीया ।
मधुरभावना भक्तिसाधना सेवा शरणावाप्ति:
दुर्लभनरतनुकेवलसाध्या सर्वाऽभयतासिद्धि: ॥

यच्चित्तं मलिनं पुनर्ननु पुन: कुर्वत्त्वघं जायते
पश्चात्तापतपोऽर्चिरत्र किमपि स्यान्न प्रभावि ध्रुवम् ।
वस्त्रेऽत्यन्तसितेतरे नहि मसीचिह्नप्रतीतिर्यथा
यावत्स्वच्छमथाम्बरं ननु मलप्रत्यक्षता तावती ॥१२५०॥

एवं निर्मलकोमले तु हृदये ज्वालाऽनुतापोऽधिक—
श्चोद्गच्छन् भवतीति, यस्य हृदयं यावद्भवेत्कोमलम् ।
येन स्वाघभरं निबुध्य वदनं सर्वक्षणायात्मन:
प्रत्यावृत्तमत: स्वपूर्वकुकृतौ तापश्च तस्याधिक: ॥१२५१॥

भावी श्रीप्रभुपादपद्मनिकटं तस्यानुताप: स वै
नेतुं किञ्च सहायको, नहि नृणामन्यो रिपुर्वा सुहृत् ।
यस्तापो भवतीह दु:खमथवा पापक्रियानन्तरं
पश्चात्ताप इतीर्यते ननु स वै, कर्तुस्तथाऽस्य स्मृते: ॥१२५२॥

दु:खं कर्मणि कुत्सिते नहि निजे, यस्यानुतापश्च नो
मिथ्याऽनर्थकरात्मनां स्ववचसां, जीव: स तु स्थास्यति ।
तल्लोकेन्द्रियलिप्सुयोनिचरक: सन्नारकीय: सदा,
कामं निष्कृतिसाधनं प्रभुकृपा तस्यास्तु वा, नान्यथा ॥१२५३॥

संमार्ज्यात्र मलं हृदो विमलतां सूतेऽनुतापस्तथा
पश्चात्तापरसायनं कुकृतिनां सर्वोत्तमश्चौषधि: ।
पापाब्धौ त्विह मज्जतां ननु नृणां पोत: स वै चान्तिमो,
धन्यास्ते पुरुषा: स्वदुष्कृतिकृतेऽद्धा येऽनुतप्ता: स्वत: ॥१२५४॥

नित्यानन्दनिमायिनो: सुकृपया भ्रात्रोरभिन्नात्मनो—
स्तत्र भ्रातृजगायिमाधवहृदोर्जातं हि कायान्तरम् ।
यस्माद्गेहकुटुम्बयोर्न किमपि भ्रात्रोस्तयो रोचते
त्यक्त्वा सर्वमिदं सदैव सुजनश्रीवासगेहे स्थितौ ॥१२५५॥

कुर्वन्तौ भवतो जपं भगवत: श्रीकृष्णसंकीर्तनं
नित्यानन्दनिमायिदर्शनफलञ्छ्रीवाससत्सङ्गति: ।
गङ्गास्नानमिमौ सदैव कुरुत: प्रत्यूषकालोत्थितौ
नित्यं तन्नियमेन 'नाम' जपतो लक्षद्वयञ्छ्रीहरे: ॥१२५६॥

वाष्पैरेव बभूवतुर्ननु तयोः क्लिन्ने सदा लोचने
स्मृत्वा वृत्तमतीतमेव भवतोऽधीराविव भ्रातरौ ।
अन्नं पानमथानयोर्विषसमं, केनापि वार्ताऽथवा
नात्तो नो वदतो दिवानिशमिमावश्रूणि वै मुञ्चतः ।। १२५७।।

श्रीवासः कुरुते स्म भोक्तुमनयोर्भूयोऽधिकन्त्वाग्रहं
ग्रासः किन्तु गलस्य नावतरति स्थाने ह्यधः कर्हिचित् ।
वारम्वारमिमौ प्रबोध्य मृदुहृच्छ्रान्तोऽवधूतः परं
भोक्तुं नाकुरुतामुभौ किमपि तत्स्वीकारमेवाधुना ।। १२५८।।

नित्याऽऽहूतमहाप्रभुर्मृदुकरौ पृष्ठेऽवदच्चालयन्
'पापं तत्तु मया गृहीतमखिलं स्थानेऽत्र वां भ्रातरौ! ।
निष्पापावपि भोजनं न कुरुतः सन्तौ कथञ्च क्षितौ,
विश्वासो मयि नास्ति किं?, स्वमघकं दत्तं न वा वस्तुतः?' ।।१२५९।।

दैन्येनातिशयेन तज्जगदतुस्तौ बद्धपाणी 'प्रभो!
विश्वासस्त्वयि पूर्ण एव, रुदिवः पापाय नो चात्मनोः ।
पापानां फलभोजनं यदि भवेत्तन्नौ प्रमोदः परं
ते निर्व्याजकृपोपरीह सततञ्चाद्यावयो रोदनम् ।। १२६०।।

एवं यन्ननु मादृशोः पतितयोश्चक्रे त्वपूर्वां कृपा—
मायाति स्मरणं तदीयमधुना स्थित्वा, क्षणे तत्क्षणे ।
तद्वाष्पं नहि रुध्यतेऽपि यततोर्भ्रात्रो'स्तथासङ्गिनो—
र्नानाऽऽश्वासनदर्शनं प्रभुरदा,त्स्थाने हि दत्तस्थितिः ।। १२६१।।

तस्याऽऽश्वासनतस्तथाल्पमधिकञ्छान्तो जगायी परं
यातोऽल्पं न मधायिनः कथमपि स्थानेऽनुतापस्तथा ।
साऽऽयाति क्रमशः स्मृतौ तु घटना भूयश्च भूयो यथा
चक्रे नित्यनिरागसोऽदयतया शीर्षे प्रहारं यतेः ।। १२६२।।

एतस्य स्मृतिमात्रतोऽस्य घृणया स्वस्मिंश्च रोमोद्गति—
र्दीर्घं रोदिति तत्स्फुटञ्च 'कियती हा! नीचता मे कृता ।
दत्तं नित्यमहात्मनेऽतिविपुलं कष्टं तथाऽकारणं,
(यद्धेतौ सति चित्रमस्ति विविधं किं स्यादहेतोः पुनः) ।। १२६३।।

चक्रं तच्च सुदर्शनं भगवतोऽच्छेत्स्यत्तदाऽऽगत्य मे
शीर्षं, नित्ययतिर्वधन्तु यदि वा कुर्यात्ततो धन्यता ।
दूरं वा हननं कटूक्तिकथनं तत्राऽवधूतो महा—
ञ्छ्रेयः प्रत्युत स प्रभुन्तु सुमना मे मानोऽभवत् ।। १२६४।।

आसीत्प्रसन्नमनसा शुभमेव कांक्षन्,
तत्कीर्तयन् भगवतः प्रियनाम मेऽसौ' ।
एवञ्छुचौ स भवतीह सदा मधायी,
चिन्ताऽपि चिन्तनसमा हितकृत्कदाचित् ॥ १२६५॥

एकस्मिन् दिवसे ततो मधुरयं जग्राह गत्वा रहः
पादौ प्रार्थितवांस्तथा ननु रुदञ्छ्रीपादनित्यप्रभोः ।
'अत्यन्तं ननु पामरोऽस्मि, विहितं घोरं मयाऽघं प्रभो!
तत्पापान्यखिलानि सम्प्रति परं विस्मर्तुमप्यस्मि तु ॥ १२६६॥

आघातस्त्वयि यत्कृतो यतिवरे विस्मारितोऽप्यत्र न
स्थाने याति स विस्मृतिं मधुहृदो यावत्त्विदानीं यते ।
विस्मर्तुं, ननु तावदेव हृदयस्यान्तो विशन् याति स
क्षिप्रं निष्कृतिसाधनं किमपि मे ब्रूह्यस्य तन्निश्चितम् ॥ १२६७॥

यावन्नास्य वदिष्यतीह कमपि स्थाने ह्युपायं भवां-
स्तावद्धार्दिकशान्तिरस्य भविता प्राप्ता न मे कर्हिचित्' ।
नित्यानन्दयतिर्मधायिवचनञ्छ्रुत्वा जगाद प्रभु-
'भ्रातस्त्वां नु वदामि सत्यमपरं, (सत्याऽवधूतस्थितिः) ॥ १२६८॥

दुर्भावो नहि लेशमात्रमपि मे कोऽप्यात्मनि त्वां प्रति
क्रुद्धोऽहं त्वभवं तवोपरि नहि स्थाने तदानीमपि ।
दुःखञ्चेद्धृदये तवास्ति, कुरु तच्छान्त्यै तपःसाधनं
सन्तापस्तपसैव सर्वविधिकः सत्प्राणिनां लीयते ॥ १२६९॥

दुःखं शोकभये तथाऽऽन्तरमनःक्षोभो विकारोऽखिलो
दूरं तत्तपसैव याति, नियतं सिद्धेर्हि मूलं तपः ।
भक्तस्तापस एव चात्र भगवन्नाम्नोऽधिकारी जनः,
(संसारे तपसैव मानवतनुः प्राप्ता तपस्याकृते) ॥ १२७०॥

घाटं सुन्दरमेकमत्र घटय द्वीपस्य गङ्गातटे
यत्र स्नातु सदाऽखिलैव जनता तुभ्यं ददात्वाशिषः ।
तत्रैव त्वमपि स्थितोऽमलमना नम्रस्त्वमानी तथा
भूत्वा तिष्ठ तपश्चरन्', सहृदयः पुण्यैर्जनो जायते ॥ १२७१॥

आज्ञां नित्ययतिप्रभोर्ननु शिरोधार्यां विधायाऽऽत्मनो
हस्ताभ्याञ्च परिश्रमेण सरितो घाटं मधायी स्वयम् ।
गङ्गायाः पुलिनेऽत्र सुन्दरमसावेकं तथा निर्ममौ
निर्मायैककुटीमुवास यतिना शिष्टश्च तस्योपरि ॥ १२७२॥

स्नातुं स्त्रीपुरुषौ शिशुप्रवयसौ मूर्खस्तथा पण्डित—
श्चाण्डाल: पतितश्च योऽपि सरितो घाटेऽत्र चागच्छति ।
तस्यैवाङ्घ्रियुगं निगृह्य भवति स्वात्मापराधक्षमा—
प्रार्थी नम्रगिरा निवेदयति हृच्छुद्धो मधायी रुदन् ।। १२७३।।

'ज्ञाताज्ञातदशासु कोऽपि यदि ते जातोऽपराधो मया
कष्टञ्चापि कदापि कीदृशमपि द्वारा भवद्भ्यश्च मे ।
तेभ्योऽहं भवतां विनीतशिरसा याचे क्षमां पादयो',—
र्नम्रोक्त्याऽस्य रुदन्ति तेऽथ ददते कृत्वा गले चाशिष: ।।१२७४।।

शास्त्रेषूक्तमघे निजे ननु हृदो यस्यानुतापो भवे—
त्पापोऽस्य स्वत एव नश्यति चतुर्थांशोऽनुतापे कृते ।
लोकानां स पुर: प्रकाशयति चेत्स्पष्टं स्वपापक्रियां
नश्यत्यस्य पुन: प्रकाशनकृते: पापार्धभागस्तथा ।। १२७५।।

लोको य: स्वमनोमुदेऽघनिवहं संभाषते पापिना—
मंशोऽमुष्य चतुर्थकोऽस्ति चलित: पापस्य तस्योपरि ।
एवं सत्यतया त्वघप्रकटनाल्लोकेष्वमानी स्थितो
निष्पापो भवतीह पापकृदयं स्थानेऽनुतापात्तथा ।। १२७६।।

स्वदैन्यभावेन तथा महात्मना—
महेतुमप्राकृतयाऽनुकम्पया ।
गुणा हि सर्वे मिलिता: क्रमान्मधौ
भवन्ति ये श्रीभगवत्प्रियात्मनाम् ।। १२७७।।

७८. **सुहृद: साधुजना: खलु शान्ता: ।**
जन्ममृत्युशारीरिकधर्मं मनोभाविसुखदु:खम्
क्षुधातृषाभ्यामिन्द्रियदैन्यं शीतोष्णादिद्वन्द्वम् ।
प्रकृतिविकारं संसृतिचक्रं नैसर्गिकसिद्धान्तम्
देशकालविभिन्नस्वरूपं व्यक्तिभोग्यमनिवार्यम् ।
आत्मज्ञानोदारमनोभ्यां सर्वं साधुसमाज:
सहते परकारुणिको जनताऽकारणमित्रसमात्मा ।।

सन्तस्ते विषयोपभोगपरताभावं कदाप्यात्मनि
स्थाने नैव नयन्ति, तद्गुणगणाश्चायान्ति तत्र स्वत: ।
किं नायातु तदात्मकेषु ? भगवद्भक्तिप्रभावस्तथा
वास: स्थावरजङ्गमो भगवत:, सन्तो हि सर्वप्रिया: ।। १२७८।।

७९. देवाः! सद्गुणवसतिस्थानं भागवतानां हृदयम् ।
भगवति मार्गे चित्तं दृष्टिः केवलभगवद्भक्ते
भगवत्कृपाकटाक्षाकांक्षी तन्न्यस्तामलचेताः ।
गगनपतितजलमवनीमध्ये निम्नस्थाने तिष्ठति
अप्राकृतसद्गुणसमुदायः सच्चिद्वासं कुरुते ॥

एवन्त्वल्पदिनैर्मधायिभगवद्भक्तेस्तु गङ्गातटाद्
यावद्दूरतरं बभूव विषये ख्यातिर्नवद्वीपके ।
लोकास्तस्य विसस्मरुर्नहि परं प्राचीनमेवाघकं
तन्नाम्नः स्मरणं न चास्ति जनतामध्ये 'मधायी'त्यपि ॥ १२७९॥

नाम्नाऽद्य प्रथितिं गतोऽत्र विषये स 'ब्रह्मचारी' मधुः
कीदृक्पापभरक्षयेऽत्र भगवन्नामास्त्यमोघौषधिः ।
संसारेऽस्य रसायनस्य रसनात्पापोत्तमोऽपि ध्रुवं
पुण्यात्मा भवति द्रुतं, भगवतो भक्त्या हि सज्जीवनं ॥ १२८०॥

द्वीपेऽधुनापि वरभागवतस्य तस्य
स्थाने मधोः प्रथितनाम 'मधायिघाटः' ।
कुर्वंस्तथाऽमरमयं भगवत्सुगीत–
श्लोकोक्तिमुच्चरवघोषणया बिभर्ति ॥ १२८१॥

८०. भजते चेदपि सुदुराचारः ।
श्रुतिरपि यद्यपि नाचारादिह हीनं लोके पवते
व्यवहारैकप्राणसंसृतिस्तथोपनिषदाचारः ।
अज्ञानाद्वा हठप्रकृतितो यदि नाचारे तिष्ठति
पूर्वपुण्यतः सङ्गतितो वा नामनावमधिरूढः
स सम्यक्साधनव्यवसायी साधुरेव मन्तव्यः ॥

सज्जनभावः

८१. सज्जन! निजलक्षणमनुभावय ।
तृष्णानिवारणक्षमताधारणमदपापाऽनासक्तिम्
सत्यवादसत्पथानुसरणं विद्वज्जनप्रणयनम् ।
मान्याऽऽदरविद्वेषिसमादरनिजगुणजनहितभजनम्
साधुयशःपालनपीडितमतिदयनं सहृदयतान्तम् ॥

श्रीगौराङ्गमहाप्रभौ तु भगवद्भावस्य तां भावनां
ते केऽप्यत्र तदन्तरङ्गसुहृदो भक्तास्तथैवाऽऽदधुः ।
श्रेष्ठं भागवतञ्च वैष्णवबुधं सर्वे परं सज्जनं
बोधन्ते पुरुषन्तु तञ्च गुणिनं, ख्यातिः समाजस्थितिः ।। १२८२।।

आसन् सद्गुणशंसकाश्च निखिला, येऽकारणं द्वेषिण–
स्तेऽजस्यापि च निन्दनान्नहिं परं तिष्ठन्ति मौनं खलाः ।
एवन्तान्मलिनस्वभावपुरुषांस्त्यक्त्वा खलान्निन्दकान्
तस्याऽऽसंस्तु परे प्रभोर्ननु तथाऽऽसक्ता गुणैरुत्तमैः ।। १२८३।।

मर्यादा निजजीवने किमपि नो शास्त्रस्य तल्लङ्घिता
सामर्थ्येन युतोऽपि स स्वयमसौ चक्रे क्रियां सर्वथा ।
सर्वा लौकिकवैदिकीञ्च, जनताप्रोत्साहनं तत्कृते
मुख्यं किन्तु कलौ बुबोध भगवन्नामैव तत्साधनम् ।। १२८४।।

गार्हस्थ्ये ननु जीवने, तदपरं गौणन्तु कर्माऽखिलं
मन्वानोऽपि, मुमोच न स्वयमयं, तेषाञ्च नो कर्हिचित् ।
चक्रे खण्डनमेव, वेदविहितं संस्कारवर्गं तथा
संध्यातर्पणपितृकर्म निखिलं पर्व व्रतं तीर्थकम् ।। १२८५।।

कुर्वन्नस्ति च मन्यते, स्वयमसौ चैषां तथोपेक्षणं
चक्रे नाऽऽचरणेन कुत्रचिदपि स्थाने पुनश्चेष्टया ।
द्वीपे भागवतास्तथाहि परमाः सन्तोऽपि तस्यात्र त–
न्मर्यादापथपालनं सुमनसश्चक्रुश्च भक्ताः प्रभोः ।। १२८६।।

वासोऽद्वैतमुरारिपण्डितरमाचन्द्रादयस्तेऽखिला,
भावावेशदशां विहाय पुरतः कस्यापि नो कर्हिचित् ।
श्वश्लाघावचनं जगाद किमपि द्वीपेऽयमन्यत्र वा
स्वात्मज्येष्ठसमक्षमत्र सततं नम्रः स एवाभवत् ।। १२८७।।

अद्वैतनन्दनकशेखरवासमुख्यान्
सर्वानसौ प्रणमति स्म निजांश्च भक्तान् ।
वृद्धान् प्रबुध्य वयसोऽध्वनि पूर्वतो वै,
माहात्म्यसिद्धिरवनीव्यवहारतो नुः ।। १२८८।।

संसारे नियमोऽस्ति सन्ततमयं कस्यापि यद्वस्तुन–
श्चैकस्यैव भवन्ति यत्र बहवः स्थाने यदाहीच्छुकाः ।
तेऽन्योन्यन्तु तदा द्विषन्ति नियतं, तत्स्वेष्टवस्त्वर्जने
स्वल्पाशाऽपि भवेन्न चेत्तदपि वै, द्वेषस्तथाऽकारणम् ।। १२८९।।

तस्यान्यैर्भवतीच्छुकैर्हि,   नियम: स्वाभाविकोऽस्तीदृशो
लोके   चेन्द्रियभोग्यवस्तुयशसोरिच्छाऽखिलानां स्थिता ।
तद्यद्भोग्यपदार्थकप्रचुरताकीर्तिप्रसारस्तथा
तस्मै प्राकृतिकं द्विषन्ति तु   जना:, शान्तिर्नहि द्वेषिण: ।। १२९० ।।

तन्मैत्रीं   सुखिते   तथाहि करुणां भावं पुनर्दु:खिते
पुण्ये वै मुदितामघे सुमनसो   रक्षन्त्युपेक्षां   तथा ।
सामान्या धनिकं   प्रतिष्ठितमुदासीना   भवन्ति प्रति
प्रायो दुष्टहृदो मन:स्विनमहो!   निन्दन्ति सन्तं   परम्! ।। १२९१ ।।

कस्यापि स्तवनं   यदैव तु चतुर्लोकश्चकार क्षणा—
दीर्ष्या तद्हृदयान्तराज्ज्वलति वै लीना खलानां स्फुटम् ।
मिथ्यासत्यवच: प्रसार्य   कुरुते   लोकेऽत्र तेषां खलो
निन्दारम्भमतो   न   निन्दकदलात्त्रातोऽवतारी त्वपि ।। १२९२ ।।

श्रीगौराङ्गमहाप्रभोरपि तथा   कीर्त्या सरन्त्या यशो—
गन्धेन प्रसृतेन तच्च परित: क्षुब्धा:   परं   निन्दका: ।
निन्दाञ्चक्रुरमुष्य   ते   तु विविधं कोऽप्यत्र पाखण्डिनं
वामाचारमनूद्य तं निजहृद: कार्ष्ण्यं करोति स्फुटम् ।। १२९३ ।।

धूर्त कोऽपि   तथाहि जल्पति परो मायाविनञ्चापि तं
सर्वेषां सुमना: शृणोति   मनसि स्थाने जहास प्रभु: ।
चक्रे नो निजनिन्दकस्य वचसां   किञ्चिद्विरोधं, स्वत:
शंसां प्रत्युत   तु   स्वनिन्दकनृणां कुर्वन्नभूदेव स: ।। १२९४ ।।

तद्भाव: करुणाक्षमाशबलित: स्वद्वेषिणं प्रत्यपि
स्याद्बोध्यो घटनाद्वयेन   भविताऽद्धा भावकानामध: ।
मध्येपाठकमत्र   चास्ति विदितं   गेहं पिधायैव तद्
वासस्यौकसि   कीर्तनं चलदभू,त्साध्या रह: साधना ।। १२९५ ।।

यावद्वर्षमनेन चैव   विधिना संकीर्तनं प्राचलद्
द्रष्टुं दर्शनलिप्सवोऽत्र बहवश्चायान्ति,   सद्द्वेषिण: ।
निन्दन्त: पिहितं विलोक्य   तु गृहं निर्यान्ति संकीर्तनं,
श्रद्धालोर्हृदि धीरता वसति वै   नान्यस्य संसारिण: ।। १२९६ ।।

ईर्ष्याद्वेषवतां   तथाऽधमहृदां तत्राऽभवद् ब्राह्मणोऽ—
तिक्षुद्रप्रकृतिर्ह्यसाधुहृदयो   गोपालचापालक: ।
सोऽयं   क्षुब्ध इव प्रभोर्धवलया कीर्त्या सरन्त्या तथा
कर्तुञ्चाकृत   निश्चयं   स्वहृदये संकीर्तनं लाञ्छितम् ।। १२९७ ।।

प्राप्तो द्वारि तथाहि वासवसते रात्रौ स तत्रैकदाऽऽ—
सीद्द्वारं पिहितं तदन्तरचलत्संकीर्तनं तत्क्षणम् ।
चापालो निभृतं विलिप्य पुरतो द्वारस्य चाल्पस्थलं
चण्डीपूजनसर्ववस्तु निदधौ तत्र प्रसङ्गास्पदम् ।। १२९८।।

सामग्रीनिकटे तथा निहितवांश्चैकां पुनर्हण्डिकां
रक्तश्यामलपीतबिन्दुलिखितां, मद्यस्य पात्रं तथा ।
एकस्मिन्नपि भाजने च पललं, यातः स कृत्वेदकं
चण्डीपूजनवस्तु दृष्टमखिलैस्तैः कीर्तनानन्तरम् ।। १२९९।।

तत्प्रातो गृहनिःसृतैश्च निखिलं भक्तैस्तथैकत्रितं,
तत्रागत्य परस्परं कथयते वृन्दं खलानामपि ।
'विद्मः पूर्वत एव निश्चितमिमे कृत्वा स्वसङ्गे स्त्रियो
रात्रौ गेहमुखं पिधाय तु रवात्कुर्वन्ति तत्कीर्तनम् ।। १३००।।

अन्तस्तान्त्रिकवाममार्गविधिना कुर्वन्ति गुप्ता रहो
भैरव्या ननु चक्रपूजनमिदं प्रत्यक्षमेवाधुना ।
कालीपूजनवस्तु(पश्य)सकलं', ये तत्र वै सज्जना,
ज्ञातं तैर्ननु कार्यमेतदखिलं कस्यापि धूर्तात्मनः ।। १३०१।।

धूर्तं तादृशकं निनिन्द निखिलः स्थाने तथैकस्वरा,—
त्कृत्वा तालरवं जहास, वदति श्रीवासगेही जनान् ।
'चण्डीपूजनमेवमेव निशि तत्कुर्मो वयं भ्रातरः!
पश्यन्त्वद्य सतां स्फुटन्तु विदितं', धूर्ताः सताञ्छोधकाः ।। १३०२।।

संगृह्य वस्तु सकलं क्षणतश्च भक्तैः
क्षिप्तं विदूरमधुना, ननु गोमयेन ।
भूमिर्विलिप्य वरवारिकणैर्द्युनद्याः
संशोधिता, विमलतैव खलोपहासात् ।। १३०३।।

लोकैर्दृष्टमतोऽपरत्र दिवसे गोपालचापालके
सम्पूर्णे वपुषि स्फुटन्तु गलितं कुष्ठं तथास्त्युद्गतम् ।
तत्पूयश्च ससार पूतिबहुलः सम्पूर्णदेहाद्, व्रणे
कण्डूतिः पुनरेव, तेन सततं क्रोशत्ययं हाऽऽरवैः ।। १३०४।।

तत्संक्रामकरूपतोऽयमधुना लोकैर्बहिः सारित—
स्तद्गङ्गातटनिम्बपादपतले तिष्ठन् वराकोऽभवत् ।
एकस्मिन् दिवसेऽत्र दीनमनसा दृष्ट्वा जगाद प्रभुं
'गौर! त्वच्छरणं प्रभो! जगति मज्जातोऽपराधो महान् ।। १३०५।।

क्षन्तव्यो नहि किं ममायमधुना स्पष्टोऽपराधस्त्वया ?
कुर्वंस्त्वं जगतोऽप्यथास्य कुरुतोद्धारं तथापापिन: ।
त्वञ्च ग्रामधरानुबन्धनविधेर्मे भागिनेयस्ततो
दीनेऽस्मिन्निजमातुले न दयसे, किं भी: प्रभो: कुष्ठिन: ॥ १३०६ ॥

आर्तोऽहं बहु, तत्प्रभो! द्रुतमिदं दु:खन्तु मे नाशय'
क्षिप्रञ्छ्रीप्रभुराह 'चास्तु किमपि, क्षन्तुं समर्थ: सदा ।
संसारे त्वपराधिनं मम, परं स्थानेऽपराध: कृत:
श्रीवासस्य च पण्डितस्य गृहिणो विप्र! त्वया मातुल! ॥ १३०७ ॥

सामर्थ्यं न भवन्तमत्र मम तत्क्षन्तुं' वराकोऽधुना
मौनं, वेदनया समं फलमयं तत्कुष्ठदु:खार्दित: ।
तन्नीचत्वकृतं त्वभूदनुभवन्, कालान्तरे श्रीप्रभु:
संन्यस्त: कुलियागतो भुवि यदा कुष्ठी ततोऽयं पुन: ॥ १३०८ ॥

चापाल: शरणागत: प्रभुपदे श्रीवासपार्श्वे कृतो
वासेनोक्तमतो, 'न पूर्वमधुना द्वेषो बभूवाऽस्ति वा ।
मे त्वेतेन, यदि प्रभु: क्षमितवांस्तद्दु:खमुक्तो ह्यसौ'
पश्यत्येव तथास्य पश्यति वपुर्नैरुज्यमापाखिलम् ॥ १३०९ ॥

एवं कीर्तनदर्शनार्थमपर: प्राप्तो द्विजश्चैकदा
दृष्ट्वाऽन्त:पिहितं गृहं क्षणमयं दीप्तोऽनलाभ: क्रुधा ।
निर्यात: स्वगृहञ्च कीर्तनकृतां निन्दावच: श्रावयन्
गङ्गास्नानगतं स्वभक्तसहितं दृष्ट्वा परेद्यु: प्रभुम् ॥ १३१० ॥

ऊचेऽसौ 'निजकीर्तनस्य(कुपित:)किन्तेऽभिमानो महान्?
लोकांस्त्वं दश—विंशतिश्च सरलान् द्वीपेऽत्र हस्तेङ्गितै: ।
स्थाने पुत्तलिकासमं स्वमनसा बोभूयसे नर्तयं—
स्त्वामर्चन्ति जनास्ततोऽद्य महती जाता तवाऽहङ्कृति: ॥ १३११ ॥

याहि, त्वामधुना शपे ननु सुखे यस्मिंस्तु सांसारिके
मत्तो विस्मृतवानसीयदधिकं तत्ते द्रुतं नश्यतु' ।
श्रुत्वा ब्राह्मणवाक्यमीदृशमघं साश्चर्यमत्राखिला:
पश्यन्तो मुखसम्मुखं प्रतिजना भक्तात्मनां का कथा ? ॥ १३१२ ॥

क्रोधोऽप्यत्र मनागभूत्कतिपयश्रीगाङ्गशुद्धात्मनां
सर्वांस्तांस्तु निवारयन् प्रभुरसौ स्मित्वा जगाद द्विजम् ।
'त्वत्पादे मम विप्रदेव! नमनं शाप: सहर्षं तव
स्वीकार्योऽस्ति च', सर्वमेव भगवत्प्रेमात्मनां साम्प्रतम् ॥ १३१३ ॥

क्रोधोऽल्पक्षणतो द्विजस्य शमितो, वाक्ये स्वकीये तथा—
पश्चात्तापमसौ ततः प्रकटयन् प्रोचे विनम्रात्मना ।
'उक्तं क्रोधवशङ्गतेन कुवचोऽवाच्यं मया ते प्रभो!
क्षाम्यत्वत्र ममापराधमसतो', लोकः क्षमावान्महान् ।। १३१४।।

'किञ्चिन्नापकृतन्तु विप्रवर! मे' स्पष्टं तमाश्वासयन्
'नोक्तञ्चापि कुवाक्यमेव भवता', प्रोचे निमायी प्रभुः ।
'शापं नात्र, परं वितीर्य सुहृदा दानन्तु दत्तं वरं
कृष्णाप्तौ सुखमेव भौतिकमिदं हेतुर्महान् बन्धनम् ।। १३१५।।

दत्तं मे वरदानमत्र भवता तेभ्यश्च मुक्त्यर्थकं
कल्याणं भवितैव तेन मम तच्चिन्ता न तेऽस्त्वल्पकम्' ।
उक्त्वैवं द्विजमालिलिङ्ग तमयं प्रेम्णा निमायिप्रिय—
स्तद्भक्तैः सह चागतः स्ववसतिं, लक्ष्यं सतां हि ध्रुवम् ।। १३१६।।

अस्यैव नाम ननु विद्विषतोऽपि जन्तू—
ञ्छुद्धात्मभावभजनं प्रति सात्त्विकानाम् ।
एवं महाप्रभुसमेन महात्मनैव
स्यादत्र सम्भवमपि व्यवहारतायाम् ।। १३१७।।

आसीदस्य महाप्रभोस्तु महती लोकोत्तरा नम्रता
मार्गेऽयन्तु चलेत्कथं कथमपि स्त्रीभिः समं कर्हिचित् ।
दृष्टिं मेलयति स्म नोऽत्र सततञ्छ्रेष्ठैर्जनैः सर्वदा
सम्मानेन वभाष दीनवचनो, मर्त्योऽमरः कर्मणा ।। १३१८।।

भावावेशदशाक्षणेऽयमवनीरूपं स्वकं व्यस्मरत्—
चेत्तद्भिन्नदशासु वार्चति पदे कोऽप्यस्य वा वन्दते ।
अप्रीतो बहु लक्ष्यते स्म तदितो भावे समाप्ते सति
ब्रूते कोऽपि यदीह 'दर्शनमहो जातं कथं नस्त्वयि ।। १३१९।।

दुर्गा-राम-नृसिंह-वामन-बल-श्रीकृष्ण-रूपात्मना ?'
क्षिप्रञ्चाह 'भवांस्तु पण्डितमती रूपं तदेवात्मनि ।
स्वेष्टं चिन्तयतां सदाऽत्र, भवतामिष्टे स्वदेवेऽस्ति तत्—
सामर्थ्यं सकलं, स्वदर्शनमदात्कस्यापि देहे स्फुटः ।। १३२०।।

प्रधानहेतुर्भुवि भावनैव सा
भवादृशां तादृशरूपदर्शने' ।
ध्रुवस्वभावो भवकारणं मत—
स्तथोत्तमश्लोकचरित्रचिन्तने ।। १३२१।।

सार्धं भक्तजनैरभूत्प्रभुरयञ्छय्यास्थितश्चैकदा
भक्त्याऽमुष्य पदे ननाम शिरसा चैकाऽऽगता ब्राह्मणी ।
स्वे पादे ननु मस्तकं द्विजकुलां दृष्ट्वा धरन्तीं ततो
गङ्गायामनुधाव्य तत्क्षणमसौ दु:खी चुकूर्दे भृशम् ।। १३२२।।

गङ्गायाञ्च विलोक्य भक्तजनता कूर्दन्तमेतं तथा
हाहाकारमतश्चकार च शचीमाता रुरोदातुरा ।
गङ्गायां प्रभुणा समं समहृदौ नित्यश्च दासोऽपि तौ
कूर्देते स्म निमायिनञ्च पुलिने नि:सार्य तं निन्यतु: ।। १३२३।।

रागद्वेषविकारतो निजमयं रक्षंस्तथा जीवनं
प्रेम्णा पापिजनैरपि व्यवहरन् भूमिक्षमां धारयन् ।
आत्मद्वेषिभिरत्र निर्मलमना, हीनोऽभिमानात्स्वयं
भक्ताऽऽदर्शमपाठयत्सुजनताशीलं निजाचारत: ।। १३२४।।

श्रीकृष्णलीलाभिनय:

८२. प्रेमी प्रियतमचिन्तनरागात्सततञ्छबलितचेता: ।
रोदिति दयितनिरन्तरचिन्तनदशया विरहाकुलया
जन्मनि भुवने समये कदापि भविता सम्मिलनं किम्?
ध्यानमधुरदर्शनरसपानात्प्रीतो विहसति मत्त:
दिवानिशं प्रियनामगुणानां कीर्तनमस्य श्वसनम् ।
उत्कण्ठितहुंकारं कुरुते क्वचिद्विलज्जो नृत्यति
प्रियभावनया तन्मयदशया तल्लीलामनुकुरुते ।।

पृच्छेदेकपदेऽत्र कोऽपि सुहृदो भक्तस्य चेल्लक्षणं
तत्रैकं ननु 'लोकबाह्य'मुचितं लोके पदञ्चोत्तरम् ।
अत्रैकत्र पदे हि भक्तिजगतो मार्गस्य पूतात्मन:
सम्पूर्णं परिलक्षितं भवति वै भक्तस्य तल्लक्षणम् ।। १३२५।।

तल्लोकोत्तरमेव कार्यमखिलं भक्तात्मनो जायते
चिन्ता नास्य तथाहि लोकजगतो, मग्नो यथा बालक: ।
आनन्देऽत्र सदैव, तस्य मुदिता हासे, रसो रोदने
संज्ञाशून्य इवात्र भाति सततं स स्वप्रियस्य स्मृता ।। १३२६।।

वार्ता कोऽपि च तत्प्रियस्य समये यस्मिन्नमुञ्छ्रावयेत्
तस्यानन्दभरस्य तर्हि विषये वक्तव्यमेवात्र किम् ? ।

अङ्गोपाङ्गममुष्य सत्त्वजनितैर्भावैस्तदा दीपितं
तस्मिन्नेव हि जायते परिचिता काले यथार्थस्थिति: ।। १३२७ ।।

प्रेम्णो मूर्ति: श्रीचैतन्य: सर्वैर्भावैर्भक्ताग्रण्य: ।
एतद्देहे सत्त्वाख्यांस्तान् भावान् द्रष्टुं सन्नद्धा: स्यु: ।। १३२८ ।।

श्रीवासस्य गृहे स्थित: प्रभुरयं 'वंशीति-वंशीपदं'
भावाविष्टदश: प्रगाय निजकां वंशस्य तामेकदा ।
प्राचीनां मुरलीमयाचत ततो वासो हसन्नाह तं
'वंशी सा कथमत्र, तान्तु भवतो हृत्वा गता गोपिका:' ।। १३२९ ।।

जात: प्रेम्णि स विह्वल: प्रभुरहो! श्रुत्वा क्षणेनैव तद्
भावा: सम्प्रति सात्त्विका: समुदिता: सम्पूर्णकाये क्रमात् ।
वारम्वारमथावरुद्धगलतो ब्रूते स वासं बुधं
'किन्न श्रावयसीह मे मुरलिकालीलां, मनाक् श्रावय ।। १३३० ।।

गोपीनान्तु चकार हानिमबला त्वक्सारवंशी कथं ?
जह्रुस्ता यदमून्तु, पण्डित! कथावंशीप्रसङ्गं वद' ।
कुर्वन्तं प्रभुरत्र वक्तुमभवद्वासस्तथाऽऽप्त्वाऽऽग्रहं,
संयोग: समये तथाहि घटते सच्छ्रोतृवक्तृत्वयो: ।। १३३१ ।।

'आसीदाश्विनमासशारदऋतुस्निग्धत्रियामापति:
सालोकं कलयोदित: सकलया कुर्वन्नभोमण्डलम् ।
शान्ताऽऽसीत्प्रकृति: स्वनीडशयिता: सर्वे विहङ्गास्तथा
श्रीवृन्दावनमध्यकुञ्जनिकरे व्याप्ताऽभवत्स्तब्धता ।। १३३२ ।।

रात्रेर्नीरवतां नदी च यमुना सा लोपयन्ती सती
हुंकारेण शनै: शनै: स्म सरति स्वश्यामवर्णाम्बुना ।
तस्मिन्नेव निशाक्षणे मुरलिकास्वादुस्वर: कर्णयो-
र्गोपीनां प्रियमोहनस्य मिलितो', भावोऽद्यते भावुकै: ।। १३३३ ।।

श्रुत्वा केवलमेतदेव पतितो भूमावचेता: प्रभु-
र्नेत्राभ्यां घनमश्रु वासमवदत्स स्यन्दयन् पण्डितम् ।
'आम्, भूय: किमभूद्वदाग्रिममपि ब्रूषे कथं नो पुन:
प्राणा मे श्रयितुं तदेव मधुरं वंशीलयञ्चातुरा:' ।। १३३४ ।।

श्रीवास: पुनरेव चाह, 'पतितो वंशीध्वनिर्यच्छ्रुतौ,
या शुश्राव मनोविमोहनलयं तं, सैव मोहङ्गता ।
सर्वा विभ्रमितेव सम्प्रति तथा स्पष्टा यथा विस्मृता
तासामल्पमपि स्म तिष्ठति नहि स्वस्य प्रतीतिस्तदा ।। १३३५ ।।

८३. वंशीगीतमनङ्गोत्कण्ठां गोपीनामिह कुरुते ।
वैधी भक्तिः साधनरूपाऽनुरागात्मिका साध्या
व्रजभक्तिः केवलमनुरागः किन्त्वन्यत्र तदनुगा ।
व्रजगोपीनां प्रेमव्यक्तिर्भक्तिसूत्रदृष्टान्तः
तासामेव प्रेम नृलोके, काम इति सुप्रतिष्ठा ।
व्रजबाला या कृष्णमनस्का, गीतमनङ्गोद्दीपम्
श्रुत्वा क्षणतः खट्वाङ्गो वा कान्तं निजमागच्छति ॥

वेणोस्तास्तदनङ्गवर्धनमिदं गानं मनोह्लादक—
ञ्छ्रुत्वा कृष्णगृहीतमानसतया गोप्यः क्षणदागताः ।
एवं गोकुलगोपिका मधुहृदः सापत्न्यभावादमू—
रन्योन्यं स्वगतोद्यमप्रकटनञ्चक्रुर्न, लब्धुं रसम् ॥ १३३६॥

श्रीकृष्णोष्ठमधुस्वने परवशास्तस्मिञ्जगन्मोहने
लक्ष्यीकृत्य तदेव, कर्णविषयो जातो यतः स स्वनः ।
चेलुस्ताश्च यथा स्थिताः स्ववसतावुत्थाय तावत्तथा
तत्प्रेङ्खत्कमनीयकुण्डलयुगश्रीकास्त्वराकारणात् ॥ १३३७॥

आसीद् गां दुहती चचाल दुहनीं क्षिप्त्वा च तत्रैव सा,
दोग्धुं या च मुमोच वत्समधुना तस्या न तस्थौ पुनः ।
स्थाने बन्द्धुमपि स्मृतिर्ननु पयः क्वाथक्रियायाञ्च या
त्यक्त्वा तच्चलिता क्वथन्तमनले, वस्तुक्रियाऽऽसक्तितः ॥ १३३८॥

धावन्त्यश्य बभूवुरत्र जननी क्षिप्त्वा स्वपुत्रं द्रुतं
पत्युः क्रोडगता तथाहि वनिता निःसृत्य तामेव तत् ।
आशां भोजयती विहाय भगिनी गेहे निजं भ्रातरं
वासोऽस्त्यत्र वदन् प्रभुस्त्वनिमिषः शृण्वंश्च भावस्थितौ ॥१३३९॥

आस्तां स्वप्रियवार्तया ननु तदा द्वावेव चाचेतनौ
सम्पूर्णा व्यगमत्तथैव रजनी श्रीकृष्णसंवादतः ।
तद्गेहाऽपरभागतो दिनकरोऽप्येता निलीयाखिला
लीलाः स्वादयितुं तथा प्रकटितः, कालो न किं भावुकः? ॥ १३४०॥
बाह्यज्ञानमभूद्विलोक्य सुहृदः सूर्यप्रकाशं प्रभोः
प्रेम्णा वासमुवाद दीर्घमधुनाऽऽलिङ्ग्य'न्नहो पण्डित! ।
अद्य त्वं ननु देवदुर्लभरसास्वादं ममाचीकरो
धन्योऽहं मुखतोऽद्य ते श्रवणतः श्रीकृष्णलीलाश्रियः' ॥ १३४१॥

उक्त्वा स प्रभुरेवं नित्यं कर्म विधातुम् ।
यात: पण्डितगेहा,त्पाण्डित्यं कृतिमत्ता ।। १३४२।।

भक्तैः सार्धमयञ्चकार च परामर्शं परस्मिन् दिने
'श्रीलीलाभिनयं करोतु मिलितो वृन्दावनस्वामिन: ।
तल्लीलाभवनं भविष्यति च मे मातृष्वसु: स्वामिनो
गेहं पण्डितचन्द्रनामविदुष'स्तेनैव चोक्तं स्वयम् ।। १३४३।।

सर्वेषामनुकूलमेव बहु तत्स्थानं प्रतीतं तथा
दीर्घञ्चापि बभूव तत्र भवनं तत्सर्वभक्तस्त्रिय: ।
सङ्कोचेन गताऽऽगतिं ननु विना केनापि कर्तुं क्षमा,
'लीला का भविता, तथाह्यभिनयं क: कं विधाता पुन:'।। १३४४।।

प्रश्नस्यास्य तथोत्तरे प्रभुरयं प्रोवाच भक्तात्मनां
'नायं सम्प्रति निश्चयोऽस्ति किमपि स्थाने परं निश्चितम् ।
श्रीलीला भविता, न कोऽपि नियते पाठेऽस्ति पात्रात्मना,
भावो यस्य यथा भवेन्ननु तदा तस्मिन् वदेत्स स्वकम् ।। १३४५।।

जाते सम्प्रति निश्चये तु भविता लीला परं कृत्रिमा,
यस्य स्यात्स्फुरणा हि तत्र समये स्वाभाविकी यादृशी' ।
श्रुत्वेदं निखिला: प्रसन्नहृदया वृन्दावनस्य स्फुटं
लीलादर्शनमेव भावि नियता भक्ता: प्रभोर्मेनिरे ।। १३४६।।

पात्राणामकरोच्च निर्णयमसौ तत्रैव काले प्रभु—
र्भक्तानां निकरेऽत्र पात्रचयने हासोऽतिमात्रं बभौ ।
सर्वादौ ननु सूत्रधारचयनप्रश्नोऽभव,न्नाटकं
य: सामाजिकमध्यमामुखगत: प्रस्तौति संलापत: ।। १३४७।।

'कोऽपि स्थूलवपुस्तथाऽत्र विषयेऽद्धा सूत्रधारो भवेद्—
यश्चावश्यकतास्थितौ तु सहिता पर्याप्तिकं ताडनम् ।
सर्वेषामवलोकनाऽवनकयोस्तत्रैव भारो यतो'
भक्तैकस्य वचो निशम्य तदिदं नित्यो जगाद द्रुतम् ।। १३४८।।

'दासस्योपरि कार्यमेतदपरं देयं, प्रवीणोऽस्त्ययं
भूयस्ताडनभोजनेऽपि', तदिदं सर्वे निशम्याऽहसन् ।
नित्योक्तस्य समर्थनं प्रभुरपि प्रोवाच कृत्वा स्वयं
'नास्त्यावश्यकतैव नारदकृते कस्यापि चान्यस्य तु ।। १३४९।।

साक्षान्नारदविग्रहोऽवतरितो वासस्तु चोपस्थितो',
भक्त: कोऽपि शनैर्जगाद 'कलहाऽशान्तिप्रियो नारद:' ।

अद्वैतोऽत्र हसन् बभाण 'विषये किं कारयेन्नारदः
स्थाने सोऽयमितोऽधिकञ्च कलहं द्वीपे नवे साम्प्रतम् ।। १३५० ।।

एतावान् विसृतोऽस्ति यो मधुरवः कोलाहलः सर्वतो
मूलन्त्वस्य च नारदोऽवतरितः श्रीवास एव प्रधीः' ।
'एको नारदजीकृते तु नियतः शिष्योऽपि चापेक्षितः
स्निह्येन्नारदजी', मुरारिरवदच्छिष्यो भविष्याम्यहम् ।। १३५१ ।।

श्रुत्वेदं तरसा गदाधरवचः 'श्रीनारदस्य व्यथा
कुक्षौ नो जनिताऽस्ति कापि तु, यतो वैद्यं स्वशिष्यं क्रियात् ।
तद्धिङ्ग्वष्टकचूर्णहेतुमधुना, स्याद्ब्रह्मचारी जनः
कोऽप्येकोऽनुचरस्तु तस्य तपसस्त्वं वै गृहस्थाश्रमी ।। १३५२ ।।

कर्ता नारदजी तव ग्रहणतः किं,? ब्रह्मचारी तथा
श्रीनीलाम्बरजी तु पूर्वरचितस्तस्यात्र शिष्योऽस्ति वै' ।
'कर्ताऽहं' भणति प्रभुस्'त्वभिनयं त्रैलोक्यसम्मोहिनी–
श्रीलक्ष्मीललनाश्रियस्तु, ललितानाम्नी सखी मेऽस्तु का'? ।। १३५३ ।।

तद्विद्यानिधिपुण्डरीकलपनं 'छायासमाना प्रभो!
सङ्गे तिष्ठति सर्वदैव ललिता वृत्तिः सहेवाऽऽत्मना ।
अस्त्येवैष गदाधरस्तु ललिता गौराङ्गलक्ष्मीसखी'
'प्रोतः सम्प्रति मुद्रिका ननु यथा तस्यां तथाऽयं नगः' ।। १३५४ ।।

उक्तं तन्निखिलैः प्रियोचितमिदं भक्तैस्तथैकस्वरा–
त्स्मित्वोवाच ततः प्रभु'र्वरमतो वृद्धाऽपि चापेक्षिता ।
एका नो महती, तथाविधिकृते श्रीपादनित्योऽस्ति वै'
भूत्वाऽधीरमना जगाद गुरुकोऽद्वैतो द्रुतं, 'किं प्रभो! ।। १३५५ ।।

स्थाने विस्मृतवांस्तु मामभिनये, वृद्धो न कर्तुं क्षमो
भावी त्वल्पमपीह'?, तत्प्रभुवचोऽद्वैतात्मनः सस्मितम् ।
'वृद्धं निर्दिशते भवन्तमनु यो, जाताऽस्य वृद्धा स्वयं
बुद्धि,र्भक्तशिरोमणिर्ननु भवान् (प्रेमापि वृद्धोऽत्र किम्?) ।। १३५६ ।।

तल्लीलाभिनये भविष्यति पयोदानग्रहीता स्वयं
वृन्दाकाननगोसमूहविहरः कृष्णो भवानेव हि' ।
सर्वो भक्तजनो निशम्य तदिदं प्रीतः प्रभुं पृच्छति
स्वं स्वं कार्यमहो!, मुदो द्विगुणिताः पृष्ट्वा कृते कर्मणि ।। १३५७ ।।

दत्तं सुन्दररङ्गमञ्चरचनाकार्यं धनाढ्यद्वय–
श्रीखाँबुद्धिसदाशिवोपरि, धरास्वामी च खाँबुद्धिमान् ।

सज्जावाद्यमसौ च वस्तु विविधञ्छ्रीचन्द्रगेहेऽनयत्
तत्रादौ वररङ्गमञ्चघटना तत्प्रांशवलिन्दे कृता ।। १३५८।।

नारीणामुपवेशनस्थलमितिर्निर्धारिता दक्षिणे
भागे तत्र तथा नृणामभिमुखे, सर्वाश्च तत्राऽऽययुः।
काले पण्डितचन्द्रशेखरगृहे भक्तस्त्रियो निश्चिते,
श्रीलीलोत्सवदर्शनाय जनता प्रायः सदा लोलुपा ।। १३५९।।

देवी तत्र च मालती सहृदया श्रीगौरविष्णुप्रिया
द्रष्टुं नाट्यविधिं समागतवती माताऽपि ताभ्याञ्छची ।
भक्तास्ते क्रमशोऽखिलाः स्थलमिताः प्राप्तेषु सर्वेषु तद्—
गेहद्वारपिधानतः प्रचलितो लीलाप्रयोगोऽधुना ।। १३६०।।

अन्तः सञ्जयति स्म पात्रनिकरञ्छ्रीवासुदेवो बुधो
रङ्गे प्रेषयितुं, बहिर्यवनिकापातः क्षणेनाऽभवत् ।
सर्वादौ शुभमङ्गलाचरणकं जातं, तथागायने
नाट्यस्य प्रहिताश्च पञ्च पुरुषाः, पञ्चप्रपञ्चं जगत् ।। १३६१।।

श्रीविद्यानिधिचन्द्रशेखरमुखावासंस्त्रयो भ्रातरः
श्रीवासस्य रमादयश्च, मधुरः कण्ठोऽस्ति विद्यानिधेः ।
स प्रागगायति तत्स्वरे स्वमपरे संयोजयन्ति स्वरं
पूर्वं पद्यमिदं जगौ निजगलाद्विद्यानिधिः कोमलात् ।। १३६२।।

८४. कृष्णो जयति निखिलजनवासो देवकीजन्मवादः।
धर्मग्लानौ कालेऽधर्माभ्युत्थानेऽस्मिन् वर्षे
दुष्कृतिनाशनधर्मस्थापनहेतुरयं संभवति।
यदुवरपरिषत्खलसंहर्ता स्थिरचरवृजिनघ्नोऽसौ
साधुव्रजपुरवनिताप्रीतिं वर्धयति स्मितमुखतः ।।

अस्यानन्तरमेकपद्यमपरं गीतं विधौ मङ्गले
सम्प्राप्तो वररङ्गमञ्चपटले तत्सूत्रधारोऽधुना ।
आगत्यात्र स नाटकस्य कुरुते प्रस्तावनां पूर्वतः
स्वाभिप्रायमथ स्वसङ्गिमिलनाऽऽलापे निधत्ते क्षणात् ।। १३६३।।

ब्रूते येन, स पारिपार्श्विकजनो दृश्ये विधौ कथ्यते
स्थाने पार्श्वजनो मुकुन्दसुजनो दासो हरिः सूत्रधृत् ।
प्राप्तौ सम्प्रति तौ तथाहि मिलितौ मञ्चेऽत्र कालक्षणे
कश्चिद्दर्शकमध्यतो हरिजनं नाप्तुञ्छशाक स्फुटम् ।। १३६४।।

उष्णीषेण सुशोभितं ननु शिरो दीर्घे तनौ कञ्चुकं
लीलायामधुनाऽस्य भाति महती स्कन्धे च यष्टिः स्थिता ।
मञ्चे चागत एव रङ्गमवनीं स्वाऽऽजीविकादायिनीम्
नत्वा सुन्दरपुष्पयुग्मविधिना चक्रेऽर्थनां पूजयन् ।। १३६५।।

'श्रीवृन्दावनमेव सम्प्रति भव त्वं रङ्गभूमे! स्फुटं'
पश्यंस्तत्परितः स दर्शकपुरो ब्रूते करं वल्गयन् ।
'आपत्तिर्महती तथास्ति कियती नाट्यक्रियाऽशोभना
सर्वेषाञ्छिशुवृद्धमूर्खसुधियां कार्यं मनोरञ्जनम् ।। १३६६।।

इच्छां कामपि कोऽपि तु प्रकटयेत्सा पूरणीया ध्रुवं
कर्तुं तन्नमनं गतोऽद्यदिवसे श्रीब्रह्मबाबासभाम् ।
बाबानारद एव मार्गमिलितो ब्रूते तदा मां प्रति
"भ्रातस्त्वं मिलितोऽधुना समुचितं, (दैवात्क्षणो युज्यते) ।। १३६७।।

इच्छाऽऽसीत्प्रबला चिरान्मनसि मे वृन्दावनस्य स्मृतिं
पश्येयन्तु कदापि चित्तमधुराञ्छ्रीकृष्णलीलामहम् ।
श्वस्त्वं चित्तहरं प्रदर्शय मम श्रीकृष्णलीलोत्सवं"
बाबानारदजी विलक्षणमहो! वस्तु त्रिलोकेऽपि सः ।। १३६८।।

कामञ्चातिरहस्यभूतवपुषां वृन्दावनस्य स्फुटं,
लीलानां कथमत्र चाभिनयनं कर्तुं भवामि क्षमः ?' ।
ऊचे विस्मितपारिपार्श्विकजनः श्रुत्वा तदीयं वचः
किं प्राप्तोऽसि महाशय! त्वमधुना पीत्वा किमप्यासवम् ।। १३६९।।

किञ्चिच्चाधिकमेव मिष्टविजया ग्रस्ता त्वया ज्ञायते
तस्मादेव तथाऽस्मृतास्मृत इव ब्रूषेऽन्यथा वस्तुतः ।
आत्मारामपुनिस्तु नारदसमः शृङ्गारलीलां प्रति
श्रीकृष्णस्य न युज्यते, प्रकटयेत्स्थाने दिदृक्षां स्वकाम्' ।। १३७०।।

सूत्रधारः(हरिदासः)—

शास्त्राणि प्रति वाह! साहब! भवाञ्छून्यस्थितिर्ज्ञायते
श्रीमद्भागवते किमस्ति लिखितं, किञ्चिन्निकेतोऽपि ते? ।
एषैवैकविशेषता तु महती लीलागुणेषु प्रभो—
रात्मारामगतस्पृहोऽपि कुरुते भक्तिन्तु मुक्तिङ्गतः ।। १३७१ ।।

८५. **मुनयो निर्ग्रन्था अपि पथिका हरिगुणकीर्तनवर्त्मनि ।**
जीवनयात्रायां पन्थानो नाना रुचिवैचित्र्यात्
ग्रन्थिवासनारसनासिद्धौ छायाफलतरुसहिताः ।

योगोपासननिर्ग्रन्था ये केवलमात्मारामाः
उरुक्रमस्याहैतुकभक्तिं विदधति तेऽपि स्वस्थाः
यत्तादृशललितोचितसौभगगुणगणघनवनमाली ॥

पारिपार्श्विकः—

आत्मारामा भवन्तीमे शोभना, यदमायिनः ।
सन्तोऽपि, मायिका लीला भवन्ति द्रष्टुमिच्छवः ॥१३७२॥

सूत्र०ः—असि स्फुटं घोंघवसन्त एव वै
प्रभोस्तु लीला कथमस्तु मायिका ? ।
स विद्यतेऽप्राकृतिको हि वस्तुतो
न तत्र मायालवकोऽपि वर्तते ॥१३७३॥

पारि०ः—किं भो! मायां विना कापि क्रियैव नहि युज्यते ।
शास्त्रज्ञेभ्यः श्रुतं तन्नो, मायाविलसितं जगत् ॥१३७४॥

सूत्रः—

अस्तीदञ्छुतमेव, किन्न गुणितं, चेत्त्वं गुणाधानकृत्
तन्नैवं गुडगोमयौ समतुलौ सम्मेल्य कर्ता पुनः ।
मायाबद्धजनाश्च ये, स विषयस्तेषां क्रियाणां स्थितौ
मायाऽमुष्य तु किङ्करी भगवतो, मायापतिः श्रीपतिः ॥१३७५॥

प्रभोः स्वयं नृत्यति चेङ्गितेन सा
भवन्ति लीला निखिलाः परात्मनः ।
विनाऽत्र हेतुं, प्रकृतेर्बहिस्तथा
स्वभक्तमोदाय सदैव केवलम् ॥१३७६॥

पारि० (सविस्मयम्)ः—

आमेवं नु दशाऽस्ति पश्यतु तदा श्रीनारदः स्वेप्सितं
दीर्घाऽऽयोजनया प्रदर्शय, तथा सज्जाप्रबन्धं कुरु ।
आवर्ष, मुनिनारदोऽपि भवतु प्रीतो यतश्चाधिकं,
गच्छेयुर्दशविंशतिर्ननु समास्तद्ब्रह्मलोकाऽऽगतौ ॥१३७७॥

सूत्र०ः—त्वं बुद्धिपृष्ठमनुधावसि चात्र दण्डं
नीत्वा, स्फुटं मम विभाति मतौ सदैव।
देवर्षिरिष भवती,च्छति यं तु लोकं,
संकल्पतः प्रभवति क्षणतस्तमाप्तुम् ॥१३७८॥

पारि०:—आसीन्नु किं परिचयो विषयस्य मेऽस्य ?
स्थाने स्थितिर्यदि तथास्ति, करोमि शीघ्रम् ।
लीलाप्रबन्धमधुना दिश किन्तु मे त्वं
लीलाऽभिनेयविषया भविताऽत्र का वा ? ॥ १३७९ ॥

सूत्र०:—श्रीप्रियस्य भाति दानलीला
सर्वदैव चाखिलोत्तमा मे ।
साम्प्रतं तवास्ति सम्मतिः किं ?,
सङ्गिसम्मतौ हि भाति कार्यम् ॥ १३८० ॥

पारि०:—लीला तु सुन्दरमतीव सतां प्रिया सा
प्रीणाति, मामभिनयः सततं तथास्याः ।
द्वन्द्वः परन्तु सभरोऽस्ति महांस्तथैको
बाला न सन्त्यभिनयस्य तु साम्प्रतं ताः ॥ १३८१ ॥

सूत्र० (सविस्मयम्):—याताः । क्वैताः ॥ १३८२ ॥

पारि०:—सर्वाऽर्चितुमितो गोपेश्वरशिवम् ।
वृन्दावनमिता, वृन्दा शिवकृपा ॥ १३८३ ॥

सूत्र०:—एकामेतां नूत्नामापद्वार्तां ब्रूषे ।
केन श्रीलीलाऽस्तु, ब्रूते नाट्ये पात्रम् ॥ १३८४ ॥

पारि० (त्वरितम्):—
आपदः स्थितिः कथन्नु याम्यहं तथाऽधुनैव ।
आनयामि चात्मनात्र सार्धमेव ताः क्षणेन ॥ १३८५ ॥

सूत्र० (अन्यमनस्कतया):—
बालाः सम्प्रति सन्त्यमूस्तु सकलाश्चायुस्तथासां कियत्?
याताः काममथाद्य कस्यचिदपि श्रुत्वा न चोक्त्वा तथा ।
तत्रत्यं बहु वर्त्म दुर्गममतः, कुत्राप्ययास्मन् हता
वृद्धा चापि न कापि सङ्गसहिता, वृद्धो हि वैद्योऽव्ययः' ॥ १३८६ ॥

पारि०:—अस्ति कथं नो, किंविधिका सा ।
तिष्ठति वृद्धा ?, कौ घृतमायुः ॥ १३८७ ॥

सूत्र० (सहासम्):—

वृद्धामनस्यपि बहु स्फुरिताऽर्चनाऽस्या
नो दृश्यते किमपि किन्तु च लोचनाभ्याम् ।
कोऽपि स्पृशेद्यदि शनैरपि तर्हि साऽसौ
स्थानत्रये पतति नाध्वमतिश्च किञ्चित् ॥ १३८८ ॥

नेपथ्यात्क्षणतः श्रुतोऽत्र मधुरो वीणाध्वनिः श्रीपद—
श्चेदं दीर्घमधुस्वरेण सहितं कर्णप्रियच्छुश्रुवे ।
कृष्ण-श्रीहरि-वासुदेव-मुरभिद्-गोविन्द-नारायण—
श्रीनाथेत्यखिलेन्द्रियात्मललितं संबोधनेनान्वितम् ।। १३८९।।

श्रीमन्नारदजी समागत इति द्राक् सूत्रधारः समं
बुद्ध्वा तन्निजपारिपार्श्वसुहृदा यातो (मुकुन्देन) सः ।
कन्याऽऽमन्त्रणहेतवे पथि परं धावन्, क्षणाद् दृष्टवान्
वीणापाणिरयञ्च पीतवसनः श्वेतास्यकूर्चस्तथा ।। १३९०।।

शिष्येण सार्धं भ्रमतीह मन्दं
गायंस्तथेदं पदमेव मञ्चे ।
श्रीकृष्ण! गोविन्द! हरे! मुरारे!
हे नाथ! नारायण! वासुदेव! ।। १३९१।।

श्रीवासो मुनिनारदस्य समये वेषे प्रतीतोऽधुना
तद्भद्रं, नहि कोऽपि बोद्धुमभवद् वासोऽयमस्ति क्षमः ।
तत्पृष्ठे वरमुत्तरीयमटति श्रीरामनामाङ्कितं
धृत्वा शिष्यसमः कमण्डलुकरो ब्रह्मस्थशुक्लाम्बरः ।। १३९२।।

श्रीवासस्य तथास्वरूपमधुना दृष्ट्वा स्त्रियो विस्मिता
देवीं पृच्छति मालतीं समवया माता शची सस्मिता ।
'किं भर्ताऽस्त्ययमेव ते न?' वचसा सख्याः स्मयन्ती मनाक्
'जाने किं रसय त्वमेव', सखिता प्रीतौ सदाऽऽवश्यकी ।। १३९३।।

श्रीवासेन तु नारदस्य न कृतस्तद्वेष एवाऽधुनाऽऽ—
वेशो वास्तविको हि नारदमुनेर्जातस्तदा पण्डिते ।
तस्मिन्नेव भवान् स्वशिष्यमधुनाऽऽवेशेऽवदत्सङ्गिनं
'का वार्ता ?, ननु दृश्यते किमपि तन्न ब्रह्मचारिन्निह ।। १३९४।।

न नाटकस्यात्र तु कापि योजना ?'
तदैव गोपीपरिधानमण्डितः ।
गदाधरः सुप्रभया समन्वितः
ससूत्रधारः प्रविवेश सत्वरम् ।। १३९५।।

दृष्ट्वा त्वमुमयञ्छ्रीनारदमुनिः ।
'कोऽसि त्व'मवद,त्प्रश्नो ननु तुला ।। १३९६।।

सुप्रभा (ब्रह्मानन्दः)—वयं भवामो भगवंश्च गोपिकाः
सुरम्यवृन्दावनमद्य किन्त्विमः ।

उदारगोपेश्वरदर्शनार्थकं,
भवान्महाराज! तु कोऽस्ति कुत्र गः ? ॥ १३९७॥

नारदः—श्रीकृष्णपादाम्बुजसेवकानां
मध्ये तथैकोऽवरकिङ्करोऽस्मि ।
नाम्ना भवाम्यत्र च नारदोऽहं,
(नारायणं नारदतोऽयते ना) ॥ १३९८॥

श्रुत्वा नारदमात्रमेव निखिलाः सख्यस्तथा सुप्रभा
साष्टाङ्गं विनयेन नेमुरमलं देवर्षिसन्नारदम् ।
गोपी तत्र (गदाधर)स्तु रुदती धृत्वा पदे श्रीमुने--
र्ब्रूते 'हे भगवंश्च भक्तभयहन्!', (दूताननाः स्वामिनः) ॥ १३९९॥

'श्रीकृष्णो ननु यो निगूह्य निजकां कृष्णाऽऽकृतिं साम्प्रतं
गौरं वर्णमुपादधौ, प्रियतमप्राणप्रियस्यात्मनः ।
प्रेम्णोऽस्य त्वधिकारिणी कथमहं स्यामत्र काले कदा ?'
श्रीमन्नारदपादपद्मयुगलं धृत्वा वदन्ती तथा ॥ १४००॥

गोपी सैव (गदाधरः) प्रियतमप्रीतौ रुरोद स्फुटं
दृष्ट्वा सम्प्रति कोमलात्सुमनसो गोलात्कपोलद्वयात् ।
स्यन्दद्धारमथाश्रु, तत्र रुरुदुर्भक्तास्त्वमी दर्शकाः,
संलापस्तनुते तथाहि सुहृदो सत्प्रेम सामाजिके ॥ १४०१॥

ऊचे भक्तशिरोमणिर्मुनिरसावाश्वासयन् गोपिकां
'प्राणेभ्योऽपि तथाप्रिया सहचरी त्वञ्चासि कृष्णस्य तु ।
त्वञ्चापि व्रजमण्डलप्रियघनश्यामप्रिया बर्हिणी
स त्वन्नृत्यविलोकनात्क्षणमपि स्थातुं प्रभुर्नोपरि ॥ १४०२॥

नीचैस्तत्क्षणमेव सोऽत्र भविता, तत्त्वं विधेह्यात्मनो
मे, नृत्येन मनोहरेण हृदयं संतप्तकञ्छीतलम्' ।
श्रुत्वाप्येतदसौ तथैव रुदती चैवाभवद्गोपिका
चक्रे नृत्यलयेन नारदमनोमोदं परं सुप्रभा ॥ १४०३॥

भागेऽन्यत्र तु सूत्रधारहरिजी तालस्वरं मेलयन्
स्कन्धे सुप्रभया च नृत्यति समं लङ्कं निधायाऽऽत्मनः ।
सम्पूर्णेऽयमहोऽत्र मत्तसदृशो भूयो भ्रमित्वाऽङ्गणे
गीत्वोच्चैश्च ननर्त तत्पदमिदं, नृत्यं ह्यगानं कथम् ? ॥ १४०४॥

'श्रीमत्कृष्णं भज भज कृष्णं रे बाल! त्वं हृदि भज कृष्णम् ।
श्रीमत्कृष्णस्मृतिमपहाय त्वं रे खादिष्यसि किमुलूक!' ॥ १४०५॥

गायन् पदमिदं मध्ये ननु भवान्
स्थित्वाऽत्र कथयन् दोहां भवति वै ।। १४०६ ।।

८६. **ह्रियते केवलमायुःसम्पत् ।**
निद्राक्षणतः क्षणदाऽस्माकं दिनमिन्द्रियतर्पणतः
हीरकनरताजन्माऽमूल्यं क्षुद्रत्वे तन्नीतम् ।
परमानन्ताऽऽनन्दपरिस्थितिलब्धौ साधनमेकम्
भगवन्नामभजनमनुवेलं केवलदयिताऽऽश्रयणम्
हरणं तथायुःसम्पत्तेस्तु लोकविलक्षणरसनम् ।।

गोपी त्वभून्मुनिपदे न तदा त्यजन्ती,
तत्सुप्रभाऽऽग्रहगिरा परमाह गोपीम् ।
'प्राप्ताऽर्चनस्य महती सखि! चात्र वेला,
कुर्वन्ति नो चल चलानि पराः प्रतीक्षाम्' ।। १४०७ ।।

कृत्वा नारदपादवन्दनमथाद्धा सुप्रभासम्मति–
र्छ्रुत्वैवञ्च सखी मुनेरनुमतिं नीत्वा ययौ सप्रभा ।
भागेऽन्यत्र तयोस्तथाहि गतयोर्ब्रूते स्वशिष्यं मुनि–
'र्वृन्दासम्मुखमेव याम च वयं तद्ब्रह्मचारिंश्चल ।। १४०८ ।।

तत्रैव जन्म सफलं करवै चलित्वा
श्रीकृष्णसुन्दरमनोहरभव्यलीलाम् ।
दृष्ट्वा', गुरोर्मतमनूद्य 'यथात्र चाज्ञा'
शिष्यश्चचाल गुरुनारदपृष्ठतोऽयम् ।। १४०९ ।।

गेहान्तोऽत्र महाप्रभुः स्वयमयं त्रैलोक्यसम्मोहिनी–
लक्ष्मीवेषमथात्मनस्तु कलयन्नासीन्मनोयोगतः ।
पादौ सुन्दरकोमलाब्जसदृशौ लाक्षारसाऽऽलेपितौ
चक्रे, किन्तु स रक्तिमाऽरुणतले क्षीणप्रतीतिः पदे ।। १४१० ।।

भूयो नूपुरके बबन्ध पदयोस्तत्राङ्गुलिष्वादधौ
नानासुन्दरभूषणानि, रशनां मध्येतनुं मोहिनीम् ।
कण्ठे मोहनमालिकां, वरमधोवस्त्रञ्च, बाहुद्वये
केयूरे कनकस्य, कर्णकुसुमे क्रीडत्करे कर्णयोः ।। १४११ ।।

आचार्यो महतोत्तमेन विधिना श्रीवासुदेवः प्रभो–
र्दीर्घाऽऽकुञ्चितकुन्तलेषु जघटेऽवक्रन्तु सीमन्तकम् ।
चक्रे तस्य च पृष्ठतोऽतिसुभगं वेणीनिबन्धं तथा
वेण्यां चम्पकमालतीसुमनसां सज्जायुतं गुम्फनम् ।। १४१२ ।।

एकां सुन्दरमालिकां निहितवांस्तद्वेणिकायां पुन:
सीमन्ते महताऽत्र सूक्ष्मविधिना सिन्दूरभारार्पणम् ।
रोलीलाघवगोलबिन्दुघटनाञ्चक्रे त्वलीकान्तरे
ताम्बूलं वदनेऽस्य वासितमदात्स्कन्धे च पट्टाम्बरम् ।। १४१३।।

आवेशोऽत्र प्रभुवरदेहे जात:
श्रीरुक्मिण्या घटयति सज्जामात्रे ।
भैष्मीतुल्योऽभवदधुनाऽधीरोऽसौ
श्रीकृष्णस्याऽपरविरहोत्कण्ठात: ।। १४१४।।

रुक्मिण्या जनकस्य भीष्मनृपतेरिच्छा बभूवात्मन:
कुर्वीय प्रियकन्यकापरिणयञ्छ्रीकृष्णचन्द्रेण मे ।
तस्य ज्येष्ठसुतस्य तु स्वभगिनीदानेऽभवद्रूक्मिण:
संकल्प: शिशुपालनामसुहृदे, द्वन्द्वो विभिन्नात्मनो: ।। १४१५।।

ज्ञात्वा भ्रातृविलोमभावमधुनाऽधीरा सुबालाऽभव-
त्कृत्वा यन्मनसाऽत्र तिष्ठति निजञ्छ्रीकृष्णचन्द्रं पतिम् ।
सर्वस्वं स्वमसौ हृदैव भगवच्छ्रीवासुदेवात्मन:
श्रीपादेऽस्ति समर्प्य पूर्वसमयाद्,'वृत्ति: प्रभो रुक्मिणी' ।। १४१६।।

'हाऽऽगन्ता स नराधमोऽत्र जनकश्रीराजधान्यां मम
श्व: सार्धं प्रियसङ्गिभि: शिशु'रियं चिन्ताकुला विद्यते ।
'किं प्राणप्रियवल्लभं नरवरं प्राप्स्याम्यहं नात्मन: ?
सर्वस्वं निजकं मया तु पदयोस्तस्यैव साध्वर्पितम् ।। १४१७।।

दीनानां स च वत्सलो घट-घटज्ञाता त्वनाथाऽऽश्रय:
किं भावोऽस्फुट एव मेऽद्य भविता सर्वज्ञसंदर्शिन:? ।
जानन्नेव स तद्भविष्यति परं तत्स्मारणार्थं पुन-
स्तस्यैका विनयस्य पङ्क्तिरधुना संप्रेषणीयैव मे ।। १४१८।।

भूयोऽत्राऽऽगमनञ्च नाऽऽगमनकं तेषामधीनेऽभवद्-
देहं प्राणवियुक्तमेतमथवा गन्ता गृहीत्वा शिशु: ।
पालो रिक्तकरो भविष्यति तु वा प्रत्यावृतो निश्चितं
नो यास्यामि कदापि सार्धममुना दुष्टेन जीवन्त्यहम् ।। १४१९।।

देहेऽस्मिन्नधिकार एव भगवच्छ्रीवासुदेवस्य मे
कर्तुं सा प्रभुरेव जीविततनोरत्रोपभोगं तथा' ।
पत्रं प्रेम विचिन्त्य तच्च लिखति स्वप्राणनाथाय सा,
लेखो हार्दिकगूढभावविषयव्यक्तौ प्रमातु: पटु: ।। १४२०।।

८७. सुन्दर! भुवने परमार्थोऽयं त्वत्सुन्दरमिह भुवनम्।
अच्युतगुणनिकरो हृदि यातस्तच्छ्रवणासक्तानाम्
कर्णविवरतस्तापं हरते हरेऽङ्गगतमत्यन्तम्।
संसृतिरखिला गुणलीलेयं माया प्रकृतिस्त्रिविधा
विश्वचराचरगुणतेश्वरता यत्रानन्तविलासः।
गुणकृतघटनानिजप्रवेशोऽस्फुटचैतन्याऽऽलोकः
सगुणाकारसुरूपधारणात्स्फुटमाधुर्याऽऽस्वादः ।
गुणश्रवणानन्तरदिदृक्षा भाववतां प्राकृतिकी
दृष्टिमतामखिलार्थलाभदं कृपया तनुषे रूपम्।
इह सत्कुलकन्यामर्यादा विधिनाऽतुलिता विहिता
चित्तमपत्रपमद्य मदीयं त्वय्यासक्तं पुनरपि।
अजित! मुकुन्द! नृसिंह! गदाग्रज! मम कन्याया ग्रहणे
अत्रोपायो गिरिजापूजनयात्रापथसङ्केतः।
विविधतपोभिर्यत्पदधूलिं वाञ्छन्त्यत्र महान्तः
कमलनयन! तद्भवत्प्रसादो यदि भविताऽत्र न लब्धः?
जह्यां जीवनमिदमुपवासैः स्याच्छतजन्मभिरस्याः॥

श्लोकान् सप्त विलिख्य तद्द्विजपतिद्वारा तथा रूक्मिणी
पत्रं प्रीतिरसेन पूर्णमपरञ्छ्रीकृष्णपार्श्वे निजम् ।
शीघ्रं सा विससर्ज वल्लभपुरीं कृष्णप्रिया द्वारकां,
भेदेऽसत्यपि लोकसंग्रहकृते वार्ता परस्याऽऽत्मनः ॥ १४२१॥

एवं पाणिनखैर्महाप्रभुरपि श्रीरूक्मिणीभावतः
श्रीकृष्णाय निजप्रियाय लिखितुं प्रेमाक्षरं प्रस्तुतः ।
रोदित्यत्र तथास्फुटं स विकलस्तेनैव भावेन तत्
तानेव प्रकटं करोत्यपि तथाभावान् रुदन् वै रुदन् ॥ १४२२॥

भावोऽयञ्छमितः क्षणैः कतिपयैर्बाह्ये तु मञ्चे गुरु—
र्गोप्या सुप्रभया बभूव मधुरालापे तथाऽद्वैतजी ।
लट्ठं स्कन्धगतं निधाय हरिजी जागर्तु-जागर्तु च
भ्राम्यन्नस्ति, परञ्च भक्तनिकरः प्रेम्ण्यत्र रोदित्यलम् ॥ १४२३॥

एतस्मिन् क्षण एव दर्शकपुरो मञ्चे जगन्मोहिनी—
रूपं तच्च दधत्प्रवेशमकरोत्प्रेमावतारः प्रभुः ।
अग्रे नित्ययतिर्बभूव जरतीवेषे प्रभो,र्नित्यजी—
स्कन्धे पाणिमसौ निधाय शनकैरायाति पद्माऽऽकृतिः ॥ १४२४॥

श्रीलावण्ययुतं स्वरूपमधुना दृष्ट्वाऽद्भुतं तत्प्रभो-
र्भक्तास्ते चकिता बभूवुरखिला, लोकोत्तरे विस्मय: ।
तत्कालस्य महाप्रभोस्तु कलना, शक्ते: कवीनां बहि-
स्तद्रूपं प्रभुणा तथास्ति विहितं सर्वैस्तदा विस्मृतम् ।। १४२५ ।।

लक्ष्मीं कोऽपि च जानकीं ननु महाकालीं पर: पार्वतीं
कश्चिद्रासविहारिणीरसमयीश्रीह्लादिनीराधिकाम् ।
तद्रूपे निजभावनानुसरणात्पश्यन्ति भक्तास्तथा,
दृष्ट्याऽन्तर्हृदि याति संसृतिरियं, दृष्टिर्यथा भावना ।। १४२६ ।।

काले सागरमन्थने भगवतो दृष्ट्वा जगन्मोहिनी-
रूपं राक्षसयक्षदानवसुरा: सर्वे यथा मोहिता: ।
कामार्तश्च सुराधिपो ननु महादेवोऽपि भूत्वा तथा
तत्पृष्ठे हि दधाव, तत्समतया सर्वेऽत्र मुग्धा:, परम् ।। १४२७ ।।

कस्याप्यत्र न मानसे प्रभुवशात्कामस्य भावोऽभव-
न्मातृस्नेहरसस्य तत्र निखिलश्चक्रेऽनुभूतिं पराम् ।
गीत्वा भावमयं स सुन्दरपदं लक्ष्मीस्वरूप: प्रभु-
श्चेष्टाभावयुतं ननर्त मधुरं कालेऽत्र नारीसमा- ।। १४२८ ।।

वाणी च प्रकृतिस्तथाऽऽकृतिरपि स्थानेऽस्य जाताऽखिला,
गायन् कोकिलतुल्यकण्ठमधुरञ्चासीत्स कर्णप्रियम् ।
आसीत्तस्य च भावभङ्गिषु तदा पूर्णं तथाऽऽकर्षणं
सर्वे स्तम्भितचित्रतुल्यलिखिता लोकोत्तरान्नृत्यत: ।। १४२९ ।।

भावावेशगतोऽयमत्र सततं नृत्यन् बभूव प्रभु-
र्वृद्धिं यात्यधिकाधिकं मधुरिमा नृत्यस्य तस्याधुना ।
धारे संततमश्रुणोर्नयनयो: संस्यन्दमाने गते
स्यन्देतेऽत्र सजीवगाङ्गयमुनावारिप्रवाहौ यथा ।। १४३० ।।

तस्याऽऽस्तामुपरि भ्रुवौ हरिहृदस्तत्रोन्नते नृत्यतो
नानाभूषणनूपुरादिरवतो रङ्गोऽभवज्झङ्कृत: ।
स्तब्धाऽऽसीत्प्रकृति, निरीक्षितुमहो! मन्येऽत्र वातोऽपि किं?
लुब्धो नृत्यमपूर्वमेतदधुना तिष्ठेन्निमायिप्रभो: ।। १४३१ ।।

स्थितास्तथान्तर्निखिला: पुन: स्त्रियो
दृशौ च विस्फार्य च विस्मयेन ता: ।
अहो! स्म पश्यन्ति तथाऽद्भुतां प्रभो:
सुरूपलावण्यमनोहरच्छटाम् ।। १४३२ ।।

नित्यानन्दयतिर्विहाय तरसा वृद्धास्वरूपं पुनः
स्थाने क्रन्दति गौरतन्मयतया श्रीकृष्णभावेन वै ।
श्रुत्वा क्रन्दनमस्य भक्तनिवहा जाताः परं व्याकुलाः
श्वासैश्चातिशयैः स्वरैश्च रुरुदु 'र्हा! गौर! हा कृष्ण! हा!' ।। १४३३।।

सर्वेषामिह चन्द्रशेखरगृहं तद्रोदनस्य ध्वने–
र्लीलायां हि जुगुञ्ज, सर्वककुभो ज्ञाता रुदत्यो यथा ।
दृष्ट्वा भक्तगणं तथाहि विकलं वात्सल्यभावं निजं
तेषु द्योतयितुं ससाद भगवत्सिंहासने चैत्य सः ।। १४३४।।

सम्पूर्णन्तु गृहं प्रकाशभरितं सिंहासनेऽस्मिन् स्थिते
मन्ये व्योम्नि सहस्रमद्य युगपत्स्थानेऽत्र विद्योतिताः ।
नक्षत्राणि तथेन्दवश्च रवयश्चाग्रेऽखिलानां दृशो–
र्दिव्यालोकममुं न सोढुमयतां व्याप्ता यथा शून्यता ।। १४३५।।

स स्थाने स्थित एव दासमधुना चाऽऽह्वत्तु सिंहासने
क्षिप्त्वा लड्डमसौ दधाव जगतां क्रोडाय मातुर्हरिः ।
उत्सङ्गे तमयञ्चकार निजके चोत्थाप्य दासं प्रभु–
स्तत्रस्थोऽयमपूर्वमेति तु महामायाऽऽदिशक्त्याः सुखम् ।। १४३६।।

सर्वेषां तदनन्तरं समभवत्पर्यायशः स क्रमो
वात्सल्यस्य रसं ददौ भगवतीभावेऽखिलानां प्रभुः ।
स्वाप्राप्यस्तनपानतः पुलकितञ्चक्रेऽखिलं नन्दितं
तत्पानञ्च तथाहि कारयति च प्रातःक्षणो लोकितः ।। १४३७।।

भक्तानामरुचिप्रतीतिरभवत्सूर्योदये वा तदा
चक्रे संवरणं प्रभुर्भगवतीभावस्य दृष्टे रवौ ।
वेषं तं परिणम्य स प्रकृतिगो भक्तैः क्षणेन प्रभु–
र्गङ्गातीरमुखश्चचाल विधये नित्याय गौराङ्गजी ।। १४३८।।

तेजोमयं स्थितिमिदन्तु गतेऽपि तस्मि–
ञ्छ्रीचन्द्रशेखरगृहं हरिलीलयेद्धम् ।
तेजो हि तच्च शनकैः शनकैः समाप्तं
गेहेऽत्र सप्तदिवसैर्ननु पूर्णतश्च ।। १४३९।।

श्रीमद्भागवतस्यात्र भक्तैरेवं समं स्वकैः ।
प्रायश्चकार सर्वासां लीलानां नटनं प्रभुः ।। १४४०।।

भक्तैः सार्धं प्रेमरसास्वादनम्

८८. चेतो रसयतु भगवद्भक्तिम् ।
संसारे नानारसभरिते स्थूलमतीनाञ्छान्तिः
सुखमेकान्तिकमात्यन्तिकमपि सदा विदूरं स्थास्यति ।
नश्वरभौतिकवस्तूनामिह रसस्यापि नश्वरता
अविनश्वररसरूपश्चात्मा तत्सुखशान्तिस्थानम् ।
आत्मैवायं ब्रह्म परात्मा भक्तिमतां भगवानिति
सच्चित्परमानन्दाकारं सगुणं भगवत्तत्त्वम् ।
भागवतानां केवलभक्त्या भगवद्रसनिष्पत्तिः
तत्पादाम्बुजसर्वस्वैस्तैः क्षमा भवति धन्येयम् ॥

प्रेम्णः केन भवेत्तथाहि तुलना ? प्रेमाऽद्वितीयं तथा
वस्त्वेकं, जडचेतनाऽचरचरे व्याप्तञ्च सर्वत्र तत् ।
ओतप्रोतमथात्र तत्समतया प्रेमैव वै संसृतौ,
यद्वस्तुद्वयमेलने ननु रसापेक्षाऽस्ति तत्प्रेम वै ॥ १४४१ ॥

आकाशं ननु रिक्तमत्र मनुते, भ्रान्तोऽस्ति लोकः स वै
लौहादप्यधिकं तथास्ति स घनो रिक्तस्तथाऽल्पोऽपि नो ।
अप्येकः परमाणुरत्र न समाविष्टो भवेच्चाधिकः
साकल्येन स संभृतोऽस्ति सदसद्भावैर्नृवृत्त्युद्गतैः ॥ १४४२ ॥

व्याप्तं प्रेम समानमस्ति ननु तद्भावेषु सर्वेषु तत्
प्रेमाऽत्र द्रवयोजको जगति वा ज्ञेयः सुधोपस्करः ।
एते प्रेमवशात्स्वकीयविषये भावाः समस्ताः स्थिताः
सर्वत्रास्ति परं नहि स्फुटतया प्रेमोपलब्धिस्तथा ॥ १४४३ ॥

पूर्णोद्गतिस्तु वरभागवतस्य देहे
प्रेम्णस्तथा भवति लोकविलक्षणस्य ।
अन्योन्यमेव सततं नितरां पिबन्तः
प्रेम्णो रसायनमथात्र भवन्ति भक्ताः ॥ १४४३ ॥

तच्चेष्टास्वखिलासु चात्र भवति प्रेमैव तु प्रेम वै
स प्रेमाऽऽसवलोकबाह्यचरितोन्मत्तः सदा लक्ष्यते ।
स्थाने तिष्ठति पाययंश्च चषकानापूर्य तद्वारुणीं
बन्धून् प्रेमिजनान्निजान् भुवि तले भक्तानपि स्वेच्छया ॥ १४४५ ॥

मत्तास्तेऽपि भवन्ति पानविधिनाऽपूर्वाऽऽसवस्यास्य च
प्रीता धन्यतमास्तथाहि रहिता लज्जाघृणाभीतित: ।
तेऽप्यत्र प्रलपन्ति मत्तसदृशा, मोदश्चरित्रे कियान्—
तेषां मत्तनृणां तथाऽतुलरस:, प्रेमा रसानां निधि: ॥ १४४६॥

तेषां मारणताडनेऽपवदनेऽन्योन्यं स्तुतिप्रार्थने
व्यापारेष्वखिलेषु भुक्तिशयने प्रेम्ण: स्थिते संपुटे ।
एतत्कर्मभरप्रतीतिरथ वै दिव्येव लोकोत्तरा
स्थाने तच्छ्रुतिमात्रत: सहृदये लोके सुखास्वादनम् ॥ १४४७॥

प्रेमासवाय विकला ननु तेऽपि तस्मै
लोकास्तथा सहृदयाश्च भवन्ति, तस्मात् ।
वैकल्यतो, भगवतस्त्वधिकारिणस्ते
प्रेम्णो निजप्रियतमस्य लगन्ति चान्ते ॥ १४४८॥

नित्यं सम्प्रति चात्र भक्तनिवहं सङ्गे विधाय प्रभु:
श्रीलीला मधुरास्तथाहि मधुरा कुर्वन्नभूत्स्वप्रभो: ।
उद्धारस्त्वभवज्जगायिमधुकभ्रात्रोश्च यत्कालत:
सर्वस्वञ्च विहाय तौ निवसत: श्रीवासगेहे तथा ॥ १४४९॥

भक्तानां ववृधे ततो ननु तथोत्साहोऽधिकं सर्वतो
बोधन्तेऽपि जना महत्त्वमपरे संकीर्तनस्य स्फुटम् ।
चर्चा सम्प्रति कीर्तनस्य भवति द्वीपे ह्यतीताधिका
कुख्यातं विविधं विधातुमधुनेहन्ते खला: कीर्तनम् ॥ १४५०।

इमेऽत्र निन्दन्तु खलास्तु, भावका:!
परं रसास्वादनमेव कुर्वताम् ।
सहाऽद्य भक्तैर्विहिताद्भुतात्मनां
प्रभोस्तु लीलाजगतां निमायिन: ॥ १४५१॥

आसीद्गुप्तमुरारिरत्र तु सहाध्यायी प्रभो: किन्तु स
ज्येष्ठो वै वयसा, प्रभुस्तमधिकं सिष्णेह भक्तं पुन: ।
मेने चाधिकमन्तरङ्गमपि च स्थाने प्रभो: पादयो—
र्गौराङ्गस्य, मुरारिगुप्तसुहृद: पूर्णानुरागोऽस्ति वै ॥ १४५२॥

श्रीरामस्य च साधकोऽस्ति तदयं बुद्ध्वा कदाचित्तथा
भावे स्वं हनुमन्तमेत्य कुरुते हुंकारमप्यस्य वा ।
आत्मानं प्रभुसेवकञ्च सततं बोधत्ययं, कर्हिचि—
च्चाह्वद्वै 'गरुड' प्रयुज्य 'गरुड' श्रीविष्णुभावे प्रभु: ॥ १४५३॥

तत्कालं निजमम्बरं ह्युभयतः संतत्य पक्षात्मकं
स्वस्कन्धे द्रुतमेव स प्रभुमहो! कृत्वा मुरारिः प्रियम् ।
आनन्देन तथाङ्गणेऽत्र परितो बभ्राम संलक्ष्य तद्
भक्तानां मुदिता ततोऽतिशयिता,ऽऽनन्दो हि सङ्गे सत्ताम् ।। १४५४।।

श्रीनारायणसन्निभो हि गरुडाऽऽरूढश्चतुर्बाहुषु
प्रत्यक्षं ननु शङ्खचक्रकगदापद्मानि तेषां तदा ।
श्रीमद्वस्तुचतुष्टयानि च दधत्प्रायः प्रतीतः प्रभु—
स्तद्भक्ता ननृतुः प्रसन्नहृदयाः, प्रीतिः परप्राप्तितः ।। १४५५।।

देवी तत्र च मालिनी ननु शची माता तथाऽन्याः स्त्रियो
बिभ्युः स्कन्धगतं विलोक्य सरला भावे मुरारेः प्रभुम् ।
बाह्यज्ञानमभूत्प्रभोः कतिपयैः पश्चात्क्षणैः स क्षितौ
प्राप्तो गुप्तमुरारिकन्धरतलाद्, भावे विशेषस्थितिः ।। १४५६।।

रामोपासकमेकदा परिचितः सोऽयं प्रभुः पूर्णतः
स्तस्यैकान्तिकनिष्ठया निजजने नेतुं प्रभावं तथा ।
एकान्ते तमुवाद 'सत्यमुचिता वार्ता मुरारे! त्वियं
माधुर्ये भवतस्तथासमतया श्रीरामकृष्णावुभौ ।। १४५७।।

स्तस्तस्यैव पुनस्त्विमौ भगवतोऽनन्तस्वरूपेषु तौ
कस्यापि प्रभुविग्रहस्य कुरु तन्नाम्नश्च रूपस्य वा ।
प्रेम्णोपासनमत्र चान्तिमफलं प्राप्तिः प्रभोरेव तैः,
साक्षात्स्यादनुभूतिरस्य सततं स्थानेऽत्र सोपासना ।। १४५८।।

लीलायां ननु संभृतोऽधिकरसः श्रीराघवापेक्षया
श्रीकृष्णस्य, तथाऽऽश्रयं नहि कथं गृह्णासि रामादतः ।
इच्छा मेऽस्ति च हार्दिकी, प्रतिपलञ्छ्रीकृष्णलीलारस—
स्रोतःस्वादनमेव चात्र भवता तत्कुर्वता भूयताम् ।। १४५९।।

श्रीकृष्णमेव हृदयेन तथाहि मत्वा
सर्वस्वमत्र निजकं, कुरु सर्वदैव ।
तस्यैव पूजनमथार्चनकं स्वरूप—
ध्यानञ्च नामभजनं व्रजवल्लभस्य ।। १४६०।।

तामाज्ञामकृत प्रभोरथ शिरोधार्यां मुरारिः, परं
तस्याऽनन्यसुरप्रियस्य हृदये जातं तथाऽऽन्दोलनम् ।
आसीज्जन्मत एव स प्रकृतितो रामस्य चोपासक—
स्तच्चित्तं ननु रञ्जितं समभवच्छ्रीरामरूपे तथा ।। १४६१।।

कृष्णोपासनमस्य कर्तुमधुनाऽऽदेशं विधत्ते प्रभु—
स्तत्रैव त्वसमञ्जसेऽश्रु पतितो मुञ्चन्नभूदानिशम् ।
निद्रा तन्नहि चागता क्षणमपि क्रन्दन् क्षपां नीतवान्,
प्रातः श्रीप्रभुसन्निधौ विनयतो दीनं न्यवादीदयम् ॥ १४६२ ॥

'विक्रीणामहकन्तु मस्तकमिदं रामाय चात्र प्रभो!
विक्रीतन्तु परत्र रामपदयोः शीर्षं कथं स्यान्नतम् ? ।
कर्ता सम्प्रति तन्निजात्महननं, रामस्य नोपासना—
त्यागो मे न च सम्भवः प्रभुवचः सामर्थ्यमुल्लङ्घितुम्' ॥ १४६३ ॥

एतत्प्रोच्य मुरारिरत्र विकलः स्थाने रुरोद स्फुटं
जातोऽत्यन्तमुदाऽन्वितोऽस्य सुहृदो दृष्ट्वेष्टनिष्ठां प्रभुः ।
गाढालिङ्गनमस्य गद्गदगिरा कुर्वञ्जगाद द्रुतं
'निष्ठेष्टेऽस्ति तवेदृशी ह्यतिशया धन्यो मुरारे! निजे ॥ १४६४ ॥

मेऽपि प्रदेहि ननु तादृशमेव चाशी—
र्वादं, दृढा भवतु येन तथैव निष्ठा ।
ऐकान्तिकी दयितकृष्णपदाब्जयुग्मे'
निष्ठा मनुष्यहृदयस्य परा हि सम्पत् ॥ १४६५ ॥

स्तोत्रं प्रभुः किमपि गातुमयं कदाचिद्—
गुप्तं मुरारिमवद,ल्लयतः पपाठ ।
रामाष्टकं स्वरचितं स्वरतश्च, तस्य
श्लोकद्वयं रसिकलोककृतेऽत्र दत्तम् ॥ १४६६ ॥

८९. रामं त्रिभुवनललितललामं भजामि हृदये सततम् ।
अवधराजसिंहासनसंस्थितनृपवरसुन्दरवेषम्
'तमसो मा ज्योतिर्गमया'ऽऽर्चकशारदशशिभावदनम् ।
गुरुकवितुलमणिकुण्डलशोभितकर्णयुगलकमनीयम् ।
राजमुकुटमणिदीधितिदीपितनिखिललोकसकलाशम् ॥

९०. ध्येयः श्रीपुरुषोत्तमरामः ।
सूर्यकिरणविकसितकमलामलदीर्घमनोहरनयनः
बिम्बारुणसदृशाधरसुन्दरतिलसुमनःसमनासः ।
यन्मन्दस्मितसम्मुखलज्जितशीतलधवलदीधितिः
मर्यादाकरवारिधिमन्दररविकुलकीर्तिपताकः ॥

अत्यन्तमेव मुदितः प्रभुरस्य गीत–
स्तोत्राद्वरं स्वसुहृदः पदकं लिलेख ।
'श्रीरामदास' इति मस्तकमध्यशब्दं,
श्लोके कृताऽस्ति घटना कियती सजीवा ।। १४६७।।

९१. **श्लोकः प्रभुगुणवर्णनपङ्क्तिः ।**
श्रुत्वा रघुवीराष्टकमधुना सुहृन्मुरारिवदनतः
प्रीतः प्रभुजी वैद्यमस्तके निदधौ निजचरणाब्जम् ।
'अविरलभक्तिं मत्कृपया त्वं रामस्याप्नुहि', निगदति
'रामदास' इति तस्यालीके लिखति सुपदसंयोगम् ।।

लब्ध्वाऽकल्पमनुग्रहं प्रमुदितश्चैवं मुरारिः प्रभोः,
स्वं गेहं गत एव भोजनमसौ पत्नीं निजामिच्छति ।
साध्वी साऽत्र पतिव्रताऽस्य वनिता तत्सम्मुखे तत्क्षणं
संयुज्य द्विदलौदनञ्च निदधौ, श्रीर्गेहिनी गेहिनः ।। १४६८।।

भावावेशगतोऽधुना त्वयमहो! ग्रासेषु भूयो घृतं
संमेल्याऽध्वनि बालकोऽत्र शिशुको यः कोऽपि वा दृश्यते ।
सस्नेहञ्च तमेव भोजयति तद्भुङ्क्ते तथाऽयं स्वयं
बह्वन्नं पतति क्षितावपि यतः, सर्वत्र जीवस्थितिः ।। १४६९।।

भुक्तं तेन कियत्तथा स्वयमसौ नो वेद किञ्चित्पुनः
पत्नी चास्य ददर्श तादृशदशां तस्थौ तु सा विस्मिता ।
हस्तक्षेपमियन्तु नाकृत पतिप्राणाऽस्य कार्ये मनाग्
भुक्त्वैवञ्च जलं निपीय शयितः, प्रीतस्य निद्रासुखम् ।। १४७०।।

प्रातर्जागरिता यदा तु किमयं पश्यत्यमुष्याधुना
प्रत्यक्षं समुपस्थितोऽस्ति पुरतः प्रेमावतारप्रभुः ।
उत्थाय द्रुतमेव तस्य चरणौ नत्वा ददौ चासनं
स्थातुं सुन्दरमेकमत्र, सुहृदोर्योगे हि योगो द्वयोः ।। १४७१।।

एवं ज्ञातुमियेष कारणमसौ गेही निषण्णे प्रभौ
तत्तस्याऽऽगमनस्य नम्रहृदयोऽकाले मुरारिस्तथा ।
'वैद्यः सन् विपदं त्वमेव कुरुषे किञ्चित्तु देह्यौषधि–
ञ्छ्रीप्रेमा वदति स्मयन् प्रभुरय,ञ्चित्रं रहः प्रेमिणोः ।। १४७२।।

आश्चर्यकं प्रकटयंस्तरसा मुरारि–
श्चाह 'प्रभो! कथमथौषधि,रिच्छसि त्वम् ।
रोगस्य कस्य ननु चौषधि,मद्य रात्रिं
व्याप्यैव सम्प्रति किमत्र गतो विकारः' ? ।। १४७३।।

उक्तं तत्स्मयताऽमुना 'तव नहि ज्ञातं? विकारोऽत्र क:?,
पत्नीं पृच्छतु तु स्वकां निशि कियन्मां भोजयामास तत् ।
साज्यञ्च द्विदलौदनं ननु तदा प्रेम्णाऽभवो भोजयं—
स्तत्प्रेम्णोऽत्र कथं भवामि च तवोपेक्षां विधातुं क्षम:? ।। १४७४।।

यावत्तत्र च भोजितं तदखिलं भुक्तं, परं साम्प्रतं
स्थानेऽजीर्णमभूत्तवैव निकटे तस्यास्ति चाप्यौषधि: ।
पश्येदं, त्विदमेव राजति तथाऽजीर्णाऽऽमयस्यौषधं'
भैषज्यं ननु रोगिणां, सुमनस: प्रेमक्रिया ह्यौषधि: ।। १४७५।।

तत्राभूच्च महाप्रभुर्ननु पिबंश्चैवं ब्रुवाण: क्षणा—
त्तस्योच्छिष्टजलञ्च पात्रनिहितं वैद्यस्य खट्वान्तिके ।
शीघ्रं तत्कृतितो निवारणमसौ कुर्वन् बभूव, प्रभु—
स्तावत्तत्तु जलं पपौ प्रियरसो प्रेमी तदर्धाधिकम् ।। १४७६।।

प्रेमाऽऽलुप्तो विलोक्येदं मुरारि: प्ररुदंस्तथा ।
श्रीप्रभुपादपद्मेषु लुलोटाऽसौ पुन: पुन: ।। १४७७।।

स्नेहेन प्रभुरेकदाऽतिशयितो मित्रं जगादात्मनो
'भक्त्याऽहेतुकया वशेऽसि कृतवान् कृष्णं मुरारे! प्रियम् ।
पाशात्प्रेममयात्तथाविधदृढञ्छ्रीकृष्णचन्द्रस्त्वया
बद्धो, मुक्तिमसौ यदीच्छति ततो मुक्तौ न भावी प्रभु:' ।। १४७८।।

श्रुत्वैतत्कविहृदयात्मना
प्रत्युत्पन्नमतिरसौ द्रुतम् ।
गुप्त: श्रावयति मुरारिक:
श्लोकं भागवतममुं प्रभुम् ।। १४७९।।

९२. श्रीपतिरधनं सुजनं स्वजनं कुरुते चैतन्यात्मा ।
व्यवहारे भुवि शक्तिमतामिह बुद्धिमतां निजसदृशे
मैत्री सङ्ग: सम्बन्धो वा युज्यते ह्यौचित्येन ।
शक्तिवितरणे बुद्धिविकासे पात्रविशेषापेक्षा
क्षुधातृषादेहान्यापेक्षाविषये किं पात्रत्वम् ? ।
तद्भौतिकधनविनिमयकर्मणि तद्दास: किं कर्ता ?
औचित्येन तदर्हवितरणं कुरुते तद्धनभर्ता ।।

श्रीमद्भागवतस्य पद्यमिदकञ्चोक्ति: सुदाम्नस्तथा
ब्रूते तस्य दयालुताऽतनुकृपाशंसां सुदामा दिशन् ।

'पश्यत्वत्र दयालुतां भगवतः, क्वाऽहं दरिद्रो द्विज-
स्तत्पापात्मककर्मभिस्तु घटिते देहे सदाऽऽसक्तिमान् ॥ १४८० ॥

पूर्णैश्वर्यसमस्तपुण्यशरणं क्व कृष्णचन्द्रस्तथा
साम्यं जातिगुणक्रियादिविषयं दूरेऽपि नास्ति द्वयोः ।
बाहुभ्यां परिरम्भते द्विजकुलोत्पन्नं तथापि द्रुतो
विप्रं केवलजातिमात्रमपरं कृष्णः स मां स्माऽऽत्मनः ॥ १४८१ ॥

मे तत्रास्ति न पौरुषं किमपि, तद्धेतुः कृपाऽहैतुकी
कृष्णस्यैव सतः कृपालुसुहृदोऽद्धा वर्तते केवलम्' ।
एवं प्रेमभरप्रदर्शनमयं कुर्वश्च नानाविधं
तेने स्वस्य विनोदनेन विपुलाऽऽनन्दं मुरारेः प्रभुः ॥ १४८२ ॥

अद्वैताचार्यस्य श्रोतव्या सम्बन्धे ।
वार्ताऽप्यद्य प्राज्ञाः! श्रीगौरस्य प्रेम्णः ॥ १४८३ ॥

ज्येष्ठः श्रीप्रभुतो न केवलमसावद्वैतविद्द्गुरुः
प्रायः स्याद् वयसाऽस्य तन्पितुरपि श्रीमज्जगन्नाथतः ।
विद्यायां ननु बुध्यते स्म निखिलश्रेष्ठोऽयमत्र, प्रभु-
श्रीमन्मंत्रवरप्रदेश्वरगुरुभ्राता तथाऽऽचार्यजी ॥ १४८४ ॥

सम्बन्धेन तथा कुलेन वयसा वृद्धस्ततो विद्यया
सत्कारं गुरुतुल्यमेव कुरुते गौरस्तथाऽस्यादरम् ।
आचार्यस्य परन्त्वसह्यमभवत्स्वस्मिन् प्रभोस्तादृशं
पादे तन्नतिपूर्वकप्रणमनं, नम्रस्य लज्जा नताद् ॥ १४८५ ॥

आचार्यो बहु लज्जतेऽस्य विधिना भूयस्तथा चात्मनो
धिक्कारं कुरुते, यतोऽयमभवत्तद्दास्यभावेच्छुकः ।
किन्त्वस्योपरि दास्यभावधरणस्थाने विधत्ते प्रभुः
श्रद्धालुर्गुरुभावमेव सततं, प्रेमी तथाऽऽचारवान् ॥ १४८६ ॥

तेनाऽशान्तमनाः स शान्तिपुरकं दासेन सार्धं ययौ
वेदान्तं निजमेव पाठयति तं तत्रैव विद्यार्थिनः ।
अभ्यासं स विहाय भक्तिविषयं ज्ञानस्य चर्चां जनैः
कुर्वन् सम्प्रति दृश्यते, गुरुरपि स्थाने स्वयं खिद्यते ॥ १४८७ ॥

भावोऽनेन मनोगतश्च बुबुधेऽद्वैतस्य तच्चैकदा
श्रीनित्यं वदति प्रभुः स्वयमहो! 'श्रीपाद! जाने कथम्? ।
आचार्यो बहुभिर्दिनैर्ननु नवद्वीपेऽत्र नायातवान्
कृत्वाऽऽयाव ततोहि शान्तिपुरकं गत्वैव तद्दर्शनम्' ॥ १४८८ ॥

नित्यानन्दयतेस्तदत्र च किमापत्तिस्तथा भाविनी ?
कामञ्छान्तिपुरोन्मुखौ च चलितौ द्वावेव संयात्रिणौ ।
तौ द्वावेव समानमत्तहृदयौ पर्यायिभूतात्मनौ
नो संज्ञा वपुषो ययोर्ननु तयो: स्याच्चेतना किं पथ:? ।। १४८९ ।।

यान्तौ विस्मरतोऽत्र मार्गमधुना द्वावेव तत्प्रेमिणौ
गङ्गातीरगते पुरे तु ललिते यातावटन्तावुभौ ।
एकं तत्र गृहं तयोश्च ददृशे गङ्गातटे पावने
पृष्टं 'कस्य गृहं ?' 'गृहं (जनवच:) संन्यासिनो गेहिन:'।। १४९० ।।

श्रुत्वेदञ्च तदुत्तरं प्रभुरसावुच्चैर्जहास स्फुटं
नित्यानन्दमुवाद 'कीदृशमिदञ्छ्रीपाद! चाश्चर्यकम् ? ।
गेही चापि तथा यति: पुनरपि, द्वीपे न दृष्टो गृही—
संन्यासी तु कदापि यावदधुना ह्यस्माभिरत्राद्भुतम् ।। १४९१ ।।

पश्यावात्र तु साम्प्रतं चल परं, किञ्चास्ति गेही-यति:?'
श्रुत्वा नित्ययतिश्चचाल ननु तद्गेहोन्मुख: संयत:
तत्पृष्ठे चलति प्रभु,र्यतिगृहद्वारञ्च यातावुभा—
वद्राष्टां सकषायवस्त्रमपरं संन्यासिवेषं नरम् ।। १४९२ ।।

तस्मै नित्ययति: पुरो ननु नमश्चक्रे च, संन्यासिनं
बुद्ध्वा किञ्च महाप्रभु: प्रणमनञ्छ्रद्धान्वितोऽस्याकरोत् ।
आयान्तं निजगेहमुन्मुखमसौ सार्धञ्च संन्यासिना
तेजस्विप्रियसुन्दरं विनयिनं वर्षत्रयोविंशतिम् ।। १४९३ ।।

दृष्ट्वा ब्राह्मणपुत्रमेकमधुना गेही-यात: स्वागत—
ञ्चक्रेऽभ्यर्चनमत्र चासनमदात्ताभ्यां यथायोग्यकम् ।
वार्ताऽन्योन्यमभूत्तदा बहु तयोश्चासीदयं सर्वदा
स्थायी प्रेमबुभुक्षित: प्रभुरहो!, प्रेमैव साधु क्षुधा ।। १४९४ ।।

पश्यंस्तत्परित: प्रभु: कथयते संन्यासिनं गेहिनं
'संन्यासिन्! किमपीह चास्ति भवत: कुट्यां महाराज! तत्? ।
आवाभ्यां जलपानहेतुमधुना सम्पादनीयं गृहिन्!'
तत्संन्यासिगृहस्थकस्य वनिते चास्ताञ्च गेहान्तरे ।। १४९५ ।।

संन्यासी जलपानकं गृहपतिश्चानेतुमाहात्र ते,
तावन्नित्ययुत: प्रभुस्त्रिपथगास्नानं विधायाऽऽगत: ।
स्वे-स्वे सम्प्रति चासने गृहविधिद्वारा निषण्णौ स्तृते,
वर्षाकालफलप्रसूतिसमयश्चाषाढमासोऽधुना ।। १४९६ ।।

आम्रं सुन्दरसुन्दरञ्च पनसं पात्रद्वये सज्जितं
ते संन्यासिगृहस्त्रियौ स्म नयतः क्षीरं कटोरेऽपि च ।
आम्रं तत्पनसञ्च खादितुमसौ शीघ्रं सनित्योऽभवत्,
तृप्तिं वस्तु बुभुक्षितस्य कुरुते दत्ते रसं प्रेमिणः ॥१४९७॥

संन्यासी स महाशयः पुनरहोऽभूद्वाममार्गी गृही
तत्सङ्केतितमेव पूर्वमपि तज्जानन्ति सर्वे जनाः ।
वङ्गे वामपथप्रथार्चनविधिप्राबल्यमासीत्तदा
तत्स्त्री पृच्छति 'चानयानि किमत"श्चानन्द"मप्यल्पकम्?' ॥१४९८॥

संन्यासी कुरुते निषेधमपदाद्गेहे ततः स्त्री ययौ
दीर्घं तत्र रसालमेकमधुना खादन् प्रभुः पृच्छति ।
'श्रीपादास्ति तथाहि वस्तु किमिदञ्चानन्दनामप्रियं ?
संसारे पृथगेव चास्ति किमहो! भाषाऽपि संन्यासिनाम् ॥१४९९॥

संन्यासिनश्च गृहिणंस्त्वथवा तथेयं
भाषाऽस्ति? तु त्वमसि नात्र गृही यतिश्च ।
ज्ञाता तथापि भविता ध्रुवमेव', लोके
सूक्ष्मातिसूक्ष्ममपि वेत्ति यतोऽवधूतः ॥१५००॥

श्रीनित्यो हसति प्रभोस्तदमुना प्रश्नेन ?, भूयः प्रभुः
पृच्छत्येव 'कथं तथाहि हससि श्रीपाद! तु ब्रूहि मे ।
सत्यं-सत्यमहो, किमस्ति च तथाऽऽनन्दः किंप्यस्ति चे,–
न्मिष्टं वस्तु, ततोहि याच, पयसः पश्चान्मुखं स्यान्मधु' ॥१५०१॥

चूषन्नाम्ररसञ्जगाद यतिको नित्यः 'प्रभो! वस्तुतः
सन्तीमे ननु वाममार्गरसिका, (वामस्य सर्वं प्रियम्) ।
'आनन्देन' तथा ब्रुवन्ति मदिरां', जातः परं दुःखितः
श्रुत्वेदं प्रभुरद्य, तत्र परितः पश्यत्यसौ सिंहवत् ॥१५०२॥

संन्यासी तु महाशयो वनितयाऽऽहूतस्त्वमुष्मिन् क्षणे
यातोऽन्तः प्रभुरत्र तत्क्षणमयं तस्माद्दधाव द्रुतम् ।
एवोत्थो जलपानमध्यरसतो, नित्योऽपि पृष्ठेऽलगद्
धावन्तौ च विलोक्य तौ गृहपतिर्यातः परावर्तितुम् ॥१५०३॥

गङ्गायां द्रुतमत्र तत्प्रभुरयं स्थाने चुकूर्दे, तर–
ञ्छीघ्रञ्छान्तिपुरोन्मुखश्च चलितः, शान्तिः समाप्तिः परा ।
नित्यानन्दयतिस्तथाहि तरणाचार्योऽस्ति, सोऽपि प्रभोः
पृष्ठे सम्प्रति वै ततार, सततं पृष्ठेऽस्य जीवोऽभयः ॥१५०४॥

आवेशो जनितस्तथैव सुहृदो गङ्गान्तरे तु प्रभो—
स्तीर्त्वा शान्तिपुरस्य घाटनिकटे क्रोशद्वयं प्रायशः ।
प्राप्तोऽसावृजु घाटतो गुरुगृहं तत्रस्थितो दासजी
दूरादेव विलोक्य पादनमनञ्चक्रे प्रभोः सन्मुखः ॥ १५०५॥

चैतन्यं किमपि प्रभोर्नहि परं, पार्श्वे गुरोरेव स
प्राप्तः पूर्वममुञ्चगाद गुरुकाऽऽचार्यञ्च दृष्ट्वैव 'किम् ? ।
तन्वानः पुनरेव शुष्कमपरं ज्ञानं तथा विद्यते ?'
'ज्ञानञ्छुष्कमिदं कथन्तु ?, निखिले ज्ञानं तथाह्युत्तमम् ॥ १५०६॥

नारीणान्तु कृतेऽस्ति भक्तिरिति' तच्छ्रुत्वैव चाचार्यकं
दीर्घं ताडयति प्रभु,र्ननु जनाः पश्यन्ति सर्वे पुनः ।
आश्चर्येण तथाद्भुतामनुपमां लीलामिमां, साहसं
नो कस्यापि निवारणे सुमनसः कार्यादतस्तु प्रभोः ॥ १५०७॥

तत्किञ्चित्त्वविचार्य स प्रभुरपि स्थानेऽस्य पृष्ठे गुरो—
र्वृद्धस्यास्ति च ताडयन् मतिमतो घूसाचपेटादिभिः ।
अद्वैतो भवति प्रसन्नहृदयो घातोऽपतद्वै यथा
प्रेमाऽऽघातपथेन वृद्धवपुषि प्रेमाऽमुना चार्यते ॥ १५०८॥

नो लक्ष्यते गुरुमुखेऽप्यणुमात्रमत्र
स्थाने हि दुःखपरितापविषादरेखा ।
स प्रत्युताधिकतयाऽस्ति मुदैव मत्तः,
प्रेमप्रकाशनमहो! महतां विचित्रम् ॥ १५०९॥

श्रुत्वा ताडनकध्वनिं खट-पटं तद्धर्मपत्नी गुरोः
श्रीसीताऽपि च निःसृताऽत्र गृहतो देवी ददर्शाऽद्भुतम् ।
आचार्यस्य तनौ प्रहारमधुना कुर्वन्तमेव प्रभुं
भर्तुर्गौरनिमायिनञ्च विकलाऽधीरा जगाद द्रुतम् ॥ १५१०॥

'हे! हे! त्वं किमिदं करोषि नदियावासिन्निमायिन्! प्रभो!
वृद्धाचार्यगुरौ कथं तव दया नायाति' ?, किन्तु प्रभुः ।
तत्कस्यापि नहि शृणोति किमपि, प्रेमाकुलस्ताडनं
स्वीकुर्वन् गुरुकोऽपि गौरगुणनं कुर्वन् प्रनृत्यंस्तथा ॥ १५११॥

एवं तत्समयक्षणैः कतिपयैर्मूर्च्छा प्रभोरागता
संज्ञाशून्यतया क्षितौ स पतितो बाह्यप्रतीतौ तथा ।
आचार्यं निजपादयोर्ननु मुदो नृत्यैर्लुठन्तं समं
दृष्ट्वा 'श्रीहरि' साम्प्रतं 'हरि-हरि' ब्रूते द्रुतञ्चोत्थितः ॥ १५१२॥

'आचार्य! त्वयि कोऽपि सम्प्रति तथा जातोऽपराधस्तु मे?
चाञ्चल्यं किमपीह नो तु विहितं स्वाचेतनावस्थितौ ? ।
त्वं मे पितृसमः, सुतोऽस्मि भवतो भ्रात्रच्युताभस्तथा
क्षन्तव्यं यदि जातमत्र किमपि स्थाने त्वचेतःस्थितौ' ।। १५१३।।

उक्त्वैतत्परितश्च पश्यति, पुरः सीतान्तु देवीं स्थितां
दृष्ट्वा चाह 'मम क्षुधाऽस्ति महती, मातः! पच त्वं द्रुतम्' ।
तच्चोक्त्वा वदतीह नित्ययतिक'ञ्छ्रीपाद! तावद्द्वयं
गङ्गास्नानमितो विधाय तरसाऽऽयामौदनं पच्यते' ।। १५१४।।

आचार्यो हरिदासजी प्रभुवचः श्रुत्वा तथा नित्यजी
श्रीगङ्गां प्रति तच्च चेलुरमुना, तापोऽम्बुना शाम्यति ।
प्रेम्णा चातिशयेन तत्र मिलिताश्चत्वार एवाऽकृत
स्नानं ते तदनन्तरं सुकृतिनः प्राप्ता निवृत्याधुना ।। १५१५।।

साष्टाङ्गं प्रणतिं प्रभुर्भगवते चाचार्यपूजागृहे
चक्रे, तत्क्षणमेव लोटति पदेऽद्वैतो निमायिप्रभोः ।
आचार्यस्य पदे लुलोट हरिजी, पादे स्वकीये प्रभु–
र्दृष्ट्वाऽऽचार्यमसौ लुठन्तमधुना शीघ्रं ततश्चोत्थितः ।। १५१६।।

हस्तौ सम्प्रति कर्णयोर्ननु धरन् कृन्तंश्च जिह्वां रदैः
प्रोचे 'श्रीहरि, मेऽद्य कीदृशमिमं दत्तेऽपराधं भवान् ।
द्वीपे पुत्रसमोऽस्मि, तेन भवतः पात्रं सदा चाशिषः'
स्थाय्यास्ते भुवि गौरवन्तु वयसा ज्येष्ठस्य शुद्धात्मनः ।। १५१७।।

आसीत्सज्जितभोजनञ्च मिलितैः सर्वैर्निषण्णैः कृता
तत्प्रेम्णा महतैव सार्धममुना स्थानेऽत्र भुक्तिक्रिया ।
अत्रैवास्य गृहे निवासमकरोद्रात्रौ सनित्यः प्रभुः
स्थानं नाम च 'कालनां' परदिने चोत्तीर्य गङ्गां ययौ ।। १५१८।।

एकान्ते परमश्च वैष्णवजनस्त्यक्त्वा गृहद्वारकं
गौरीदासपदः करोति भजनं स्थित्वाऽत्र गङ्गातटे ।
प्राप्तस्तत्र विचित्रवेषकलितः पार्श्वे च तस्य प्रभुः,
पूर्वं साधकसन्निधौ भवति वै साध्यस्य चित्राकृतिः ।। १५१९।।

आसीत्स्कन्धगतोऽस्य शोभनतया दण्डो हि नौचालको,
गौरीदाससमीपमत्र तु चलन् कैवर्ततुल्यो ययौ ।
आसीत्ख्यातिरमुष्य पूर्वदिवसैर्गौरीदसेन श्रुता
सौभाग्यं न तु दर्शनस्य सुहृदस्तेनाप्तमद्यावधिम् ।। १५२०।।

चक्रे पूजनमस्य तत्परिचयं लब्ध्वा प्रभोः साधकः
सत्कारं वनवस्तुभिः फलभरैः, कुर्यात्किमन्यद्वनी ।
तस्मै दण्डमिमं जगाद च ददत् 'संसारमोहाम्बुधौ
मग्नाँल्लोकभरान् समुद्धर भवान् पारे निधत्स्वाऽमुना' ।। १५२१।।

स्वीचक्रे ननु तं स हृष्टमनसा बुद्ध्वा प्रसादं प्रभो,—
स्तद्दण्डाधिपतिर्बभूव सुजने यातेऽत्र लोकान्तरे ।
चैतन्यो-हृदयस्तथागुरुतपास्तत्पट्टशिष्यस्ततो
दण्डस्यास्य च वर्धितोऽत्र महिमा भूम्ना समाजेऽमुना ।। १५२२।।

श्यामानन्दमहात्मना तु सुहृदः शिष्येण तस्योत्तरं
सम्पूर्णोत्कलमध्यमेव विततः श्रीगौरधर्मध्वजः ।
याऽद्यैवं बहु गौरधर्मविततिश्चास्ते समस्तोत्कले
तच्छ्रेयोऽस्य समस्तमेव लसति श्रीश्यामनन्दात्मनः ।। १५२३।।

तल्लक्षोत्कलवासिनः सुहृदयः श्रीगौरभक्तानयं
कृत्वा तत्र चकार तेषु भगवन्नामोपदेशन्तथा ।
सत्यञ्छ्रीप्रभुदत्त एव भवतो दण्डः स पाथोधितः
पारोत्तारणवर्त्मनो मनुहृदां हेतुः प्रधानोऽभवत् ।। १५२४।।

तत्कालनाऽनुचलितः पुनरेव चात्र
द्वीपे महाप्रभुरयं न्यवसत्स्वकीये ।
आचार्यकोऽपि नदियाविषयेऽत्र मध्ये —
मध्येऽस्य दर्शनमनाश्च बभूव यात्री ।। १५२५।।

श्रीवासश्च तथैकदा निजगृहे श्राद्धे पितृणां मुदे
श्रीमद्विष्णुसहस्रनामपठनं कुर्वन् बभूवात्मनः ।
तस्मिन्नेवमुपस्थितः प्रभुरयञ्चागत्य काले तु तत्—
पाठं तस्य पुनर्नृसिंहविषयाऽऽवेशोऽभवच्छृण्वतः ।। १५२६।।

आवेशेऽत्र ददाति हुंकृतिमसौ स्थाने तथा धावते
श्रुत्वा हुंकृतिगर्जनेऽस्य भयतो लोका ययुः सर्वतः ।
वासस्तन्निजभावसंवरणकप्रार्थी बभूव प्रभौ
मूर्च्छतः पतितोऽर्थितः पुनरयं यातः स्वभावे क्षणात् ।। १५२७।।

आचार्यो वनमालिनाम च कदाचित्कर्मकाण्डी द्विजः
प्राप्तः श्रीप्रभुसन्निधौ सुतयुतः कृत्वा प्रणामं पदे ।
स्थाने निष्कृतिसाधनं नृजगतां पप्रच्छ तत्रात्मन—
स्तस्योचे सकृपाप्रदर्शनमसौ, पृष्टः कृपालुर्वदेत् ।। १५२८।।

'साङ्गोपाङ्गतयात्र सम्प्रति युगे तत्कर्मकाण्डक्रिया–
संभावो वरसात्त्वतामपि महद्दु:साध्य एव क्षितौ ।
शुद्धिर्द्रव्यशरीरयोरिव पुरा, नो संभवैवाधुनाऽऽ–
धार: केवलमत्र भावभगवन्नामैव तन्निश्चितम् ।। १५२९ ।।

९३. **शास्त्रे सकले तथोपदिष्टम्–**
अत्र युगे हरिनामैवाऽऽस्ते श्रीहरि–नाम हरि–नाम
केवलमुभयं साधनसाध्यं तत्कलिसमयोऽमाय: ।
नास्ति नास्ति गतिरन्यथा नास्ति कथितञ्चैव–त्रयेण
श्रीचैतन्यमहाप्रभुरयमपि भविता कीर्तनसरणि: ।।'

ब्राह्मण: कर्मकाण्डी स सूपदेशानुसारत: ।
प्रभोर्भागवतो नाम्ना जात: परमवैष्णव: ।। १५३० ।।

आवेशे वरविष्णुमण्डपपदं स्थित्वैकदा श्रीप्रभु:
प्राप्तो,'देहि (बलस्य) तन्मधु–मधु' प्रोवाच चैवंविधम् ।
नित्यानन्दयतिर्बुबोध बलकाऽऽवेश: प्रभौ साम्प्रतं
गङ्गावारिघटं तदेकमधरत्सोऽयं पुरस्तात्प्रभो: ।। १५३१ ।।

पीत्वा वारि ननर्त सोऽयमधिकञ्चक्रे यथा श्रीबलो
लीलाञ्छ्रीयमुनाविकर्षणमयीं, तामेव कुर्वन् बभौ ।
तत्काले वनमालिन: प्रभुकरे हैमं हलं लाङ्गलं
स्पष्टं दीव्यति चन्द्रशेखरदृशि श्रीमद्बलोऽयं प्रभु: ।। १५३२ ।।

एवं स्वभक्तांश्च तथान्तरङ्गाँ–
ल्लोकोत्तरा: प्रेमभरास्तु लीला: ।
स्थाने प्रभुर्दर्शयतीह काले,
पाथेयमब्धौ मधुरा हि लीला ।। १५३३ ।।

भगवद्भजने बाधकभाव:

अस्ति श्रीहरिनाम सर्वसुखदं, नो भेदभावो मनाक्
पात्रापात्रगतोऽत्र कोऽपि, भगवन्नाम्न: सहायञ्छ्रिता ।
संसारेऽखिलवर्णजातिजनता सर्वात्मकस्त्रीनरा
यातुञ्छक्ष्यति तत्पदाब्जममलं, यात्री पथैति स्वकम् ।। १५३४ ।।

नो कश्चिन्नियमोऽस्ति देशसमयावस्थाक्रियाणां तथा
पात्रापात्रविधानतश्च भगवन्नामक्रतुप्रस्तुतौ ।

भूभागे निखिलेऽखिले च समये स्थाने च सर्वत्र वै
कोऽपि स्याच्च दशासु कास्वपि तथा शुद्धास्वशुद्धासु वा ।। १५३५।।

चेत्कामं जपकारको बहु दुराचारी न वैवास्तु किं?
नैषां भागवतेऽस्ति नाम्नि वचसां तद्भेदभाव: परम् ।
नूनं नामजपस्तु सर्वसमये सर्वस्य कल्याणकृ–
च्छास्त्रोक्ता गुरवस्तथापि भगवन्नाम्नोऽपराधा दश ।। १५३६।।

९४. दश किल नामजपेऽत्यपराधा: ।

(१) सज्जननिन्दा (२) भगवन्नामसु भेदभावपर्याय:
(३) गुर्वपमान: (४) शास्त्रनिन्दनम् (५) भगवन्नाम्न्यर्थवाद: ।
(६) नामाश्रित्य पापप्रवृत्ति: (७) नामतुला व्रतधर्मै:
(८) नाम्नामुपदेशोऽशुश्रूषो: (९) ममताविषयासक्ति:
(१०) श्रुतेऽपि नाममहत्त्वे, हृदये तत्प्रेमाऽनुपपत्ति:
अपराधानां संख्यादशता, दिशते जीवप्रकृतिम् ।।

येषां पूर्वशुभैर्महात्मतपसां सङ्गात्कृपात: प्रभो–
र्निष्ठा नाम्न्यथवा स्थिरा दृढतया, तै: सावधानेन वै ।
एतस्मादपराधतो दशविधात्त्रेयं निजं जीवनं,
कार्यं स्वस्य तथाहि रक्षणमतो नव्यापराधात्सत: ।। १५३७।।

कुर्वन्नस्त्युपदेशमत्र सततं नामापराधादयं
भक्तानाञ्च महाप्रभु: स्वसुहृदां संरक्षितावस्थिते: ।
सर्वेषां कुरुते निरीक्षणमसौ, कस्यापि निन्दारतं
दृष्ट्वा जल्पति शीघ्रमेव सुहृदं कञ्चित्तथा चेतयन् ।। १५३८।।

'पश्य, त्वं कुरुषे ह्यशोभनमिदं, पापो महानस्ति वै
निन्दा भागवते परस्य भजने सद्द्वेषभावस्तथा ।
येऽभक्तास्तदुपेक्षणं कुरु तथा किञ्चिन्न तच्चिन्तनं,
सम्बन्धं भुवि नैव पालय च तै,र्बन्धो हि सम्यक् सता ।। १५३९।।

ये सन्तीह विवेकिनश्च भगवद्भक्ता: सदाचारिण–
स्तेषां पादरज: सदैव शिरस: स्वाभूषणं बोधतु ।
भक्त्या लेपय सुन्दरं वपुषि तन्मत्वाऽङ्गरागं सदा'
भक्ते स्नेहभर: परस्परमभूत्तस्मात्सदैवाऽधिक: ।। १५४०।।

दृष्ट्वाऽऽलिङ्गति तत्क्षणं हरिमनाश्चान्योन्यमेक: परं
कस्याप्यत्र च पादमेव दधते कश्चित्तथा पादयो: ।

शीर्षे लिम्पति धूलिमेव निजके, साष्टाङ्गमेवाऽऽनतिं
दूरादेव विलोक्य कोऽपि कुरुते धूलौ विलुठ्याऽन्यकम् ।। १५४१ ।।

भक्तानां खलु शिक्षणाय भगवन्नामापराधस्य स
स्पष्टञ्चाधिकभर्त्सनाञ्च कुरुते, जातोऽपराधः स वै ।
यत्पार्श्वे, प्रभुरत्र कारयति नो तद्द्वारतोऽस्य क्षमां,
क्षान्तं तावदयं तथा न मनुते तस्यापराधञ्च तम् ।। १५४२ ।।

श्रीवासेऽत्र बभूव तादृशकरो गोपालचापालक—
स्तत्सम्पूर्णतनौ च तस्य गलितं कुष्ठं बभूव स्फुटं ।
दुःखेनाभवदात्मनः स शरणापन्नः प्रभोर्दुःखितः
स्वीकुर्वंश्च ययाच तत्प्रभुममुं स्वस्यापराधं क्षमाम् ।। १५४३ ।।

'एकैवास्ति' जगाद तत्स्फुटतया 'चास्यौषधिः' श्रीप्रभु—
'श्चक्रे यं प्रति वासपण्डितमहो! द्वीपेऽपराधं नवे ।
तस्यैवाङ्घ्रिजलं पिब द्रुतमतः स्यात्तेऽपराधक्षमा,
सामर्थ्यं मयि नास्ति कर्तुमवनीभक्ताऽपराधिक्षमाम्' ।। १५४४ ।।

गोपालचापोऽत्र तदेव चक्रे
कुष्ठं चचालाऽस्य, पुरैव नाभूत् ।
श्रीवासपादोदकपानतस्तु,
प्रेम्णाऽखिलं निष्कपटेन साध्यम् ।। १५४५ ।।

कामञ्चास्तु तथाहि कोऽपि भगवन्नामापराधी जनो
नूनं दण्डयते यथोचितमसौ स्थाने तमेव प्रभुः ।
प्रायश्चित्तमथापि तस्य दिशति स्याद्वाऽधिकारी तथा,
भावो वज्रकठोरपुष्पमृदुको लोकोत्तरस्यात्मनि ।। १५४६ ।।

एतावद्यदहो! शचीस्वजननीजातोऽपराधोऽमुना
क्षान्तस्तावदसौ न, यं प्रति न तद्द्वारा क्षमा कारिता ।
तत्पूर्वं स्वकृपैव तेन न कृता तस्याञ्छचीमातरि,
स्पष्टं तत्परमार्थतो व्यवहृतिर्लोकोत्तरस्यामृदुः ।। १५४७ ।।

वार्तेयं, प्रभुसोदरोऽग्रजनितः श्रीविश्वरूपः पठ—
न्नाचार्यस्य समीपमेव सततञ्चाद्वैतनाम्नोऽभवत् ।
सर्वस्वं मनुते स्म सोऽत्र निजकञ्चाचार्यमेवात्मना
गेहं केवलरोटिकार्थमयते, तस्यैव पार्श्वेऽन्यथा ।। १५४८ ।।

अद्वैतः गुरुकः स्म पाठयति तञ्छ्रीयोगवाशिष्ठकं,
मेधावी निजशैशवात्किल सदाचारी सुशीलस्तथा ।

आसीत्पूर्णविरक्तिमान् प्रकृतितः संसारिभावादयं,
वैराग्यं भवतीह लीनमवनीपृष्ठे विशुद्धात्मनि ।। १५४९ ।।

तद्ग्रन्थश्रुतिमात्रतोऽस्य हृदये लीना विरक्तिः स्फुटं
जाता शीघ्रमसौ विहाय निखिलं यातः परिव्राजकः ।
याते सर्वगुणे प्रिये निजसुते त्यक्त्वा गृहं सर्वतोऽ–
काले, कारणतोऽस्य तस्य जननीदुःखस्य पारो नहि ।। १५५० ।।

तद्विश्वस्य विरक्तिकारणमसावद्वैतमेवाऽबुधद्–
भ्रान्ता वत्सलभावतः प्रकृतितः सौम्या शची चेतति ।
'अद्वैतः किल विश्वकं मम सुतं प्राणप्रियं भूयसा
पोथीं ज्ञानमयीं विपाठ्य नियतश्चक्रे परिव्राजकम्' ।। १५५१ ।।

यन्माता बहु रोदनं कृतवती चाद्वैतपार्श्वे तथा
भूयः सा विललाप विश्वहृदया, वार्तासु सम्बोधयन् ।
सामान्येन जगाद तद्गुरु'रहो! शोकार्थमस्त्यत्र किं ?
चक्रेऽशोभनकर्मकं किमपि किं ? तद्विश्वरूपात्मकः ।। १५५२ ।।

द्वीपेऽत्र स्वकुलस्य पूर्वपरयोर्भद्रेण तेनात्मनः
कार्येण त्वमुनैकविंशतिगता वंश्यास्तथोत्तारिताः ।
बोधामः पठनन्तु लेखनमभूत्तस्यैव तत्सार्थकं,
न ज्ञानं, पठिताऽबुधो जगति वै ग्रन्थेष्वधीतेष्वपि ।। १५५३ ।।

एवं पुस्तककीटभूतपुरुषोऽधीतेऽपि वै पुस्तके
स्थाता वञ्चित एव जीवनभरे तन्मर्मवस्तुस्थितेः' ।
मातुर्हृच्छकलन्तु निःसृतमभूत्स्याद्वा कथं तत्क्षणे
तादृक्प्रांशुविबोधवाक्यमधुनाऽऽर्तायाः प्रतीतं प्रियम् ? ।। १५५४ ।।

अद्वैतस्य तथाविधैश्च वचनैर्भावस्य तन्मानसे
जातोऽस्यैव विनिश्चयो दृढतयाऽवश्यं गुरोः सम्मतिः ।
अस्ति प्राञ्जलविश्वरूपगृहकत्यागे,ऽधिकं स्नेहवां–
श्चाचार्ये, न यातुमेव भविता गेहात्तदाज्ञां विना ।। १५५५ ।।

इमान्मनस्येव निगूह्य सा शची
ररक्ष भावाञ्जननी विभर्तृका ।
चकार कस्यापि पुरो न तत्स्फुटं,
कुलीनसाध्वीवनितामुखं पतिः ।। १५५६ ।।

संसर्गेऽधिकमत्र सम्प्रति यदाऽऽचार्यस्य गौरोऽप्यभू–
त्तत्पूजास्तुतिमेष एव भगवद्भावेन सर्वाऽधिकम् ।

कुर्वन्नस्ति गुरु,र्न साम्प्रतमसौ तस्थौ वराकी शची
तन्मौनं, कथितं—"पिबत्यपि रसं फूत्कृत्य दुग्धार्दितः" ।। १५५७।।

मातुः पूर्वत एव चास्ति हृदयं मर्माहतं, तद्हृदि
स्थाने विश्वसुतः पुरैव विपुलं कृत्वा व्रणं निर्गतः ।
नाऽभूदस्य पुराणताऽपि, ददृशे तस्यैव भूयोऽधुना
मायावासरसात्पथानुसरणं कुर्वन्निमायी सुतः ।। १५५८।।

त्यक्त्वा भक्तजनं क्षणार्धमपि नो संसारिकर्माऽधुना
कर्तुं वाञ्छति स प्रभावितमनाः स्थाने निमायी सदा ।
वार्तामेव न साम्प्रतञ्च कुरुते विष्णुप्रियाकान्तया
भक्तैस्तिष्ठति कृष्णमेव सततं जल्पंस्तथाऽऽकर्णयन् ।। १५५९।।

द्रष्टुं पौत्रमुखं तथाऽऽतुरहृदे मात्रे प्रतीतं नहि
द्वीपे तादृशवर्तनं रुचिकरं पुत्रस्य चैकाकिनः ।
मूलेऽप्यस्य करस्तथाहि ददृशे तस्या गुरोरेव त-
च्चेतोभावनिगूहनेऽधिकतया माताऽसमर्थाऽधुना ।। १५६०।।

वार्तायां स्वत एव सम्प्रति जनैस्तस्याश्च चेतोव्यथा
चित्तन्त्वद्य विदार्य निःसरति तद्ब्रूतेऽश्रु सा मुञ्चती ।
'आर्तायां विधवास्त्रियां मयि दया स्थानेऽपि नायाति तद्-
वृद्धाऽद्वैतगुरोस्तथाहि गृहिणो, बोद्धा सवर्गो जनः ।। १५६१।।

संन्यासी त्वमुना पुरैव विहितो ज्येष्ठो ममैकः सुतो
मध्येजीवनमेव कैतवतया यातः पतिर्मे क्षितेः ।
आयाताऽणुदयाऽपि तस्य मयि नाऽऽर्तायां रुदत्यान्तथाऽ-
न्धाया जीवनमात्रयष्टिरधुनाऽऽस्ते मे निमायी त्वयम् ।। १५६२।।

त्यक्त्वैतं खलु संसृतिश्च निखिला शून्यैव शून्याऽस्ति मे
तद्द्वीपे त्वयमेव चास्ति पुरतः पृष्ठे ममैकाऽऽश्रयः ।
आचार्यो यततेऽधुनाऽमुमपि तं कर्तुञ्च संन्यासिनं
कुर्वन् कीर्तनमेव तिष्ठति सदा कृत्वा तमेवाऽग्रणीम् ।। १५६३।।

गौरो मेऽस्ति कियांश्च सौम्यहृदयश्चोक्त्वा पुनश्चेश्वरं
सोऽद्वैतोऽस्य च सङ्गिनोऽकृषत तं भक्त्या विरक्तं पुनः ।
एष ध्यानमथैव किञ्चिदपि नो दत्ते च गेहोन्मुखं
भक्तैर्भ्राम्यति सार्धमेव सततं', चिन्ता विरक्तस्य किम्? ।। १५६४।।

श्रीवासादिनिमायिभक्तनिकरे मातुस्तथावार्तयाऽ-
द्वैताचार्यबुधे च मानसतले दुःखं मनाग् वर्तते ।

भक्तानाञ्च विवेद स प्रभुरपि स्थाने मनोभावकं,
स्वामी सेवकमानसं हि भजते, तेनैव तत्स्वामिता ।। १५६५।।

भक्तप्रशिक्षणनिमित्तमयं प्रभुश्च
क्रोधं मनाक् प्रकटयन् विषये स्वमातुः ।
तत्पापशोधनमकारयताऽनिवार्य,—
ज्ज्रेयः किमस्ति भुवि वैष्णवनिन्दनस्य ? ।। १५६६।।

एकस्मिन् दिवसे प्रभुर्भगवदावेशे तथान्यत्र ता
मूर्तीर्भागवतीर्विधाय भगवत्सिंहासने संस्थितः ।
तत्रोपस्थितसर्वभक्तनिकरं ब्रूते वरं याचितुं
स्वस्वेच्छानुसृतेर्ययाच निखिलो, हीच्छा मनोनर्तकी ।। १५६७।।

तत्कोऽपि स्वपितुश्च याचति वरं तद्दुष्टताशोधनं,
स्वस्त्रीबुद्धिविशोधनञ्च, भगवद्भक्तिं सुतस्यात्मनः ।
सर्वेभ्यो वरदानकं प्रभुरदात्तेषाञ्च तेषामय—
ञ्चाभीष्टं, निजभाव एव निरतः स्थाने महाँल्लक्ष्यते ।। १५६८।।

ऊचे वासबुधोऽतिदीनहृदयस्तत्रैव काले 'प्रभो!
तिष्ठत्यत्र च दुःखिनीव नियतं माता शचीयं सदा ।
मुञ्चत्यश्रु दिवानिशञ्च भगवन्! दुःखस्य हेतोस्ततो
भव्याऽत्रापि कृपा हि नश्यतु यतस्तच्छोकतापोऽखिलम् ।। १५६९।।

ऊचे चासनसंस्थितो भगवदावेशे तथैव प्रभु—
'भूयान्नैव कृपा कदापि च शचीमातुर्यथार्थोपरि ।
यस्माद्वैष्णवको नवेऽत्र विहितो द्वीपेऽपराधोऽनया,
हेतौ सत्यपराधवृत्तिरमला, क्षम्या तु नो वैष्णवे ।। १५७०।।

आत्मापराधिजनताक्षमणेऽपि शक्तो,
भक्तापराधकरणप्रकृतेः क्षमायाः ।
सामर्थ्यमत्र नहि मेऽस्ति कदापि लोके',
किं युज्यतेऽबुधमनश्छलनं प्रभूणाम् ? ।। १५७१।।

वासोऽत्यन्तविनीतदीनवचसा प्रोवाच 'कामं प्रभो!
क्वेदं सम्भवमस्ति याऽत्र जननी गर्भे भवन्तं दधौ ।
क्षम्यो नास्त्यपराध एव भविता तस्या ? भवद्धारणाद्
गर्भे, सेयमभूत्स्वतः खलु जगन्माता नवद्वीपगा ।। १५७२।।

अस्याः कोऽस्ति निजः परश्च ननु कः सर्वे तु चास्याः सुता
वाञ्छेद्यं प्रति चात्र यत्किमपि तञ्छक्नोति वक्तुं त्वियम्' ।

'किञ्चिद्दास्तु तु कोऽपि वैष्णवसतां स्थानेऽपराद्धा भवे–
ल्लोके निष्कृतिरेव (तत्प्रभुवच)स्तस्यास्ति नो सम्भवा ।। १५७३ ।।

कृतेऽपराधे ननु वैष्णवानां
देवाधिदेवः स शिवोऽपि साक्षाद् ।
तत्कालमेवात्र भवेद्धि नष्टः'
शिवं तथावस्तु पिपर्ति पात्रम् ।। १५७४ ।।

'अस्याः कोऽप्यपराधमोचनकृते भूयादुपायः क्षितौ ?'
वासोक्तौ प्रभुवाक्यमत्र तरसा'ऽद्वैतेऽत्र माता शची ।
स्थाने चास्त्यपराधिनी, यदि गुरोर्धूलिं स्वशीर्षे क्रिया–
त्सा चाद्य क्षमतां गुरुर्निजहृदा, त्वस्यां कृपा भाविनी' ।। १५७५ ।।

आचार्यो हि तदा बभूव च परस्थानेऽस्य पार्श्वे द्रुतं
सर्वे भक्तजना ययुश्च जगदुर्वृत्तान्तमस्याखिलम् ।
श्रुत्वा चाश्रुविमोचनं प्रभुवचः प्रीतौ विमुग्धो गुरुः
कुर्वंश्चाह रुदन् 'स्ववत्सलदशा त्वेषैव भक्ते प्रभोः ।। १५७६ ।।

किं वा स्यादपराध एव तु जगन्मातुः शचीकश्रियोऽ–
सौ नः शिक्षणहेतवेऽस्त्यभिनयं तत्कारयँल्लीलया ।
इच्छैवं यदि तु प्रभो,र्ननु तथापात्रं प्रधानं प्रभु–
र्मामिवाभिनस्य कर्तुमयते तस्योपदेशस्य च ।। १५७७ ।।

ब्रूते तर्हि हृदा–न वै मनसि मे भावस्तथाऽशोभनः
कोऽप्यस्ति प्रति मातरञ्च, विवशं मां वक्तुमेव प्रभोः ।
आज्ञातो यदि यूयमत्र कुरुथ स्पष्टं ब्रुवेऽहं द्रुतं
तच्चैवं (विहिता क्षमा), (ननु गिरा भावप्रतीतिः स्फुटम्) ।। १५७८ ।।

मात्रा नो कृत एव कोऽपि मम तु स्थानेऽपराधोऽस्ति तद्–
दृष्टौ चेदपराधकोऽयमधुना कुर्वे हृदा तत्क्षमाम् ।
शेषं पादरजोवचो, ननु जगद्वन्द्याऽस्ति माता शची
भक्तानां रज एव तच्चरणयोर्देहाङ्गरागोऽस्ति नः ।। १५७९ ।।

कामं मातृकरेण तन्निजपदस्पर्शं कथं कारयै'
भक्तेष्वत्र भवन्नभूच्च कलहः स्थाने तथैवं प्रियः ।
मध्येऽपि क्षणतोऽस्य सम्प्रति शचीदेवी तदाऽऽप स्वयं
स्वे शीर्षे तरसा चकार च रजोऽद्वैतात्मपादाब्जयोः ।। १५८० ।।

भक्तानां घटनेन तेन मुदितासीमा न शुद्धात्मनां,
नृत्यन्तश्च बभूवुरत्र समुदः सर्वे नवोत्साहिनः ।

अल्पं वा बहु यच्च भक्तकमनोमालिन्यमासीत्पुराऽ—
न्योन्यं तच्च समूलमद्य गलितं वृत्तेन तेन द्रुतम् ॥१५८१॥

एकोऽन्यं मिलति भक्तः प्रेम्णा कण्ठघटनातः ।
आत्मालिङ्गनमखेलन्मात्रा गर्भगततुल्यः ॥१५८२॥

देवानन्दकपण्डितो ननु तथा चैकोऽभवद्द्वीपगः
शास्त्रेऽमुष्य गतिर्यथावदभवत्तत्पण्डितोऽसौ महान् ।
दूरं भागवतस्य पाठनमभूत्ख्यातं बुधस्यास्य वै,
गङ्गाद्वीपनिवासिनामनुरतिः श्रीमत्पुराणे स्वतः ॥१५८३॥

श्रीमद्भागवतं तथास्य पठितुं गीताञ्च विद्यार्थिनो
दूराद्दूरतरात्समीपमगमन्, ख्यातिर्जनान् कर्षति ।
आसीन्नायमशोभनः प्रकृतितस्तुष्टो यदृच्छार्जिते
तत्संसारिसुखाच्च निश्चितमुदासीनो विरक्तस्तथा ॥१५८४॥

नास्त्यद्यावधि किन्तु तस्य हृदये प्रेमाङ्कुरस्योद्गति—
र्बीजं तद्हृदयेऽस्ति तत्र पतितं प्रेमस्वरूपं परम् ।
श्रद्धासाधुकृपाम्बुना ननु विना क्षेत्रं त्वभून्नीरसं,
बीजञ्चाङ्कुरितं कथं भुवि भवेत्क्षेत्रेऽत्र शुष्केऽरसे ॥१५८५॥

यावत्सुन्दरभाववारिसरिता स्यात्तन्न सिक्तं द्रुतं,
गौराङ्गो नगरे दयार्द्रहृदयः कुर्वन् विहारं तथा ।
एकस्मिन् दिवसे कृपाममलहृच्चक्रेऽपि तस्योपरि,
स्थानेऽत्र भ्रमणं स्वतो हि महतां काले च पात्रे सताम् ॥१५८६॥

कृत्वाऽस्योपरि पूर्वतस्तु मतिमांस्तद्वाक्प्रहारञ्च हृत्—
क्षेत्रञ्छुष्कमथाऽद्रुतं सहृदयोऽकर्षत्स कृष्णापरः ।
सिक्त्वा तच्च कृपाम्बुना घटयति स्निग्धं तदुत्पत्तिदं,
भूमौ कर्षणयोगतोऽत्र घटते श्रीकृष्णधर्मी जनः ॥१५८७॥

श्रीमद्भागवतं विलोक्य कृषकस्तं पाठयन्तं प्रभु—
र्देवानन्दबुधं जगाद कुपितः स्पष्टं 'त्वहो! पण्डित! ।
अर्थं भागवतस्य चात्र कुरुतेऽनर्थं कथं सर्वदा
ते किं भागवतार्थकन्तु लगतु, स्थाने सुभावोदयः ॥१५८८॥

श्रीमद्भागवतं तथास्फुटतया श्रीकृष्णमूर्तिः परं,
नो येषां हृदये मनागपि रसः प्रेमा न भक्तिः सरित् ।
साधुब्राह्मणवैष्णवे सति जने श्रद्धा न येषां हृदि,
श्रीमद्भागवताख्यपुस्तकसतः स्पर्शाधिकारी न सः ॥१५८९॥

श्रीमद्भागवतं तथाहि भगवद्भक्ता जगत्पावना,
गङ्गाजी, तुलसी तथैव भगवद्रूपाणि सन्त्येव ते ।
संसारे ननु योऽस्ति शुष्कहृदयस्तत्प्रेमभक्तिर्न वा
यस्यान्तःकरणेऽत्र, तस्य भविता लाभस्तथैतैस्तु किम्? ॥१५९०॥

ज्ञानोक्तिं ननु काममेव तनुषे किं वापि बोद्धा मनाक् ?
को लाभः पठने तथैवमधुना पुंविप्रविज्ञात्मनः ? ।
लाहि, ग्रन्थममुं विदार्य तव तद्गङ्गाप्रवाहेऽमले
कुर्वेऽसाम्प्रतिकं प्रवाहितमहो', स्थाने श्रियः सुस्थितिः ॥१५९१॥

उक्त्वैतद्ददरितुं दधाव निजकाऽऽवेशे च तत्पुस्तकं
दृष्ट्वेदं द्रुतकं धृतश्च शमितः स्थानेऽत्र भक्तैरयम् ।
भावावेशगतं विलोक्य निजकैरग्रे स नीतः प्रभु,—
र्देवानन्दबुधस्थले पुनरसौ प्रावर्तमानोऽमिलत् ॥१५९२॥

भावावेशगतोऽत्र नायमधुना, तत्स्मारयामास तं
देवानन्दबुधं, 'बभूव स यदा तत्रैकदा पाठयन् ।
श्रीमद्भागवतं, तथाहि मिलितः श्रोतुञ्च वासोऽपि तत्,—
(प्रेमी स्वप्रियमार्गणाय विषये बंभ्रम्यते कुत्र नो ?) ॥१५९३॥

यस्मिन् भागवते भृतोऽस्ति च रसः प्रत्यक्षरं पूर्णत—
स्तादृग्भागवतञ्च पाठममलञ्छुश्राव वासो यदा ।
शून्यः प्रेम्णि स मूर्च्छितस्तव जनैश्चोत्थाप्य बाह्ये कृतो,
नापत्तिर्भवता मनागपि कृता, (शस्यो न मौनी सदा) ॥१५९४॥

भावः पण्डितवासभागवतगो बुद्धस्त्वया नो, तदा
किं बोधन्तु तु तेऽनुगा, ननु तिरस्कारस्तथा कारितः ।
स्थाने निन्द्यविधेस्तु तत्र भगवद्भक्तस्य चैकस्य ते,
तेनाऽयं भवतस्तथोपरि शिरोरूढोऽपराधः स्फुटम्' ॥१५९५॥

देवानन्दबुधश्च शास्त्रनिपुणो विद्वान् विरक्तः पुन—
स्तासां क्रुद्धगिरां प्रभोः किमपि नो दत्तन्तु तेनोत्तरम् ।
तद्बुद्धिः कृपया तथा भगवतः शुद्धा बभूवाऽधुना
दोषस्यानुभवं निजस्य कुरुते, प्रेमी निमाय्यद्भुतः ॥१५९६॥

जातोऽयं तरसा प्रभोश्च शरणापन्नः स्वपूर्वत्रुटे—
रज्ञाने क्रियमाणदुष्टकृतये वासं ययाच क्षमाम् ।
तत्तस्योपरि साम्प्रतं प्रभुकृपा जाता, विलम्बः पुन—
स्तद्भक्तत्वसमुद्भवे कथमतो भक्तः स जातो महान् ॥१५९७॥

शिक्षां भक्तजने निजे प्रभुरसावासीद्ददानः सदा
भक्तः स्याद्भजनक्षणे कथमहो! भक्तिप्रणाली च का? ।
एकस्मिन् दिवसे ब्रूवंश्च भगवन्नाम्नो महत्तां प्रभु–
''श्चैतन्याष्टक''मुच्यते यदवदत्तद्गौरधर्मेऽधुना ।। १५९८।।

भावोऽत्र प्रथमस्य विस्तृततया पद्यस्य दत्तोऽमुना
'भक्तः स्वं तृणतोऽपि नीचमपरं बोधेत्सदा स्वात्मना ।
स्याद्वृक्षादपि वै सहिष्णुरधिको, मानं न कांक्षेन्निजं,
सम्मानन्तु परस्य चाधिकतया भूयो ददानो भवेत् ।। १५९९।।

एवं संश्च निरन्तरञ्च भगवन्नाम्नां क्रियात्तु स्मृतिं
ध्येया साऽत्र सहिष्णुताऽधिकतया, स्यान्नो सहिष्णुश्च यः ।
कामं सोऽस्तु महान् कियानपि न च प्राज्ञस्तपस्वी कथं,?
कालेनाप्यधिकारिता भगवतोऽस्य स्यात्कृपाया नहि ।। १६००।।

वृक्षेभ्यश्च सहिष्णुताविषयतापाठोऽत्र नेयोऽमुना,
ब्रूते केनचिदत्र नो कटुवचो वृक्षः सहिष्णुः सदा ।
यस्तत्र क्षिपते फलाप्तिमनसा लोष्ठं तथा प्रस्तरं
रुष्टो नास्य, ददाति किन्तु नियतं पक्वं प्रहर्तुः फलम् ।। १६०१।।

प्राप्तायां क्षुधि भोजनं तृषि जलं नो याचते कर्हिचित्
तिष्ठत्यत्र विविक्तमेव सततं, भक्तैस्तथैवं पृथक् ।
स्थित्वा लौकिकसंसदः, कमपि न स्वं याचमानैर्मनाक्,
लोकेऽमानिसहिष्णुभिर्भगवतो भव्यं सततश्चिन्तने ।। १६०२।।

९५. सुगतिर्हरिनाम्ना कलिकाले ।

नामरूपमयसंसृतिमध्ये क्षणभङ्गुरमिह निखिलम्
केवलभगवन्नामरूपतास्थायिमधुरसुन्दरता ।
तदधीनञ्छ्रीरूपदर्शनं केषाञ्चित्स्वाधीनम्
निजरसनाश्रीनामाश्रयणं भवपथपथिकाधीनम् ।।

(ऊचे महत्त्वमधुना हरिमिष्टनाम्नो)
नास्त्यत्र वै कलियुगे गतिरन्यथा तत् ।
नान्यो भवेऽत्र सरलः सुगमो ह्युपायो
वारत्रये सति कृते च निषेधभावे' ।। १६०३।।

विद्यार्थी जडबुद्धिरत्र हृदयाच्छून्यस्तथैकोऽभवद्–
व्याख्यामेवमथ प्रभोर्वदति स शृण्वन् प्रगल्भो द्रुतम् ।

'एतच्छास्त्रभरे विभाति निखिले स्थानेऽर्थवादः, परं
प्रोक्तञ्चातिशयान्वितं बहु वचो नामप्रशंसाकृते ॥ १६०४॥

लोके केवलनामतः किमपि तन्नो वस्तुतः सिध्यति,
स्याल्लोकस्य, तदुक्तमत्र वचनं, नामप्रवृत्तिस्तथा'।
श्रुत्वैव क्षणतः प्रभुश्च पिदधौ कर्णद्वयं स्वात्मनो,
भक्तांस्तान्निखिलाञ्जगाद तरसोक्त्वा 'श्रीहरि-श्रीहरि' ॥ १६०५॥

'पापं वै लगति स्फुटन्तु भगवन्नाम्न्यर्थवादोक्तिके
लोके श्रोतरि चापि, तच्चलतु तत्स्नानं सचैलं क्रियात्।
गङ्गायामत एव तच्च भगवन्नाम्न्यर्थवादश्रवः—
पापान्नो भविता तु मुक्तिरधुना', शुद्धिर्हि गङ्गाऽऽश्रयात् ॥ १६०६॥

गङ्गास्नानकृते ययौ प्रभुरिदञ्चोक्त्वा स्वभक्तैः, कृत—
च्छ्रद्धाभक्तियुतञ्च तैः सुरसरिच्छीताम्बुनि स्नानकम्।
तद्भक्तेर्महिमाऽमुनाऽखिलपुरः, स्नाने कृते वर्णितो
लक्ष्यीकृत्य जगाद सम्प्रति च तान् स्थाने तथा बोधयन् ॥ १६०७॥

'भ्रातश्चिन्तय तु त्वमेव निखिलानन्तस्य यो नायको
ब्रह्माण्डस्य, च यस्य रोमविवरेऽसंख्यं समावेक्ष्यति।
प्रत्येके भुवनाण्डकं, तमधुनाऽऽप्तुं कोऽपि यत्नं क्रियाद्
योगेनैव, तु तद्वशे कथमयाच्छ्वासैकरोधादयम् ॥ १६०८॥

ब्रूयात्कोऽपि च वेदिताऽस्य वसतिं तत्त्वस्य तत्संख्ययाऽ,—
स्योक्तिः केवलमूर्खताऽस्ति ननु सा, बुद्धेस्तु यो वै परः।
वेदा यस्य च 'नेति-नेति' कथनाच्छंसन्ति, तस्य प्रमा
स्यात्सांख्येन तु सम्भवा कथमिव स्थाने ह्यसंख्यः श्रुतः ॥ १६०९॥

शेषो धर्मवचःक्रमः, स तु तथाहेतुः परं बन्धने,
तद्धर्माध्वनि तु त्रिलोकविषयाऽऽस्वादस्य चैवार्जनम्।
अस्त्येका कनकस्य सोऽपि विदुषान्तु शृङ्खलैव स्फुटं,
(प्रेमी बन्धनमेव तत्सुखसुखी लोके सदा कांक्षति) ॥ १६१०॥

यस्येत्कोऽपि जपेन तञ्च मुदितं कर्तुन्तु वा केवलं
त्यागेनैव, तु किं भवेत्स मुदितः? कश्चित्त्यजेदेव किम्?।
किञ्चित्तस्य कृपां विना न भविता कुर्यान्न सत्कर्म किं?
सानुष्ठानतपोमखादिकमहो! व्यर्थं हि भक्तिं विना ॥ १६११॥

९६. उद्धव! भक्तिः साधनसाध्या ।

दानव्रतजपहोमतपोभिः स्वाध्यायात्संयमतः
अन्यैर्विविधैः श्रेयोमार्गैः साध्या श्रीमद्भक्तिः ।
श्रीकृष्णः स्वयमेवाकथयत्संबोध्योद्धवमित्रम्
साध्यः सरलं नान्योपायैर्यथाऽहमूर्जितभक्त्या ॥

एवं सदैव भगवद्गतिभक्तिशिक्षां
भक्तेष्वपूर्वसुखमोदरसं ददानः ।
नानाविधां प्रभुरयं तनुते स्म लीलां
द्वीपे, भवे भवति भक्तिधनी ह्यमायी ॥ १६१२॥

नदियामध्ये प्रेमप्रवाहः काजी-अत्याचारश्च

९७. एकं 'नाम' निखिलपुरुषार्थः ।

भक्त्या गीतं प्रीत्या संस्मृतमास्थातो वा श्रुतमिह
तारयत्येव शुद्धमशुद्धं सव्यवहितमुच्चरितम् ।
सत्यं, सत्फलमचिरं सूते प्रियतमनामग्रहणम्
सांसारिककामनया युक्तं तदपि फलदमार्तानाम् ॥

प्रेमैवास्ति तु जीवनं, भवति न प्रेमाऽत्र यज्जीवने
नेदं जीवनमस्ति किन्तु तदिदं जञ्जालमेवोच्यते ।
यत्र प्रेम, च वस्तुतो दृशि गता तत्रैव वै तच्छटा,
गूढं तिष्ठति हासशुक्प्रभृतिके भावे निसर्गा रतिः ॥ १६१३॥

कुत्राप्यत्र तथाहि पश्यतु परं सम्मेलनं प्रेमिणा—
मालापङ्क्तिषु वा भवन्तु मिलिता हासोपहासे तथा ।
तेषामुत्सवभोजपाननिवहे, तेन प्रतीतं भवे—
त्किं वा वास्तविकञ्च जीवनमिदं, तत्र प्रमोदः कियान् ॥ १६१४॥

माधुर्यं कियदस्ति, तस्य पुरतो यावत्पदार्थास्तथा
संसारे मधुरोक्तिकास्तु, निखिलाः स्वादच्युताः स्युर्यथा ।
देहे भाग्यवतोऽत्र कस्यचिदहो! प्रेमप्रकाशो भवे—
त्तच्छायाऽऽश्रयधारिणो ननु च ये स्युः पावनास्तेऽखिलाः ॥ १६१५॥

संसारेऽत्र यथार्थजीवनसुखं तेषामपि प्राप्यते
प्रेमी यत्र निवासमत्र कुरुते सा पावनी स्याद्धरा ।
सोऽयं क्रीडति यत्र तच्च भवति स्थानं हि तीर्थस्थलं
लीलां यैर्वरभागिनश्च पुरुषास्ते स्युः सदैवाऽमराः ॥ १६१६ ॥

गौरेन्दुह्युदितः स्वशीतलकरैः प्रेमावतारो नवे
द्वीपे शैत्यसुखं भवार्तमनसां यस्मिन् ददानो भवेत् ।
कस्तत्तद्विधभाग्यशालिनगरीलोकस्य तात्कालिकाऽऽ—
नन्दप्रीतिनिरूपणन्तु घटये,त्सूर्यः क्षितौ मास्यते ? ॥ १६१७ ॥

गौरप्रभोश्च हरिकीर्तनभूमिकातो
द्वीपोऽखिलोऽस्ति गृहमेव मुदस्तथैकम् ।
श्रीकृष्णकीर्तनमधुस्वर एव तत्र
श्रोत्रे सदा, प्रियरवो हि पवित्रलोकः ॥ १६१८ ॥

उद्धारेण जगायिमाधवहृदोः संकीर्तनस्याधुना
बोधन्ते स्म महत्त्वमत्र जनताः, स्थाने सहस्रं जनाः ।
आयान्ति प्रभुदर्शनाय, सुहृदे नानोपहारैः समं,
नीत्वा पुष्पवरस्रजः प्रभुगले कोऽप्यर्पयत्यास्थया ॥ १६१९ ॥

स्वादिष्टं फलमेव कोऽप्युपहृतञ्चक्रे पुरः श्रीप्रभोः
पक्वान्नं बहु सुन्दरञ्च बहवश्चक्रुः स्वगेहात्तथा ।
तेभ्योऽल्पं कुरुतेऽखिलन्तु मुदितञ्चादाय गौरप्रभु,—
र्ह्यल्पस्वीकृतिरेव लोकमहताञ्छ्रद्धालुहृत्प्रीतिदा ॥ १६२० ॥

सर्वः पृच्छति, 'किं प्रभो! वयमपि ह्यल्पं विधातुं क्षमाः?
ह्यस्त्यस्माकमपीह कृष्णभजने स्थानेऽधिकारश्च किम्?' ।
'सर्वः कर्तुमहो! क्षमः प्रकृतितः कृष्णस्य तत्कीर्तनं,
पात्रापात्रविवेचनस्य न परं प्रश्नोऽत्र', वाक्यं प्रभोः ॥ १६२१ ॥

'सर्वे सन्त्यधिकारिणो भगवतो नाम्नस्तु, तन्नामके
नो चात्रास्ति विचार एव विधिको नो वा निषेधात्मकः ।
श्रीमद्भागवतेऽत्र नाम्नि नहि वा तत्रोच्चनीचात्मकः,
प्रेम्णा तत्प्रभवन्ति कर्तुमखिला यूयं प्रभोः कीर्तनम्' ॥ १६२२ ॥

तत्पृच्छन्ति जनाः,'प्रभो! न तु वयं विद्मोऽपि तत्कीर्तनं,
लोकेऽत्र क्रियते च केन विधिना, लब्धञ्च नाद्यावधिम् ।
तत्संकीर्तनशिक्षणं, न पठिता तत्पद्धतिः पुस्तके
कुत्राप्येव ?' ततो विहस्य वदति स्थाने निमायी प्रभुः ॥ १६२३ ॥

'किञ्चास्त्यत्र तु शिक्षणीयमधिकं तन्नामसंकीर्तने
स्यादेवात्र च विज्ञता नहि तथा नो वाऽत्र चातिज्ञता ।
मार्गोऽयं सरलोऽस्ति चाधिकतया सर्वे विधातुं क्षमाः
पश्यैवं, करतालिकाध्वनिविधेस्तन्नामगानं कुरु ॥१६२४॥

९८. केवलनामपदानां गानं प्रेम्णा त्वं कुरु बन्धो!
कृत्वा दैनिकमखिलं कृत्यं सांसारिकमनिवार्यम्
व्यवहारं परिवारापेक्षितमाचर्य त्वं धीरः ।
हरि-माधव-गोपाल-गोविन्द-राम-कृष्ण-मधुसूदन!
सम्बोधनमधुरातिमधुरपदवदनं तत्कीर्तनकम् ॥

एतन्नामपदावलीं रसनिधिं मन्त्रं तथाऽन्यच्च वा
यस्मिन् केवलरागभावभगवन्नाम्नां भवेत्कीर्तनम् ।
गायन्तो, दश पञ्च तत्र निजकान् संयोज्य तत्सङ्गिनः
कुर्वन्तो मिलिता भवेयुरखिलास्तन्नामसंकीर्तनम् ॥१६२५॥

यूयं काममिदं विधत्त विधितो मासन्तु यावत्ततो
नूनं द्रक्ष्यथ तेन चात्मनि कियानानन्दलाभः स्वतः' ।
लोकस्तन्मुखतः शृणोति भगवन्नाम्नो महिम्नस्तथा
माहात्म्यं हरिकीर्तनस्य, कुरुते संकीर्तनं तत्पुरः ॥१६२६॥

यत्रायं कुरुते त्रुटिं, प्रभुरमुं स्थाने दिदेश द्रुतं,
प्रष्टुं योऽपि महाप्रभुं ननु नवद्वीपेऽत्र चायाति तत् ।
सर्वेषामुपदेशनञ्च भगवन्नाम्नां हि संकीर्तनं
दत्तं तेन, तथाहि सर्वमधुरञ्छ्रीकृष्णसत्कीर्तनम् ॥१६२७॥

कृत्वाऽऽज्ञाञ्छिरसि प्रभोर्ननु जनाः स्वं स्वं गृहं यान्ति ते
कुर्वन्तः परतस्तु सन्ति दिवसात्संकीर्तनारम्भणम् ।
पूर्वं ते करतालिकाध्वनियुतञ्चक्रुस्तु तत्कीर्तनं,
ह्यादेशस्य यथावदेव करणं सिद्धौ परं साधनम् ॥१६२८॥

आनन्दस्य यथा प्रतीतिरमिता तेषाञ्च जाता यथा
वाद्यानामपि कीर्तने ननु समावेशस्तथाऽजायत ।
कुर्वन्तं हरिकीर्तनं मधुरवं दृष्ट्वैकमत्राऽपरः
सोत्साहो दश-पञ्च-सङ्गिसहितः सोऽपि स्वकां मण्डलीम् ॥१६२९॥

कृत्वैकां नियमेन चैव कुरुते संध्याद्वये कीर्तनं
तत्संकीर्तनमण्डली बहु तथा टोलेऽखिले स्थापिता ।

संध्यायां स्वकुटुम्बकेन मिलितः संभ्रान्तगेही तथा
लोकश्चाकृत कीर्तनं लघुवरैर्युक्तश्च नारीनरैः ॥ १६३० ॥

आनन्दे सततं बभूवुरखिला भक्ताः प्रमत्ता यथा
चैकोऽन्यस्य करोति मार्गमिलितोऽन्योन्यं तथाऽऽलिङ्गनम् ।
यत्र क्वापि परस्परञ्च मिलिते गाढ़ञ्च भक्तद्वयं,
संसारे समसङ्गिनोर्हि मिलनं सौभाग्यतो जायते ॥ १६३१ ॥

साष्टङ्गप्रणतिं तथैव कुरुते कश्चित्परस्य द्रुतं
नेतुं पादरजोऽस्य सोऽपि नदियाद्वीपौकसो धावते ।
भक्तास्ते दश—विंशतिश्च मिलिताः स्थाने कदाचित्प्रिये
गायन्त्यत्र पदानि चैव विषये संकीर्तनस्याऽऽरताः ॥ १६३२ ॥

कुर्वन्नर्तनमेव कोऽपि पुरतः सर्वस्य यात्यापणे
प्रेम्णश्चोत्पततीह भक्तिनदियामध्ये तरङ्गः सदा ।
नानावाद्यमृदङ्गशङ्खतुरहीखोलादिशब्दैर्नव—
द्वीपाख्यं नगरं दिवानिशमहो! गुञ्जद्बभूव प्रियम् ॥ १६३३ ॥

आरात्रिञ्च महाप्रभुर्भवति तत्कुर्वन् स्वभक्तैः सह
श्रीसंकीर्तनमेव, तत्प्रहरकञ्छेते निशान्तेऽर्धकम् ।
भक्तैश्चैव तथोत्थितः सुरनदीस्नानाय याति प्रभुः,
सर्वा जागतिकी क्रिया प्रियतरा सङ्गे यदि स्युः प्रियाः ॥ १६३४ ॥

लोकैः पूर्वत एव भक्तसुहृदां दत्तस्तथा 'बावलो'—
पाधिस्तेन विचित्रमेव भवति स्नानं त्वमीषामपि ।
एतेऽफीमजनैः सदैव पिनके तुल्या भवन्त्यारता
मत्ता मद्यपसन्निभा मधुमदे क्षीबप्रलापास्तथा ॥ १६३५ ॥

स्नायन् कोऽपि तदम्बरं क्षिपति वै धौतं तथा कस्यचित्—
तत्कस्योपरि वारिमेव दिशते कोऽप्यत्र बालोपमः ।
तीर्त्वा कोऽपि च याति पारमपरं, कश्चिच्च दुःसाहसं
तद्धाराविपरीतमेव तरणे धाराजले चेष्टते ॥ १६३६ ॥

गङ्गास्नानसमाप्तिरेवमयते होरास्वमीषां, ततो
भक्तैस्तैरखिलैः समं प्रभुरयं गेहं प्रयाति स्वकम् ।
तत्रायं कुरुते च देवतुलसीपूजादिकं, तावता
सन्नद्धं विदधाति भोजनमियं पक्त्वाऽत्र विष्णुप्रिया ॥ १६३७ ॥

स्थाने चात्रभवान्निषीदति ततस्तद्भोजनेषु द्रुतं,
नैवास्य स्वदते स्म भक्तनिवहं सङ्गे त्वकृत्वाऽऽदनम् ।

सङ्गेनैव तदस्य पञ्च दशकाश्चादन्ति भक्ता: सदा,
ह्यन्नं देहवसुन्धरा, तु रसदं भुक्तिक्रियासङ्गित: ।। १६३८ ।।

कुर्वंश्चाह कदापि भोजनमयं 'मातर्वधूहस्तयो–
र्जाने किञ्च चमत्कृतिस्तव, यतो भूय: पदार्थेऽखिले ।
माधुर्यं पततीह तत्किमधिकञ्छाकोऽपि मिष्टायते,
किञ्छाके मधुरप्रतीतिरपि नो ?' पार्श्वस्थकं पृच्छति ।। १६३९ ।।

हसन्ति सर्वे तदिदं निशम्य
स्थाने च भक्ता: प्रभुमिष्टवाक्यम् ।
विष्णुप्रियाऽपि स्मयतेऽत्र चित्ते,
सर्वं महान्तो वचनै: स्पृशन्ति ।। १६४० ।।

विश्रामं कुरुते भवान् क्षणमत: किञ्चित्कृते भोजने
मध्याह्ने शनकै: पुन: प्रभुगृहं भक्ता भवन्ति श्रिता: ।
श्रीमत्कृष्णकथास्तदा स कथयन् बोभूयते तै: समं,
लोके स्वप्रियसंकथा नवनवा तत्प्रेमिणां सङ्गतौ ।। १६४१ ।।

श्रीमद्भागवतस्य चैव चलित: कश्चित्प्रसङ्गस्तथा
चक्रे श्रीजयदेवगीतपदकव्याख्यां कदाप्यन्यक: ।
एवं पद्मपुराणपावनकथा कौत्यह्नि कस्मिन्नपि
स्थाने शास्त्रकदम्बके प्रभुगृहे चर्चा सदा प्राचलत् ।। १६४२ ।।

सार्धं भक्तजनै: पुरभ्रमणके सायं प्रभु: पद्यते
भक्तानां सहवास एव सकलो व्येत्यस्य कालस्तथा ।
पार्थक्यं सुहृदामपि क्षणमहोऽसह्यप्रतीतं प्रभो–
स्तेषां भक्तिरहैतुकी प्रभुपदे चाप्यस्ति निष्ठात्मनाम् ।। १६४३ ।।

चेष्टन्ते प्रभुभावनाऽनुसरणात्ते चात्र भक्ता: सदा
पश्यन्तोऽस्य भवन्ति तत्प्रति मुखं, कस्मिन् क्षणे तन्मुखे ।
कीदृग्भावतनुप्रतीतिरिति यद्भावानुसारं तथा
ते कुर्वन्ति निजक्रिया: प्रभुहृद:, सङ्गी हि भावानुग: ।। १६४४ ।।

ईर्ष्यालु: परगौरवाऽभ्युदयकं द्रष्टुं न शक्नोति य–
स्तन्निन्दन्ति सदैव ते खलजना गौरं निमायिप्रभुम् ।
तद्वार्तासु परं ददौ प्रभुरयं न ध्यानमेवाल्पकं,
ध्यातुर्ध्येयविनिश्चये सति कथं ध्याने पतेदन्यकम् ? ।। १६४५ ।।

तत्सम्बद्धवचोऽत्र कोऽपि यदि वा भक्तो यदाप्याह, तं
निर्भर्त्स्य द्रुतमेव तत्क्षणमसौ स्फीतञ्जगादात्मन: ।

'श्रीमत्कृष्णसुकीर्तने कथमहो त्यक्त्वाऽन्यनिन्दास्तुती
चित्तं स्वं न युनक्षि च प्रतिपलं, तद्ध्यानमेवात्मदम् ।। १६४६ ।।

तन्नाऽन्यस्तुतिनिन्दायां भवति प्रभुसम्मुखे ।
साहसमेव भक्तानां, सङ्कोचः सात्त्विको गुणः ।। १६४७ ।।

द्वीपे सम्प्रति वर्धमानमधिकं दृष्ट्वा प्रभावं प्रभो–
स्तत्कालप्रभवस्तथाहि यवनास्तद्द्वेषिभिर्नोदिताः ।
ते जानन्ति, वयं निमायिविदुषश्चानिष्टमप्यल्पकं
कर्तुं न प्रभवेम, तस्य कथने स्थाने सहस्रं जनाः ।। १६४८ ।।

आश्लेच्छासकपक्षतोऽस्य सुहृदः पीडाविधानं भवे–
त्स्थाने यास्यति सर्वगौरहरिता द्वीपक्षितेर्मायिनः ।
आसीन्मुस्लिमशासनं ननु तदा तस्याभियोगेष्वतो
ध्यानं दीयत एव चाधिकतया, शास्ताऽपि बन्धुप्रियः ।। १६४९ ।।

तस्माद्भेदनमेव मुस्लिमनृणामारब्धमेतैः खलैः
'प्राज्ञश्चात्र निमायिनाम कुरुतेऽशास्त्रीयकर्माऽखिलम् ।
सम्पूर्णे नगरेऽत्र कीर्तनमहो! दृष्ट्वाऽमुमद्याऽचलद्,–
रात्रावह्नि च कीर्तनस्य सततञ्चैव ध्वनिः श्रूयते ।। १६५० ।।

तत्कोलाहलकारणान्निशि जने निद्रापि नायाति तत्–
काजीजीमभिभाष्य सन्ति नितरां ते दण्डनीया जनाः ।
नो जाने मिलितोऽखिलः किमधुना कर्ता नवद्वीपभू'–
र्वार्तेयं यवनात्मनामपि यथा ह्युक्ता प्रतीता तथा ।। १६५१ ।।

द्रष्टुं कदाऽभ्युदयकं ननु हिन्दुधर्मे
शक्ष्यन्ति तेऽत्र, ? मिलितास्तत एव सर्वे ।
स्थाने विरुद्धमभियोगमचालयंस्त–
त्काजीसमक्षमभितो हरिकीर्तनस्य ।। १६५२ ।।

वङ्गाले त्वभियोगनिर्णयकृतिः कालेऽत्र काजीपदा–
धीनाऽभून्ननु मण्डलेश्वरपदो राजाऽथवा भूपतिः ।
सम्राजो नियतावधिं कतिपयग्रामाग्रहारं ललौ
यन्मात्राग्रहरः, करग्रहणतस्तावत्तथा रूप्यकम् ।। १६५३ ।।

सम्राजे स्म ददाति, तद्व्यवसितञ्छेषं स्वपार्श्वेऽधर–
त्सम्राजा तु नियोजितो नयकृते काजी प्रतिस्थानकम् ।
वङ्गस्यास्ति हुसेनशाहनृपतिः शास्ता स्वतन्त्रस्तदा,
काजी सैन्यपतिस्तथाहि विहितो द्वीपेऽमुना चाँदखाँ ।। १६५४ ।।

सम्मानो बहु चास्य चन्द्रमनसः सम्राट्सभायामभू—
त्प्रायोऽयञ्च हुसेनशाहनृपतेरासीत्तु विद्यागुरुः ।
किञ्चिद्वास्तु, स चाँदखाँ सहृदयः शान्तिप्रियो मानवो
बोद्धा सम्यगभून्न हिन्दुजनतारोषी विना कारणम् ।। १६५५ ।।

श्रीनीलाम्बरचक्रवर्तिदुहितापुत्रत्वहेतोरयं
गौराङ्गेऽपि महाप्रभौ परिचितः काजीशशीखाँ ह्यभूत् ।
तल्लोकैरभियोजने सति कृते भूयोऽपि भूयोऽमुना
किञ्चिद्गौरविरुद्धकार्यवहनं नेष्टं हि सौम्यात्मना ।। १६५६ ।।

श्रीसंकीर्तननिन्दनं प्रतिदिनं पार्श्वेऽस्य लोकैर्यदाऽऽ—
रब्धं, तैरधिकं बलञ्च मिलितैर्दत्तञ्च तस्योपरि ।
तद्बोधेऽपि समाययौ ननु तदा चेदं वचो, य'त्तथा'
कुर्वन्तोऽत्र भवन्ति चानिशममी वाद्यैश्च कोलाहलम् ।। १६५७ ।।

एवं किन्नु कीर्तनञ्च भजनं, कर्तव्यमेवास्ति चेत्—
कुर्यात्तत्तु शनैः शनैरयमिदं काजी विचिन्त्यैकदा ।
सार्धं कीर्तनकारिणो दलबलैः रोद्धुञ्चचाल स्वकैः,
शक्तिः सज्जनपीडनाय जगतीपृष्ठे पुराणी प्रथा ।। १६५८ ।।

कुर्वन्ति स्म च कीर्तनं बहुजनाः प्रेम्णि प्रमत्तास्तदा
रोद्धुं कीर्तनकारिणश्च जगदुस्तत्कीर्तनं तज्जनाः ।
श्रोतारः परमत्र कस्य ननु ते, जाते निषेधेऽपि तु
श्रीमत्कीर्तनकं निरन्तरमहो! कुर्वन्त एवाऽभवन् ।। १६५९ ।।

सत्येवं कुपितो हि सम्प्रति शशी काजी तदन्तो गतः
खोलं कीर्तनकारिणां प्रियरवं पूर्वं बभञ्ज द्रुतम् ।
ऊचे तर्जनया च भक्तनिवहं 'भो! सावधान! शृणु
क्रोशेत्कोऽपि पुनस्तथैवमखिलं कर्ता हि कारागृहे' ।। १६६० ।।

भीतास्तद्वचनादमी मृदुहृदो भक्ता वराकास्ततो
रुद्धं कीर्तनकर्म तै,र्भवति तद् यत्रापि संकीर्तनम् ।
गत्वा कीर्तनरोधनञ्च कुरुते सर्वत्र काजीजनो,
निर्बाधं खलहेतुनाऽमलहृदां कार्यं चचाल क्षितौ ? ।। १६६१ ।।

सम्पूर्णे नगरे तथाहि वितता हाहाकृतिः सर्वतो
लोकाः सम्प्रति कीर्तनस्य विषये नानाविधञ्चोचिरे ।
'भ्रातो! मुस्लिमशासनेऽत्र भवितुं नो शक्यते कीर्तनं'
प्रेमी कीर्तनकस्य कोऽपि वदति (क्षेत्रानुकूला स्थितिः) ।। १६६२ ।।

त्यक्त्वा देशमिमं वयन्तु नियतं कुत्रापि देशे तथा
वत्स्यामो भुवि, यत्र कीर्तनमिदं कुर्याम सौविध्यत:' ।
ब्रूतेऽन्यो 'रवतस्तथाहि भजने नाम्न: किमर्थोऽत्र, चेत्
काजी वारयते ततस्तु शनकै: कर्ताऽस्मि नाम्नो जपम् ।। १६६३।।

केनापि तद्भगवतो विधिना भवेद्वै
नाम्नो जपोऽनुपममानवदेहलोकै:' ।
एवं वदन्ति विविधं जनता हि भीता,
गुप्तक्रिया जनहृदो रतिमेव दुग्धे ।। १६६४।।

प्राप्तास्ते मिलितास्तथा परदिने गौरप्रभो: सन्निधौ
रात्रौ या घटना च याऽत्र घटिता, सर्वं तमूचुस्तथा ।
अन्ते चोक्तमथ 'प्रभो! कथयते कर्तुन्तु संकीर्तनं
किन्त्वायान्ति तथा-तथाहि विपद: संकीर्तनस्याध्वना ।। १६६५।।

आज्ञा का भवतीह नो, यदि भवेदाज्ञा वयं साम्प्रतं
त्यक्त्वा क्षेत्रमिदं तथाहि जगतीक्षेत्रे चलेम द्रुतम् ।
सौविध्येन च यत्र कीर्तनमिदं कर्तुं भवामोऽथवा
जह्यां कीर्तनकार्यमेव, दिशतु, (स्थाने प्रमाणं गुरु:) ।। १६६६।।

पलायमानास्त्वपि सन्ति लोका
भिया बहु द्वीपभुव:, प्रतीतम् ।
किं वाऽद्य काजीवचसाऽथ नाम्न:
कर्तुं रह: कीर्तनकं स्वभक्त्या'।। १६६७।।

रोषेण प्रभुरुक्तवान् दृढतया 'त्याज्यो न देशस्तथा
श्रीसंकीर्तनमेव साम्प्रतमथ द्वीपे भवद्भि: पुन: ।
कुर्वन्तोऽत्र भवन्तु, कीर्तनमिदं पूर्वं बभूवुर्यथा,
तं काजीयवनं तथाऽस्य पुरुषान् द्रक्ष्याम्यहं सङ्गिन: ।। १६६८।।

ते रुन्धन्ति कथञ्च वङ्गनदियाद्वीपेऽत्र संकीर्तनं,
यूयं नाल्पमपीह चिन्तयत' तच्छ्रुत्वा तथाऽऽश्वासनम् ।
भक्ता: स्वं-स्वमथ प्रभोर्हरिहृदश्चेलुश्च सर्वे गृहं,
गौरो यत्र विशेषको, ननु कथं त्याज्या सता साऽवनी ।। १६६९।।

आसन् पूर्ववदेव कीर्तनरताश्चाज्ञानुसारं प्रभो:
केचि,त्तद्भयमेव तत्र मनसि त्वेषामभूत्सर्वदा ।
तस्मादेव दिनात्परञ्च बहुभि: संकीर्तनं तन्नव-
द्वीपे सम्प्रति रुद्धमेव, जनताप्रेमप्रसारोऽभये ।। १६७०।।

भीतं लोकभरं विलोक्य मतिमांश्चित्ते चकार प्रभु—
'नैवं सेत्स्यति कार्यमत्र जनता भीताऽस्ति काजीभयात् ।
यावत्तद्दमनं भविष्यति, न भीस्तावद्बहिर्यास्यति
द्वीपे साम्प्रतिकी', स्वलोकमनसश्चिन्तास्वभावः प्रभुः ।। १६७१ ।।

श्रुत्वाऽऽश्चर्यमिदं करिष्यति परं गीतारसे भावकः,
सैन्यं तद् बहु चास्ति काजिनिकटे शस्त्रास्त्रकैः सज्जितम् ।
अस्त्येवास्य च बादशाहमुखतः प्राप्तोऽधिकारस्तथाऽ,—
सामान्यो भुवि वै जनो भवति किं? नो राजयोगो यदि ।। १६७२ ।।

पार्श्वे राजबलं तथा धनबलं सैन्याधिकारादिकं
सर्वं पूर्णमुपस्थितं ननु बलं यस्यास्ति भूमौ पुनः ।
किञ्छान्तप्रकृतिश्च तस्य दमनं कर्ता त्वहिंसाप्रियः
शस्त्रास्त्रै रहितो हि वाद्यलयतोऽयं पण्डितो नर्तकः ? ।। १६७३ ।।

अस्योत्तरं सम्प्रति भावकानां
क्षणेन लब्धं भविता पुरस्तात् ।
कथं निमायी ननु पण्डितोऽपि
द्वीपे खलानाञ्छमनं विधाता ।। १६७४ ।।

काजी-शरणापत्तिः

९९. वन्दे नदियाश्रीचैतन्यम् ।
स्वच्छन्दाऽद्भुतचेष्टावन्तं प्रेमरसाप्लुतचरितम्
गङ्गायमुनानदियागोकुलसारगौरहरिकृष्णम् ।
यदनुग्रहतः स्थावरजङ्गमवृन्दमनन्तानन्दम्
अपि यवनः संकीर्तनविधिना कृष्णनामरसमपिबत् ।।

राजा चापि भवेद्विनाऽत्र मुकुटं, सेनाऽपि शस्त्रं विना
योद्धुं प्रत्युत शक्यते, भुवि तथा राजा किरीटी च यः ।
प्रायस्तस्य भयेन लौकिकजने स्याच्चाधिपत्यं, यतः
सामान्या ननु दृश्यते व्यवहृतिर्लोभाद् भयाद्वा नृणाम् ।। १६७५ ।।

अन्तर्द्वेषयुताऽपि चास्य जनता काले विरुद्धं तथा
कुर्यात्क्रान्तिमपीह, किन्तु नरपो यो वै किरीटं विना ।
लोकानां हृदयेऽमले भवति तत्तस्याधिपत्यं परं
स प्रेम्णैव निजे वशेऽखिलजनञ्छक्नोति कर्तुं पुनः ।। १६७६ ।।

आगच्छेच्च पलाय्य भीतिवशतः सेना रणक्षेत्रतो
राज्ञश्चात्र पराजयो मुकुटिनः कामं भवेदेव वै ।
किन्त्वास्ते जनताभरस्य हृदये यस्याधिपत्यं तथा
प्रेमाऽङ्को ननु शासनस्य लगितो यस्यात्र लोकात्मसु ॥ १६७७॥

सैन्यं स्यान्ननु शस्त्रधारि भुवि वा तस्याऽस्तु शस्त्रं विना
नायात्येव पलायते न रणतोऽलब्ध्वा जयं कर्हिचित् ।
स्वप्राणस्य यतोहि नाल्पमपि ते कुर्वन्ति तच्चिन्तनं,
प्राणा वस्तु न चिन्तनस्य कृतिनां कीर्तिः प्रशस्याऽमला ॥ १६७८॥

स्वप्राणस्य न यस्य किञ्चिदपि वै चिन्ताऽत्र, मृत्योः सदा
श्रुत्वा नाम समुद्यतस्त्वविचलः कर्तुञ्च तत्स्वागतम् ।
संसारेऽस्य कृते न कर्म किमपि क्षेत्रे दुरूहं सतः,
कोशेऽसम्भवशब्द एव न, तथा कोऽपि क्षितौ मानवः ॥ १६७९॥

नापेक्षाऽत्र तथाधिकस्य कृतिनस्तद्बाह्यशस्त्रक्षितेः
स्पष्टं साहसमेव शस्त्रमपरं लोके त्वमुष्यात्मनः ।
निर्भीको निजसाहसायुधदिशाऽन्यायक्रियाकर्मिणा—
ञ्छक्नोतीह पराभवेऽय,मपरः कोऽप्येक एवाऽग्रणीः ॥ १६८०॥

चित्ते नास्य विरोधिनं प्रति पुनर्दुष्टो विचारो मनाक्
तिष्ठत्यत्र तथाहि तस्य हितकस्त्रोतः सदा चिन्तयन् ।
अन्ते तस्य विरोधिनोऽपि भवति श्रेयस्तथा मङ्गल,—
ञ्छ्रेयः सज्जनसङ्गतेर्हि, विधिना स्यादत्र केनापि सा ॥ १६८१॥

अस्ति प्रेम्णि विशेषता तु तदियं, नो कोऽपि शत्रुः परं
तत्प्रेमाध्वनि हिंसनं न कपटं द्वेषो जुगुप्साऽथवा ।
पीडादानविचार एव मनसो नो जायतेऽकारणं
तिष्ठन्त्यत्र सदैव केवलममी भावा रसप्रीतिदाः ॥ १६८२॥

१००. श्रेयसि पथिका भवेयुरखिलाः ।
दीर्घायुष्यकुशलिनः सर्वे जगति सन्तु नीरोगाः
योगक्षेमसमन्वितजीवनशिवसंकल्पप्राणाः ।
भद्रालोकाः पीडाशून्याः कटुतालेशविहीनाः
मधुरालापाः प्रियसंवादाः प्रतिपलशरणस्मृतयः ॥

एतस्यैव हि नाम संघटनया दत्तं सता शब्दयो—
'निष्कर्मप्रतिरोधनं' 'सविनयाऽवज्ञा'ऽथ 'सत्याग्रहः' ।

श्रीगौराङ्गमहाप्रभुस्त्वनुसृतिं कर्तुं पथोऽस्यैव कौ
तत्संकीर्तनरोधनस्य विषये द्वीपे विरोधेऽलषत् ।। १६८३।।

तत्काजीलघुकप्रवृत्तिदमने स्थाने गृहीतोऽमुना
चोपायस्त्वयमेव, सम्प्रति जना: सर्वे तथोक्ता: पुन: ।
'यूयं सन्तु न साम्प्रतं विचलिता:, कुर्वंस्तु संकीर्तनं
यास्यामि स्वयमेव वाद्यनिकरध्वानेन काजीपुर: ।। १६८४।।

पश्येयं, स रुणद्धि केन विधिना मामेव संकीर्तनात्',
स्पष्टाऽऽश्वासनत: प्रभोर्ननु तथा सर्वे प्रसन्ना: पुन: ।
स्वं स्वं गेहमयु: सुकीर्तनकरा गौरप्रिया निश्छला:,
काले स्थानबलाद् भवन्ति निखिला: पात्राणि सद्योगत: ।। १६८५।।

एवं गौरमहाप्रभु: परदिने श्रीनित्यकञ्चादिशत्
'सम्पूर्णे नगरे निशाम्यतु भवान् सन्देशमेवङ्गत: ।
श्रीसंकीर्तनमत्र चाद्य नगरे कुर्वन् सरिष्याम्यहं
सायं काजिवचोविरुद्धमतुलं (वर्षाऽनिवार्या मरौ) ।। १६८६।।

तत्संध्यासमये गृहे मम जना: सर्वे तथैकत्रिता:
सन्त्वेकैकमशालमप्यतमसे सङ्गे नयन्त: स्वके' ।
श्रीनित्यस्त्विदमेव तद्बहुदिनैरासील्ललषन्नप्ययं,
स्वच्छन्दस्य नियन्त्रणं प्रियमहो! स्याच्चावधूतस्य किम्? ।। १६८७।।

अस्येच्छा भवति स्म चैकदिवसे कुर्वंस्तु संकीर्तनं
सम्पूर्णे नगरेऽत्र नि:सरतु तद्गौरो निमायी प्रभु: ।
माधुर्यं कियदस्ति तस्य जनतास्पष्टप्रतीतिर्भवे,—
(ल्लोकानाञ्छ्रवणाद्यभक्तिविषये तद्दर्शनापेक्षणम्) ।। १६८८।।

कुर्वन्त्यद्य विरोधमत्र ननु ये संकीर्तनस्यानिशं
लप्स्यन्ते दिनमेकमप्यथ च ते तत्प्रेमनृत्यं यदि ।
गौराङ्गस्य च तस्य कीर्तनविधेर्भक्ता भविष्यन्ति तत्
(यावज्जीवनमत्र सर्वहृदये प्रेमप्रसङ्गाऽऽग्रह:) ।। १६८९।।

द्वीपे चात्र महाप्रभोर्ननु नवे व्यक्तं कृते कीर्तने
दूरं यास्यति भीतभक्तसुहृदां त्रासोऽपि भाव: सताम् ।
अन्येषामपि साहसञ्च भविता कर्तुं पुन: कीर्तनं
(सद्भावो वसतीह लोकहृदये नेतुस्त्वपेक्षा परम्) ।। १६९०।।

लोका: सन्ति समर्थकास्तु बहव: संकीर्तनस्यात्मना
तेषां किन्तु न साहसं भवति तत्कर्तुञ्च काजीभयात् ।

अस्त्यावश्यकता प्रभोः समहृदः प्रोत्साहनस्यैव च
(व्यक्तिः काव्यपथे विभावसुहृदां योगाद्रसः स्थायिनः) ।। १६९१ ।।

विश्वासेन वचांसि तानि मनसा नित्यप्रभुश्चिन्तय–
न्नासीद्वै बहुभिर्दिनैः परमयं नोचे स्फुटं कस्यचित् ।
तत्कर्तुञ्च महाप्रभुं स्वयममुं दृष्ट्वा तथाद्योद्यतं
सुव्यक्तं पुरकीर्तनं, निजमुदः सीमा न नित्यप्रभोः ।। १६९२ ।।

घण्टामात्मकरे विधृत्य नदियारथ्यासु सर्वास्वयं
भ्रामं भ्राममिमञ्छुभं प्रतिगृहं सन्देशमश्रावयत् ।
घण्टां स प्रथमञ्च वादयति वै दीर्घं तथोच्चैर्यतः,
श्रुत्वा तत्र रवं बहुस्त्रिपुरुषाः स्थाने भवन्त्यागताः ।। १६९३ ।।

ब्रूते नित्ययतिस्ततो निजकरावुद्यम्य 'हे भ्रातरः!
सायं गौरहरिः स्वकीयमधुरश्रीनामसंकीर्तनात् ।
सम्पूर्णस्य पुरस्य मानवजनान् कर्ताऽद्य वै पावनान्
सर्वेषां ननु पूर्तिमेष्यति मनोवाञ्छा चिरात्सञ्चिता ।। १६९४ ।।

नृत्यस्याद्य विलक्षणस्य भविता लोकोत्तरस्य प्रभोः
सौभाग्याप्तिरनावृतं प्रियरसाऽऽस्वादस्य सर्वात्मनाम् ।
तेषां कीर्तनकारिणां हरिहृदाञ्च स्वागतार्थं ततः
सर्वः स्वस्वगृहन्तु सुन्दरतया भ्राता तथाऽलङ्कुरु ।। १६९५ ।।

एकैकन्तु मशालकं प्रभुगृहं चायान्तु नीत्वाऽखिलाः
सायं तत्र तथाहि किञ्चिदपि नो कुर्वन्तु कोलाहलम् ।
गृह्णन्तो निजजीवनं प्रियमिदं संकीर्तनस्य श्रियं
धन्यं धन्यतरं तथा विदधतु', श्रेयःक्षणो दुर्लभः ।। १६९६ ।।

आनन्दात्प्लवतेऽखिलो ननु जनः श्रुत्वा त्विमां घोषणा–
मुत्साहो नृषु जायते प्रकृतितः सामूहिके कर्मणि ।
अत्रैकाविदितप्रभाववशतस्तस्मिंस्तथोत्साहके
लोकाः सर्वविधा भवन्ति चलिताः प्रायो यथाऽऽकर्षिताः ।। १६९७ ।।

आशा न क्रियते कदापि च यतः कस्यापि भद्रात्मनः
कार्यस्य, स्वबलाधिकन्तु कुरुते सोऽप्यत्र चोत्साहितः ।
तस्मादेव हि सर्वकार्यविधये काले कलौ साम्प्रतं
प्रख्याता बहु सङ्घशक्तिरततां, सङ्घः स्वयं सेवकः ।। १६९८ ।।

एवं तत्पुरकीर्तनं नहि नवद्वीपे कदाचित्त्वभू–
च्चासीद्वस्तु नवीनमेव नदियानारीनराणामिदम् ।

शृण्वन्तश्च निमायिनृत्यभजनख्यातिन्त्वनेकैर्दिनै--
स्तन्नाद्यावधि ते परञ्च ददृशु,र्दृष्टि: फलं हि श्रुते: ।। १६९९।।

श्रीवासस्य गृहान्तरे समभवत्संकीर्तनं, तत्र तु
स्थाने भक्तविशेषकेतरजनो नासीत्प्रवेष्टुं क्षम: ।
तस्माद्द्वीपनिवासिनां मनसि वै संकीर्तनस्य श्रिय:
साक्षाद्दर्शनलालसाऽमलहृदामप्यत्र सन्ना यथा ।। १७००।।

सन्नेच्छा पुरकीर्तनस्य मनसो वार्ता निशम्योद्गता
सर्वेषामधुना, स्वशक्त्यनुसृतेस्तत्स्वागतार्थ जना: ।
चक्रु: श्रीहरिकीर्तनस्य विविधं सज्जासमायोजनं,
पर्वाऽऽयोजनकक्षणाय जनताचित्ते प्रतीक्षा सदा ।। १७०१।।

"दृष्ट्वाऽऽवर्तयतीह वर्णमपरं स्वं खर्बुजं खर्बुजं"
लोकेऽद: प्रथितं, तथाहि भगवद्भक्ता यदा स्वं गृहम् ।
रम्भास्तम्भपताकतोरणभरैस्ते सज्जयन्तोऽभवं--
स्तत्तेषां प्रतिवेशिनोऽपि, ननु ये शाक्ता: परे येऽथवा ।। १७०२।।

लोका भिन्नपथाश्रिता, निजनिजद्वारध्वजासज्जनं
कुर्वन्त: स्म भवन्ति सम्प्रति, यतोऽस्मद्गेहहेतोस्त्रुटि: ।
सज्जायां नगरस्य नात्र लगतु, द्रष्टव्यमद्यापि न--
स्तद्गौराङ्गसनृत्यकीर्तनवरख्यातिप्रमाणांशकम् ।। १७०३।।

सर्वेषां हृदि जोषदायकनवाऽऽरम्भस्य कस्यापि च
स्वाभाव्यात्तु सहानुभूतिरवनीखण्डे कृते जायते ।
तत्कार्यस्य च धूमधामविधिना दृष्ट्वा भवत्सज्जनं
दृश्यन्ते सहयोगकर्मणि पुनर्लोका: प्रतीपास्त्वपि ।। १७०४।।

दूरं याति तदा विरोधिहृदयं तेषां, यतोहि क्षितौ
वर्षत्युग्रविचारमेघकणिकाशीतप्रभावोऽखिले ।
तस्माद्ये निजनीचभावमनसोऽत्यन्तञ्च संकीर्तने
गौरे द्वेषयुता (भवन्ति सुहृदां हेतुं विना द्वेषिण:) ।। १७०५।।

त्यक्त्वाऽहेतुमथ ज्वलत्खलनृणां तेषां निवासं, स्वकं
द्वीपे सर्वविधात्मभिर्ननु नृभिर्भद्रं गृहं सज्जितम् ।
तन्मार्गे नगरस्य सुन्दरतया भव्ये कृतं सेचनं,
स्थाने गन्धितधूपगुग्गुलभरा: स्थाने तथा ज्वालिता: ।। १७०६।।

नानावर्णपताकिका ह्युभयत: पन्थानमुत्तोलिता:
स्थानस्थानचतुष्पथेषु नदियापुर्या ध्वजा: स्थापिता: ।

नीलश्यामलपीतलोहितहरिद्वर्णाश्च याः शाटिकाः,
प्रासादा द्वितलाधिकाः पथमुखास्ताभिः पुनः सज्जिताः ॥१७०७॥

स्थाने कर्गजपत्रिका विलसति स्थाने तथा कुत्रचिद्–
द्वीपे राजति तत्र रञ्जितपटाऽऽवृत्तिस्तु नानाविधा ।
अम्भःपूर्णनवीनचित्रकलशा द्वारे निजे स्थापिता
भक्तैर्मङ्गलसूचकाश्च गृहिभिः (शाम्या तृषा ह्यम्भसा) ॥१७०८॥

दृश्यन्ते कदलीद्रुमाः सगृहरा द्वारेषु शोभाधिकाः
संध्यायां ज्वलनाय मङ्गलविभा दीपस्रजां पङ्क्तयः ।
लोकोत्साहभरस्तथाहि ववृधे, ते चिन्तयन्तः पुनः
किं संकीर्तनकारिणां किमधुना सुस्वागतार्थं क्रियात् ॥१७०९॥

तत्संकीर्तनमण्डलं ननु पथा केनाऽत्र सर्ता पुन–
स्तस्यान्तो भविता च कुत्र, नहि तत्पन्थाः कृतो निश्चितः ।
सर्वे तन्निजभावनानुसरणादेवन्तु बोधन्ति यन्–
नूनं कीर्तनमण्डली मम गृहद्वारोन्मुखी यास्यति ॥१७१०॥

श्रीमत्कीर्तनकारिणाञ्च सुहृदां सत्कारकर्मक्षणः
सर्वेषामनुमानमद्य भविताऽद्धाऽऽप्तोऽत्र सौभाग्यदः ।
तत्ते गौरमहाप्रभोर्नन्नु कृते सर्वस्य तत्सङ्गिनो
भव्यस्वागतकाय वस्तु विविधं दध्रुस्तथासज्जितम् ॥१७११॥

सम्पूर्णे प्रथिता मुदोऽद्य नु मुदो द्वीपे नवे सर्वतः
कस्मिंश्चित्तु महोत्सवेऽथ नगरे राजाऽऽगमेऽप्यत्र वा ।
नाभूत्क्वापि च धूमधामसहिता रथ्यासु सज्जेयती,
श्रीमत्कीर्तननृत्यदर्शनरतौ हेतुर्निमायिप्रभुः ॥१७१२॥

प्रेम्णाऽद्य भक्तहृदयं ननु वंशमानं
स्थाने तथोच्छलदथाऽऽकृतितः प्रतीतम् ।
सज्जाक्रियासु विततासु सतीसु चैवं
संध्याऽऽगता सुमनसां वचनक्रमेण ॥१७१३॥

मध्येगेहमयं महाप्रभुरपि श्रीकीर्तनस्याधुना
कुर्वन्नस्ति तथाप्रबन्धनमहो!, नेताऽक्रियः किं भवेत् ? ।
आहूय स्वविशेषभक्तनिवहान् सर्वां व्यवस्थां स्फुटं
देष्टाऽसौ पुरकीर्तनस्य, दिशते सम्यग्जनानग्रणीः ॥१७१४॥

अग्रे स्थास्यति को, भविष्यति च कः पृष्ठेऽस्य, सर्वस्य वै
चान्ते को भविता, तथेदमखिलं कार्यं दिदेश स्फुटम् ।

मुख्यः कुत्र च नर्तकश्च भविता कः सम्प्रदाये तथा,
चक्रे सर्वमिदं व्यवस्थितमसौ, कौति व्यवस्थाऽमला ।। १७१५।।

शृङ्गारञ्च गदाधरोऽकृत ततो भक्तोऽन्तरङ्गः प्रभोः
श्यामे कुञ्चितकुन्तलेऽस्य विविधं तैलं तथावासितम् ।
दत्वा तस्य बबन्ध पूर्वमधुना भद्रप्रियां वेणिकां
पुष्पञ्चम्पकमालतीप्रभृतिकं तस्याञ्जुगुम्फोत्तमम् ।। १७१६।।

तन्नासोपरि चोर्ध्वपुण्ड्रमपरं कृत्वा कपोलद्वये
चक्रे सम्प्रति मस्तके च ललितां पत्रावलीमुन्नताम् ।
शृङ्गारं ललितं तथाऽस्य विहितं प्रत्यङ्गकं, येन तं
दृष्ट्वा स्यान्ननु लज्जितः प्रथमतो नूनं मनोजोऽपि सः ।। १७१७।।

दध्रेऽत्यन्तमनोहरं निजतनौ पीताम्बरञ्छ्रीप्रभु–
स्तत्पीतं पदलम्बितं पटवरं प्रान्तेऽल्परेखाङ्कितम् ।
धौतं सज्जितकं तथास्य वसनं भद्रं प्रतीतिङ्गतं,
सामान्येऽपि विभाति वै वरपटो भव्ये तथा का कथा? ।। १७१८।।

मालामर्पितवांस्ततः प्रभुगले चाऽऽजानुलम्बां गदा,
रेजे तप्तसुवर्णतुल्यमतुलं तत्कारणात्तद्वपुः ।
ताम्बूलस्य च वीटिकाऽस्ति निहिता श्रीमन्मुखे शोभनं
तस्माद्वामकपोलमल्पमधुना ह्युत्थं यथा लक्ष्यते ।। १७१९।।

रक्तौ तावरुणाधरौ बहु तथाताम्बूलरागेण तत्–
संकोचो ननु जायते स्म च तयोर्बिम्बोपमायामपि ।
मध्ये चापसमभ्रुवोः कुटिलयोः कृत्वाऽभितः केसराऽऽ–
लेपं कुङ्कुमबिन्दुरस्य निहितश्चैकोऽतिसूक्ष्मोऽन्तरे ।। १७२०।।

स्थाने कुङ्कुमशोणबिन्दुरधुना पीताभदेहे प्रभो–
र्दूरादेव स रक्तहीरककणीतुल्यश्च दीव्यन् बभौ ।
शृङ्गारञ्च विधाय तत्र विधिना गेहाद्बहिश्चागते
द्वारे लोकभरे प्रभौ दृशिगतेऽपारे प्रतीक्षारते ।। १७२१।।

जातः सम्प्रति संस्थितेऽत्र युगपत्तस्मिंस्तु कोलाहलो
मन्ये सागरमध्यवीचिरधुना जाताऽखिलेन्दौ यथा ।
उक्त्वोच्चै'र्हरि-बोल, बोल-हरि' ते खं गुञ्जयन्ति क्षितिं
लोकाः श्रीप्रभुदर्शनाय मनसाऽऽकृत्या तथोच्चालिताः ।। १७२२।।

अन्योन्यञ्च निवार्य पादसविधे यातुं यतन्ते प्रभोः
सर्वादौ निखिलाः, प्रभुर्निजकरावुद्यम्य शान्त्यर्थकम् ।

सङ्केतं कृतवान्, क्षणेन जनतामध्येऽस्ति निःशब्दता,
तत्काले तु तथाप्रतीतिरभवन्मन्येऽत्र कोऽप्यस्ति नो ॥१७२३॥

बध्नाति स्म गदाधरश्च पदयोः श्रीमत्प्रभोर्नूपुरे
चक्रुर्नूपुरबन्धनं पुनरमी भक्ताः क्रमादात्मनोः ।
चक्रे नूपुरकस्वनं प्रभुरतः संचाल्य वामाङ्घ्रिकं
पादैः स्वैर्युगपत्तथैव विहितो भक्तैरनन्तैः स्वनः ॥१७२४॥

आनन्दतरङ्गः स्थाने जनवृन्दे ।
उत्थित इवाभूद्गङ्गाम्बुधियोगे ॥१७२५॥

सम्मर्देऽत्र जनस्य सर्वविधिका ह्यासंश्च नारीनरा
वृद्धास्ते तरुणास्तथाहि शिशवो, नो भेदभावः पुनः ।
आसीत्कोऽपि च जातिपङ्क्तिविषयो, द्वीपस्य योऽपीच्छतु
श्रीसंकीर्तनमण्डलेऽत्र मिलितुञ्छक्नोति तत्राऽऽगतः ॥१७२६॥

कस्याप्यत्र न कीर्तने हि मिलने कश्चिन्निषेधः कृतो
यावन्तोऽपि जनाश्च तत्र मिलिताः स्थाने समूहेऽभवन् ।
एकैकञ्च मशालमस्ति नियतं प्रायोऽखिलानां करे,
वेदोक्तं 'तमसस्तु माऽत्र गमय ज्योतिः' परं सत्यकम् ॥१७२७॥

लोकस्यास्ति तु दृष्टिरेव, दिवसे तस्मिन् प्रकाशाय नो
नीत्वा तच्च मशालमेकविधिना माहात्म्यमेवाऽभवत् ।
सार्धं तत्तु मशालकेन चलनं, मन्ये मिलित्वाऽखिला
द्वीपस्यास्य नवस्य तल्लघुवराऽऽलोकैर्यथाशक्तिकम् ॥१७२८॥

लीनाज्ञानतमश्चिरस्य, बहुधाऽन्विष्यापसारार्थकं
सन्त्येवात्र समागताः सुमनसः स्थाने तथाप्रस्तुताः ।
दीर्घञ्चास्ति मशालमत्र लघुकं कस्यापि हस्ते स्वके
धत्ते कोऽपि पुनर्द्वयोस्तु करयोर्द्वे द्वे मशालेऽधुना ॥१७२९॥

कूर्दन्ते ते लघु-लघुबाला
गृह्णन्तो वै लघुकमशालम् ।
भूयश्चोक्त्वा 'हरि-हरिबोल',—
ञ्छ्रीगौराङ्गो ह्यनुपमभावः ॥१७३०॥

आसीत्सर्वजनात्मनां सुखमयी गोधूलिवेला तथा—
श्रीगौराङ्गवरेन्दुदुःसहहिमश्रीरूपलावण्यतः ।
लब्ध्वा किन्नु पराभवं दिवि दिवानाथो मुखं गूहितुं
सम्प्रत्यस्तगिरौ समुद्यत इव, स्तुत्यो विवेकः सदा ॥१७३१॥

सम्पूर्णं मुखमण्डलं समभवत्तस्य ह्रिया लोहितं,
खे चान्यत्र तथोदितोऽर्धशशिको मन्ये समुद्घोषितुम् ।
तत्प्रेमाकरपूर्णगौरशशिनः स्थानेऽवतारं क्षितौ,
काले भूतलवासिनामपि सतां भाग्यं दिवा स्पर्धते ।। १७३२।।

पक्षश्चास्ति सितो, निशाऽस्ति धवला, ग्रीष्मर्तुकालः कलः,
क्रोशन्तो 'हरि-बोल, बोल-हरि' तेऽभुः प्रेम्णि मत्तास्तथा ।
चक्रे स्थातुमतस्तथा सनियमं सङ्केतमत्र प्रभुः
सर्वेऽन्ये द्रुतमेव पृष्ठमगमन्, दृश्यं पुरस्ताद्दृशोः ।। १७३३।।

भक्ताः कीर्तनकारिणो ननु पुरोऽतिष्ठंश्च निर्धारिता
भक्तानामकरोद् विभाजनमसौ पूर्वञ्चतुर्धा प्रभुः ।
आचार्यस्य दलन्तु सर्वपुरतस्तद्भक्तिसेनापतेः
श्रीमद्भीष्मपितामहेन सदृशः, कार्यो हि वृद्धः पुरः ।। १७३४।।

तत्पृष्ठे सह चात्मनो दलबलैः श्रीवासभक्ताग्रणी–
स्तद्वर्गे च लसन्ति कीर्तनकलादक्षाः शतं सञ्चिताः ।
पश्चादस्य महात्मनः प्रियहरिश्रीनामदासस्य तत्
सर्वान्ते निजमुख्यभक्तसहितस्तस्थौ निमायिप्रभुः ।। १७३५।।

श्रीयतिश्च दक्षिणेऽस्य, वामे
शोभते गदाधरः प्रभोश्च ।
रुद्रपद्मजद्वयेन युक्तः
श्रीपतिर्यथा विभाति गौरः ।। १७३६।।

तत्सर्वेषु च सत्सु सम्प्रति यथायोग्यं स्थितेषु प्रभुः
सङ्केतं ह्यकरोच्च नूपूरवाल्लब्धे क्षणादिङ्गिते ।
आकाशः करतालखोलमधुरध्वानैश्च गुञ्जन्नभूद्–
भक्ताः प्रेममदेन गाननिरतास्तालस्वरैर्ननृतुः ।। १७३७।।

कस्यापि स्वशरीरबुद्धिरधुना बाह्यप्रतीतिश्च नो,
भूताऽऽविष्टविचेतनो ननु यथा नृत्यंश्च कूर्दन् भवेत् ।
तद्वत्प्रेमनिमज्जिताश्च निखिला भक्तास्तदाऽनर्तिषुः
कश्चित्किन्तु विलोममत्र न गतस्तालस्वरस्याधुना ।। १७३८।।

कुर्वन्तो विधिपालनं महति तत्कोलाहलेऽत्रापि ते
तत्तालस्वरकस्य सुन्दरतया सन्ति, स्मयो वै महान् ।
उत्तिष्ठन्ति पदानि तत्र युगपच्चैवाऽखिलानां सतां,
तुल्या सर्वजनस्य वै हृदि समे बाह्येन्द्रियस्य स्थितिः ।। १७३९।।

द्वीपे नूपुरनि:स्वनै रुनझुनै: सार्ध विचित्रस्वर–
स्त्रष्टाऽभूत्करतालखोलजगतां स्फोट: स्फुटं संयुत: ।
एको गायति भिन्नमेव पदकञ्छ्रीसम्प्रदायोऽन्यत:,
शब्दोऽर्थ: पृथगस्तु किन्तु सुहृदां भाव: समानो रस: ।। १७४० ।।

नृत्यन्तो ननु वाद्यवादकजनास्ते वादयन्ति स्फुटं
भूमौ खोलकवादकाश्च शयितास्तद्वादयन्तोऽभवन् ।
स्थाने झाँझमजीरवाद्यमधुरस्वाना: पुरा न श्रुता–
स्तेषां तद्हृदयं तथासुविहिताश्चोद्वेलयन्ति स्म ते ।। १७४१ ।।

नृत्यन्तं परितो भवन्ति सुहृद: संवेष्ट्य, तन्नर्तक:
स्वच्छन्दं विविधञ्च कीर्तनरसं नृत्यत्ययं दर्शयन् ।
पादेनास्य पदं तथा विदधते तत्सम्प्रदायस्य ते
सार्ध नूपुरकस्वनेन निखिला: सम्मेलयन्ति स्वकम् ।। १७४२ ।।

उच्चैस्ते 'हरि–बोल, बोल–हरिक–श्रीगौर–बोल–प्रभु'
स्थाने सर्वजना वदन्ति युगपन्मध्येऽत्र मध्ये पुन: ।
एषोऽपारजनोत्थितोऽतुलरवो व्योमस्तरोत्कम्पको
रोदस्यां हि जुगुञ्ज कालमधिकं, भूमिस्वर: खप्रिय: ।। १७४३ ।।

भूयो भक्तास्तद्वद्गाने । गौरप्रीतास्ते मज्जन्ति ।। १७४४ ।।

नृत्यन्नस्ति महाप्रभुर्हरिमय: सर्वस्य चान्तेऽधुना
श्रीनित्येन गदाधरेण सहित:, क्रीडा न चैकाकिन: ।
नृत्यञ्चास्ति महाप्रभो: स्फुटहृदो द्रष्टव्यमेवाद्यकं
तत्पश्येत्स्वविमानग: सुरगणो मन्ये नभोमण्डले ।। १७४५ ।।

भावावेशगत: प्रभुर्ननु तदा नृत्यन् बभूवाऽद्भुतं
मालाऽऽजानुविलम्बिनी वसुमतीं रम्या स्पृशन्तीव सा ।
नृत्यत्यूर्ध्वदृशिर्विनम्य कटिकं हस्तौ तथोद्यम्य स,
प्रीतिर्वै परिचीयते नयनयोर्निम्नोन्नतावस्थया ।। १७४६ ।।

स्यन्दत्तन्मृदुपद्मलोचनयुगात्प्रेमाश्रु भूयोऽमलं
भूमौ याति कपोलयोरुपरित: तप्तात्मनां सेचनम् ।
तिर्यग्लोचनकोणतो ननु यदा शीताश्रुणोस्ते कणा:
स्यन्दन्तोऽस्य कपोलयो रचितयो: पत्रावलीशोभयो: ।। १७४७ ।।

नीचै: पतन्त्युपरितो, नदियाऽमलेन्दो–
स्तात्कालिकस्य वदनस्य तदाऽस्य शोभा ।

आसीत्परं नयनमात्रगतैव गम्या,
ज्योतिर्गतिर्वपुषि लोचनमध्यरन्ध्रात् ॥ १७४८॥

गद्गदकण्ठो गायति गौरः ।
भक्तजनानां संसृतिपथ्यम्— ॥ १७४९॥

"तोमार चरणे मन लागुरे हे सारंगधर!"

१०१. **चरणे प्रिय! तव, लगतु मनो मे, हे शार्ङ्गधर! सुदर्शन!**
भवकाननतरुवनसुमनःफलमधुरससुखपरिणामः
शोकमोहभयमिलिताऽऽस्वादनसंततसंसृतिचक्रम् ।
भुवि जनसाधारणमतिगतिरिह निजशिवनिश्चयदीना
शिवसंकल्पं मनो-जगन्मे, कृपाकणं स्वं वितरतु ॥

'हे सारंगधर!' प्रभोः कथयतः स्थाने गलो रुध्यते,
सर्वः श्रीहरि-बोल, गौरहरि च' ब्रूते तथैकस्वरात् ।
संज्ञायाञ्च भवन् पुनः प्रभुरयं तस्मात्तु भूयो विधे—
र्गानं कोकिलकण्ठतो हि कुरुते, गानं प्रियस्य प्रियम् ॥ १७५०॥

मध्याङ्गञ्च विचाल्य सम्प्रति करौ नृत्ये प्रसार्य प्रभु—
स्ते संकोच्य तथा भ्रुवौ निजशिरो नीचैर्विधायोच्चकैः ।
गानेऽलौकिकभावदर्शनमयं राध्नोति नानाविधं,
स्वप्रेमास्पदगानमेव जगति श्रीप्रेमिणां जीवनम् ॥ १७५१॥

सर्वे सम्प्रति काष्ठपुत्तलिसमाः श्रीमन्मुखे दर्शकाः
पश्यन्तो ह्यनिमेषकाः सुमनसः पश्यन्त एवाभवन् ।
सञ्चारो हृदयेऽपि कर्कशतमे प्रेम्णोऽद्य नृत्यात्प्रभो—
स्तत्रैव क्षणतो भवंश्च लगितः, श्रीमांस्तथोद्दीपकः ॥ १७५२॥

सस्यन्देऽपि महाविरोधिमुखतः संकीर्तनस्य स्फुटं—
'साधु, प्रेम भवेद्' वदन्ति निखिलास्त्वैतादृशं वै भवेत्' ।
'एवं तन्मयता हि मानवतनौ (कोऽप्याह) नो संभवा,
ब्रूतेऽन्यस्तरसा 'निमायिपुरुषः साक्षात्तु नारायणः' ॥ १७५३॥

'नो लब्धं निजजीवने सुखमिदं नाद्यावधिं कर्हिचि'—
च्छ्रुत्वैकस्य वचस्तथाहि तरसा ब्रूते परो,' वस्तुतः ।
त्वं किं, कोऽपि न लब्धवानिदमहो! सौख्यं कदाप्यात्मनो,
देवानामपि चास्य दुर्लभमदस्तिष्ठन्ति लालायिताः' ॥ १७५४॥

कुर्वन् गाङ्गतटोन्मुखः प्रभुरयं याति स्म संकीर्तनं
सम्मर्दः पथि तत्र मानवसतां स्थानेऽस्त्यपारोऽधुना ।
सम्मर्दात्तु पिपीलिकागतिरहो! तस्मान्न वै संभवा,
व्यक्तेर्भावविशेषतोऽखिलहृदा संमेलनं जायते ॥ १७५५ ॥

भक्ताः सद्गृहिणोऽत्र सन्ति निखिला द्वारे स्वके वै स्वके
गृह्णन्तो हरिसम्पदां सुमनसां नीराजनां सत्कृते ।
पुष्पाणां कुरुते प्रभोरुपरि वै कश्चित्तथावर्षणं,
भक्तानां सुगलेषु चार्पयति तन्मालाः पुनः कोऽपि वै ॥ १७५६ ॥

कश्चिद्गन्धमहार्घतैलसुमनोवासस्य सीसीं प्रभो
श्रागुद्वर्तयतोह पूर्णमधुना कोऽपीत्रदानात्पुनः ।
आर्द्रं भक्तजनं करोति बहुल कीर्त्यां सुवासेत्रकं,
नार्यो द्वारि तथा गृहाद्धवलभौ स्थानात्प्रभौ वै ततः ॥ १७५७ ॥

वृष्टिं सम्प्रति कुर्वते सुमनसां, कन्याश्च लाजास्तथा
भक्तस्योपरि वै किरन्ति विपुलञ्चापूर्य ताः स्वाञ्जले ।
काचिच्चन्दनमेव वासितमहो पुष्प पुनश्चाक्षतं
भक्तस्वागतमत्र कापि कुरुते प्रक्षिप्य दूर्वास्तथा ॥ १७५८ ॥

एवं पुष्पमयस्तथाहि नदियासम्पूर्णमार्गोऽभवत्—
तद्दूर्वाक्षतलाजचन्दनफलैः पन्था यथा चास्तृतः ।
उन्मत्तः प्रभुरत्र नृत्यति यथा, तद्बोध एवास्ति नो
किञ्चित्तस्य तथाहि बाह्यजगत,स्तल्लीनता दुर्लभा ॥ १७५९ ॥

तत्सांसारिकचिन्तनञ्च निखिलास्त्यक्त्वाऽत्र संकीर्तने
प्रेमस्रोतसि मज्जिताः, सुमनसस्तेषाञ्च मग्नात्मनाम् ।
काजी सम्प्रति न स्मृतोऽस्ति, न कदाचारस्तथैवास्य वै,
सर्वे विस्मृतमानसाः प्रभुसतो नृत्यं विलोक्याऽधुना ॥ १७६० ॥

एवं तत्पुरकीर्तनं हि नगरे सर्वात्ममेवाऽभवत्—
सर्वेषान्तु नवैव चात्र घटना द्वीपे तथाऽऽसीन्नवे ।
भूयो मुस्लिमशासकस्य भविता तच्छासने तादृशं
कर्तुं साहसमेव कस्य, भजनं माधुर्यभावो हृदः ॥ १७६१ ॥

आधीनं बुबुधे निजन्तु निखिलश्चाद्य प्रभावात्प्रभोः
साम्राज्यं समभूत्तु सर्वहृदये गौरात्मनः केवलम् ।
यावन्मस्तककर्तनार्थमपि तत्स्वल्पेङ्गितेऽद्यात्मन—
स्ते सन्त्यत्र समुद्यता, हि नवमी भक्तिस्तथाऽऽत्मार्पणम् ॥ १७६२ ॥

तत्संकीर्तनकस्य नागरहृदि स्थाने समाजोऽद्भुतं
सञ्चारं नवजीवनस्य विदधन्नृत्यैश्च गानैर्जयैः ।
गङ्गाघाटमवाप्तवांश्च, सुमनाः स्नात्यत्र नित्यं प्रभु,-
र्गङ्गायां सुहृदो मनो हि मिलते, गङ्गाप्रसूतिर्हरिः ।। १७६३ ।।

तत्स्थानाद्धरिमण्डलीजनयुतो यातो निमायिप्रभुः
कुर्वन् भक्तमधायिघाटमधुना श्रीनामसंकीर्तनम् ।
तस्माद्याति मधायिघाटविषयाच्छ्रीमानवक्रं पुनः
काजीजी वसति स्म 'बेलपुखरा'स्थानेऽत्र, तत्रोन्मुखः ।। १७६४ ।।

काजीसन्निधियानपूर्वमधुजीघाटे गतिः श्रीप्रभो-
स्तन्मर्माऽत्र विदन्तु भावकगणाः स्थाने स्मरन्तु स्वयम् ।
संस्कर्ताऽस्ति जगायिमाधवमनोवृत्तेर्निमाय्यम्बुना
तत्क्रूरव्यवहारपीडितहृदां प्रेमाऽध्वसंदेशकः ।। १७६५ ।।

अद्योद्धारकृतिस्तथामनसि तत्काजीहृदोऽपि प्रभो-
स्तन्मार्गोन्मुखयानकस्मृतिरहो! सर्वस्य जाताऽधुना ।
अत्याचारममुष्य तत्क्षणममी सर्वे स्मरन्तोऽभवन्,
सौख्यं विस्मृतिमेति लोकमनसो दुःखं सदैव स्मृतौ ।। १७६६ ।।

आवेशे तु तथा गताः कतिपये, यच्चोच्चकैश्चुक्रुशु-
'भ्रातः! काजिममुं गृहाण तरसा प्राणैः समं घातय ।
अत्याचारकृतिः सनातनपथे भूयोऽमुना वै कृता'
नासीदल्पमपि प्रभोर्मृदुहृदः संज्ञानमेतद्गतम् ।। १७६७ ।।

द्वेषः केनचिदस्य जीवजगता नो, सम्प्रदायेन वा
नाप्याऽऽस्ते कणमात्रमत्र हृदये, द्वेषक्षणो नो रतौ ।
अन्यायाय निमायिपण्डितमनाः स्म द्वेष्टि गौराङ्गजी,
नो तत्रापि स योद्धुमैच्छदपरः सार्धं तथाऽन्यायिना ।। १७६८ ।।

प्रेमास्त्रेण पराभवं परमसौ कर्तुञ्च तस्येहते,
पक्षे संहृतिकर्मणो नहि, समुद्धारस्य चासीत्प्रभुः ।
तस्मात्सम्प्रति 'मार-काट'-वचसामुद्घोषका वै जना-
स्तेऽभक्ताः कुहृदो निमायिमनसस्तस्याभिप्रायाऽविदः ।। १७६९ ।।

एतावत्तु तथोग्रताप्रियजनैरज्ञानिभिस्तैः कृतं
भित्वा पादपशाखकानि तरसा चाविश्य काजीगृहे ।
पुष्पोद्यानफलप्रसूननिवहं ते नाशयन्तोऽभवँ,-
ल्लङ्कायां हनुमत्क्रिया समुचिता दूरस्थिते राघवे ।। १७७० ।।

काजी पूर्वत एव चात्मपुरुषैस्त्वासीत्तथात्रासित–
'स्त्वामायान्ति तु धर्तुमत्र नदियाभूमेर्निमायी सुधीः ।
कृत्वा (प्रोचुरमी तथा तमधुना) सङ्गे सहस्रं जनान्,
तैः प्राणैः सह हन्यते ननु भवां',स्त्रासोऽन्तिमः प्राणहा ।। १७७१ ।।

त्रस्तोऽपारजनस्य दुर्बलमनाः काजी च कोलाहलैः,
क्रुद्धानां पुरतो ययौ नहि भिया, सेनाऽपि तस्याऽधुना ।
आत्मानं त्वसहायमत्र परितो बुद्ध्वा वराको द्रुतं
गेहेऽलीयत साम्प्रतं, प्रथमतः प्राणाऽवनं संसृतौ ।। १७७२ ।।

लोकस्तावदुपद्रवी कतिपयश्चोत्फाल्य सम्मर्दकं
तत्रोत्पादयतीह चात्ममनसस्तूग्रप्रवृत्तिं पुनः ।
उद्योगं कुरुते तथाह्यनुचितं कर्तुञ्च काजीक्षतिं,
जाता यत्प्रभुजीप्रतीतिरियती, '(स्वस्मिन् मनस्वी रतः) ।। १७७३ ।।

तत्रैव क्षणके दिदेश तदयं रोद्धुन्तु संकीर्तनं
स्वं स्वं वाद्यमधश्चकार निखिलस्त्वादेशलब्धिक्षणे ।
तस्थौ नर्तकवृन्दमत्र, रुरुधे तद्गायकस्तत्पदं
जाता नीरवतेव तत्र तरसा, शान्तो हि शुश्रूषते ।। १७७४ ।।

ऊचे मेघगभीरसन्निभरवे श्रीमान् दिशो गुञ्जय–
'न्नुद्योगं यदि सावधान! कुरुते किञ्चित्तु काजीक्षतिम् ।
कश्चित्प्रापयितुं, तदाऽप्रियजनस्तत्तोऽधिकोऽन्यो न मे,
तत्पूर्णं ननु संयता स्त सकलाः', शान्तिस्वभावः सुखम् ।। १७७५ ।।

एतन्मात्रनिमायिमौखिकगिरौ सर्वस्तथोपद्रवी
क्षिप्त्वा प्रस्तरलोष्ठशाखशकलं मौनं निषण्णो द्रुतम् ।
आगत्य प्रभुसन्निधौ, तदखिलं लब्ध्वोपविष्टं प्रभुः
शान्तं, तत्र दिदेश काजिकजनान्, जिज्ञासनीयो गृही ।। १७७६ ।।

'काजीपुरो मम गृहाण हि नामकं त्वं,
तं ब्रूहि चाह्वयति चैष भवन्तमत्र ।
कर्ता त्वयि व्यवहृतिं नहि कोऽप्यभद्रां
द्वारे भवान्ननु गृही चलतु क्षणाय' ।। १७७७ ।।

श्रुत्वा तत्प्रभुवाक्यमत्र तरसा जग्मुश्च तत्सेवका
गेहाभ्यन्तरलीनकाजिनिकटं प्रोचुस्तथैतं ततः ।
श्रुत्वाऽऽश्वासनमस्य तादृशमसौ काजी विलक्ष्याधुना
तं सम्मर्दमपारमुक्तिरहितं गेहाद्बहिर्निःसृतः ।। १७७८ ।।

सार्धं भक्तजनैश्चकार सुमनास्तस्यात्र चाभ्यर्थनां
ब्रूते सस्मितकञ्च तं स्वनिकटे प्रेम्णोपवेश्य प्रभुः ।
'किं भो! रीतिरियं कुतो ?, वयममी द्वारे तवाभ्यागता,
दृष्ट्वाऽस्मांस्तु भवानलीयत गृहे', द्रष्टव्य एवाऽऽगतः ।। १७७९ ।।

काजी जल्पति तद्विनम्रवचसा प्रेमस्वरो लज्जितः
'सौभाग्यं मम यन्मदीयवसतौ प्राप्तो निमायी भवान् ।
आयात्यत्र च सन्निधौ मम भवान् क्रुद्धस्तु, बुद्धं मया
युक्तं तन्नहि सम्मुखेऽस्य भवनं क्रुद्धस्थितौ, मे मतम्' ।। १७८० ।।

'वचस्तथाक्रोधकृते किमस्ति वै
भवान्नवद्वीपगतो हि शासकः ।
मम त्वयि क्रोधकृतिर्भवेत्कथं',
वराय कोपो न विधिः सनातनः ।। १७८१ ।।

अत्रोक्तं ननु पूर्वमेव तदिदं, देवीशचीश्रीपिता
श्रीनीलाम्बरचक्रवर्तिसुमतिर्गौराङ्गमातामहः ।
काजीजीनिकटेऽस्य 'बेलपुखरा'स्थाने निवासोऽभव—
त्तस्माच्चक्रमहाशयेऽस्य मनसि स्नेहो महान् काजिनः ।। १७८२ ।।

तत्काजी वदति स्म 'पश्य वसतेर्योगान्निमायिन्! मम
श्रीचक्रो लगतीह विप्रतिलको द्वीपे पितृव्यो नवे ।
तत्त्वं मे भगिनीसुतोऽलग,दहं स्थानेऽस्मि ते मातुलः,
क्रोधोऽकारणमत्र मातुलगतः स्या,त्तं सहेताऽस्य सः ।। १७८३ ।।

क्रोधं ते सहिता, ममोपरि कुरु क्रोधं यथा चेहसे'
'सम्बन्धस्य तथास्य तत्कथमहं हे मातुलाऽस्वीकृतिम् ।
कुर्वे कुत्र?, भवांस्तु मे भुवि वरः, क्रोडे त्वया लालितो,
बालस्ते पुरतोऽस्मि, चात्र भवते क्रोधन्तु कुर्वे कथम्?' ।। १७८४ ।।

'श्रीसंकीर्तनकस्य तत्तव मया प्रायो विरोधः कृतः',
'क्रोधं तत्त्वयि भागिनेयशिशुको द्वीपेऽत्र कुर्यां कथम् ? ।
श्रीगङ्गापुलिने भवानपि नहि स्थाने स्वतन्त्रो, यतः
प्राप्ता स्यान्ननु बादशाहनिकटादाज्ञा यथा तेऽथवा ।। १७८५ ।।

तेऽधीनस्थककर्मचारिपुरुषैश्चोक्तं भवेद्वै यथा
तत्काजीपदवर्तमानभवता स्याद्वा कृतं तादृशम् ।
स्थाने कीर्तनकारिणां यदि कृतस्तद्दण्डनस्यैव ते
द्वीपे सम्प्रति निश्चय,स्तदखिलाः कुर्मोऽपराधं तथा ।। १७८६ ।।

अस्मभ्यं त्वपि देहि दण्डमधुना शीघ्रं यथेच्छं मुदा,
सज्जीभूय तदर्थमेव निखिला: प्राप्ता वयं त्वत्पुर:' ।
'एवं कापि न बादशाहनिकटादाज्ञा बभूवाधुना,
(संसारे परधर्मिणां भवति किं स्थाने कुदृष्टि: सदा ?) ।। १७८७।।

अत्रागत्य निवेदितन्तु बहुभिस्तै: पण्डितैरेव ते,ऽ–
शास्त्रीयं क्रियतेऽत्र कार्यमिदक,ञ्छास्त्रं यथा शासनम् ।
पूर्व मङ्गलचण्डिकाभगवतीगीतं स्म वै गीयते,
सम्प्रत्यत्र निमायिपण्डितमतिर्गायंस्तथाऽनावृतम् ।। १७८८।।

मन्त्राणामटतीह भद्रभगवन्नाम्नां पुन: कीर्तनं
गोप्यानामुपदेशनञ्च कुरुते सर्वेषु वर्णेष्वयम् ।
दुर्भिक्षं पतिता तथाहि करणाद्देशे, विरोधे तत–
स्तत्संकीर्तनकस्य सम्प्रति मयाऽऽदेशस्तथोद्घोषित: ।। १७८९।।

बोधन्तेऽनुचितं त्विदं कतिपये काजी स्म मुल्लास्तथा',
'तल्लोकान् कथमत्र सम्प्रति भवान् रुन्धे न संकीर्तनम्?' ।
श्रुत्वा प्रश्नमिमं स मौनमभवत्किञ्चिद्विचिन्त्याऽवदद्–
'गुप्तञ्चेदमतीव चेच्चल रह:स्थाने वदेयं तदा' ।। १७९०।।

'सर्वेऽत्र स्वजनाश्च, बोधतु भवान्मे चान्तरङ्गानिमान्
सङ्कोचं कुरु मा पुरश्च सुहृदां, ब्रूह्यत्र वार्ता तु का ?' ।
'द्वीपे गौरहरे! न वै भवति मे सङ्कोचभावोऽधुना
तुभ्यं 'गौरहरीति चात्र कथने (स्वीकार्यमत्र त्वृतम्) ।। १७९१।।

भक्तास्त्वां कथयन्ति 'गौरहरि' तत्सत्यं त्वसि त्वं हरि–
र्ज्ञात्वा ते हरिकृष्णकीर्तनमिदं केऽप्यत्र मुल्लास्तु माम् ।
प्रोचुश्चैष तु 'कृष्ण-कृष्ण' कुरुते चोक्त्वा निमायी पुन:
सर्व दूषित,मत्र कोऽपि भवता कार्यो ह्युपायो द्रुतम् ।। १७९२।।

भूत्वा तद्विवशश्च तत्र दिवसे गत्वैकभक्तौकसं
खोलं भञ्जितवांश्च, भक्तजनताकार्येऽत्र संकीर्तने ।
लोकान् योजितवान् विरुद्धमपरान्, रात्रौ परं भीषणं
तस्मिन्नेव दिने तथैकमपरं स्वप्नं त्वहं दृष्टवान् ।। १७९३।।

मन्येऽतीव विशालक: पशुपति: सिंहस्तथाऽगत्य मां
पार्श्वे, जल्पति–यत्पुनश्च कुरुषे संकीर्तनस्याधुना ।
सद्द्वीपे तु विरोधमत्र नियतं तत्खोलतुल्यं हि ते
भेत्ताऽहं जठरं, तथाकथनतस्तीक्ष्णै: स्वकीयैर्नखै: ।। १७९४।।

तत्कालञ्च विदारयन् स जठरं मेऽभू,त्क्षणाच्चक्षुषी
चोन्मिन्ने, नखचिह्नकानि वपुषि प्रत्यक्षमेतानि च ।
अद्याप्यत्र तथा स्फुरन्ति' कथनात्काजी स्वदेहाम्बरं
भक्तानां पुरतः स्म दर्शयति तच्चिह्नानि चोत्थाप्य सः ।। १७९५।।

तत्काजीमुखतो निशम्य तदिदं वृत्तं प्रभुश्चोच्चकै–
श्चक्रे तत्परिरम्भणं, तदुपरि ब्रूते कृपां दर्शयन् ।
'जातो मातुल! वैष्णवस्तु परमः, शास्त्रेषु चोक्तं हि नो,
लोके भागवतः स वै नरवरो, गृह्णाति तन्नाम यः ।। १७९६।।

१०२. ग्रहणञ्छ्रुतिरसनाचेतोभिः श्रीनाम्नां, परमार्थः ।
विप्राजामिलसुतसङ्केतितनारायणसंबोधः,
'राम! राम! किं कुरुषे कार्यं', व्यवहारे परिहासः ।
गीताऽऽलापपूरणव्याजादिह 'रामा हे रामाः'
अपि सावज्ञं 'किं विष्णुनेति' वैकुण्ठाख्यग्रहणम् ।
सन्तो विदुरखिलाघहरं भुवि भागवते पथि कवयः
सर्वानर्थकरी निजकुण्ठा, विकुण्ठगतिरेवार्थः ।।

उच्चारितं तु भवता बहुवारमेतत्–
पीयूषमत्र 'हरि-कृष्ण' निमायि नाम ।
उच्चारणस्य फलमस्ति तदीयनाम्नां
व्यक्तेयती भवति निर्मलभावबुद्धिः' ।। १७९७।।

प्रेमालिङ्गनकं निमायिवपुषो लब्ध्वा स्फुटं हर्षितं
काजीजीप्रतिरोम, तन्निजतनौ चैकप्रकारात्मना ।
सञ्चारो नवजीवनेन ततु भवंस्तुल्योऽमुना लक्षितः
स्वस्मिन् पावनताविशिष्टमृदुतास्निग्धानुभावस्तथा ।। १७९८।।

तच्चोक्तं प्रभुणाऽ'स्तु मातुल! मया वक्तव्यमेतत्तव
श्रीसंकीर्तनकस्य सम्प्रति पुनर्नास्मिन् विरोधं क्रियाः' ।
ऊचे 'गौरहरे!' स गद्गदगिरा 'त्वञ्चासि साक्षात्स्फुट–
ञ्छ्रीनारायणरूप एव, च शपे हार्दं ब्रुवे ते पुरः ।। १७९९।।

त्यक्तुं सहे कुलकुटुम्बभरं स्वकीयं
भूमौ समस्तनिजजातिसमाजवर्गम् ।
कर्ता सुकीर्तनविरोधमहं पुनर्नो,
संकीर्तनं (दिश जनं) कुरुतामशङ्कम्' ।। १८००।।

तत्काजीवचनं निशम्य जनता भक्तास्तथोपस्थिता:
कूर्दन्ते मुदिताभरेण निखिला: काजीकृते श्रीप्रभु: ।
गाढालिङ्गनसम्प्रदानमकरोत्स्थाने तथैकं पुन:
सार्धं भक्तजनैस्तथैव विधिना भूय: पुर: सोऽचलत् ।। १८०१ ।।

काजी श्रीप्रभुपृष्ठतोऽचलदपि प्रेमाश्रु मुञ्चन् पुन–
र्लोकानां 'हरि-बोल' चात्र कथने स्थाने, तथोच्चध्वनिम् ।
स्वप्रेम्णा 'हरि-बोल' चास्य कुरुते, कुर्वंश्च संकीर्तनं
भक्तश्रीधरगेहसम्मुखमसौ प्रापन्निमायिप्रभु: ।। १८०२ ।।

तस्याकिञ्चनदीनहीनगृहिणो भक्तस्य गेहेऽविशद्–
द्वीपश्रीप्रभुभक्तवत्सलसुहृत्प्रेमावतारोऽद्‌भुतम् ।
कुर्वंस्तन्मधुरं बभूव भगवन्नाम्नां सुगानं गृहे
चैकत्र, प्रभुमागतं निजपुरो दृष्ट्वैव रोमाञ्चित: ।। १८०३ ।।

प्रेम्णा शीघ्रमसौ पपात पदयोस्तत्खोलकप्रेमिणो
दृष्ट्वा तं निजपादपार्श्वपतितं प्रेम्णा जगाद प्रभु: ।
'प्राप्त: श्रीधर! ते गृहं किमपि किं? नो भोजयेन्मां भवान्'
सोऽयं चिन्तयतेऽत्र निर्धनगृही नामाऽऽश्रय: श्रीधर: ।। १८०४ ।।

'हाऽद्यैषोऽसमये तथा, मम गृहे प्राप्तो दरिद्रस्य यन्–
नास्ते वस्त्वपि चर्वणीयमधुना किं भोजनीयं प्रभो:' ।
एवञ्चिन्तयतीह भक्तहृदये, चोत्थाप्य तत्पार्श्वत–
स्तद्‌भग्नायसपात्रगं जलमयं ब्रूते स्वभक्तं प्रभु: ।। १८०५ ।।

'किं त्वञ्छ्रीधर! चात्र चिन्तयसि तन्नो पश्यतीहाऽमृतं
भृत्वाऽस्मिंस्तु धृतं त्वयेति' कथयन् सर्वं पपौ तज्जलम् ।
गौरश्रीप्रभुजी, तथा बहु रुदन्नासीद् ब्रुवञ्छ्रीधरो
'योग्यं तेऽस्ति नहि प्रभो! जलमिदं (गङ्गाऽङ्घ्रिशौचं प्रभो:) ।। १८०६ ।।

एतत्खण्डितपात्रवारि नदिया-क्ष्मा-नाथ! चाशुद्धक',–
ञ्छ्रोता क्व प्रभुरस्ति, तस्य तु कृते भक्तस्य शुद्धात्मन: ।
सर्वञ्छुद्धमथ प्रियञ्च परमं, नो भेदभावस्तथा
योग्यायोग्य-वरावरात्मविषयस्तेषु, प्रभुर्वै सम: ।। १८०७ ।।

तच्छ्रीधरस्य निखिलास्तु नुवन्ति भाग्य–
ञ्छंसन्ति भक्तजनवत्सलतां प्रभोश्च ।
प्रेमाकुलो भुवि पपात धरोऽपि भक्त,–
श्चित्रं हि भक्तिजगति प्रभुभक्तभाव: ।। १८०८ ।।

एतावत्प्रभुसङ्ग एव नदिया-काजी स चास्त्याऽऽगतः,
सम्प्रत्यत्र निवर्त्तितुं तमवदत्प्रेमी निमायिप्रभुः ।
गौराङ्गप्रणतिं विधाय विनयी प्रत्यावृतस्तत्स्थला,—
च्छ्रीमानेव सनातने न भगवान् भक्तोऽपि तु श्रीधरः ॥ १८०९ ॥

काजी चैष न केवलन्तु निखिला लोकाश्च तद्वंशजा
द्वीपे तद्दिवसाद्विरोधकरणं संकीर्तनस्याऽऽजहुः ।
अत्राद्यावधि चाँदखाँ-मृदुमनः-काजी-कुलं विद्यते
ते चाद्यापि मिलन्ति काजिकुलजाः श्रीकृष्णसंकीर्तने ॥ १८१० ॥

अप्याऽऽस्ते रचितोऽद्य वेलपुकरस्थाने समाधिर्नवे
द्वीपे काजिक-चाँद-नाम-सुहृदो भक्तस्य, सद्वैष्णवाः ।
तत्सौभाग्यवतः समाधिनिकटं गत्वा तु तत्स्थं रजो
मन्यन्तेऽपि निजं कृतार्थमधुना शीर्षे विधायात्मनः ॥ १८११ ॥

तत्प्रेमदृश्यं ननु भावुकानां
यथावदेवात्मनि नृत्यतीह ।
समाधिपार्श्वे गत एव तस्य,
स्थाने पुराणन्त्वपि वस्तु नूत्नम् ॥ १८१२ ॥

धन्यं प्रेम महाप्रभोर्हरिहृदो गौराङ्गदेवस्य तत्—
यच्छायासु विराधिनोऽपि विनताः कुर्वन्ति तज्जीवनम् ।
काजी सोऽपि सदाशयो वरभगो धन्यश्च, यस्मै ददौ
प्रेम्णा तत्परिरम्भणञ्च निबिडं मामोक्तितः स प्रभुः ॥ १८१३ ॥

भक्तानां लीलाः

१०३. लोभो भगवति विषये भूमौ पुण्यवतां केषाञ्चित् ।
दास्यसख्यवात्सल्यमधुरताभुवि, माधुर्यश्रवणे
भागवते,ऽपेक्षा नहि बुद्धौ युक्तिशास्त्रयोरेषाम् ।
तत्प्रभुनामरूपलीलां प्रति लोभोत्पत्तिलक्षणम्,
लोभो वास्तविकः संसारे भगवद्विषयाऽऽसक्तिः ॥

यो भावः प्रकृतेः परः स कथितोऽचिन्त्योऽत्र शास्त्रेषु, तत्—
कार्यं तत्र न जायते भुवि नृणां बुद्ध्या तु सामान्यया ।
तद्भावेषु तथात्मयुक्तिनयनं व्यर्थाभमेवास्ति यद्—
भावास्ते प्रकृतेरतीतविषया, ह्यात्माऽखिलेभ्यः परः ॥ १८१४ ॥

अस्ति प्राकृतिकी त्वनेकघटना, नो वक्तुमेव क्षम–
स्तथ्यं यद्विषये नरः किमपि तन्नो कोऽपि पूर्णो यतः ।
पूर्णस्त्वत्र स एव केवलमजो, बुद्धिर्मनुष्यस्य तु
स्थाने संकुचिता तथा परिमिता,ऽऽधेयं यथाऽऽधारकम् ।। १८१५ ।।

बुद्धिर्यस्य तु यावतीव भविता संसारयात्रात्मनः
शक्तश्चिन्तयितुं स तावदधिकं, कस्यापि वै सत्यता ।
साध्या नो भवितुञ्च तर्कनिकषे स्थाने परीक्ष्याधिकं,
विश्वस्तो भुवि नैष्ठिकोऽत्र लभते ज्ञानी च सिद्धिं पराम् ।। १८१६ ।।

तर्केनापि तथाहि कोऽपि विषयस्तर्केण वै साधितो,
दक्षोऽम्यैव तु खण्डनेऽत्र भविता तस्माद्वरस्तार्किकः ।
श्रद्धैवात्र हि मुख्यकारणमतः श्रद्धा स्थिराऽभूद्यथा
स्थाने यत्र च यस्य, सत्यमुचितं तस्मिंस्तदेवास्य च ।। १८१७ ।।

लोभः स्वेष्टकथादिकं प्रति नृणां, भावेऽत्र रागानुगे
जाते, जायत एव, तत्र कुरुते लोभी मनाक् चिन्तनम् ।
विघ्नानां निजकर्मणश्च पुरतो, नेत्रे निमील्यैव तु
स्थाने मौनमयं प्रयाति सततं, स्थाने हि दोषो गुणः ।। १८१८ ।।

सामान्यात्मनरस्य भक्तमनसश्चास्त्यन्तरञ्छ्रद्धयो–
राकाशाऽतलसन्निभं, भुवि तले स्वे जीवने कुत्रचित् ।
शङ्काध्यानमपीह यत्र विषये भक्तस्य नो जायते,
पाखण्डञ्च मृषा तमेव विषयञ्चोक्त्वाऽर्थवादं पुनः ।। १८१९ ।।

तस्योपेक्षणमत्र तत्र कुरुते लोकश्च साधारणः,
कुर्वन्तश्च भवन्तु तेऽत्र, किमतो भक्तात्मनः प्रेमिणः ।
यावच्छास्त्रगिरां न युक्तिवचसोऽपेक्षां यदा कुर्वते,
कुर्युः किं ह्यविशेषलोकहृदयोपेक्षाकुचिन्तां तदा ।। १८२० ।।

श्रीमन्महाप्रभुनिमायिसुकीर्तनेऽपि
द्वीपेऽद्भुताऽत्र घटना बहु दृश्यते स्म ।
भक्तात्मनां, कतिपया पुरतोऽत्र तासां
लीलात्मनो भगवतः प्रियभक्तहेतोः ।। १८२१ ।।

एकस्मिन् दिवसे च वासभवने संकीर्तनानन्तरं
नीत्वैकं प्रभुराम्रबीजमपरस्तस्याङ्गणेऽरोपयत् ।
उत्पन्नोऽङ्कुरकस्ततः सुमनसां संवृध्य संपश्यतां
जातः पूर्णतरुः क्षणैः कतिपयैरेवाङ्कुरोऽयं तथा ।। १८२२ ।।

साश्चर्यं त्ववलोकितस्तरुरयं भक्तैस्तथा तत्क्षणे
तस्मिन् ददृशिरे फलान्यपि तरौ, स्वल्पैर्निमेषैः पुनः ।
पक्वानीव तथाप्रतीतिमगमन्, संचित्य तानि प्रभु–
श्चैकैकं व्यतरत्स्वभक्तनिकरे, स्वस्मै पितुर्वाटिका ।।१८२३।।

तेषां दर्शनमात्रतोऽभवदहो! चेतःप्रसादस्तथा–
दीर्घास्तेऽक्षिविकर्षकास्त्वपि सतां सिन्दूरवर्णाः स्वतः ।
तेभ्यः स्पष्टमथात्र निःसरदभूद्गन्धस्तु दिव्यो,ऽखिला
भक्तास्तत्प्रभुजीप्रसादमपरं प्रेम्णाऽऽदुरादृत्य ते ।।१८२४।।

तेष्वाम्रेषु तथाहि नाष्ठिरभवन्न त्वक् तथा, संभृत–
श्चोतप्रोततया तु केवलरसो माधुर्यरूपोद्भुतः ।
भक्तानां भवति स्म पूर्णमुदरञ्चैकाम्रभुक्त्यैव वै
तद्वस्त्वन्तरभक्षणस्य न तथाऽपेक्षा प्रभुप्रेमिणाम् ।।१८२५।।

स्थातव्यापि तु नो, यदा ननु तरोराम्रस्तथा भक्षितः
स्थाने भक्तिरसाप्लुतः सुकरतः सेंरोपितस्य क्षितौ ।
प्रेमोद्यानसुदक्षपादपसुहृद्गौराङ्गदेवप्रभोः
स्यात्काऽऽवश्यकता तदाहि जगतीखाद्यात्मनोऽस्याऽऽत्मनाम् ।।१८२६।।

एवञ्चाम्रमहोत्सवोऽयमपरः श्रीवासगेहेऽचलद्–
द्वीपे द्वादशमासमेव, तु परं येषामभून्नो हृदि ।
विश्वासो वचसोऽस्य, तस्य मिलनं दूरे पुनर्दर्शनं
तस्याम्रस्य बभूव नापि च तथाऽभक्तात्मनां वासिनाम् ।।१८२७।।

द्वीपेऽद्यावधि चात्र कारयति तत्तादृग्रसालस्मृति–
ञ्चैकस्थानमपि प्रसिद्धमधिकं भूत्वाऽऽ'म्रघाटा'ख्यया ।
तादृक्सुन्दरदर्शनीयरुचिरस्वादिष्टकानां स्मृतेः
सत्यं संभृतमम्बु नो तु वदने, तेषामनष्ठित्वचाम् ।।१८२८।।

मेघाटोपघटा बभूव समये संकीर्तनस्यैकदाऽऽ–
च्छन्ना दीर्घतमास्तथाहि परितश्चागत्य खे वारिदाः ।
दृष्ट्वाऽऽच्छन्ननभोऽम्बुदैस्त्वसमये भक्ताश्च भीता मनाग्,–
दूरं यातु न हेतुरत्र तु मुदश्चित्ते सदेदं भयम् ।।१८२९।।

कुर्याद्विघ्नमुपस्थितं नु जलदः संकीर्तनस्य क्षणेऽ–
स्माकञ्चात्र, तथास्ति संभवमिदं बुद्धं हृदि प्रेमिभिः ।
तद्भावं प्रतिबुध्य तत्क्षणमयं हुंकारमेकं प्रभु–
श्चक्रे तच्चलितोऽम्बुदश्च परितः स्वच्छं नवद्वीपखम् ।।१८३०।।

अस्त्येका घटनाऽधुना ननु तथा, संसारिण: प्राणिन:
सर्वे किं ?, परमार्थमार्गपथिका: स्थाने महान्तोऽपि ते ।
श्रुत्वा स्युश्चकितास्तु विस्मयभराद् ज्ञास्यन्ति तद्भावका
माधुर्यं कियदस्ति चात्र भगवद्भक्तौ, तु वृत्तादत: ।। १८३१ ।।

आरम्भो भगवत्कृपाऽनुभवनस्पष्टानुभूतेश्च य–
च्चित्तेऽभूत्तदनन्यभक्तहृदये स्वल्पोऽपि मोहो नहि ।
सर्वं बान्धववृन्दकञ्च पितरौ पत्नीसुतौ प्रत्यपि
स्थाता, बोधति चेष्टदेवकमयं सर्वस्वमेवात्मन: ।। १८३२ ।।

प्रीतौ चास्ति निजेष्टदेवमनस: प्रीतिस्तु तस्यात्मन:
स स्वाराध्यमन:प्रमोदनकृते शक्नोति हातुं स्वकम् ।
कार्यं दुष्करदुष्करं प्रियमुदे तन्मन्यमानं जनै:
शक्नोतीह स कर्तुमेव मुदित:, प्रेमी प्रियाऽऽमोदद: ।। १८३३ ।।

प्रेम्णा ते मिलितास्तथैकदिवसे चासन् सुवासाङ्गणे
कुर्वन्तो हरिकीर्तनन्तु निखिला भक्ता निमायिस्वका: ।
नो जानेऽत्र कथं दिने स्वहृदये संकीर्तनेऽलौकिकाऽऽ–
नन्दस्यानुभवं करोति सततं सर्व: क्षणे तु क्षणे ।। १८३४ ।।

नृत्यन्तश्च बभूवुरत्र सकला नानासुवाद्यै: समं
विस्मृत्य स्वशरीरबोधमधुना तत्प्रेम्णि संमोहिता: ।
आगत्य क्षणतश्च सोऽपि मिलित: संकीर्तनेऽत्र प्रभु–
स्तत्संकीर्तनमेलतोऽधिकतया मुद्वर्धमानाऽभवत् ।। १८३५ ।।

विस्मृत्याखिलमत्र स प्रभुरपि स्थाने ननर्ताऽखिलै–
र्वासोऽपि प्रभुपृष्ठतोऽनु सुगृही नृत्यंस्त्वभूत्पण्डित: ।
एका तत्र च दासिका तु शनकैरागत्य तस्यान्तरे
गेहान्तश्चलितुं तथेङ्गितवती श्रीवासकं गेहिनम् ।। १८३६ ।।

गेहान्तश्चलति स्म वाससुमतिर्बुद्ध्वा च दासीङ्गितं
तत्रासीच्छयितस्तथास्य शिशुको रुग्णश्च शय्यागत: ।
तत्स्त्री सेवनतत्पराऽत्र च शचीमाताऽपि चोपस्थिता
तस्यात्यन्तमभूद्दशाऽऽत्मजनुषोऽद्धा शोचनीयैव च ।। १८३७ ।।

श्रीवास: करमादधौ तदुरसि स्थाने पुनस्तस्य तन्–
नाडीं पश्यति चान्ततोऽस्य वदने बालस्य पश्यन्नभूत् ।
धत्ते श्वासकमन्तिमञ्छिशुरयं वासो विवेद स्फुटं
दृष्ट्वैवञ्छिशुकस्थितिञ्च विकला: सर्वा गृहस्य स्त्रिय: ।। १८३८ ।।

तासां धैर्यमसौ बबन्ध च शिरोभागे तथैव स्थितो
हस्ताऽऽवर्तनमस्य मूर्ध्नि कुरुते, वासो ददर्श क्षणात् ।
श्वासं सम्प्रति बालको न दधते तत्प्राणपक्षी त्विदं
त्यक्त्वा नश्वरकञ्छरीरमगमत्कुत्रापि लोकेऽस्फुटं ।। १८३९।।

दृष्ट्वेदं रुरुदुः शिशोश्च जननी सर्वाः पितृव्यास्तथा
हा! शोकस्तु कियान्महान्नन् शिशोर्मृत्यौ तथैकाकिनः ।
स्यान्मातुः, कथमेव कोऽपि पुरुषस्तस्यानुभूतिं क्रियात्.—
ज्ञातुं न प्रभवेन्नभोऽत्र धरणी मूतं कथं वै तरुम ।। १८४०।।

तन्मातुर्हृदयं भवेच्च विदलत्रास्याः शरीरं पुना
रोदित्यत्र, परं ततो द्रवति तत्स्थाने तथान्तर्मनः ।
द्रावं द्रावमथ स्वतः सरति तच्चाश्रुस्वरूपेण, को
रोद्धुं रोदनतो भवेत्प्रभुरिमां, कम्पं धरेत्को भुवम् ।। १८४१।।

अग्न्या बाह्यमिदं न रोदनमहो! वाष्पं यतश्चान्तर—
ज्वालाया, नवनीतकञ्च हृदयं स्निग्धं स्वतो द्रूयते ।
शय्यायां मिलितं विलोक्य मृतकं पुत्रं स्वमेकाकिनं
तन्मातुः स्फुटति स्म तत्र हृदयं, रूपे हि चक्षुर्गतिः ।। १८४२।।

उच्चैश्चीत्कृतितः पपात भुवि सा माता शिशोर्मूर्च्छिता
स्वां पत्नीञ्च तथाहि मूर्च्छितदशां दृष्ट्वा गृहान्यस्त्रियः ।
सर्वास्ता रुदतीश्च वाससुमतिः स्थानेऽवदद्बोधयन्
'काचित्पश्यत सावधान! यदपि श्वस्यात्पुनस्तन्न शम् ।। १८४३।।

यूयं पश्यथ नो,ऽत्र चाङ्गणगतो नृत्यन् प्रभुर्वर्तते,
तस्यानन्दततौ तथा भवतु नो भङ्गो, न मे कर्हिचित् ।
शोकः स्यात्सुतमृत्युतो, ननु यथाऽऽनन्दे निमाईप्रभो—
र्विघ्ने वै पतिते, (क्षणं प्रियमृदस्त्वाप्नोति भाग्याद्गृही) ।। १८४४।।

संकीर्तनस्य यदि कापि तथाहि मध्ये
रुद्यात्प्रतीहि वचनं मम पूर्णसत्यम् ।
गङ्गाप्रवाहपतितस्त्वधुना त्यजामि
प्राणान्', गृही परमुदे तनुते स्वसत्ताम् ।। १८४५।।

हाऽत्युच्चाऽस्ति कठोरताऽत्र कियती? हे भक्तिदेवि! प्रिये!
तज्ज्ञानां चरणाब्जयोस्तव नमस्कारास्तथा कोटिशः ।
भक्तौ प्रेम्णि च यत्र सा सरसता सा स्निग्धता तादृशी
किं तत्रैव कठोरतयमियती तिष्ठेत्तथाऽऽत्यन्तिकी ? ।। १८४६।।

प्राणेभ्योऽपि तथाप्रियो नयनयोस्तारात्मक: शोभन:
स्यात्सम्पूर्णगृहप्रकाशकमणि: पुत्रोऽद्वितीयोऽप्रभ: ।
मातु: सम्मुखमेव तस्य मृतकं स्याच्च स्थितं स्वे गृहे,
सा माता भुवि कथ्यतेऽ'श्वपि नहि स्थानेऽधुना मोचय' ।। १८४७ ।।

'क्रन्दित्वा न तथोच्चकै: स्वहृदयज्वालामपि ह्रासय'
ह्यन्यायोऽयमहो! कियानतितमश्चाज्ञा कियन्निर्दयी ? ।
सा भक्तस्य च गेहिन: कठिनता भूमौ पुन: कीदृशी ?
किन्तु स्वेष्टमुद: कृतेऽत्र सकलं भक्तैर्हि सम्पाद्यते ।। १८४८ ।।

देवी भर्तृपरायणाऽपतिबला बद्ध्वा मनो मालिनी
स्थाने मौनमिता निजोरसि शिलां धृत्वाऽकृताऽदोऽमृदु ।
अन्तर्दाहमिमं बबन्ध हृदयाऽन्तश्चैव चाश्रूणि सा
संमार्ज्य स्वदृशोर्बभूव शमिता, जाड्यं परं सात्त्विकम् ।। १८४९ ।।

शान्तायां निजकस्त्रियाञ्च शनकैस्तां बोधयत्यत्र स
श्रीवासोऽ'स्य शिशोरतोऽधिकमहो! किं भावि सौभाग्यकम् ।
यत्साक्षान्नदियाप्रभुर्ननु यदा नृत्यँल्लसत्याङ्गणे
देहत्यागमसौ तदाऽकृत (महायात्राक्षण: स्याद्वर:) ।। १८५० ।।

गौराङ्गप्रभुरेव सर्वसुहृदां स्वामी नवद्वीपज:
किं त्यागस्तदुपस्थितौ स्ववपुष: सौभाग्यमल्पं भुवि ?' ।
शृण्वन्ती पतिदेववाक्यमधुना मौनं स्थिता मालिनी,
भूयोऽपि स्फुटति स्म मातृहृदयं, भेद: स्त्रिमात्रोर्महान् ।। १८५१ ।।

ऊचे वासबुध: पुनर्दृढतया 'सर्वास्तथा बोधय
स्थाने रोदितु कापि नात्र विषये यावत्पप्रभुर्नृत्यति ।
विघ्नोऽल्पोऽपि भवेत्प्रभोर्यदि रसाऽऽनन्देऽमुना तत्समं
बालेनाद्य ममापि चास्य वपुषोऽप्यन्तं तथैवाऽऽवह' ।। १८५२ ।।

तथेदमुक्त्वा पुनरेव वासजी
समाययौ तत्र बहिर्निजाङ्गणे ।
उद्यम्य हस्तौ कुरुते च कीर्तनं
तेनैवं नृत्यं विधिना समञ्च तै: ।। १८५३ ।।

यातश्चात्र चतुर्घटीक्षणनिशाकालो यदा वै तदा
मृत्युस्तस्य शिशोरभूच्च, समयं यावन्निशीथाधिकम् ।
कुर्वन्तस्तु बभूवुरत्र सुहृद: संकीर्तनं तत्समं,
गुप्ता स्थास्यति तादृशी तदधिक वार्ता कियन्नु क्षणम् ? ।। १८५४ ।।

वार्तेयञ्च शनैः-शनैः प्रसरिता भक्तेषु संकीर्तने
कर्णेऽन्यस्य तथैकतोऽत्र, तदिमां योऽपि शृणोति क्षणात् ।
तत्संरुध्य स एव कीर्तनमहो! मौनत्वमालम्बते
भक्तास्ते क्रमशस्तथाहि निखिलास्तूष्णीकतामापिताः ।। १८५५।।

वाद्यानि स्वत एव खोलमुरजादीन्यत्र रुद्धानि तन्–
नृत्यं तत्र रुरोध स प्रभुरपि श्रीकीर्तनञ्च स्वतः ।
दृष्ट्वा तु स्थगितं निमायिहृदयो वासोन्मुखः पृष्टवान्
'स्थाने पण्डितजी!' गृहेऽद्य भवतः किं मे मनो व्याकुलम्? ।। १८५६।।

जाता तु काचिदिह दुर्घटना कथं वा ?
नो कीर्तने लगति (वेद्मि न) किं मनो मे? ।
आन्दोलनन्तु हृदये किमपीह कौति,?'
स्थानेऽपि दुर्भ्रमति कालरथाङ्गचक्रम् ।। १८५७।।

दैन्येनातिशयेन वासगृहिकः प्रोवाच 'संकीर्तनं
कुर्वन् यत्र भवेत्तु गाङ्गनदियाप्रेमावतारो भवान् ।
स्थाने दुर्घटना हि कापि घटितुं तत्रैव किञ्छक्यते ?
द्वीपे दुर्घटनासमस्तविपदां संवारको वै भवान् ।। १८५८।।

कामं दुर्घटना पुरस्तु भवतः किं वा प्रभुश्चागतौ ?
त्वञ्छ्रीमङ्गलरूपकोऽसि, नदियाभूमौ तवोपस्थितौ ।
भव्यं मङ्गलमेव मङ्गलमहो', भूयो दृढं सोऽवदन्–
'न, स्पष्टं वद, मे मनोऽस्ति विकलं, काऽप्यत्र नूनं तथा? ।। १८५९।।

जाता दुर्घटना, स्वतस्तु हृदयं निर्यातुमत्रेहते',
पृष्टस्तु प्रभुणैवमत्र सुदृढं, तूष्णीमभूद्वासजी ।
किचिन्नोत्तरितन्तु तेन, शनकैर्भक्तस्तदैकोऽवद–
'च्छ्रीवासस्य परं हि लोकमगमत्पुत्रोऽपरो हे प्रभो!' ।। १८६०।।

पश्यन् वासमुखं प्रति प्रभुरतोऽशान्तोऽवदत्संभ्रमा–
'त्किं चोक्तं ? परलोकवासभवनं वासात्मजस्य त्वया? ।
क्वाऽभूत्पण्डितजी! कथं न दिशते? किं वै यथार्थस्थिति–?'
भूयोऽप्यस्ति स मौनमेव जनको, मूढश्च धीरः समः ।। १८६१।।

भक्तस्तर्हि पुनः स एव दिशते 'सार्धद्वियामौ गतौ
वृत्तान्ते घटितेऽत्र सम्प्रति, तवाऽऽनन्दे तु विघ्नो भवेत् ।
तत्कस्मिन्नपि च स्फुटं न कृतवान् वृत्तं त्विदं वासजी'
श्रुत्वैवेदममुष्य नेत्रयुगलाद् वाष्पाम्बुधाराऽस्सरत् ।। १८६२।।

'श्रीवास!' प्रभुरुक्तवान् यतगलः 'क्रीतोऽद्य ते पण्डित!
श्रीकृष्णो, दृढतेयती तु महती! त्यक्त्वा तथैकाकिनम् ।
गेहान्तो मृतकं तथात्मजमहो! कुर्वन् हरेः कीर्तनं
तत्प्रेम्णैव च वर्तसे (न रसतः शून्या कदापि क्षमा) ।। १८६३।।

धन्या ते बलिहारिभक्तिरपरा, श्रीकृष्णसत्प्रेम ते
नूनं त्वादृशभक्तदर्शनपलादेव क्षयो जायते ।
पापानामिह कोटिजन्मवपुषा'ञ्चोक्त्वा तथेदं प्रभु–
श्चक्रन्द स्फुटविस्फुटं, न सहते भावप्रभावं मृदुः ।। १८६४।।

एवं वासगृही जगाद तरसा दृष्ट्वा रुदन्तं प्रभुं
'भूयासं निजपुत्रशोकसहने द्वीपे समर्थस्त्वहम् ।
ते न क्रन्दनकन्तु सोढुमधुना शक्नोम्यदोजीवने
हे सम्पूर्णशरीरिशुद्धशरणप्रेमप्रदातः! प्रभो! ।। १८६५।।

निःसार्य वाष्पं जलजाक्षियुग्मा–
न्नो दुःखितं मे हृदयं करोतु ।
द्रष्टुं न शक्नोमि रुदन्तमत्र,'
श्रीमन्तमेव श्रयते वराकः ।। १८६६।।

अन्तश्चैत्य तदन्तरे कतिपये भक्तास्तु नीत्वाऽङ्गणे
चक्रुस्तन्मृतपुत्रकस्य तनुकञ्छ्रीवासभक्तात्मनः ।
स्थित्वा श्रीप्रभुरत्र तस्य च शिरोभागे तथैतं स्पृशन्
जीवन्तं मृदुपाणिना ननु यथा ब्रूते तथा पृष्टवान् ।। १८६७।।

'किं जीव! त्वमसि क्व?, देहममुकं त्यक्त्वा तु यातः कथं?'
तत्काले प्रभुकान्तरङ्गसुहृदां मन्ये स्फुटञ्छ्रूयते ।
दत्ते जीविततुल्यतन्मृतवपुः स्थाने स्वकीयोत्तरं,
तेनोक्तं 'नदियाप्रभो! ननु वयं कर्माऽस्वतंत्रास्तथा ।। १८६८।।

एतावन्ति दिनानि चात्र वपुषि स्थाने तथासीच्च मे
संस्कारस्त्वधुनोत्तमे तु विषये चास्मि प्रसन्नोऽधिकम्' ।
'कञ्चित्कालमथापि किं वससि नो देहेऽत्र,' पृष्टोऽमुना
जीवः स्वोत्तरकं 'प्रभो!' ध्रुवमदात्सर्वक्षमो वै भवान् ।। १८६९।।

प्रारब्धं त्वपि लोपयेन्ननु भवान्, देहेऽत्र भोगस्तु मे
चैतावद्दिनमात्रमेव, वसतेरिच्छापि नात्राधुना ।
देहे मेऽस्ति, यतोऽधुनाऽधिकसुखी यत्रास्मि चैतत्स्थलात्'
तज्जीवोत्तरतस्ततोऽखिलनृणाञ्छोकश्च मोहो गतौ ।। १८७०।।

ऊचे सम्प्रति वासपण्डितमयं द्वीपप्रभुः सान्त्वयन्
'द्वीपे पण्डितजी! भवांस्तु विशदं जानाति सर्वं स्वयम् ।
एतावद्दिनमात्रमेव भवतः सार्धं सुतेनामुना
संस्कारस्त्वभवत् (सदैव समयाधीना समस्तस्थितिः) ।। १८७१ ।।

तच्चाद्यावधि चैकमेव बुबुधे पुत्रं स्वकीयं त्विमं,
द्वावेवाद्य तवाहमत्र सुतकौ श्रीपादनित्यस्त्विवः ।
आवां स्वात्मजमेव बोधतु भवानद्यक्षणात्सर्वथा',
त्यागात्त्यागमयी तथोन्नतिगतिर्भूमौ समाजस्थितिः ।। १८७२ ।।

वासो निशम्य नदियाप्रभुवाक्यमित्थं
प्रेम्णा च विह्वलदशोऽस्य दृगश्रुधारा ।
संस्कारमत्र वपुषो मृतकस्य तस्य
स्थाने ततश्च विधिनाऽकृत भक्तवृन्दम् ।। १८७३ ।।

आदर्शोऽस्ति कियांस्तथोन्नतदशः, पुत्रस्य चैकाकिनः
संतापो निधनेऽपि यस्य न तनौ, ते किन्नु संसारिणः ? ।
मायाबद्धजनैः कथञ्च तुलना तेषां पुनर्युज्यते ?
ते सन्तीह तथाहि नित्यसुहृदः श्यामप्रभोर्वस्तुतः ।। १८७४ ।।

संतापः कथमेव तस्य भगवत्प्राणप्रियस्यात्मनो,
यच्चित्तभ्रमरेण वै मधुरिमाऽऽपीतोऽत्र लोकोत्तरः ।
लोके तन्मुरलीमनोहरमुखाम्भोजोद्भव,स्तस्य किं
लाभः स्याद्वनवीथिकास्वटनतः संसारिरूपास्वतः ।। १८७५ ।।

मत्तः स तिष्ठति निजप्रियवाटिकाया—
मानन्दमूर्तिरससागरपद्मपानात् ।
योगेश्वरः समुचितं हरिनामकस्तु
स्थाने पुराणवरभागवते जगाद ।। १८७६ ।।

१०४. **तापः संसारोन्मुखवृत्तौ प्रभवति मानवचित्ते ।**
दैहिकतापो भूतपञ्चकस्थूलजगत्परिणामः
इन्द्रियदैविकतापकारणं तन्मात्रागतविषयः ।
मानसबौद्धिकहार्दिकतापश्चित्तविलोमावस्था
चित्तं संसृतिचिन्तनवृत्तिर्दयितशरणसम्पत्तिः ।
प्रियतमभासितजीवनशरणे तिमिरविरहसत्ता किम्?
प्रभुशशिवासितहृदयाकाशे संसृतिभुवि किं तापः? ।।

भक्तानां दयितात्मनान्तु निखिलाऽचिन्त्याऽत्र लीला तथा,
स्थाने मानवबुद्धिबाह्यविषया, यस्मिंस्तदीया कृपा ।
स्वेत्युक्त्वा प्रभुरेव यच्च नदियाभूमौ वृणोति स्वयं
तस्यैवात्र महात्मके तु भगवत्सद्भावना कुत्रचित् ।। १८७७।।

तत्रानन्दरसे स एव भविता स्थाने प्रमाताऽपि च
(व्यक्तौ भागवती कृपा प्रतिपलं, सैवाऽस्य तद्बोधिका) ।
लीलासु प्रथितं निमायिसुहृद: प्रेमैव तत्प्रेमकं
यस्मात्प्रेमसजीवमूर्तिरपरा गौरप्रभु: केवलम् ।। १८७८।।

गौराऽनन्यकभक्तमण्डलगतेष्वेकोऽस्ति शुक्लाम्बर:
किन्त्वस्यानुभव: स्वकीयहृदये कालेऽत्र कालेऽभवत् ।
भव्या यात्र कृपा प्रभोर्मयि तथा प्रेमात्मनो नास्ति वै,
बुद्ध्वा तस्य मनोगतं प्रभुरयं प्रोवाच तच्चैकदा ।। १८७९।।

'कर्ता भोजनकं तवैव वसतौ श्वो ब्रह्मचारिंस्त्वह—
ञ्छ्रीपादस्य मम त्वमेव पचनं कृत्वा तथा श्वो भवे:' ।
हर्षश्चातिशयोऽस्य तेन वचसा, सङ्गे विषण्णोऽपि स
स्थाने सम्प्रति हर्षित:, स ननु मां सेवोचितं बुद्धवान् ।। १८८०।।

अस्त्यस्यात्र विषण्णतास्थितिरियं, विप्र: कुलीन: प्रभु—
स्तन्मद्भिक्षुकहस्तवारिमिलितं भक्तं स भोक्ता कथम् ? ।
तद्दैन्येन जगाद 'गाङ्गनदियाभूमौ त्वहं भिक्षुको,
नो ते भोजकयोग्यता मयि तथा तावत्कृपापात्रता' ।। १८८१।।

ऊचे चाग्रहपूर्वकं प्रभुरयं 'चेन्मन्यतां नाथवा,
भुक्तिर्नौ भविता तवैव वसतौ, नो दास्यति स्वेच्छया ।
अत्स्याव: स्वयमेव तत्र भवत: स्थाल्याश्च लब्ध्वा तदा',
तच्छ्रुत्वा त्वसमञ्जसे महति स स्थानेऽस्ति शुक्लाम्बर: ।। १८८२।।

सम्बन्धेऽत्र तदन्तरङ्गसुहृदोऽन्यांश्चाप्यसौ पृष्टवान्
'कीदृक्प्रेम्णि तथाहि चात्र नियमो, गौरप्रभो: कोऽपि नो ।
उच्छिष्टान्नमपीह स प्रमुदितो भुक्त्वा त्वनन्यस्य वै,
तत्पक्त्वौदनकन्तु (तैर्निगदितं) प्रेम्णा प्रभुं भोजय' ।। १८८३।।

लब्ध्वा सम्मतिमद्य भक्तसुहृदाञ्छुक्ल: परस्मिन् दिने
कृत्वा दैनिककर्म पावनतया स्नानञ्च संध्यादिकम् ।
चक्रे भोजननिर्मितिं प्रभुकृते तन्मध्यमेवाऽऽगतो
गङ्गास्नानमयं विधाय सहितो नित्येन गौरप्रभु: ।। १८८४।।

नित्यानन्दयुतश्च भोजनमयं प्रेम्णाऽत्र जग्राह तत्—
कुर्वन् भोजनमद्य शंसति बहु स्थाने पुनर्वै पुनः ।
'भक्तं सद्विदलञ्च शाकसहितं भुक्तं तथैतैर्दिनै—
र्नो भुक्तं निजजीवने ननु पुरा स्वादिष्टमेतद्यथा ।। १८८५।।

स्वादिष्टं कियदस्ति तण्डुलमिदं खोलं कियत्स्वादुकं'
सम्पन्ना बहुशंसया प्रतिपलं भुक्तिक्रिया सा तयोः ।
हस्तक्षालनकं द्वयोर्विनयिना शुक्लेन सम्पादितं
भुक्त्वा ब्रह्मकुटीच्छदौ सहचरौ द्वावेव सुप्तौ तथा ।। १८८६।।

सा शुक्लाम्बरजीकुटी त्रिपथगातीरे तथैवाभव—
च्छीतैर्गाङ्गकणैस्तथाहि मिलितो वायुः पवित्रश्च्छदौ ।
आयाति स्म, तथाऽऽसनञ्च शयितो विस्तार्य तत्र प्रभुः
श्रीनित्येन समं, गृहस्य शयनाद्भुक्त्वा प्रतिष्ठाऽतिथेः ।। १८८७।।

आसीदाखरियाऽत्र नाम विजयो भक्तस्तथैकोऽभव—
च्चैव श्रीप्रभुसन्निधौ तु शयितो, जात्या स कायस्थकः ।
द्वीपे पुस्तकलेखनस्य विजयः कार्यं करोति स्म, तत्—
काले मुद्रणयन्त्रकं क्वचिदपि स्थाने बभूवैव नो ।। १८८८।।

लिख्यन्ते स्म हि पुस्तकानि सकलं तत्पाणिनैवाधुना,
लेखो यस्य च सुन्दरः स्म भवति ग्रन्थं लिखित्वैव सः ।
निर्वाहं निजजीवनस्य कुरुते, तल्लेखनञ्चैव तु
ग्रन्थानां विदधाति चापि विजयो, लेखोऽक्षरात्मा कला ।। १८८९।।

आसीद्भक्तिरमुष्य चात्महृदये गाढा प्रति श्रीप्रभुं,
भूयो लाडयते स्म तं प्रभुरपि, ग्रन्थाँल्लिलेख प्रभोः ।
चानेकान् विजयो,ऽस्य तत्र ददृशे स्थाने शयानस्य त—
च्चैकश्चिन्मयदिव्यपाणि,रपरं दृष्टौ महद्भाग्यतः ।। १८९०।।

दृश्यन्ते विविधं तदङ्गुलिषु वै दिव्यानि रत्नानि, त—
ज्जातं तस्य कुतूहलञ्च परमं तच्चिन्मयाऽऽलोकनात् ।
उत्थाय द्रुतमेष पश्यति पुरः पृष्ठेऽभितोऽप्यत्र स
स्थाने तादृश एव पाणिरधुना तस्य प्रतीतः पुनः ।। १८९१।।

तल्लोकोत्तररूपसौभगवतः पाणेस्तदा दर्शना—
न्मत्ताभो विजयोऽभवत्प्रभुरतः पप्रच्छ तञ्च स्मयन् ।
'का वार्ता? विजयोऽधुनाऽत्र परितः कस्मात्पुनः पश्यसि
स्थाने वस्तु तथाऽद्भुतं किमपि किं ते दृश्यते साम्प्रतम्? ।। १८९२।।

श्रीशुक्लाम्बरजी महांश्च भगवद्भक्तोऽस्ति तत्सर्वदा
श्रीकृष्णस्तु विराजतेऽस्य वसतौ द्वीपे सदेहो नवे ।
तस्यैवात्र तु दर्शनं नहि तव स्थाने, तथा जायते ?,'
श्रुत्वा तत्प्रभुवाक्यमत्र विजयः किञ्चिद्ददौ नोत्तरम् ।। १८९३।।

दद्यादुत्तरमत्र चापि स कुतः ? संज्ञाऽधुना नास्य तद्–
देहस्यापि निजस्य, तत्प्रभुवचः श्रुत्वा कदाचित्त्वसौ ।
मत्ताभो हसतीह, रोदिति तथाऽव्यक्तं स्वयं जल्पति,
श्रीनित्योऽपि तथा दशां ददृशतुश्चोत्थाय शुक्लोऽस्य ताम् ।। १८९४।।

ताभ्यां बुद्धमथ स्फुटं प्रभुकृपा जाता त्वमुष्योपरि
क्षीबाभो विजयश्च सप्तदिवसान् कुर्वन्नभूत्तादृशीम् ।
चेष्टामत्र तथैव, तस्य वपुषो नासीत्प्रतीतिर्मनाङ्–
नाल्पं खादनपानमेव कुरुते, रात्रौ न शेतेऽपि सः ।। १८९५।।

मत्तो रोदिति सर्वदैव स यथा, स्थाने कदाप्युच्चकैः
स्थाने लोकयते हसन्नपि तथा, बाह्यप्रतीतिः पुनः ।
जाता सप्तदिनक्षणव्यपगमाद्, भक्तेऽन्तरङ्गे तदा
वार्तेयं त्वमुना तथा प्रकटिता, पात्रेषु धेयं स्वकम् ।। १८९६।।

एकस्तिष्ठति वासपण्डितगृहे चैवं तथा सौचिको,
नित्यञ्छ्रीहरिकीर्तनश्रवणतो भक्तिः प्रगाढाऽस्य वै ।
श्रीमत्कीर्तनके महाप्रभुपदे द्वीपे तथाऽभून्नवे,
पश्यत्यत्र यदापि तत्प्रभुमयं नूनं नमत्यास्थया ।। १८९७।।

तद्दिव्याकृतिदर्शनं प्रभुसतस्तस्याप्यभूच्चैकदा
कृत्वाऽलौकिकदर्शनं स यवनो धन्योऽभवत्सौचिकः ।
द्वीपे मत्तसमस्तथा बहुदिनं क्रोशन् भ्रमंश्चापणे
'दृष्टं' 'दृष्ट'मथोक्तितोऽभवदयं, तस्याऽनुभावेऽद्भुतः ।। १८९८।।

लीलाः श्रीप्रभुरेवमत्र विविधं भक्तेऽन्तरङ्गे निजे
प्रेमाक्ताः कुरुते स्म, तस्य शरणाऽऽपन्नात्मनां केवलम् ।
द्वीपे दर्शनमत्र जातमपरं रूपस्य तत्तादृश,–
स्त्वन्येषां स 'निमायिपण्डित' इति स्थानीयभावात्मनाम् ।। १८९९।।

पाखण्डी त्वपि पण्डितो लघुहृदामासीद् बहूनां दृशि
स्थाने केनचिदत्र तस्य न तथा द्वेषो न रागोऽभवत् ।
यस्त्वप्यत्र तथापि शुद्धमनसा तस्यैव जातस्तथा
तस्यामुष्य तु दिव्यदिव्यकलितं रूपं पुनर्लक्षितम् ।। १९००।।

१०५. भगवन्! तरुरिव फलमिह यच्छसि शरणागतजीवानाम् ।
जडजङ्गममात्रे समदृष्टिः समवत्सलताभावः
त्यक्त्वा सर्वाशां यो भजते, तं स्वीकुरुषे त्वखिलम् ।
कल्पतरुः सुखयति निखिलानिह वाञ्छितवस्तुवितरणात्
तान्, ये तन्मूलस्थितयो भुवि वाञ्छितचिन्तनशीलाः ।
तन्निकटे कृतगृहवासादपि भवति न वाञ्छितपूर्तिः
मूलस्थितिवाञ्छितचिन्ताभ्यां सुरतरुकल्पतरुत्वम् ।
अखिलानन्तानन्तचराचरनायककृपाकटाक्षः
केवलतत्पदपद्माश्रयणेऽकिञ्चनहृदि नरि नृत्यति ॥

नवानुरागो गोपीभावश्च

१०६. चित्रा दयितचिन्तनाकारा वृत्तिः प्रेमिजनानाम् ।
प्रियसंस्पर्शविमुग्धमानसः क्वचिदास्तेऽचलचित्तः
क्वचिदुत्पुलकः क्वचिच्च तूष्णीं भवति सततनिष्पन्दः ।
आशंसाप्रियमधुरालोकनसलिलापूरितनयनः
गृह्णन् विषयरसं नहि धत्ते कृष्णाऽऽलिङ्गितहृदयः ॥

प्रत्यावृत्य यतो दिनादयमहो! प्राप्तो गयातः प्रभु—
र्मत्तः प्रेम्णि यथैव लीनहृदयश्चासीत्सदा तद्दिनात् ।
संज्ञाशून्य इवात्र, किन्तु सहितो भक्तैश्च संकीर्तने
तस्यानन्दरसप्रतीतिरधिकं, प्रेम्णो गतिः कीर्तनात् ॥ १९०१॥

सर्वं कीर्तनके स विस्मरति वै, संकीर्तनस्य ध्वनिः
प्राप्तो यन्मधुरोऽस्य तु श्रवणयोर्मत्तं मनस्तत्क्षणम् ।
भूत्वा नृत्यति, कीर्तनस्य मधुरे सत्येव वाद्ये श्रुते
पुस्फोट प्रतिरोम, रात्रिमखिलां नृत्यंस्त्वखण्डं परम् ॥ १९०२॥

भावावेशगतो बभूव सुमनाः, संज्ञा तु देहस्य नो,
बोधः सम्प्रति नापि बाह्यजगतस्तन्नृत्यतः केवलम् ।
देहो यन्त्रसमानको भ्रमदभूदानन्दसीमा ततो
नो भक्तेष्वपि, तत्र तेऽपि ननृतुस्तत्सौख्यनृत्यैः समम् ॥ १९०३॥

भक्तैः समं वर्षमयं तथैवं
निरन्तरं तन्नदियानिमायी ।
कथामृते कीर्तनसागरे च
स्थाने चकार क्षणयापनं वै ॥ १९०४॥

उद्धारे सति काजिन: सुमनस: किन्तु स्वभावे प्रभो—
र्दृष्टं तत्परिवर्तनं, लगति न श्रीकीर्तने तन्मन: ।
कुर्वन्तोऽत्र बभूवुरत्र मिलिता भक्तास्तु संकीर्तनं,
स्थाने सम्मिलितोऽपि नाभवदयं संकीर्तने स प्रभु: ।। १९०५ ।।

मध्ये कीर्तनकस्य पूर्ववदहो कामं कदाप्यागत—
स्तद्भक्ताऽऽग्रहतस्तु कीर्तनमयं कुर्वन् बभूवापि च ।
तत्किञ्चित्परवस्तुहेतुमधुना ह्येतन्मनो व्याकुल,—
ञ्छान्तस्तिष्ठति दुग्धमात्रमिलनान्नानापदार्थे शिशु: ।। १९०६ ।।

तादृग्व्याकुलतापुरोऽस्य तु मन: संकीर्तनस्याधुना
तत्तालस्वरयुक्तनृत्यकरणे चक्रे निषेधं स्फुटम् ।
भक्तै: पूर्वसमानमत्र सहित: संमिश्रित: स प्रभु:
प्रेमाऽऽलापमसौ करोति न तथा, प्रेमी रह: सेवते ।। १९०७ ।।

आसीन्महाप्रभुदशा त्वधुना विचित्रा
रोदित्यसौ क्षणमहो स्वयमेव भूय: ।
विस्फुट्य सम्प्रति जहास कदाप्यहेतो—
र्भूय: क्षणाद् बहु रुदन् कथयंस्तथाऽऽस्ते ।। १९०८ ।।

१०७. **गोकुलपालक! मग्नानुद्धर ।**
नाथ! रमानाथ! व्रजनाथ! श्रीवृन्दावनचारिन्!
गोविन्द! प्रियतमाऽऽर्तिनाशन! गोवर्धनधर! केशव!
वृजिनार्णवमज्जितमूर्च्छितजनगोकुलनौकर्णधार!
त्यक्ताखिलधर्माश्रयचित्तं निजशरणागतमुद्धर ।।

राधाभावमय: कदापि सुमनास्तद्भावनाभावितो
भूत्वा रोदिति, कुत्रचिन्ननु रह:स्थाने कदाचित्तथा ।
सोऽयं त्वन्यमन:स्थिते: करतले धृत्वा कपोलौ मृदू
मुञ्चंस्तिष्ठति वाष्पमेव, किमपि प्रेमाश्रुमुक्तिस्तप: ।। १९०९ ।।

राधाभावदश: कदापि भणति श्रीमानजस्रं भवान्
'हे श्रीकृष्ण! तथासि निष्ठुरमना: पूर्वं त्ववेदं नहि ।
वार्ताभिर्मधुराभिरत्रभवतो रासे न्वहं वञ्चिता,
किं बोधो? विधिनाऽमुना तु तनिता सौम्याऽबलावञ्चनम् ।। १९१० ।।

हा! जाने न , कथं तदाऽत्र पतितो बुद्धौ मम प्रस्तरो,
यत्ते तत्प्रियमृष्टमिष्टवचनोपन्यासके चागता ।

ऐश्वर्यस्य तथाखिलस्य जगतां स्वामी भवान् कुत्र च,
क्वाहं वै वनवासिनोऽच्छलहृदो गोपालकस्यात्मजा ॥ १९११ ॥

सिष्णेह त्वयि हे! प्रियाऽपरिचये, हा! प्राणनाथ! त्वमी
प्राणाः सन्ति तवार्पिताः, सह सदा स्थास्यन्ति चैव त्वया ।
भूयोऽदस्तु शरीरमत्र भवतु स्थाने स्थितं क्वापि वा
(देहः प्राकृतवस्तु, किन्तु दयितस्थानांशकश्चिन्मयः) ॥ १९१२ ॥

त्वञ्चासि प्रिय! कोमलस्तु सरसोऽवक्रो हृदा सुन्दरो,
भूयो मेऽभवदत्र निष्ठुरमना वक्रस्वभावश्च किम् ? ।
किं सौख्यं तव ? मे स्वकीयविरहोत्पीडाप्रदाने तथा',
होरा यावदसौ त्वनेन विधिना चास्ते प्रलापे प्रभुः ॥ १९१३ ॥

कृष्णं नेतुमिहाऽऽगतोऽस्त्यमधुरो वृन्दावनेऽक्रूरजी
तावत्तद्विरहे रुदन्ति बहुधा ता गोपिकाः, कर्हिचित् ।
गोपीभावमयो भवान् कथयते संस्मृत्य भावं तथा,
प्राप्तो जल्पति साधको ननु तथा, मन्त्रो यथा दीक्षया ॥ १९१४ ॥

'हा! किं दैव! कृतं तु गोतुलहृदां साधुस्वभावात्मनां
सम्पूर्णव्रजलाडलं स्वमनसां प्राणप्रियं मोहनम् ।
अस्मत्त्वं कुरुषे पृथक्कथमहो! धातस्तथानिर्दयिन्!
वारम्वारमिमां तथाकलुषितां बुद्धिं त्वदीयान्तु धिक् ॥ १९१५ ॥

एवं प्रेमिजनं परस्परमहो! संयोज्य चैतान् पुन–
र्यत्त्वं तद्विरहाम्बुधौ कुविधिना क्लिश्नासि संमज्य वै ।
गन्तैव प्रियकृष्ण! हा किमधुना, स प्राप्स्यते न प्रियः
श्रोतुं किं मुरलीमनोहररवः श्रोतव्यवस्तूत्तमः ? ॥ १९१६ ॥

तत्पीताम्बरकच्छटा किमधुना दृष्टौ न चायास्यति ?
स्थाने सुन्दरमत्र मोहनमुखं दृष्ट्वा वयं साम्प्रतम् ।
विस्मर्तुं प्रभवेम दुःखमखिलं नाह्नश्च संतापक–
श्छ्रीकृष्णो नवनीतमत्स्यति न किं गेहे निलीयाद्य नो? ॥ १९१७ ॥

दृष्ट्वा श्यामलकाऽऽकृतिं सुमधुराञ्छ्यामस्य शोभात्मनो
भूयः किं सुखसागरे मधुरसे तन्मज्जनं भावि नो ? ।
अक्रूरः कथमागतोऽयमधुनाऽसौ क्रूरकर्मा, कुत–
स्तच्चैवं विपरीतनाम कुकृतेः केनास्य दत्तं पुनः ॥ १९१८ ॥

अस्मद्यो दयितं करिष्यति पृथक् प्राणप्रियं नोऽधुना
कोऽक्रूरन्तु वदेदिमं, ननु महाक्रूरस्त्वसौ विद्यते ।

एतद्वास्ति विधातुरेव निखिलं सा क्रूरता, दुष्टता
काऽक्रूरस्य तथाऽत्र कर्मणि सतः स्थाने वराकस्य तु' ॥ १९१९ ॥

एवञ्चोक्त्वा भूयो-भूयः। सोऽयं गौरः क्रोशत्युच्चैः ॥ १९२० ॥

गोपैः सार्धमसौ कदापि कुरुते श्रीकृष्णभावे व्रज–
श्रीलीलानुकृतिं, तथोपदिशते पार्श्वस्थभक्तान्निजान् ।
प्रह्लादस्य गतश्च दैत्यतनयाऽऽशिक्षाप्रदानाऽऽकृते–
रावेशो भगवत्सुनामभजनश्रीकीर्तनं कर्हिचित् ॥ १९२१ ॥

कुर्वन्नस्ति तपो यथा प्रभुरयं स्मृत्वा ध्रुवं कर्हिचित्–
स्थित्वा चैकपदेन भावितमनास्तस्यैव भावे तथा ।
भूयश्चाभिनयं तथाविरहिणीभावस्य कुर्वन्नभू–
दौदासीन्यतया स्थितस्तु तरसा भूमिं नखेनाऽऽलिखन् ॥ १९२२ ॥

दृष्ट्वाऽमुष्य तथादशां बहु शचीमाताऽस्ति सा दुःखिनी,
नाना मङ्गलहेतवे च कुरुते पुत्रस्य देवार्चनम् ।
बुद्ध्वा रोगमिमं तथा कमपि सा वैद्यैः परामर्शकं,
दीनाऽत्यन्तमथाह भक्तसुहृदो (माता क्षमाया: क्षमा) ॥ १९२३ ॥

'जाने नोऽत्र निमायिनः किमभवत्पूर्वं यथा साम्प्रतं
स्थानेऽसौ कुरुते न कीर्तनमपि द्वीपेऽस्य जातं तु किम्? ।
केनाप्यत्र तथाहि नो हसति वा ब्रूते, चिकित्सां पुन–
र्यूयं तस्य कथं न कारयथ भो! कञ्चित्सुवैद्यं नय' ॥ १९२४ ॥

मुग्धायाः सरलां त्वमूं सुजननीस्नेहार्द्रवार्तां प्रभु–
श्रीमातुर्मनसा भवन्ति सहसा: श्रुत्वा वराकास्त्वमी ।
आहुस्तन्मनसा, 'करोति जगतो भद्रां चिकित्सां त्वसौ
स्यात्कोऽन्योऽस्य चिकित्सकोऽत्र भुवने (वैद्यस्य किं वैद्यकम्?) ॥ १९२५ ॥

रोगस्यौषधिकन्तु नैव घटितं केनापि चाद्यावधिं
वैद्येनास्य, निमायिनो विरहिणो नो कोऽपि वैद्यस्तथा ।
संसारी दिनरात्रिखेलनिरतो निर्मातुमेव क्षमो,
जानात्यस्य तु साम्प्रतं स्वयमयं (प्रेमौषधिः प्रेमिणः) ॥ १९२६ ॥

नाडीञ्चास्य तथा ग्रहीष्यति यदा श्रीश्याम एव स्वयं
सोऽयं गौरहरिर्हसिष्यति तदा', नानाविधं मातरम् ।
भक्ताः सम्प्रति बोधयन्ति, जननीबोधे तु नायाति तद्–
वार्ता चैकविधापि, तिष्ठति सदाऽधीरा वराकीव सा ॥ १९२७ ॥

भावावेशदशो महाप्रभुरयं 'गोपी' तु 'गोपी' गिरा
ह्युच्चै रोदिति चैकदा, ननु तदा सम्मोहितोऽसौ तथा ।
गोपीभावगतो, यथाऽस्य मुखतो गोपीति गोपीध्वने–
रेकोऽन्यो नहि निःससार तु रवः, प्रेमास्पदो गोप्रियः ।। १९२८।।

एकश्चागतवान् प्रतिष्ठितयशाश्च्छात्रस्तु तद्दर्शने
पार्श्वे तस्य तदैव, चाल्पमवधिन्त्वासीदधीतिर्द्वयोः ।
तत्पारङ्गतपण्डितोऽखिलतया शास्त्रीयविद्यास्वयं
स्थाने यद्यपि बुध्यते स्म तदपि श्रीभक्तिभावेऽमतिः ।। १९२९।।

श्रीमत्प्रेमपथस्य नो परिचयस्त्वासीदमुष्य, प्रभु–
र्बाह्यज्ञानबहिस्तदाऽभवदहो! नोऽमुष्य भावस्थितौ ।
बोधः सम्प्रति, को मदीयनिकटे प्राप्तश्च तत्को गतो,
दृष्ट्वाऽमुष्य तथास्थितिं स दिशते विद्याभिमानी त्वलम् ।। १९३०।।

(सोऽयञ्छब्दो मन्त्रारम्भे । तद्गौरोक्ति'र्गोपी-गोपी') ।। १९३१।।

'अशास्त्रव्यवहारमत्र कुरुते भूत्वा भवान् पण्डितः
किञ्चेमं, कथनात्प्रयोजनमतो 'गोपीति-गोपीति' किम् ? ।
त्वं संबोधय 'कृष्ण—कृष्ण' भवितोद्धारो यतो निश्चितं,
मर्यादाऽपि न भञ्जिता भुवि भवेच्छास्त्रीयरीतेस्तथा' ।। १९३२।।

कोऽयञ्चास्ति, महाप्रभोर्न किमपि ज्ञानं तदासीदतो
भावावेशगतस्तथाऽयमबुधच्चैषोऽपि कश्चित् पुनः ।
अस्ति श्यामसखा तथोद्धवसमः प्राप्तश्च मां बौद्धिके
मोहे बद्धुमसौ, ततः प्रभुरयं क्रुद्धस्तथाऽस्मै द्रुतम् ।। १९३३।।

पृष्ठेऽमुष्य दधाव हन्तुममुकं धृत्वा तथैकं प्रभु–
र्दीर्घं वंश,मतो, महाशयजनो विद्याभिमानी त्वसौ ।
शास्त्रीयं सकलं स्वबोधमधुना विस्मृत्य शीघ्रं ततः
स्वं संरक्ष्य पलायितः, प्रभुरगात्पृष्ठेऽस्य धर्तुं तथा ।। १९३४।।

बद्ध्वा मुष्टिमसौ प्रहारभयतः स्थानात्पलाय्य द्रुतं
यातश्छात्रमहोदयश्च पतितं स्कन्धोत्तरीयं भुवि ।
पोथी सम्प्रति पार्श्वतोऽसरदयं क्रोशंस्तथोच्चैः श्वसन्
धावन् याति पुनर्द्रुतं, मनसि भीः प्राणस्य हि द्वैतजा ।। १९३५।।

धावन्तञ्च तथा विलोक्य जनता तत्कारणं तं पुनः
पृच्छत्यत्र तु विस्मयेन सहिता, दृष्ट्वा तथाऽस्य स्थितिम् ।

कश्चिद्वै हसतीह साट्टहसनं, कस्यापि किञ्चिन्न त-
च्छुश्रावैव स किन्तु, तस्य निजकप्राणेऽपतद्वै विपत् ॥ १९३६॥

त्राता: प्राणा, लक्षं प्राप्तम् । आप्तो गेहं मियाँ-बुद्धू: ॥ १९३७॥

एवञ्छात्रमहाशयस्य नदियागौरन्तु पृष्ठेऽस्य तं
धावन्तञ्च विलोक्य भक्तसुहृद: स्थाने दधु: साम्प्रतम् ।
तस्मिन्नेव पपात स प्रियतमे भावे प्रभुर्मूर्च्छित:,
क्रोधाविष्टदशा तथासुमनसां ह्याभासमात्रात्मिका ॥ १९३८॥

विद्यार्थी क्षणत: प्रधाव्य बहुकं स्थाने ददर्शात्मन:
पृष्ठे, यत्र यदा तथाप्रभुमसौ नायान्तमालोकयत् ।
तस्थौ तत्र तदाऽस्य दीर्घमधुना श्वासाश्चलन्ति स्म च
स्वेदार्द्रं निखिलञ्छरीरमसरत्तद्धारकं सर्वत: ॥ १९३९॥

नानाप्रश्नममुं विलोक्य जनता प्रष्टुं तथा प्रस्तुता
स्थाने तादृशकस्थितिं, परमसौ प्रश्नोत्तरं किं त्वदात् ? ।
श्वासोऽमुष्य तु वर्धितो, न मुखवाङ् निर्यातुमेव क्षमा,
गौरक्षेत्रनिवासिभि: कतिपयैर्भूत्वा दयार्द्रैर्जनै: ॥ १९४०॥

दत्तं साम्प्रततालवृन्तपवनं पातुञ्च शीतं जलं,
पीतेऽमुष्य जले मनाक् स्ववशता, श्वासोऽपि सम्यग् ययौ ।
एक: पृच्छति तन्'महाशय! कथं जाता तवेयं दशा ?
केनैवं कृतमत्र ताडनमहो ? द्वीपे निमायिप्रभो:' ॥ १९४१॥

द्वेषाग्निं हृदयस्य जल्पति वमन् सोऽसौ निजस्याधुना
'भ्रात:! किं कथयानि, यच्छ्रुतमहो! स्वर्नाथमिश्रात्मज: ।
भक्तोऽभूद्वरपण्डितो भुवि नवद्वीपे निमायी महान्
सङ्गेऽयं पठति स्म (पण्डितसहाध्यायी न विस्मर्यते) ॥ १९४२॥

भक्तोऽयं विदितश्चलानि, करवै तद्दर्शनं, चिन्तितं
यातो दर्शनमस्य कर्तुमधुना, किं वेत्तु भक्तिन्तु स: ।
दृष्ट,ञ्छास्त्रविरुद्धरीतिपतितो 'गोपीति गोपी' तथा
क्रोशन्नस्ति, मयोक्तमत्र, 'नदियाबन्धो! भवान् पण्डित: ॥ १९४३॥

एवञ्छास्त्रविरुद्धकर्म कुरुते द्वीपेऽमले किं भवान्' ?
तावत्येव न तेन तत्र गणितं स्वत्वञ्च तत्त्वं तथा ।
धृत्वा लड्डमसौ तु वन्यसदृशो मे क्रामति स्मोपरि,
स्वप्राणैर्न पलायितोऽहमभवं (संख्याऽऽत्मन: प्राणनम्) ॥ १९४४॥

तत्रैव त्वकरिष्यदेव विषये ह्यन्तं स मे कर्मणो,
भक्तिर्नाम किमस्य ? सज्जनमतौ तन्नाम तु क्रूरता ।
एवन्तु व्यवहारमत्र कुरुते व्याघ्रः परं हिंसकः,
सर्वप्राणिदयाकृतिर्भवति तद्भक्तस्त्वहिंसाप्रियः' ॥ १९४५ ॥

श्रुत्वा तन्मुखतस्तथाहि वचनं केचिद्धसन्तोऽवदन्
मन्दं, 'पण्डितजी! तथाल्पमधिकं किन्नोपदिष्टं त्वया ?' ।
अन्योक्ति, 'ह्युपदेशनस्य मिलिता स्थाने कटुर्दक्षिणा,
किं भो! नास्ति तथा, स्थितस्त्वपचये, प्राप्तः परं रक्षितः ॥ १९४६ ॥

नूनं त्वद्य सपादरूप्यकधृतं लोके प्रसादं कुरु',
ह्युचुः केचन तत्खलास्तु पुरुषाश्चेर्ष्यालवः स्वात्मनः ।
गुप्तेर्ष्यामलताप्रकाशनपुरो दुष्टास्तथा साम्प्रतं
'कर्तारः किममी तु भद्रकृतिकं? (भद्रस्य भद्रा कृतिः) ॥ १९४७ ॥

साधुब्राह्मणकप्रहारकरणन्त्वेभिः परं शिक्षितं
जाने रात्रिषु नो निलीय विषये कुर्वन्ति किं किं त्वमी? ।
त्रासं सम्प्रति चापयन्ति दिवसे साधुद्विजानां तथा,
किं भो! पण्डितजी! करौ न तव किं? (लोके करी वारणः) ॥ १९४८ ॥

तत्सङ्गे दश-विंशतिर्यदि परं भक्ताश्च बुद्धिच्युताः,
स्थाने ते कथने सहस्रमधुना सन्त्यत्र विद्यार्थिनः ।
एतेषां न कथं सुकारयसि भोः! संधानमत्रैकदा,
भूयः कीर्तन-फीर्तनञ्च निखिलं स्मर्ता न सर्वस्त्वसौ ॥ १९४९ ॥

एतेषामधिकं स्युरत्र शिथिला यावन्न तु स्नायव—
श्चायास्यन्ति न तावदद्य नदियाद्वीपे स्वबोधे पुनः' ।
दुर्वासाः क्रुधि तैस्तथाहि नुदितो विद्याभिमानी त्वसौ
स्थाने छात्रमहाशयः कथितवान् संगर्ज्य तद्द्वीपभूः ॥ १९५० ॥

'नूनं सन्ति तथामदीयकथने छात्राः सहस्रं पुन—
र्द्रष्टुञ्चापि न तन्मिलिष्यति दृशोर्मे चेङ्गितेनैव तु ।
एतद्भक्तजनेषु यावदधुना कस्यापि भूयोऽस्थिकं,
सर्वे, किं भविताऽस्य तत्परिणतिः, श्वश्चैव पश्यन्तु भोः! ॥ १९५१ ॥

बच्चूनां नवरागिणान्तु भविता ज्ञातं स्फुटञ्छ्वस्तथा
संसारे द्विजकप्रहर्तृकदशा द्वीपे भवत्यत्र किम् ?' ।
एवं स प्रलपन् महाशयजनः स्वच्छात्रसङ्घेऽमिल,—
च्छात्राः पूर्वत एव गौरधवलोत्कर्षाऽसहस्वात्मना ॥ १९५२ ॥

आसन् गौरनिमायिनो ननु ततो दग्धा: स्थिता भर्जिता–
स्तेषां साम्प्रतिकं महाप्रभुयशस्तद्वर्धमानन्तथा ।
नासीत्सह्यमथोद्गता कुहृदये चेर्ष्याऽत्र तेषां प्रभो–
र्देशव्यापिसितप्रशस्तयशसो,लूको दिने खिद्यते ।। १९५३ ।।

योग्ये तावति साम्प्रतं महति च श्रुत्वा तु विद्यार्थिनि
द्वीपे चात्र नवे प्रहारवचनं क्रुद्धा: क्षणात्तत्प्रभौ ।
प्रायो दूषितमानसास्तु बहवश्छात्रा विधातुन्तथा
स्थाने तत्क्षणत: प्रहारकरणे गन्तुं पुन: प्रस्तुता: ।। १९५४ ।।

उक्तं सम्प्रति साम्प्रतं कतिपयैश्छात्रै: प्रबुद्धै: पुन:
'का चावश्यकता तथाद्भुतविधेर्भ्रात:! प्रहारोऽपि नो ।
एतस्मिन्नधुना बभूव, दिवसान् द्वित्रान् पुन: पश्यतु
द्वीपेऽस्मिन् यदि वस्तुतो व्यवहृतिस्तेषां तथैवाभवत् ।। १९५५ ।।

अग्रे सम्प्रति चेत्तथा प्रहरति च्छात्रे पुन: कुत्रचिद्–
युष्माभि: प्रहरोत्तरं ननु तदा देयं प्रहारेण वै ।
एवं सम्प्रति शीघ्रतेयमियती स्थाने पुनर्नोचिता'
छात्रास्तत्क्षणमेवमत्र शमिता, वह्नौ तु देयं जलम् ।। १९५६ ।।

तेषां किन्तु महाप्रभुं प्रति तथाविद्वेषभाव: क्रमा–
दासीद्वृद्धिपुर:सर:, कतिपये दुष्टात्मका ब्राह्मणा: ।
तन्मायापुरवासिनोऽपि मिलिताश्छात्रै: सभावै: समं,
तच्चैकं दलमेव तद्घटनया जातं विरुद्धं प्रभो: ।। १९५७ ।।

सर्वं ज्ञातमभूदमुष्य सुहृदो भावे प्रशान्ते प्रभो–
र्जातं दु:खमपारकञ्च हृदये वृत्तेन तेनाधुना ।
गेहद्वारतथेष्टमित्रजनताभक्तप्रियाणामुदा–
सीन: पूर्वत एव चाभवदयं द्वीपे निमायी सुधी: ।। १९५८ ।।

औदासीन्यममुष्य तद्घटनया भूयोऽधिकं वर्धितं
देशव्यापियशोऽधुना सुमनस: संकीर्तनस्याधुना ।
धावच्चात्र तु कृन्तितुं सुविततं तल्लक्ष्यते स्म स्वकं,
लोको यत्र विशेषतो हि रमते साधोर्विरामस्तत: ।। १९५९ ।।

गेहद्वारकुटुम्बमित्रजननीश्रीधर्मपत्नीभरा–
ज्जाता तस्य विरक्तिरद्य युगपत्सम्पूर्णतो मानसे ।
अद्याऽमुष्य तथामनोमधुकर: स्थाने सुगन्धामपि
त्यक्त्वा वेष्टितवाटिकां सुमनसां स्वच्छन्दतापूर्वकम् ।। १९६० ।।

उत्कोऽधुना विचरितुं कटुकण्टकाले
संसारमुक्तपवने प्रियवन्यकुञ्जे ।
मुक्त्वा गृहादिकमचेतयताऽखिलानां
कल्याणहेतुकमयं यतिधर्ममाप्तुम् ।। १९६१ ।।

संन्यासात् पूर्वम्

१०८. कशिपुः स्वं प्रह्लादं पृच्छति ।
'किन्ते बुद्धौ सुत! वरकार्य सर्वाधिकमिह भुवने ?'
'असुराधीश्वर! पूज्यपिताजी! मनुते श्रेष्ठं त्वज्जः ।
असतो ग्रहणान्मिथ्यादृष्टिस्तद्विकलात्मा देही
सदाऽऽत्मपाते गृहेऽन्धकूपे मोहयन्त्रितस्तिष्ठति ।
विविक्तदेशं वनमेकान्तं यातस्तन्मुक्त्वाऽसौ
श्रीहरिचरणशरणमधुचिन्तनहृदयो भवतु सदात्मा' ।।

अद्यत्वे महते महाप्रभुमनस्त्यागाय तु स्पन्दते,
चोद्गच्छन्ति यथा तदीयहृदये वैराग्यभावोर्मयः ।
नासीद्यद्यपि बन्धनं किमपि तद्गेहेऽपि गौरप्रभोः
कल्याणं कुरुते स्म लक्षसुहृदां स्थित्वाऽत्र नारीनृणाम् ।। १९६२ ।।

सन्तुष्टो भवितुं क्षमस्तु सुमना नैतावतैव प्रभु—
र्विश्वव्यापि विधातुमस्य भगवन्नामाऽभवद्भावना ।
द्वीपस्यैव नवस्य सम्प्रति पुनः कृत्वा तथाऽयं निजं
धर्तुं वै प्रभवेत्पतिं कथमहो! कस्याश्चिदेकस्त्रियः ।। १९६३ ।।

आसीदेष तथाविभूतिरपरः सम्पूर्णविश्वस्य तु
स्तुत्यः पूज्यतमः समस्तभगवद्भक्तात्मनां सर्वथा ।
वासोऽसंभव एव केवलनवद्वीपेऽस्य, तस्यां स्थितौ,
वर्षन्ती खिलभूतलेऽखिलनभो व्याप्नोति कादम्बिनी ।। १९६४ ।।

प्राप्यन्ते च सुखं धनं भुवि यशः सर्वस्य सांसारिकं
भाग्येनैव सदैव पूर्वजनुषो, भाग्यं फलं कर्मणः ।
यद्भाग्ये न धनं न वा ननु यशः कुर्यात्कियन्तं त्वपि
स्थाने किन्नु परिश्रमं स, जगतीमध्ये प्रचारस्तथा ।। १९६५ ।।

भावानां कियतामपीह विषये भद्रात्मभद्रात्मनां
तद्द्वारा कथमस्तु नो, भुवि धनं नाप्नोति वाऽयं यशः ।

प्रायश्चैव कदापि योद्धुमयते राजाऽत्र युद्धेऽथवा
गेहे चैव स तिष्ठतीह (नृपतिः प्राणाः प्रजानां भुवि) ।। १९६६ ।।

सेनायां बहु वीरयोद्धृजनता शौर्येण वीर्येण वै
युध्यत्यत्र च साहसेन, समरे प्राणैः पणैः संयुता ।
स्थाने तत्र तथाह्युपर्युपरि सा शत्रोः करोत्यम्लकान्
दन्तान्, लक्षपराक्रमं रणभुवि प्रादर्शयन्ती तथा ।। १९६७ ।।

तस्यास्तादृशशौर्यवीर्यचरितं ज्ञातं न कस्याप्यभूत्,—
तद्गेहस्थितभूपतेर्जययशः प्राप्तं परं कथ्यते ।
एकस्तु श्रमिकः कुटुम्बसहितो यावद्दिनं जीवने
कुर्वन्नेव तथाहि जीवति पुनः कर्माणि पृथ्वीतले ।। १९६८ ।।

तस्याऽऽरभ्य शिशोस्तथाल्पवयसस्तद्वृद्धपर्यन्तकं
सर्वे स्त्रीपुरुषा दिवानिशमहो! कार्ये भवन्त्यापृताः ।
तेषां भोक्तुमथापि पूर्णमशनं तन्नार्जितं जायते,
(भोक्तुर्भोजनकस्य योजकमहो! भाग्यं पृथग् भोजकम्) ।। १९६९ ।।

अन्यस्तद्विपरीतमत्र जगतीमध्ये धनाढ्यो जनः
पल्यङ्कादपि चावरोहति यदा नीचैस्तु भृत्या बहु ।
अग्रेऽग्रेऽस्य चलन्ति विस्तरमहो! भव्यं स्तरन्तः सदा,
(केनाप्यत्र तथाहि सेव्यपदवी सौभाग्यतो लभ्यते) ।। १९७० ।।

वाणिज्यस्य तथाऽस्य तत्र लिपिको व्यापारकार्येऽनिशं
व्यासक्तस्तु परिश्रमञ्च कुरुते, द्वारेण तस्यैव च ।
आयो दैनिकलक्षरूप्यकचितस्तत्स्वामिनः, किन्तु त—
न्मासे लिपिकवेतनञ्च गणितं किञ्चिच्छतं दीयते ।। १९७१ ।।

तत्सर्वाऽऽयभरस्य सोऽत्र भवति स्वामी त्वकिञ्चित्कर—
स्तत्कस्यापि धनं विलोक्य भुवने वा वर्धमानं यशः ।
कार्यो नैव कदापि जीवनपथे द्वेषस्तथैवं, मया
तस्मात्तु क्रियतेऽधिकं, तदपि मे किं तद्धनं नो यशः? ।। १९७२ ।।

वार्तेयन्तु सदैव संसृतिपथे नृ-स्व-स्वभाग्यस्य, ते
भाग्ये नास्ति तु तावती भुवितले कीर्तिः प्रतिष्ठा तथा ।
भूयस्त्वं कुरु किन्नु तत्कियदपि स्थाने महत्कर्म वा ?
कीर्तिश्रीर्भविताऽधिका तु विषये तस्यैव भाग्यात्मनः ।। १९७३ ।।

करोति कर्माणि तवाऽत्र दृष्टौ
तेऽपेक्षया यस्तु लघूनि लोके ।

कदापि भाग्यस्य तथाऽस्य रेखा—
विलोपने त्वं भुवि नो समर्थः ।। १९७४।।

श्रीरामानुजपादपूर्वमपि च श्रीसम्प्रदायाध्वनि
स्थाने त्यागिविरक्तसाधुयतयोऽनेकेऽभवन् भारते ।
किन्त्वासीत्पदवी प्रधानगुरुकाऽऽचार्यस्य तच्छ्रीपथे
भाग्ये तत्र महात्मनो भगवतो रामानुजस्यैव सा ।। १९७५।।

संसारेऽस्तु महाजनो ननु तथा स्थाने महात्माऽथवा
कश्चित्किन्नु पुनः कियानपि महान् भूतेऽधुना भाविनि? ।
प्रारब्धानुसृतेस्तु भोगघटना तस्याखिलस्यात्र सा
(भव्या देहिनि कारके तु पदकावल्याः क्रियासङ्गतिः) ।। १९७६।।

प्रारब्धस्य च विद्यतेऽत्र वपुषा योगो, धृतं येन वै
शिक्षायै त्वपि चात्र लौकिकवपुः, प्रारब्धभोगोऽमुना ।
कार्यो निश्चितमेव, तु स्थितिरियं भिन्नाऽस्ति, तद्भोजने
न स्वल्पापि महात्मसंयतदृशां सक्तिस्तथा लक्ष्यते ।। १९७७।।

वर्तन्ते भुवि ते, वपुर्निजपटं, मत्वा महान्तो नराः
प्रारब्धं मलमस्य, वास्तविकता चेयं, न तेषां स्वकम् ।
प्रारब्धं नहि किञ्चिदत्र, जगतः कल्याणहेतोस्तु ते
प्रारब्धव्यपदेशतोऽत्र विविधां लीलां प्रियां कुर्वते ।। १९७८।।

संसारस्य सुखेषु लोकमनसि त्वेकं महद्वै सुखं
कीर्तिश्चापि, ततोऽधिका जगति यत्कीर्तिस्तथाऽऽप्यायते ।
तस्मै चैव तु कीर्तिलोलुपजनाश्चेर्ष्यन्ति संसारिणः
स्वल्पञ्चापि न कीर्तिलाभयतनं स्वेनास्य चैकौषधिः ।। १९७९।।

'कीर्तिर्मेऽस्तु' यथाऽस्तु संभवमयं भावोऽपि नायातु हृ—
न्मध्ये त्वेव, च जातकीर्तिजगतस्त्यागं तथा कुर्वता ।
स्थातव्यं यतिनाऽत्र, कीर्तिरधिका त्यागेन शुभ्रायते,
द्वेषी तत्पदयोः शिरो नमयति त्यागप्रभावादपि ।। १९८०।।

वार्तेयं भववस्तुभोगविषया, त्यागस्य नेयत्फलं
यत्तेनास्तु हि कीर्तिरत्र विमला, द्वेषी तथाप्यस्य च ।
स्यात्पक्षी, फलमस्य तु 'प्रियगति'स्त्यागस्य सर्वोत्तमं,
त्यागेनाऽत्र विना तथाहि भगवत्प्राप्तिर्न वै संभवा ।। १९८१।।

सर्वस्वत्यजनं प्रधानमपरप्राप्तौ तथा कारणं,
यस्यात्रास्ति मतन्तु भक्तिपथके संन्यासधर्मोऽप्रियः ।

अज्ञानी स जनो, न भक्तिपथकज्ज्ञानन्तु तस्यास्ति वै,
ब्रूतेऽत्र प्रभुदत्तसाधुरहकं भूयो दृढञ्च स्वयम् ।। १९८२।।

कश्चिद्भक्तिपथस्य चानुसरणं संन्यासितां वै विना
कर्तुन्नो भुवि मानवः प्रभुरहो! (भक्तिर्हि संन्यासता) ।
एतावद्गदितुञ्च शास्त्रबलतो यावद्द्वयं प्रस्तुता
ह्यस्मि ब्रह्मचरश्च (भक्तिपथिकः शास्त्रावनीसंततिः) ।। १९८३।।

ज्ञानस्याधिगमो नरेण नु विना कामन्तु संन्यासितां
संसारे क्रियतान्तु भक्तिरपरा सर्वस्वकत्यागतः ।
कस्याप्यत्र परं भविष्यति, मनोत्यागस्य कृत्वा मिषं
यः कश्चिद्विषयेषु सेवनरतोऽप्यत्र स्वकं भाषते ।। १९८४।।

साधूनां निवहेऽत्र पूर्णभगवद्भक्तं सहोद्घोषणै,–
र्वक्तव्यं नहि तस्य चात्र किमपि (स्थाने समीक्षा सताम्) ।
अस्माकन्तु निवेदनं सुमनसां तेषां तितिक्षावतां,
ये वाञ्छन्ति यथार्थतोऽनुसरणं कर्तुन्तु भक्त्यध्वनः ।। १९८५।।

तेषां सम्प्रति कथ्यते दृढतया-लोके पुराजन्मनः
प्रारब्धाऽनुसृतेर्भवेन्नहि भवांस्त्यक्त्वाऽत्र सर्वस्वकम् ।
संन्यासी, भवतस्तदस्ति मनसो दौर्बल्यमाध्यात्मिकं
(नात्माऽयं बलहीनमानसवता प्रेमास्पदो ह्याप्यते)।। १९८६।।

स्याद्यस्यामपि तु स्थितौ, मतिमता कर्तुं प्रयत्नः परं
यावद्भक्तिमथात्र ढौकितुमिमाञ्छक्योऽस्ति सर्वस्थितौ।
भक्तः पूर्णतयाऽत्र, नैव मनसा लोके स्वरूपादपि
त्यागो वै करणीय एव भवितुं प्रेमी प्रियस्यात्मनः ।। १९८७।।

संसारे सह सर्वकर्मफलकत्यागेन चास्त्येव तत्–
तत्सांसारिकसर्वभोगजगतां त्यागोऽपि चावश्यकः।
केचित्तद्विपरीतमेव भगवद्भक्तास्तु दृष्टास्तथा
सन्तोऽप्यत्र हि ते प्रवृत्तिपथके भक्ता बभूवुस्त्वलम् ।। १९८८।।

मन्तव्यास्त्वपवाद एव भुवि ते, स्थानेऽयमेवास्ति तत्–
सिद्धान्तो ननु केवलात्मभगवद्भक्त्यै मनुष्यात्मनि ।
श्रीमद्रूपसनातनप्रकृतिको भूत्वा तथाऽकिञ्चनो
लोके वा रघुनाथदाससदृशः कृष्णप्रियश्रीवने।।१९८९।।

निर्वाहन्तु विधाय तद्गृह-गृहप्राप्तान्नखण्डैस्तथा
कुर्वन्नत्र दिवानिशं भुवि भवेच्छ्रीकृष्णसंकीर्तनम् ।

श्रीगङ्गाधरलोकमान्यतिलकैस्तज्ज्ञानभक्तिद्वयं
तूक्त्वा त्यागमयञ्च कर्म नवकं तद्योगिनां कल्पितम् ।। १९९० ।

गार्हस्थ्ये भजनं पुनर्भगवतः स्थित्वाऽपि तच्छक्यते
कर्तुं, किन्तु वचस्तथैव तदिदं वैद्यैर्निषिद्धं यथा ।
लोके श्वासकरोगिणो दधि परं कस्यापि, तत्सर्वथा
दध्नस्तत्र तु संयमो वरवरञ्छ्वासाऽऽमये चौषधम् ।। १९९१ ।।

संस्कारान्निजपूर्वजन्मनिचितात्तद्वासनाधिक्यतो
दध्न,स्त्वत्र स सर्वथा दधि परं त्यक्तुं न शक्नोति तत् ।
वैद्यो मिश्रयते तथौषधमहो! तद्दध्नि चैकं यतो
भूयोऽमुष्य तु रोगिणो भवति नो हानिप्रदं तद्दधि ।। १९९२ ।।

एवं त्यागकृतौ क्षमोऽखिलतया लोके स्वरूपान्न यो,
निर्दिष्टं भुवि तत्कृते भगवता (यच्छ्वासमूर्तिः श्रुतिः ।
भुञ्जीथा ननु शास्त्रलोकविधिना त्यक्तेन तेनाखिलं,
भोज्यं निर्मितमत्र भोक्तृककृते तद्भोजयित्रा यतः) ।। १९९३ ।।

संसारे भगवद्गिराऽत्र निखिलं कार्यञ्च सांसारिकं
सेवामेव निबुध्य तद्भगवतो निष्कामभावेन च ।
कुर्वंस्तत्फलकामनाविरहितश्चेत्सर्वदा स्थास्यति
स्वस्थाने हरिचिन्तने तु निरतः, संसारिकामस्तदा ।। १९९४ ।।

बाधां दास्यति नोऽस्य साधुमनसः सत्सङ्गिनः प्रेमिणो,
लोकास्त्वाग्रहमेव येऽत्र हठतः कुर्वन्ति यत्तादृशम् ।
संसारे ननु भक्तिमार्गपथिकैः कस्यामपीह स्थितौ
तत्संन्यासकधर्मकानुसरणं कार्यं न, सांसारिकम् ।। १९९५ ।।

त्यक्त्वा कर्म, तथाऽत्र वाच्यमधुना तेषान्तु किञ्चाधिकं,?
ते ज्ञास्यन्ति, विलोकयन्ति यदि तत्कृत्वोच्चदृष्टिं मनाक् ।
सर्वो भक्तिपथप्रधानपुरुषस्त्यागी गृहादेः परं
संन्यासी प्रथितो बभूव, कृतिनस्त्यागः प्रतिष्ठा भुवः ।। १९९६ ।।

भक्तेर्वा भगवान् प्रवर्तनकरो ब्रह्माऽखिलस्याध्वन,—
स्तस्मात्ते जनिते प्रवृत्तिरपरा वृत्ती निवृत्तिर्ह्युभे ।
तद्वक्तुं नहि युज्यते ननु तयोरेकाऽस्य कापि प्रिया,
सम्पत्तिर्भुवि चीयते प्रकृतितो दैवी तथा वाऽऽसुरी ।। १९९७ ।।

श्रीमन्नारद एव चात्र भगवान् पुत्रोऽस्य शिष्यस्तथा
मुख्याचार्यगुरुस्तथाहि कलितस्तद्भक्तिमार्गश्रियः ।

संन्यासी तु बभूव गेहरहितः स ब्रह्मचारी पुन–
श्चैको द्वौ नहि केवलं भुवि ततो यातौ गृहत्यागिनौ ।। १९९८ ।।

लक्षं तेन विरागिणो जगति तत्पूर्वस्वभावात्कृता
मेदिन्याममुना सहस्रकलिता दक्षप्रजास्वामिनः ।
पुत्रास्ते शबलाश्च नाम हरिताः संन्यासिनो दीक्षिता
यातास्तत्र, यतः सतो न पुनरावृत्तिस्तपोलोकतः ।। १९९९ ।।

श्रीभक्त्येकविशेषशाखजगतो लोके समुद्भावका–
श्चत्वारोऽपि कुमारकास्त्वजसुताः संन्यासिनश्चैव ते ।
(अस्माकं सनकः सनन्दनमुखस्ते पञ्चवर्षीयकाः
शं कुर्वन्तु सनातनोऽत्र सततञ्छ्रीमत्कुमारः सनत्) ।।२००० ।।

जाता ब्रह्मतनौ तथा भगवतो ये येऽवताराः पुन–
र्गेहत्यागपुरस्सरञ्च निखिलाः संन्यासिनस्तेऽभवन् ।
अध्यात्मप्रतिमाः कुमारकपिलौ नारायणः श्रीनरो
विद्याश्रीभुवि नारदः सपरशू रामस्तथा वामनः ।।२००१ ।।

आसन् किं बहुना तथाहि निखिलाः संन्यासिनश्चैव ते
चत्वारो गुरवश्च भक्तिजगतस्तत्सम्प्रदायश्रियः ।
निम्बार्को नृषु माधवो रविसमा रामानुजो वल्लभः
साधूनां भुवि भारतेऽमलहृदामादर्शमूर्तीश्वराः ।।२००२ ।।

तावद्यद्यपि नार्हितोऽत्र भगवच्छ्रीवल्लभाचार्यकृ–
त्पूजापद्धतिके कृपैकरसधेः संन्यासधर्मो यतः ।
एवं पूजनपद्धतिर्धनवतां हेतोर्नृणामेव तद्–
भक्तौ तेन सतां प्रवृत्तिमनसां संचालिता वस्तुतः ।।२००३ ।।

गार्हस्थ्ये च वसन् स्वयन्त्वपि सदा वात्सल्यभावेन तद्–
भक्ताऽऽदर्शमुपस्थितं स्म कुरुते श्रीबालकृष्णार्चया ।
भूयोऽन्ते त्वमुनाऽपि मुक्तिनगरीं गत्वाऽत्र वाराणसीं
त्यक्त्वा भागवताध्वना स्वसकलं संन्यासधर्मो धृतः ।।२००४।

एतावन्महिमाऽस्ति यस्य विततः संन्यासधर्मस्य त–
न्निन्दां कश्चन नो विना विषयिणाऽद्धा कर्तुमेव क्षमः ।
ईसाबुद्धनिमायिनो यदि भुवि स्थाने न संन्यासिन–
स्तेऽद्य त्यागतथोच्चभावभरणे शक्ताः क्षमायां कथम् ? ।।२००५ ।।

महाप्रभुरयं गौराङ्गदेवो
बभूव भुवि तु त्यागस्य मूर्तिः ।
जगौ नरवरोऽसौ यावदेतन्—
(मनुष्यवपुषां वन्द्यो निमायी) ।।२००६।।

१०९. **उचितं चरितं सत्पुरुषाणाम् ।**
सम्यक्चिन्तनदर्शनवर्तनमिह सुहृदां साधूनाम्
कालविशेषे पावनदेशे तादृशपुरुषोत्पत्तिः ।
कुपथविषयिमायात्मकजगतां तेषामनुसन्धानम्
संदर्शनमपि विषभक्षणतोऽसाधु साधुशरणानाम् ।।

तादृक्त्यागसजीवदर्शनमहो! भूयो मिलेत्कुत्र वै ?
सत्य,ञ्छ्रीलमहाप्रभुस्तु महतस्त्यागस्य चादर्शयत् ।
प्राज्ञानां गृहिणां विधाय च पराकाष्ठाञ्च संन्यासिनां,
त्यागेनात्र नरो हि राजति भुवि, त्यागः परं केनचित् ।।२००७।।

भक्तास्तत्पथयायिनः सुमनसस्तस्यान्तरङ्गास्तथाऽऽ—
सन् सर्वे परमा ह्युपर्युपरि ते च त्यागिसंन्यासिनः ।
श्रीमद्रूपसनातनौ च हरिजी श्रीजीवगोस्वामिको
गोपालो रघुजी प्रबोधयतिको दामोदरो लोकजी ।।२००८।।

त्यागस्तत्प्रभुपादपद्ममनसां वैराग्यमेषां तथा
भावानान्तु महाप्रभोश्च परमत्यागात्मनामुज्ज्वलः ।
आदर्शोऽस्ति, कृते जनश्रुतिरियञ्छ्रीरूपगोस्वामिन,—
स्तस्थौ चैकदिनाधिकं नहि तरोरेकस्य सोऽत्राप्यधः ।।२००९।।

अस्यानुयाच्य शकलं व्रजवासिगेहा—
त्कस्यापि नूतनतरोः शयनं त्वधस्तात् ।
तद्दैनिकव्यवहृतिः सुहृदो बभूव,
त्यागस्तथा जगति भक्तिपथश्च धन्यः ।।२०१०।।

तद्भक्तौ विदुरोद्धवौ भगवतस्तौ चान्तरङ्गावुभौ
शुद्धप्रेमरसालयौ त्वभवतां कालेऽत्र संन्यासिनौ ।
श्रेष्ठाभ्यः परमञ्च कुत्र मिलते संन्यासिनीभ्यो भुवि
त्यागादर्शनिदर्शनं त्वतिशयञ्छ्रीगोपिकाभ्यस्तथा ।।२०११।।

श्रीगोपीविदुरोद्धवैर्नहि धृता सा लिङ्गसंन्यासता,
लिङ्गन्यासविधिस्तु केवलमसौ शास्त्रेषु विप्रात्मनाम् ।

त्यक्त्वाऽऽसंस्तु तथैव निश्चितगृहं तेऽलिङ्गसंन्यासिनः,
संन्यासी भुवि केवलं नहि गृहत्यागी, परं स्वप्रियः ॥२०१२॥

कामं स्थातुमहो! महाप्रभुरयञ्छक्नोति गेहे कथं ?
संन्यासग्रहणस्य तस्य हृदये भावस्तथोद्यन्नभूत् ।
सोऽयं चिन्तयते दृढं स्वमनसि स्थाने 'गृहीत्वाऽधुना
संन्यासं ननु मुण्डितः प्रतिगृहं यावन्न भिक्षाटनम् ॥२०१३॥

कर्ताऽहं, न तु तावदत्र भविता पूर्णाऽद्य मे चात्मनः
शान्ति,र्नैव विरोधिनां मम तथोद्धारस्त्वमीषां पुनः ।
त्यागेनैव निजेन चाद्य महतोद्धारे तथैषां क्षमः,
कृत्वा द्वेषममी पुनर्मम यशोवृद्ध्या तथाभावकाः' ॥२०१४॥

एतेष्वेव बभूव तु प्रभुरयं भावेषु मग्नः परं,
स्वामी केशवभारतीवरमहाराजो हि दण्डी यतिः ।
तन्मध्येऽत्र समाययौ च 'कटवा'वासी नवद्वीपकं,
भावोपस्थितिरत्र शुद्धमनसोऽद्धा चिन्तनस्य क्षणे ॥२०१५॥

अद्यत्वे तु पुरातनीह निखिला नष्टा व्यवस्था भुवि
स्थाने कालिकभावतः, परमियं वार्ता तु यत्कालिकी ।
तत्काले त्वभवत्प्रथा प्रचलिता श्रीदण्डिसंन्यासिकः
कस्याप्यत्र गृहस्थकस्य हि भवेद्द्वारे तथोपस्थितः ॥२०१६॥

उत्थाय चक्रेऽत्र स एव शीघ्रं
सुस्वागतं तस्य तथा गृहस्थः ।
भिक्षार्थमेतच्च जगाद भक्त्या,
गार्हस्थ्यधर्मोऽतिथिसाधुसेवा ॥२०१७॥

११०. सर्वः संन्यासी नहि दण्डी ।

आश्रमतीर्थसरस्वतीनाम्नि, संन्यासिषु दशनामिसु
दण्डधारणमधिकृतमस्तीह पूर्वाश्रमविप्राणाम् ।
अपि भारतीदण्डाधिकारः, किन्तु दण्डिनां मध्ये
दण्डोऽर्थो हि बुध्यते तेषां, दण्ड एव सर्वस्वम् ।
वनारण्यगिरिपर्वतसागरपुरीनामतः शेषाः,
नैषां विहितं दण्डग्रहणं, दण्डी दण्डयति स्वम् ॥

दण्डं ब्राह्मण एव धर्तुममलञ्छक्तश्चतुर्थाश्रमे
संन्यासी भवतीति दण्डसहितो योऽभूत्पुरा ब्राह्मणः ।

आसीत्केशवभारती वरतपा दण्डी तु संन्यासिको
द्वीपञ्चाप यतः पुरेश्वरपुरी तत्केशवो भारती ।।२०१८।।

श्रीकेशवस्य भुवि शिष्यपरम्परायां
पश्चात्तदुत्तरजनास्त्वभवन् गृहस्थाः ।
अद्यापि सन्ति ननु ते 'कटवा'समीपे,
चैतन्यभूमिमपरां यतयः श्रयन्ते ।।२०१९।।

उत्थाय प्रभुजी विलोक्य तरसा श्रीभारतीपादयो–
श्चक्रेऽसौ नमनं, तथाऽस्य वपुषि प्रेम्णस्त्वपूर्वस्य तत् ।
दृष्ट्वा लक्षणमत्र विस्मितसमः स्थानेऽभवद् भारती
तत्सौशील्यविनम्रभावमुदितः प्रेमाकुलश्चाब्रवीत् ।।२०२०।।

'व्यक्तात्मा ननु नारदो भुवि भवान् प्रह्लाद एवाथवा,
तत्प्रेमैव तु मूर्तिमान्ननु भवान् संलक्ष्यते चाधुना' ।
श्रुत्वेदं यतिभारतीवदनतो वाक्यं प्रभुस्तादृशं
मग्नः प्रेम्णि तथाऽस्य गद्गदगिरा धृत्वा पदाब्जेऽवदत् ।।२०२१।।

'साक्षात्साम्प्रतमीश्वरो ननु भवान्, स्थाने नरस्याऽऽकृतौ
श्रीनारायण एव मेऽद्य गृहिणो गेहं पवित्रं कुरु ।
मुक्तः स्याञ्च पुनः कृपां कुरु तथा संसारबन्धाद्यतः,
सुप्तो बन्धनमेव वेत्ति न, ततो मुक्तौ त बुद्धोऽस्थिरः ।।२०२२।।

ऊचे केशवभारती तु 'भवतः सम्पूर्णदेहेऽस्ति तत्–
स्पष्टञ्छ्रीभगवत्त्वचिह्नमधुना प्रेम्णोऽवतारो भवान् ।
मे सम्प्रत्यनुभूयते भगवतः संदर्शनाभं सुखं
स्थाने दर्शनतस्तु चात्र भवतो', ह्यात्मानुभूतिः प्रमा ।।२०२३।।

कुर्वञ्जल्पति भारतीस्तुतिमयं 'त्वञ्छ्रीप्रभुप्रीतिमान्,
त्वच्चित्ते भगवान् सदा निवसति श्रीमांस्तथापावने ।
श्रीकृष्णस्य सदा त्वदीयनयने च्छाया भवत्यास्तृता,
तस्मात्स्थावरजङ्गमे भगवतस्ते दर्शनं जायते' ।।२०२४।।

अत्रैवं त्वनयोर्महापुरुषयोः प्रेम्णश्च दीर्घावधिं
वार्ता,ऽन्योन्यगुणस्तुतिञ्च कुरुतः सक्तौ तथाऽन्योन्यकम् ।
चक्रे भोजननिर्मितिं क्षणमियं माता शची, तत्प्रभु–
र्भिक्षां कारितवान् तथातिथियतिञ्छ्रीभारतीञ्छ्रद्धया ।।२०२५।।

भूयः स्वाश्रममेव गाङ्गपुलिनं यातः परस्मिन् दिने
श्रीमत्केशवभारती वरयति,र्मन्ये नवद्वीपके ।

संन्यासस्मरणार्थमेव गृहिणं प्राप्तो निमायिप्रभु,—
र्ह्रीसूर्येऽनुदितेऽत्र बोधमयतां लोकोऽन्धकारात्कथम् ? ॥२०२६॥

याते सम्प्रति भारतीयतिवरेऽधीरं बभूव प्रभो—
श्चित्तञ्चातिशयं, करोति स महात्यागस्य तत्सज्जनम् ।
पूर्णं यत्तु सुखं, यतो न भवितुं शक्यं सुखञ्चाधिकं,
त्यागेनैव तु लभ्यतेऽत्र तदिदं, त्यागोऽद्वितीयं सुखम् ॥२०२७॥

त्यागस्तपो ज्ञानमथात्र धर्मो
भक्तेः परं साधनकं त्विमानि ।
भक्तिस्तदीया तु नरस्य साध्यं,
स्पष्टं दिदेशाऽत्र तथाहि शास्त्रम् ॥२०२८॥

१११. **तत्त्वं दूरे तिष्ठति बुद्धेस्तत्साधनमिह चिन्त्यम् ।**
वेदशास्त्रभाषितधर्माणां सत्यान्नास्ति परोऽन्यः
तपसो यद्यपि नानारूपं, मौनात्परं न चान्यत् ।
ज्ञानसमं नहि पावनमन्यत् तत्प्राणस्तु विचारः
इह सर्वेषां सञ्चयसुखिता त्यागसुखं परमन्यत् ।
त्यक्ते सांसारिकसर्वस्वेऽसंसारी स्फुटमयते ॥

अग्रेऽधुना धरतु भावुक! हे प्रमातो!
वक्षो दृढं त्वतिशयञ्छृणु तावदत्र ।
संस्तभ्य साम्प्रतमुरस्तु महाप्रभोस्तत्—
त्यागस्य चोद्यममयं महतः प्रसङ्गम् ॥२०२९॥

भक्तवृन्दं गौरहरिश्च

११२. **सख्यो! मथुरां यान्तं दयितं निवारयामो हठतः ।**
कुलवृद्धानां बन्धुजनानां का नो व्रीडा-भीतिः ?
दैवध्वंसितकातरमनसां को लौकिकविधिनियमः ? ।
इह यत्सङ्गो निमिषार्धन्त्वपि दुस्त्यज इव जीवानाम्
असति मुकुन्दे गोकुलमध्ये तस्मिन्, किं जीवामः? ॥

आसीद् वृद्धिगतौ दिनप्रतिदिनं वैराग्यमेव प्रभो,—
र्विद्वेषेण विरोधिनामतिशयं सार्धं तथा तं प्रति ।
एतस्योपरि च प्रहर्तुमपि ते दुष्टस्वभावा जना,
जाताः केऽपि सुयोगमार्गणपरा, द्वेषी न किं किं क्रियात्? ॥२०३०॥

तच्छुश्राव महाप्रभुश्च निखिलं वृत्तं, विशुद्धात्मन–
स्तद्भ्रातृन् प्रति तन्निमायिनि दया जाताऽस्य चित्ते बहु ।
'एवं भ्रान्तजनास्तु केन विधिनाऽऽयास्यन्ति मार्गे तथा,?
(तूपेक्षाऽत्र यतेरपुण्यविषये, कारुण्यता प्रेमिण:) ॥२०३१॥

अमी भविष्यन्ति कथं कुवृत्तै:
समुद्धृता: ? श्रीहरिपादपद्मे ।
यास्यन्ति सत्ये शरणे प्रकारात्
कस्मा',त्प्रभुश्चिन्तयते मनस्वी ॥२०३२॥

गङ्गास्नाननिमित्तमेकदिवसे गच्छन्नभूच्छ्रीप्रभु–
र्भक्तै: सार्धमसौ, ददर्श पथि च द्वित्रान्निजस्योपरि ।
व्यङ्ग्योक्तिं दिशतो विरोधिपुरुषानूचे भवांस्तत्स्मयन्
(व्यक्ति: काव्यपथोत्तमा, व्यवहृतौ सद्वृत्तिरत्राभिधा) ॥२०३३॥

'पिप्पल्या: शकलं ततोऽत्र विहितं स्यात्तत्कफान्तो यतो,
जातस्तत्परिणाम एव विषये स्पष्टं विलोम: परम् ।
वृद्धिश्चैव तत: कफस्य शमनस्थाने बभूवाधिकं'
तच्चोक्त्वा हसति प्रभु: पुनरसावुच्चैर्निमायी स्वत: ॥२०३४॥

तद्भक्तेषु न कोऽपि गूढवचसोऽस्येदं रहस्यं ययौ,
नित्यानन्दयतिस्तु केवलमहो! स्थानेऽस्य चेत:स्थितिम् ।
दृष्ट्वा चात्र विवेद, निश्चितमयं कुत्रापि चान्यत्र च
त्यक्त्वाऽस्मान् गमनप्रसङ्गमधुना श्रीमत्प्रभुर्ध्यायति ॥२०३५॥

एकान्ते तमसौ स्म पृच्छति ततो, 'नो गूहते हे प्रभो!
वार्तां कामपि मद्भवान् स्वमनस: श्रीपादसंबोधनात् ।
अद्यत्वे ननु लक्ष्यते तव दशा किञ्चिद्विचित्रैव, तद्–
वेत्तुं वाञ्छति तस्य कारणमयं नित्योऽवधूतोऽद्य किम्?' ॥२०३६॥

एवं नित्यवचो निशम्य दिशते रुद्धस्वरस्तु प्रभु–
'स्त्वत्किं गोपनमेव सम्प्रति पुरा श्रीपाद! तद्भाविनि ।
प्राणास्त्वन्तु बहिश्चरा मम तथा, शक्तोऽत्र नो गोपने
किञ्चित्त्वत्स्वमन:स्थिते,स्तु कथने चेतोऽस्य मे दूयते ॥२०३७॥

मच्चेतोऽत्र न साम्प्रतं लगति, तन्नाहं स्वतन्त्रेऽधुना,
द्रष्टुं योग्यमथाद्य जीवजगतो दु:खं न मे वर्तते ।
स्वं संसारिसुखं तथाहि निखिलं मोक्ष्ये जगच्छ्रेयसे,
(श्रेयोदर्शनहेतवे भुवि सता प्रेयोजगत्त्यज्यते) ॥२०३८॥

गार्हस्थ्ये ननु साम्प्रतं मम मनो द्वीपे च न प्रीयते
तत्संन्यासिपथस्य पालनमहं कर्ता परिव्राजकः ।
दृष्ट्वा येऽत्र ममोत्तरोत्तरमहो! तद्वर्धमानं यशो
द्रुह्यन्त्यद्य विलोक्य भक्तसहितं मोमुद्यमानञ्च माम् ॥२०३९॥

द्वीपे ये मनसि द्विषन्ति, विहितं भक्तैर्मदीयार्चनं
दृष्ट्वा मेऽत्र च, ते यदा प्रतिगृहं भिक्षान्नखण्डार्थकम् ।
स्थाने मुण्डितमस्तकन्त्वपि यतिं द्रक्ष्यन्त्यटन्तं परं,
तेषां तत्स्वकुभावकारणमतस्तापानुभूतिर्भवेत् ॥२०४०॥

(तापानुभूतिर्हृदि वास्तु नैषां
तद्द्वेषहेतुः किमहं भवेयम् ? ।
मैत्रीप्रसङ्गादधिकः सतां वै
संसारमार्गे करुणाविभावः) ॥२०४१॥

तत्तापस्य तु हेतुनाऽत्र पथिकाः कल्याणमार्गस्य ते
द्वीपस्था भुवि भाविनो (हि शयितो बुद्धैस्तथा बोध्यते) ।
एतैः श्यामलकुञ्चितैस्तु नदियामध्येऽपि मे कुन्तलै–
र्लोकानां कृतमस्ति चाद्य हृदयं द्वेषाकुलं क्षोभितम् ॥२०४२॥

मृष्टाश्चामलकीजलेन तदिमे बालास्तथार्द्राः पुन–
स्तैलैः सम्प्रति गन्धितैः, सहृदयैर्भक्तैस्तथाऽज्ञानिनाम् ।
भ्रान्तानां प्रथयन्ति चेतसि नृणां द्वेषानलं सुप्तकं,
(लोके रागिजनास्तु भिन्नमतयः सौख्यं सहन्ते सताम्?) ॥२०४३॥

एतान् कुञ्चितकुन्तलान् स्वशिरसोऽद्धा नाशयिष्याम्यहं
त्यक्त्वा सूत्रशिखे तथाहि भविता वीतानुरागो यतिः ।
संन्यासी भवितुं मदीयहृदयन्तु व्याकुलं साम्प्रतं
शान्तिर्वास्तविकं सुखं नहि तथा मे वर्तमानस्थितौ ॥२०४४॥

तत्पूर्णाऽसमशान्तिवास्तवसुखे चान्वेष्टुमत्राधुना
संन्यासे पथि दीक्षितोऽहमधुना गन्ता प्रतिद्वारकम् ।
संन्यासी त्वपरिग्रही भुवि गतः सर्वप्रकारं तथा
मोक्ष्येऽहं विधितः परिग्रह(महो! दृश्योऽग्रजस्याश्रमः) ॥२०४५।

स्वयं भवांस्त्यागियतिर्महात्मा
श्रीपाद! पूज्यो मम चाग्रजश्च ।
कार्ये मदीयेऽत्र निधेहि भद्रे
न प्रस्तरं', विश्वपदोऽसि यस्मात् ॥२०४६॥

श्रुत्वेदं प्रभुतस्त्वकल्पितवचोऽधीरोऽभवन्नित्यजी,
देहस्यापि निजस्य तस्य न तदा संज्ञानमासीदत: ।
नेत्राभ्यामपतत्तथाह्यविरलं प्रेमाश्रुधारा, गलो
रुद्ध: सम्प्रति, तत्र रुद्धगलतस्तूचे रुदन् 'हे प्रभो! ।।२०४७।।

त्वञ्छक्नोसि विधातुमत्र निखिलं, सर्व: समर्थो भवान्,
शक्ति: का मम साम्प्रतं पथि च ते कुर्यां पुन: प्रस्तरम् ।
जीवन्तोऽसति किं प्रभो! त्वयि, भुवि स्थास्यन्ति भक्तास्त्वमी,?
(नाऽऽधेयं किमपीह तिष्ठति विनाऽऽधारं जगद्वस्तुकम्) ।।२०४८।।

सत्येवं भविता निमायिनि च का विष्णुप्रियाया दशा ?
वृद्धा स्थास्यति नात्र विश्वविरहा माता पुनर्जीविता ।
प्राणानां तदियं करिष्यति परित्यागं भवत्पृष्ठत—
(स्तूड्डीने विहगे विशालगगने किं रक्ष्यते पञ्जरम् ?) ।।२०४९।।

तस्याश्चान्तिमकामनाऽपि नहि सा पूर्णा पुनर्भाविनी,
सौभाग्यं निजदेहदाहविषयं भूमौ सुतेनात्मन: ।
तस्या नाप्तमथ प्रियेण भविता, जानीहि नूनं प्रभो!
माता मात्रनिमायिपुत्रवसुधा स्यान्नो भवन्तं विना' ।।२०५०।।

गम्भीरस्वरतो मनाक्कथयते नित्याऽवधूतं प्रभु:
'श्रीपादाऽखिलमेव बोधति भवान् ज्ञानी स्वयं सर्वथा ।
सर्वे तन्निजकर्मणां ननु तथाऽधीना जगत्प्राणिन:,
(कालस्थानबलेन कर्मतरुक: सूते फलं प्राणिनम्) ।।२०५१।।

यावद्दिनं भवति यस्य च येन योग:
स्थातुं स तेन सह शक्ष्यति तावदेव ।
प्रारब्धकर्मविवशा: स्वत एव सर्वे',
स्वशृङ्खलानियमितो ननु कर्मलोक: ।।२०५२।।

तस्थौ मौनमयं निशम्य च वचो नित्य: प्रभो: साम्प्रतं,
प्राप्तोऽसौ चलितो मुकुन्दनिकटे चोत्थाय तस्मात्प्रभु: ।
आसीद्दत्तमुकुन्दकण्ठपदकव्यक्तिस्तथा सुस्वरा
तद्गीतं पदकं प्रभो: प्रियमभू,त्स्वादु स्वर: कस्यचित् ।।२०५३।।

सन्तुष्टिं कुरुते स्म चात्ममनस: सोऽयं मुकुन्दाऽध्वना
श्रीमद्भक्तिरसामृतात्मकपदाऽऽगानश्रुते: प्रायश: ।
दृष्ट्वाऽऽयान्तमसौ प्रभुं स्ववसतिञ्चोत्थाय दत्तो द्रुतं
चक्रे श्रीप्रभुपादवन्दनमथ स्थातुं ददौ चासनम् ।।२०५४।।

ऊचे तं ह्युपविश्य तत्क्षणमयं गातुं मुकुन्दं प्रभुः
किञ्चिद्भक्तिरसं तथाहि पदकं गायन्मुकुन्दोऽभवत् ।
सार्धं तन्मधुरस्वरेण, पदकञ्छ्रुत्वा प्रभुर्गद्गदः
प्रीत्याऽभूच्च, मुकुन्दगीतमवनीपृष्ठेऽमृतञ्छ्रीपदम् ।।२०५५।।

प्रेम्णा तत्परिरम्भणं विदधता चोक्तं 'मुकुन्दाऽधुना
श्रोतुं त्वत्पदकं पुनर्ननु कदा पश्यानि तन्मेलिता ?' ।
आश्चर्येण ससंभ्रमन्तु चकितः स्थाने मुकुन्दोऽवद–
'न्मर्त्यो द्वैतदशः कथं कथमहो! तेऽस्मि प्रभो! सेवकः ।।२०५६।।

आज्ञा ते भविता यदापि, पदकं, गाता तदैव प्रभो!'
प्रोचे सम्प्रति संभृताश्रुनयनो 'मोक्ष्ये मुकुन्दाऽधुना ।
गङ्गाद्वीपममुञ्च मुण्डितशिरा धृत्वा कषायाम्बरं
द्वारद्वारकभिक्षयाऽत्र शमनं कर्ता क्षुधश्चात्मनः ।।२०५७।।

वस्ता तन्नगराद्बहिर्जनभरादाभुग्नकुट्यां पुन–
र्दूरञ्छून्यगृहे च देवसदने (नस्थायिवासो यतिः) ।
गौराङ्गो भविताऽधुना भुवि गृहत्यागी विरागी त्वहं',
जम्बूद्वीपनिवासिनां द्विजसतामन्तश्चतुर्थाश्रमे ।।२०५८।।

मन्ये चात्र मुकुन्दकोपरि ततोऽभूद्वज्रपातोऽधुना,
मर्माघातकरं वचः क्षणमिदञ्छ्रुत्वा मुकुन्दोऽभवत् ।
मूर्च्छायामिव, तच्छरीरमधुना घर्मैस्तथाऽऽर्द्रं गतं,
देहे सत्त्ववतां तथाघटनया द्राक्सात्त्विकस्योदयः ।।२०५९।।

अत्यन्तं स तु कातरस्वरगलः क्रन्दंश्च बालोपमो
दुःखार्तो वदति 'प्रभो! भणति किं? वार्तान्तु हृद्दाग्किाम् ।
एतावान् भवतैतदर्थमपरः स्नेहोऽत्र किं वर्धितो ?
(हा! लोके ह्यनुरागसीमनि सतो वैराग्यभावोदयः) ।।२०६०।।

यद्येवं करणीयमेव भवतोऽभूदत्र तन्नाथ! हे!
त्वस्माकं परिरम्भणं ह्यतुलितं प्रेम्णा च सम्भोजनम् ।
पार्श्वे स्वे ह्युपवेशनं रहसि वै गोप्याभिधानन्तथा
कारङ्कारमतोऽत्र दाम्नि विधितो रागे बबन्धैव किम् ? ।।२०६१।।

हेऽस्माकं भुवि जीवनैकशरण! द्वीपे नवे त्वां विना
भूत्वा कस्य वसाम, कोऽत्र भविता नः प्रेमवाक्-श्रावकः? ।
श्रीसंकीर्तनपद्धतेर्ननु पुनः कः स्यात्तथाशिक्षको ?
नः पाठस्य भवेत्तथाहि भगवन्नाम्नस्तु कोऽध्यापकः ? ।।२०६२।।

कस्मात्तवाऽऽस्यकमलाऽनवलोकनेन
प्राणन्त एव भविताऽत्र वयं द्विरेफाः? ।
किञ्चाद्य निश्चितमिदं भवता,ऽनुकम्पां
हे जीवनाश्रय! विधेहि भवेऽस्मदीये' ।।२०६३।।

स्वे कण्ठेऽकृत साम्प्रतं सहृदयो दत्तं रुदन्तं प्रभु—
स्तस्योष्णाश्रु तथास्वकोमलकरादूचे पुनर्मार्जयन् ।
'एतावन्न मुकुन्द! सम्प्रति भवाऽधीरस्तु, ते रोदनं
दृष्ट्वा मे हृदयं तथास्ति विदलद्(वात्सल्यभावोऽन्तिमः) ।।२०६४।।

त्वन्नाहं भविता कदापि च पृथक्, हृद्येव मे स्याः सदा'
संबोध्यैवमसौ मुकुन्दमधुनाऽऽयातो गदासन्निधिम् ।
एवं भागवतो गदाधरसखाऽकाले विलोक्यागतं
त्वल्पाश्चर्यमिवाकृतात्मनि, नहि क्रामत्यकाले महान् ।।२०६५।।

कृत्वा शीघ्रममुष्य पादनमनं, तस्मै ददौ चासनं
स्थातुञ्चाद्य विलोक्य तत्प्रभुदशां भीतो यथाऽभून्मनाक् ।
नाद्यावध्यमुना कदापि सुहृदो दृष्टा तथास्याऽऽकृतिः,
प्रेमी मूर्तिमतोऽपि वेत्ति निजकप्रेमास्पदस्य स्थितिम् ।।२०६६।।

चेष्टायामभवत्तदाऽस्य सुहृदस्त्यागोऽधिकं वेदना,
वैराग्यं, दृढता, तथाह्युपरतिः, स्थाने ममत्वं परम् ।
भव्याः सम्प्रति भावना मनसि किं जाने न किं संभृता,
मौनस्याकृतिरेव तस्य मनसो भावं करोति स्फुटम् ।।२०६७।।

किञ्चिन्नापि गदाधरोऽत्र वदितुञ्छक्तोऽभवत्साम्प्रतं
ब्रूतेऽयन्तु 'गदाधर!' स्वयमत'श्चात्यन्तमेवैककम् ।
प्राप्तः श्रावयितुं त्वदीयनिकटे त्वां दुःखपूर्णं वच—
स्तन्नासाधु मनुष्व, किं मम सखे! नासाधु मन्ताऽसि तु?' ।।२०६८।।

मन्येऽयन्तु गदाधरोपरि तदा जातः प्रहारोऽपरो
मौनञ्चास्ति स तद्वदेव, वचसश्चास्यापि तेन प्रभोः ।
दत्तं नोत्तरमत्र किञ्चिदधुना, ब्रूते ततस्तु प्रभु—
'र्भावी युष्मदहं पृथङ्', (नहि सदा सङ्गः क्षितौ प्राणिनाम्) ।।२०६९।।

एतज्जगद्भोगपदार्थकानां
कर्ता परित्यागमहं समस्तम् ।
तथा करिष्ये यतिधर्मपोषं'
भवेऽस्तु पुष्टिर्हरिनामभक्त्याः ।।२०७०।।

तन्मन्ये तु गदाधरोऽभवदहोऽद्धा काष्ठमूर्तिस्त्विद–
ञ्छ्रुत्वाप्यस्य वचस्तथावदधुना तस्थौ स मौनं पुनः ।
एतज्जातमवश्यमेव सुहृदश्चैतन्यशून्यं वपुः
शीघ्रं तस्य लुलोट तु स्वयमहो! तत्पृष्ठभित्तिं प्रति ॥२०७१॥

तत्पार्श्वे स्थित एव च प्रभुरयं त्वल्पक्षणानन्तर–
ञ्छीर्षं तत्र गदाधरस्य, पदयोः संलोटति स्म प्रभोः ।
तन्नेत्रद्वयनिस्सृताश्रुजलयोर्धाराद्वयं क्षालनं
संयोगात्कुरुतः स्म पद्मपदयोः प्रेमास्पदस्यात्मनः ॥२०७२॥

श्रीमच्छीतलकोमलाङ्घ्रियुगले तस्योष्णवाष्पाम्बुभि–
स्तैरेकं पतति स्म शैत्यसदृशं तच्चाधिकं साम्प्रतम् ।
शीर्षं तेन गदाधरस्य बलतश्चोत्थाप्य कृत्वाऽऽत्मनः
क्रोडे मार्जयताऽस्य वाष्पसलिलञ्चोक्तं प्रसङ्गोचितम् ॥२०७३॥

'एवञ्चेद् भविता गदाधर! तदाधीरः कथं वस्तुतो
निर्वाहे निजधर्मभावजगतः शक्तो भविष्याम्यहम्? ।
शक्तो द्रष्टुमहं भवामि निखिलं, नैवं भवन्तं परं
गङ्गाद्वीपसखं रुदन्त(मधिकः कश्चित्स्वतोऽपि प्रियः) ॥२०७४॥

एवं निश्चितमद्य केवलमहत्प्रेमोपलब्ध्यै मया,
विघ्नोपस्थितिमद्वितीयहृदयः कर्ता तथैवं यदि ।
संकल्पे त्वमले शुभे मम, तदा तत्कर्म नो कर्हिचित्–
कर्ताऽहं(भवसागरे सहचराऽऽकांक्षाऽनुपाल्या सता) ॥२०७५॥

दूनं त्वान्तु विहाय शाश्वतसुखं तच्चापि नेच्छाम्यहं,
किं ब्रूषे?, न कथं ब्रवीषि?' महता कष्टेन रुद्धस्वरः ।
ब्रूते वेपथुवाग् गदाधरसखा 'शक्नोमि वक्तुं तु किं, ?
सामर्थ्यं ननु कस्य चात्र वदितुं त्विच्छाविरुद्धं तव? ॥२०७६॥

गङ्गाद्वीपनिवासिनां भुवि तले त्वन्तु स्वतंत्रेश्वर'–
'स्त्वच्चाज्ञां तु लषामि' तत्प्रभुवचो(धन्यः प्रियेणार्थ्यते) ।
स्वं वेगं न गदाधरोऽधिकमितो रोद्धुञ्छशाकाऽधुना,
चीत्कारेण तथोच्चकैरयमहो! चारब्धवान् रोदनम् ॥२०७७॥

तस्याऽऽरोदनतः प्रभुस्त्वपि तथाऽधीरोऽभवन्निश्चयी
तत्कालस्य च दृश्यमत्र करुणापूर्णं तथासीद्धहु ।
क्रोडे प्रेममये तथाहि शयितोऽबोधार्भकाभोऽधुना
रोदित्यद्य गदाधरोऽस्य सुहृदो विस्फुट्य-विस्फुट्य च ॥२०७८॥

तच्छीर्षे मृदुधैर्यबन्धनमसौ हस्तं तथाऽऽवर्तयन्
कुर्वन्नस्ति निजं प्रभुः, परिमृजन् वाष्पं पटान्तेन च ।
ब्रूते, 'मन्न पृथग्गदाधर! सखे! स्थाता भवान् कर्हिचिद्—
यत्र क्वापि भवामि भाविनि, परं सङ्गे धरिष्याम्यहम् ॥२०७९॥

एतावत्त्वमधीरभावहृदयो धीरो भवस्यद्य किं ?
स्यान्मे नापि विना त्वया रुचिकरं वैकुण्ठसिंहासनम् ।
एवञ्छीघ्रमधीरतां जहि विधां, तद्भद्रमेवाखिलं
कर्ता श्रीभगवांस्तु मङ्गलमयो', ह्यात्मा परात्मप्रियः ॥२०८०॥

प्राप्तोऽयं प्रभुजी गदाधरकरं गृह्णंस्तथेदं ब्रुवन्
वासौकश्च, गदाधराक्षियुगलञ्चासीत्तु रक्तायितम् ।
नासातोऽम्बु पतच्छरीरमभवत्तस्यास्थिरञ्चाधुना
धत्ते क्वापि पदं परन्तु पतति ह्यन्यत्र शून्यात्मनः ॥२०८१॥

सम्पूर्णं ननु कम्पते स्म तु वपुर्यन्त्रोपमस्तत्प्रभोः
साहाय्येन करस्य याति सुहृदः सोऽयं गदापण्डितः ।
आसीत्तत्र महाप्रभुः स्वयमहोऽसौ सावधानस्तदाऽ,—
व्यक्तोऽकिञ्चनके तथाहि पतिते यातीह तु व्यक्तताम् ॥२०८२॥

सर्वं वासबुधो बुबोध विषयञ्चागत्य वार्तामिमां
साकल्येन तु पूर्वमेव तमहो! नित्यो बभाषे यतिः ।
तद्दृष्ट्वैव तदा रुदन्नयमभूत्स्थाने निमायिप्रभु,—
ञ्छ्रीवासः प्रथितो निमायिपथतो, वासो विना किञ्छ्रिया? ॥२०८३॥

'तुल्यस्त्वत्र पितुर्भवान्मम, यदा कर्ता हतोत्साहितं
मामेवं नदियाभिभावकजनश्रेष्ठो भवानेव तु ।
धर्मस्याद्य निजस्य पालनमहञ्छक्ष्यामि कर्तुं कथं ?
(नौधर्मोऽम्बुधिभूतले सरति वै कैवर्तवृद्धाशिषा) ॥२०८४॥

कार्यं किञ्चिदशोभनं भुवि तले कर्तुं न वै याम्यहं,
संन्यासं न दधेऽपि तन्निजतनुस्वार्थस्य हेतोः परम् ।
अद्यत्वे मम तत्कुसीदिकसमा द्वीपे दशा विद्यते
स्याद्यन्नाम मह,त्परं स्वनिकटे नैकोऽपि च स्यात्पणः ॥२०८५॥

पार्श्वे गौरनिमायिनो मम हृदि प्रेम्णस्त्वभावोऽधुना,
सर्वेषां भवतां न भोगजगतां वाञ्छा तु संसारिणाम् ।
नो चास्ति त्रुटिरेव चात्र गृहिणां भक्तात्मनां प्रेमिणां
(दूरं गच्छति वस्तु कामिजगतः क्रोडे तथाऽकामिनाम्) ॥२०८६॥

यूयं भक्तजनास्तथाहि निखिला: प्रेमक्षुधापीडिता–
स्तद्ग्राम: परदेशमद्य नदियाभूमेर्विदूरं यथा ।
गत्वाऽन्यत्र महाजनो हि विषये कृत्वा धनस्यार्जनं
नीत्वाऽऽयाति पुन: स्वकीयवसतौ नीडं विहङ्गोपम: ।।२०८७।।

तैश्चात्मीयकुटुम्बपालनमसौ वित्तैर्विधत्ते तथा
कृत्वा प्रेमधनार्जनं त्वहमपि द्वीपेऽखिलानां कृते ।
आनेष्यामि, तदोपभोगमखिला गङ्गानवद्वीपिन:
कर्तारोऽस्य वयं तथाहि मिलिता:' प्रीतिर्हि सङ्घेऽधिकम् ।।२०८८।।

श्रुत्वा मिष्टवच: प्रभो:, कथयति क्षीणस्वरो वासजी,
'द्वीपे ये वरभागिनोऽमृदुहृदो भक्ता भविष्यन्ति तु ।
प्रत्यावृत्तिमथात्र यावदवनीपृष्ठेऽमृताश्चैव ते,
शक्ता भोक्तुममी तवार्जितधनं भक्तप्रभो! भाविन: ।।२०८९।।

स्थातुं त्वान्तु विना भवेम न वयं द्वीपे क्षितौ जीविता:'
'पूज्य: पण्डितजी! तथाहि गृहिणां स्थाने भवानेव न: ।
तल्लज्जा लगतीह तस्य कथने किन्तु प्रसङ्गादहं
वक्तुं ह्येव भवामि (पादनमनं नम्यस्य कार्यं सदा) ।।२०९०।।

एतावद्दिवसांस्तथाहि भवतो द्वारैव सर्वे वयं
भक्ता: प्रेमयुता निरन्तररता द्वीपे च संकीर्तने ।
श्रीमद्भक्तिरसामृतस्य नदियाभूमौ तथाऽऽस्वादनं
कुर्वन्तस्तु बभूवुरत्र (हरिणा तुल्यो हि तद्योजक:) ।।२०९१।।

आशीर्वादमथाऽधुना भुवि भवान् दत्तां तथा, पूर्णत:
शक्त: पालयितुं भवानि जगतीमध्ये स्वकीयं व्रतम्' ।
तन्मध्येऽत्र समागतोऽपि सुहृदो गुप्तो मुरारि: प्रिय–
स्तद्वार्ताश्रुतिमात्रतस्तु पतित: सोऽयं परं मूर्च्छित: ।।२०९२।।

यातेऽयञ्च बहुक्षणे कथयते चैतन्यलाभे सति
'द्वीपे सर्वसमर्थको भुवि भवान् कस्यापि मन्ता मनाक्? ।
कल्याणं जगतोऽस्य यत्र विषये भूमौ भवान् बोधिता,
कामं त्वत्प्रियलोकवृन्दमनसां स्यात्तत्कियत्त्वप्रियम् ।।२०९३।।

तत्कर्ताऽपि, परं स्वकीयहृदयादस्मान्नहि व्यस्मरो,
हे त्वस्मत्पतितैकमात्रशरण! त्वत्पादपद्मस्मृति: ।
अस्माकं हृदये स्थिराऽस्तु सततं तद्याहि दत्वाऽऽशिष–
ञ्छुष्कं त्वच्चरणस्मृतावपि तथाऽदो जीवनं सार्थकम् ।।२०९४।।

अस्ति त्वत्पदविस्मृतौ भुवि तमो,ऽज्ञानस्य हेतुस्तथा
लोकानां तम एव', साम्प्रतमयं कुर्वन्मुरारे: प्रभु: ।
गाढालिङ्गनमत्र तत्कथयते 'त्वं जन्मजन्मान्तरा–
त्प्राणानां मम विद्यसे प्रियसुहृत्, (सौहार्दमत्राऽमृतम्) ।।२०९५।।

युष्मानेव च विस्मरामि भुवि चेत्कर्ता किमत्र स्मृतिं
रक्षित्वैव, मम स्मृतिस्तु विधृता त्वत्प्रेमिबन्ध्वर्थकम्' ।
एवं तन्निजभक्तवृन्दमधुना संबोध्य यात: प्रभु:
स्वं गेहं नदियानिमायिहृदय:, प्रेमी हि लोकोत्तर: ।।२०९६।।

वार्तेयन्तु तदन्तरङ्गनिवहे विद्युत्समाऽत्र स्तृता,
शृण्वन्त्यत्र तु येऽपि, हस्तमलनं कुर्वन्ति चैव त्वमी ।
ब्रूते कोऽपि तथाहि साम्प्रतमथ श्वासं तथोर्ध्वं त्यजन्
'हा! भूयोऽयमहो! सरोजनयन: प्रेमाक्तदृष्ट्याऽधुना ।।२०९७।।

द्रष्टाऽस्मान् प्रति नो', पर: कथयते 'दृष्टं पुनर्भावि न
श्रीगौराङ्गमनोहराब्जवदनं द्वीपक्षितौ त्वद्य किम् ?' ।
एतत्कुञ्चितकेशभारमधुना को निर्दयी नापित:
कर्ता तच्छिरसो विभक्त(मतुलो हन्ता हि लोके नर:) ।।२०९८।।

केशै: कुञ्चितकैस्तथाहि रहितं द्वीपे शिरो मुण्डितं
भक्तानां जनयेत्पुनश्च हृदये दाहं तथा कीदृशम् ?' ।
'काषायाम्बरतो निमायिसुमना निर्माय झोलीं प्रभु–
र्भिक्षार्थं भ्रमिता कथं ? प्रतिगृहं माधुर्यभावाश्रय:' ।।२०९९।।

'एतौ चारुणकोमलौ तु चरणौ पृथ्व्या: कठोरे तले
कस्माद्यातुमनावृतौ च भवतां देशे-विदेशे पुन: ?' ।
एकोऽन्यो वदतीह सम्प्रति तथा स्थाने तृतीयोऽपर:
पश्चात्तापमथ स्वकीयहृदये कुर्वन् बभाषे तथा ।।२१००।।

'स्कन्धालम्बिषु कुञ्चितेषु किमत: कृष्णेषु केशेषु तत्–
तैलं तेषु सुगन्धितञ्च मलयिष्यामो वयं नाधुना ? ।
जातोऽन्तो नदियानिवासिजनतातत्पुण्यपुञ्जस्य किं ?
द्वीपात्किं नशितुं तथेच्छति परं सौभाग्यसूर्योऽधुना ? ।।२१०१।।

लीलाभूमिमिमां निजाञ्च नदियाप्रेमावनीनागर–
स्त्यक्त्वाऽन्यं कमपीह पावनमयं कर्ता प्रदेशन्तु किम्? ।
स्थाता यत्र स नूनमेव भविता सौभाग्यशाली क्षितौ,
किं क्रूरग्रहवक्रदृष्टिरधुना द्वीपे नवेऽत्राऽपतत् ? ।।२१०२।।

भक्तानामधुनैकमात्रमपरः प्रेमप्रदाता कथं
त्यक्त्वा यास्यति नो तथा विलपतश्चैव प्रियो द्वीपतः ।
किं सर्वे वयमेवमेव नदियाभूमौ त्वनाथोपमाः
सीदन्तो निजजीवनस्य दिवसाञ्छेषांश्च नेष्यामहे ।।२१०३।।

तद्वार्ताञ्छृणुमो वयं किमधुना जाग्रत्स्थितौ वस्तुतो,
नः स्वप्नस्य तथा भ्रमोऽयमथवा, तु स्वप्नवज्ज्ञायते'।
एवं ते प्रलपन्ति चात्र विविधं दुःखं स्मरन्तः प्रभो–
र्भक्ता भाविवियोगजन्य,मधिका योगाद्वियोगे रतिः ।।२१०४।।

शचिमाता गौरहरिश्च

११३. धातस्तेऽर्भकलीला क्वचिदिह ?
संततिपितरौ सोदरबन्धू भगिनीभ्रातृमनुष्यौ
मित्रवयस्यौ सुहृत्सज्जनौ सख्यौ कान्तादयितौ।
ममतामैत्रीप्रणयप्रीतीस्तेषु प्रथमं तनुषे
संयोजनतोऽन्योन्यं गाढं, यज्जगतीयं दीव्यति।
क्षणे त्वकालेऽपरिपाके त्वं कुरुषे द्वन्द्ववियोगम्
व्यर्थमपूर्णार्थात्मकयोरिह, तत्त्वददयता सिध्यति।।

भक्तानां मुखतो निशम्य परितः संन्यासवार्तामथ
स्वात्माधारनिमायिनोऽत्र जननीदुःखाब्धिपारो नहि ।
किङ्कर्तव्यविमूढमानससमा सा विस्मृतात्मा यथा
भ्रान्ता स्वं परितोऽद्य पश्यति यथा, चित्रा ह्यनाथस्थितिः ।।२१०५।।

अग्रे पृष्ठमसौ च पश्यति तथा चाकाशमेव क्षणं
मन्ये याचति वै दिशश्च विदिशं साहाय्यभिक्षामियम् ।
दुःखिन्यास्तु निमायिमात्रजगतो मातुश्च धैर्यं क्षणा–
च्छ्रुत्वा नष्टमिदन्तु लोकमुखतो, मानं हि लोकश्रुतिः ।।२१०६।।

क्रोशन्ती रुदती च पुत्रविरहाऽऽशङ्कार्तिदावाग्निना
सा तप्तेव, महाप्रभोश्च निकटे माताऽऽजगामाऽधुना ।
कातर्यातिशयेन मार्मिकगिरा पीडां हृदश्चात्मनः
कुर्वाणा प्रकटं जगाद, विधवा माता हि पुत्राऽऽश्रया ।।२१०७।।

'यत्किञ्चित्त्वधुना शृणोमि सुतक! द्वीपे निमायिन्! कियत्–
तत्सर्वं ननु विद्यते त्ववितथं?', साक्षान्न तन्निर्गतम् ।

बोधन्त्या: सुतविप्रलम्भमशुभं मातुर्मुखाद्दारुणं,
माता पृच्छति तत्स्म सम्प्रति तथा ह्यस्पष्टरूपेण सा ।।२१०८।।

किञ्चित्त्वन्यमनस्कभावसुमना: पप्रच्छ शीघ्रं प्रभु—
'स्तद्वार्ता कतमा ?', तदा तु हृदयं मातु: प्रभुप्रश्नत: ।
स्थानस्थानत एव दीर्णमधुना ब्रूयात्कथं स्वानना—
च्चेत:कम्पिवचस्तथेयमवदत्कृत्वा कठोरं मन: ।।२१०९।।

'ब्रूयां पुत्र! कथं?, लिलेख तु विधिर्जाने न किञ्चापद:?
सर्वास्त्वेतदनन्तदु:खविधवानार्यास्तु भाग्ये पुन: ।
खण्डं गेहमयाद्विहाय विपुलं मे विश्वरूपो हृदो,
मां मर्मव्रणितां विधाय नहि स प्रत्यावृतोऽद्यावधिम् ।।२११०।।

मध्ये चैव तथा पिता तव गतो दत्वा तु मे कैतवं,
दु:खं तत्पतिशोकपर्वतसमं तच्चापि भीमं मया ।
दृष्ट्वा केवलकं तवैव वदनं सोढं, स्फुटं ते मुखं
पद्माभन्तु विलोक्य चात्र विपदो याता हि मे विस्मृतौ ।।२१११।।

दु:खं क्वापि यदा बभूव, रुदितं लीत्वा मया त्वत्सदा,
तत्स्पष्टं नहि ते रुरोद पुरत,श्चन्द्रोपमं सुन्दरम् ।
न म्लानं मम रोदनात्तव मुखं भूमौ कदाचिद् भवेद्,—
द्रष्टुं न प्रबभूव सुन्दरमुखे स्थाने तव म्लानताम् ।।२११२।।

द्वीपे चात्र नवे त्वनाथजगतस्तद्दु:खदावानले
दु:खिन्या मम चन्द्रशीतलमुखञ्चैव ज्वलन्त्यास्तथा ।
आसीत्केवलमाश्रयस्तव पुनस्तस्यैव शैत्ये स्वकं
तत्तापञ्छमितञ्चकार, (भुवने ह्येकोऽस्तु कोऽप्याश्रय:) ।।२११३।।

श्रृणोमि भक्ताननतस्तथाऽधुना
मह्यं प्रदाय त्वमपीह कैतवम् ।
बहिस्तु यातुं कृतमानसोऽसि, किं
पुत्र! त्विदञ्चोचितमस्ति सर्वथा ?' ।।२११४।।

तन्मातुर्वचनं तथाहि करुणापूर्णं पुन: कातर—
ञ्छ्रुत्वाऽयं किमपीह नोत्तरमदाद् गौरो निमायी सुत: ।
तद्बाष्पप्लुतलोचनोऽवनिमुखं पश्यन्नभूत्केवलं,
म्लानञ्चास्य तथाहि चन्द्रवदनञ्छीते हिमेनाप्रभम् ।।२११५।।

सोऽयं भाविवियोगदु:खविषयाज्जातो विषण्णो मनाग्,
याता वृद्धिमधीरताऽधिकमपि स्थाने च मातु: परम् ।

अत्यन्तं भयविह्वला पुनरियं पप्रच्छ चार्तस्वरा—
'त्सत्यं सत्यमहो! निमायिसुतक! ज्ञातुं तथेच्छाम्यहम् ।।२११६।।

वार्तेयन्तु तथैव किं?, न भविता कार्यञ्च मौनस्थिते—
र्देहि क्लेशमतोऽधिकं नहि तथा मौनेन मे साम्प्रतम् ।
तन्मां ब्रूहि तु सत्य-सत्यमधुना,' तत्स्वीकृतञ्छ्रीमता,
सारल्येन च, 'यच्छ्रुतं किमपि तन्मात्राऽत्र सत्यं तथा' ।।२११७।।

दुःखं जातमपारमत्र तु कियन्मातुस्तथैतच्छ्रुते—
स्तद्व्यक्तौ प्रभवेत्कथं ननु कवेः स्पष्टं जडा लेखनी? ।
नेत्राभ्याञ्च निरन्तरं पतदभूद् धाराश्रु मातुस्तदा
तस्याश्चार्द्रमथाम्बरं तदकरोच्छुष्कं मुखं क्लेदयत् ।।२११८।।

तन्माता रुदती जगाद 'गमने कुर्यां निषेधं तव,
त्वं नो पुत्र! तु मानयिष्यसि, ततोऽसावेव मे प्रार्थना ।
क्रीत्वाऽल्पं गरलं धरन्मम कृते याहि त्वितो गेहतः
कश्चिन्नास्ति ममाग्रतस्तु नदियाखण्डेऽत्र पृष्ठे तथा ।।२११९।।

त्वत्पृष्ठे विषमत्र केन गृहिणा मर्तुं तथाऽऽनायये,
बालाऽस्त्यद्य तथा त्वबोधहृदया विष्णुप्रिया पूर्णतः ।
अस्याः सम्प्रति संसृतेः परिचयो नास्त्येव किञ्चिद्यतो
वस्तु क्रीतमथापि नैकपणतः किञ्चित्तयाद्यावधिम् ।।२१२०।।

चेत्तामेव दिशेय चात्र गरलं नेतुं, तु नैव क्षमा
यातुं सा प्रथमं, चलेदपि तदा मत्वा त्वबोधाञ्च ताम् ।
बालां कोऽपि न दास्यतीह, ननु येऽत्राऽऽयान्ति चैते तथा
भक्ताः, कारणतस्तवैव निखिलाश्चायान्त्यमी कर्षिताः ।।२१२१।।

गेहादत्र गते पुनस्त्वयि तथाऽऽयास्यन्ति कस्मात्त्वमी ?
द्वीपे शून्यगृहे त्वमेव भुवने मे केवलो दीपकः ।
मद्गेहं वसता त्वयाऽपि तिमिरे दीव्यत्सदा विद्यते
यासि त्वं ह्यधुना विहाय गृहतश्चार्धं ज्वलन्तीन्तु माम् ।।२१२२।।

याहि त्वं सुत! याहि सम्प्रति मुदा, यावत्तु मासान्नव
स्वे गर्भेऽसि धृतो मया परमतश्चैवाद्य संबन्धतः ।
कृत्वेयन्मम कर्म याहि तु, तथा कश्चित्परोऽप्याश्रयो
दुःखिन्यास्तु विषं विनाऽस्ति नहि मे (जीवन्नरःक्लिश्यते) ।।२१२३।।

गङ्गायामपि च प्रकूर्द्य सहसा प्राणार्पणञ्छक्यते
कर्तुं तद्बहु सम्भवं तु, पुरुषो निस्सारयेन्मां ततः ।

कश्चिचद्द्वीपदयालुरत्र, ननु तत्स्थात्र्या गृहेऽन्तस्तु मे
दुःखिन्या विषमेकमेव शरणं नष्टाश्रयायास्तथा' ।।२१२४।।

तन्माता भुवि मूर्च्छिताऽत्र पतिता वृद्धा ब्रुवाणा, प्रभुः
पाणिभ्यां ननु दुःखिनीं स्वजननीमुत्थापयामास तत् ।
तत्सम्पूर्णशरीरधूलिपटलं लग्नं स्ववस्त्रेण त–
त्पुत्रो मार्जयति स्म धैर्यमवदन्मातुस्तथा बन्धयन् ।।२१२५।।

'गर्भेऽहं जननि! त्वयास्मि तु धृतो, भूयो मदीयं मलं
मूत्रं मार्जितमत्र, भोजनजलैः संपाल्य वात्सल्यतः ।
एतावद्भुवि वर्धितोऽस्मि विषये शिक्षाप्रदानात्ततः
केन स्यान्नु तवर्णतो भुवि पुनर्मुक्तिः प्रकारेण मे ।।२१२६।।

मातर्जीवितदेहचर्म यदि वा चाकृष्य ते पादयो–
र्निर्माय स्वमुपानहौ तु करवै, लोके न तस्मिन्नपि ।
पर्याप्तं परिशोधितुं प्रभुरहं तावन्महत्ते ऋणं,
ह्यासीदेष ऋणी तथापि भविता ते जन्मजन्मान्तरात् ।।२१२७।।

सत्यं सत्यमहं वदामि वशगं मातर्वचो मे यदि
स्यात्प्राणार्पणतोऽपि तर्हि मुदितां कर्ता ध्रुवं त्वामहम् ।
किं कुर्या त्वहमत्र, वै मम मनो नास्ते वशे मामके
कर्तुं तादृशमस्मि चाद्य विवशो (धन्यो वशे यन्मनः) ।।२१२८।।

त्वं द्वीपेऽत्र नवेऽसि वीरजननी, श्रीविश्वरूपोपम–
द्वीपक्ष्माऽद्भुतदिव्यपुत्रधरणीसौभाग्यमाप्तं त्वया ।
एवं नो तव शोभते भुवि नवद्वीपे विलापः पुन,–
(र्दिव्या वै जननी तथाहि धरणी लोकोत्तरस्याऽऽत्मनः) ।।२१२९।।

प्राणेभ्योऽपि च पञ्चवर्षमपरं पुत्रं प्रियं स्वं ध्रुवं
तन्माता विससर्ज चात्र तपसे यातुं सुनीतिः पुनः ।
माताऽऽज्ञां प्रददौ तथा भगवतः श्रीरामचन्द्रस्य सा
गन्तुं काननमात्मजाय तु समं वध्वाऽद्वितीयाय वै ।।२१३०।।

श्रीरामेण समं स्वलक्ष्मणसुतं माता सुमित्रा वने
चक्रे चाग्रहपूर्वकं ननु गृहे सत्यां स्नुषायामपि ।
माता चात्र मदालसा भुवि तले संन्यासदीक्षां ददौ
गेहे जन्मत एव सारहृदया सर्वात्मजेभ्यः स्वयम् ।।२१३१।।

मातॄणां किमपि त्वमत्र विषये न्यूनाऽसि तासां कथं ?
मे मातस्तव कोटि-कोटि नमनञ्छ्रीमत्पदाम्भोजयोः ।

पुत्रस्नेहवशाच्च सम्प्रति ममोद्देश्ये न बाधां क्रिया,
(माता स्याद्यदि बाधिका भवतु का शक्ति: पुन: साधिका?) ।।२१३२।।

संन्यासधर्मचरणानुमतिन्तु मात—
देहि प्रसन्नमनसा स्वसुताय मह्यम् ।
आशीर्वचो यदधुनेदृशमत्र सम्यक्
स्वं जीवने व्रतमिदं भुवि निर्वहेयम्' ।।२१३३।।

माताऽश्रूणि तथा जगाद मृजती 'नाद्यावधिं पुत्र! ते
दृग्क्षेपमहन्तु चाकृषि तथा कार्येऽत्र कस्मिन्नपि ।
यस्मिन् प्रीतमना: पुनस्त्वमभवस्तस्मिन् प्रसन्ना सदा,
(वृक्षै: स्वोरसि पुष्पितैश्च फलितैर्माता धरा प्रीयते) ।।२१३४।।

गार्हस्थ्ये क्षुधिताऽत्र काममभवं, स्थानात्सहस्रात्पर—
श्चक्रे सुन्दरभोजनस्य रुचित: स्वादु प्रबन्धं तव ।
कार्यं कर्तुमहं क्षमा किमपि तन्नेच्छाविरुद्धन्तु ते,
शक्यं नो भजनं तथा भगवत: कर्तुं गृहस्थेन किम् ? ।।२१३५।।

श्रीवासञ्च गदाधरं गुरुमथाऽद्वैतं मुकुन्दं तथा
नीत्वाऽत्रैव तथाहि भक्तनिवहं गौराङ्ग! रात्रिन्दिवम् ।
द्वीपे तिष्ठ निरन्तरञ्च भजनं कुर्वंस्तथा कीर्तनं,
त्वां रोत्स्यामि न वै कदापि भगवत्प्रेमिन्! निमायिञ्छपे ।।२१३६।।

पुत्र! त्वं ननु चिन्तयाऽद्य नियतञ्चास्यास्त्वबोधात्मनो
बालाया जगतीह किन्नु भविता विष्णुप्रियाया दशा ? ।
संसारस्य सुखं न किञ्चिदनया दृष्टं त्विदानीं पुन,—
र्भूमौ स्थास्यति जीविता कथमियं प्राणाश्रयं त्वां विना? ।।२१३७।।

मे वज्रस्य विनिर्मितं तु हृदयं प्रायो विधात्रा, ततो
नो लोकोत्तरविश्वरूपतनये यातेऽपि दीर्णं त्विदम् ।
स्वर्याते जनकेऽपि ते ह्यविचलं तस्थौ यथेदं तथा
न स्यादस्य गतेऽपि च त्वयि पुन: खण्डस्तथा ज्ञायते ।।२१३८।।

द्वीपे त्वत्र मृतोऽमुकश्च चलित:, स्वर्गेऽमुक: प्रत्यहं
वृद्धाऽहं विधवा शृणोमि, विधिना जाने न चायु: कियत्? ।
दीर्घं मे घटितं, न यावदधुनाऽसौ यत्स्मरत्येव मां,
(सौभाग्यं मनुजस्य तद्धि समये मृत्युर्यमाऽऽलिङ्गति) ।।२१३९।।

आधारो भुवि भाविजीवनकृते विष्णुप्रियाया: समु—
त्पन्न: कोऽपि भवे,त्तथाऽहमवनीपृष्ठे भवेयं मृता ।

संन्यासं यतिजीवनं ननु समं प्रीत्या ग्रहीता तदा
(मुक्तिप्राप्तिनिमित्तधर्मचरणे कालोऽत्र निर्धारित:) ।।२१४०।।

तिष्ठन्त्यां मयि नोचितं भुवि पुनर्बालामवोधाञ्च तां
कृत्वा सम्प्रति जीवतोऽपि विधवां गेहात्प्रयाणन्तव ।
माता तेऽस्मि, मदीयदु:खविषये किञ्चित्त्वपि ध्यायतु
त्वं तूद्धारकृते समस्तजगत: कार्यं करोषि ध्रुवम् ।।२१४१।।

किन्नाहं जगतीह ? मां तु जगतो बाह्यां ममोपेक्षणं
बुद्ध्वा किं कुरुषे, विहाय यदि वा मां विह्वलां दु:खिनीम् ।
एवं यास्यसि, पापमत्र लगिता ते मातृपीडाविधे:'
(किञ्छ्रेयो भविता गुणार्जनपथे तावत्प्रदोषग्रहात् ?) ।।२१४२।।

'मातर्विश्वसुते! तु नेयदधुनाऽधीरा भवत्यस्तु हे!
सामर्थ्यं मम भाग्यलोपनकृतेर्नो'वाच धैर्येण स: ।
'एतावद्दिनमात्रमत्र विधिना योग: कृतस्त्वावयो—
र्नाग्रे सम्प्रति लक्षयत्नकरणैरप्यस्मि वस्तुं क्षम: ।।२१४३।।

सर्वेषामवनं करोति भगवाञ्छ्रीवासुदेव: स्वयं
तस्य स्थावरजङ्गमात्मभरणान्नामास्ति विश्वम्भर: ।
तस्यैवोपरि पोषणात्मकभर: संसारिणां विद्यते,
(सामान्यं भगवान् करोति समय: सर्वस्य सञ्चालनम्) ।।२१४४।।

अज्ञानजन्यममुमत्र हृदस्तु मोहं
निस्सारया,ऽनुमतिमद्य निमायिमात:! ।
प्रेम्णा तथैव हृदयेन च देहि शीघ्रं
संन्यस्तजीवनयतिव्रतधारणस्य' ।।२१४५।।

तन्माता रुदती जगाद सरला श्रीविश्वरूपात्मजा
'बाल्यादेव तव स्वभावमपरं जाने निमायिप्रसू: ।
यत्त्वं बोधसि चोचितं तु कुरुषे तच्चैव नूनं वच:,
(सङ्केत:, परबुद्धिनेयहृदयो मूढ:, कवीनां गुरो:) ।।२१४६।।

भूय: काममथ प्रजापतिरपि प्रत्यक्षमागत्य च
त्वां गौराङ्ग! तु तद्विरुद्धमवनीमध्ये तथा बोधयेत् ।
एवं सत्यपि नाभवो विचलित,स्तस्माद्वच: शोभनं
प्रीतिर्यत्र तदेव ते कुरु (सुतप्रीतिर्हि मातृस्थिति:) ।।२१४७।।

प्रीतावेव तवास्ति मेऽत्र मुदिता, कुत्रापि तिष्ठ स्वतो
भूमौ, तिष्ठ सुखेन काममधुना भूत्वा गृही वा यति: ।

गौर! त्वान्तु कदापि नाहमवनी विस्मर्तुमेव क्षमा
कल्याणं तव तु क्रियात्स भगवाञ्छ्रीकृष्णराधाप्रियः ।।२१४८।।

परं त्वमत्रासि यदापि गन्ता,
गम्यं न ते मां तु विनैव चोक्तम् ।
मे सूचनां पूर्वत एव देहि'
स्फुटं प्रयाणं भवति प्रशस्तम् ।।२१४९।।

लब्ध्वैवञ्च महाप्रभुस्त्वनुमतिं मातुर्निमायी सुत—
श्चक्रे तत्पदवन्दनं कथयते तामत्र चाश्वासयन् ।
'मातस्त्वच्च पुनस्तथैव हृदये कुर्वे स्म चाशामहं
भूयः साम्प्रतमेव योग्यजननीतुल्यं त्वया वर्तितम् ।।२१५०।।

विश्वासं तव दापयामि विषये त्वस्मिन्न चास्याम्यहं
मातस्त्वां कथनं विना, ननु दिने यस्मिन् गमिष्यामि तत् ।
पूर्वं निश्चितमेव चात्मजननीं त्वां सूचयिष्याम्यहं'
संबोध्यैवमथाम्बिकां तु सुमतिर्लेभे तदाज्ञां प्रभुः ।।२१५१।।

आसीत्किन्तु मनाक् तथाहि कठिनं विष्णुप्रियाबोधनं,
सम्प्रत्यस्ति गृहे त्वसौ निजपितुः, प्रश्नोऽयमस्याः पुरः ।
तस्मान्नोत्थित एव, गौरनदियाद्वीपे समस्ते प्रभोः
संन्यासग्रहणस्य वृत्तमतितं, व्याप्नोति दुःखं द्रुतम् ।।२१५२।।

विष्णुप्रियाऽपि तदिदं पितुरेव गेहे
शुश्राव सम्प्रति वचः क्षणतस्तथैषा ।
प्राप्ता पितुश्च गृहतः पतिदेवगेहं,
धत्ते निजोरसि रमां तु हरिः प्रियाऽमुम् ।।२१५३।।

विष्णुप्रिया गौरहरिश्च

११४. गोप्यो! दयिताभावे कथमिव तमस्तरेम दुरन्तम् ।
सानुरागललितस्मितवदनाऽऽलोकनरत्या रासे
गोष्ठ्यां यस्य श्रवणसुधोपमवचनाऽऽकर्णनभक्त्या ।
लीलाकुटिलकटाक्षैः प्रेमापूरितपटुपरिरम्भैः
क्षणमिव नीता क्षणदाऽस्माभि,र्विनाऽधुना तं किं स्मः? ।।

प्राप्ता यत्र दिने पितुश्च गृहतः पत्युर्गृहञ्छ्रीप्रिया
गङ्गातो गृहमागतोऽत्र दिवसे भक्तैर्विलम्बेन सः ।

चक्रे चागत एव भक्तसहितो गेही प्रभुर्भोजनं,
स्वं-स्वं स्थानमयुस्तथाहि निखिला जाते ततो भोजने ।।२१५४।।

गत्वा स्वच्छयनं गृहं प्रभुरपि श्लिष्टस्तथा शय्यया,
तद्धक्-धक् बहु कुर्वदस्ति हृदयं विष्णुप्रियायारित: ।
चिन्ताशोकबवण्डरो ननु यथा तस्या मन:सागरे
ह्युद्यन्नस्ति, तथैकमत्र मननं त्वायाति चान्यत्क्रमात् ।।२१५५।।

तत्तस्य स्मृतिमात्रतो मृदुमना विष्णुप्रिया कम्पते,
कार्यं क्षुत्तृषयो: किमस्ति मनसस्तस्यां दशायां पुन: ? ।
चिन्ताशोकभयाद्विहाय निजकं स्थानन्तु तत्क्षुत्तृषे
मन्ये क्वापि पलायिते,ऽत्र विषयप्रीति: प्रसन्नात्मन: ।।२१५६।।

प्रात:कालत एव तत्किमपि नो चासीत्तया खादितं
किञ्चित्तु प्रियकप्रसादमधुनाऽधृत्वा स्वपत्यु: पुन: ।
पार्श्वे यानमसौ तथाह्यनुचितं मत्वा तथाऽनिच्छया
जग्राह प्रभुभुक्तपात्रनिवहान्मातु: पुनश्चाऽऽग्रहात् ।।२१५७।।

ग्रासं द्वौ चतुरो, न याति मुखतश्चान्नं तथाभ्यन्तरे
किञ्चित्सा त्वधुना यथा ननु तथा भुक्त्वा च पीत्वा परम् ।
मन्दं मन्दमिता निमायिमनस: पत्युस्तु शय्यामभि,
प्राप्ताऽऽसीत्परमस्य तत्र समये निद्रेव चाल्पं प्रभो: ।।२१५८।।

दुग्धस्वच्छमनोज्ञफेनसदृशे तूलस्तरे कोमले
वस्त्रञ्चाऽऽस्तृतमस्ति तत्र शयने शुभ्रं तथैवाधिकम् ।
आस्ताञ्छ्वेतसुकोमले प्रभुशिरोभागे धृते गेन्दुके
चैकोऽस्त्यत्र तु गेन्दुकोपरि भुजस्तच्छीर्षमस्योपरि ।।२१५९।।

आस्तां पद्मसमे विशालनयने गौरस्य संमीलिते,
पर्यस्ता वदनेऽस्य सम्प्रति लटास्ते श्यामला: कुञ्चिता: ।
मन्ये तन्मकरन्दलोलुपमदोन्मत्तालिकृष्णावली
तल्लोकोत्तरसुन्दरास्यकमलं ह्यन्योन्यमाश्रित्य सा ।।२१६०।।

माधुर्यं पिबती तदीयमधुना प्रेम्णा भवेन्मोहकं,
दृष्ट्वा श्रीमुखकान्तिमर्धशयितावस्थप्रभो: श्रीप्रिया ।
स्तब्धा सा किमपि क्षणं स्थिरदशा शोभाञ्च तस्याद्भुता–
माभाञ्चानुपमाननस्य सुहृदश्चालोचयन्ती बभौ ।।२१६१।।

आसीद्वृद्धिमधीरताऽधिकतया यात्येव तस्यास्तथा
मन्दं सा प्रभुपादपद्मनिकटे स्थाने निषण्णा प्रिया ।

मन्दं मन्दमसौ स्वकोमलकरस्पर्शञ्छनैस्तच्छनैः
सिञ्चन्ती प्रियपादपद्मतलके चासीत्प्रभोर्वल्लभा ॥२१६२॥

तत्पादारुणताविशिष्टमृदुतां दृष्ट्वा प्रियाया दल–
च्चासीत्तद्धृदयं, तथाहि मनसि स्थाने तया चिन्तितम् ।
'एतत्सुन्दरकोमलाब्जचरणः प्राणप्रियो वल्लभः
कस्मान्नग्नपदस्तु कण्टकभरव्याप्तक्षमायां भ्रमेत् ? ॥२१६३॥

देहस्तप्तसुवर्णवर्णसदृशो राजात्मजस्येव हा!
संन्यासस्य मृदुः कठोरनियमान् कस्मादयं पालयेत्?'।
प्राप्तेष्वेव च चिन्तनेषु तु तथा विष्णुप्रियानेत्रयो–
र्मुक्ताहारसमाश्रुबिन्दुरपत,त्प्रेमा रसाम्भोनिधिः ॥२१६४॥

स्पर्शैस्तत्पदयोस्तथोष्णपृषतां संभग्ननिद्रः प्रभुः
किञ्चिद्गेन्दुकतश्च पश्यति शिरः कृत्वा स्वपादोन्मुखम् ।
जातोऽल्पं स यथोत्थितो ननु पुरो दृष्ट्वाऽऽत्मविष्णुप्रिया–
मर्ध तत्र शयान एव वदति, ह्याद्योऽत्र भावो रतिः ॥२१६५॥

'रोदिषि चाद्य कथं त्वं ?, किं न्वसि चैवमधीरा? ।
किं ननु जातमिदं ते ?' श्रीगृंहिणो मुदिता स्त्री ॥२१६६॥

अत्यन्तमेव करुणध्वनितोऽद्य दीना
क्षीणस्वरेण रुदती वदति प्रियाजी ।
'धात्रा कथं जगति (रोदिमि तत्स्वभाग्यं)
सौभाग्यमेवमियदत्र विनिर्मितं मे ?' ॥२१६७॥

ऊचे प्रभुः प्रकटयंस्तदधीरतां स्वां
प्रेम्णा च विस्मित इवात्र मनाग् द्रुतं सः ।
'वार्तान्तु नो दिशसि, रोदिषि चात्र कामं,
ज्ञातं भवेदपि च मेऽद्य, किमस्ति वार्ता?' ॥२१६८॥

ऊचेऽसौ रुदती च पूर्ववत् स्वं गौराङ्गहरिं पतिं प्रिया ।
'संन्यासी भविता, गृहञ्च नस्त्यक्त्वा यास्यति तु श्रुतं मया' ॥२१६९॥

तद्धसता प्रभुणोक्तं 'केन शिरःपदहीनम् ।
उक्तमिदं वचनन्ते ?' न श्रुतमप्रियमाप्यम् ॥२१७०॥

निजोक्तवचने बलञ्च ददती दिशन्ती मनाक्
प्रियप्रणयसंयुतं स्वपरमाधिकारं तथा ।
जगाद 'ननु केनचित्कथितमस्तु' विष्णुप्रिया
'भवान् दिशतु साम्प्रतं, न किमिदं नु सत्यं वचः?' ॥२१७१॥

ऊचे प्रभुरयं तत्सस्मितमतः ।
'आमस्त्यवितथं किञ्चिन्ननु परम्' ।।२१७२।।

हा! वज्रं पतितं प्रियोपरि तथाऽधीरा प्रभोः पादयोः
सम्प्रत्यत्र पपात साऽथ विकला स्पष्टं रुरोद स्फुटम् ।
हस्तालम्बनमेष शीघ्रममलं प्रीत्या ददानः प्रभुः
प्रेमालिङ्गनपूर्वकं सहृदयश्चोत्थाप्य तां भाषते ।।२१७३।।

'तस्मात्त्वां न तु किञ्चित्संभाषेऽत्र वचोऽहम् ।
धीराऽपि त्वमधीरा श्रुत्वैव क्षणतोऽसि' ।।२१७४।।

हा! को मानसवेदनाऽनुभवनं कर्तुं प्रियायाः क्षम—
स्तत्कालप्रियगौरधीरवचनस्वारस्यमर्मश्रुतेः ।
तन्नेत्रद्वयवाष्पकप्रवहनं त्वासीदजस्रं तथा
तस्याश्चैव रये जगाद रुदती स्वं वेदनायाः प्रियम् ।।२१७५।।

'हे प्राणप्रिय! दुःखिनीं जगति मां त्वामाश्रितां सर्वथा
कृत्वा चात्र निराश्रयां ननु भवान् याता त्वितो वस्तुतः? ।
गन्ता नूनमनाथिनीं किमबलां त्वं भाग्यहीनामिमां
कृत्वाऽलोकमना निमायिहृदय! (प्रेमी कठोरोऽखिलः?) ।।२१७६।।

हा! सौभाग्यसुखस्य मे स्वविषये चासीत्तु गर्वो महा,—
नेवं स्वं दयितं त्रिलोकसुभगं वन्द्यं जगत्सु प्रियम् ।
स्वां सौभाग्यवतीं बुबोध सकलश्रेष्ठामहं त्वाप्य, यल्—
लावण्यञ्च विलोक्य नाकवनिताश्चेर्ष्यन्ति मह्यन्त्वपि ।।२१७७।।

यत्सौभाग्यसुखस्य मे ननु नवद्वीपस्य नार्यः सदा
चक्रुः शंसनमत्र पूर्वमधिकं कालान्तरे मत्स्थितौ ।
कर्तारोऽत्र तु ता दयाप्रकटनं मां भाग्यहीनामिव
द्वारं-द्वारमथाभिदृश्य च यतीं (कारुण्यलब्धिर्विपत्) ।।२१७८।।

कस्याऽग्रेऽहमनाथिनी च शरणे यास्यामि ?, कश्चाधुना
धृत्वा मे स्वकरेऽत्र जीवनतरीदण्डं पुनश्चालयेत् ? ।
नारीणां पतिरेव शिष्टजगतामेकाश्रयस्थानकं,
तासां का भविता विना भुवि पतिं लोके तथाऽन्या गतिः?' ।।२१७९।।

ऊचे गौरपतिर्निमायिहृदयो विष्णुप्रियां बोधयन्
'पश्यात्रास्ति समस्तजीवनिवहः प्रारब्धकर्माऽवशः ।
संस्कारो भुवि यस्य येन च समं यावद्दिनं निश्चितः,
शक्नोत्यत्र स तावदेव तु दिनं वस्तुं समं तेन तत् ।।२१८०।।

दाताऽऽश्रयस्य हरिरेव तु सोऽस्ति लोके
सर्वात्मनामिह तथाजडजङ्गमानाम् ।
श्रीकृष्णचिन्तनरता सततं 'भवेस्तद्
दुःखं न चाल्पमपि ते गमनस्य मे स्यात्' ।।२१८१।।

'श्रीकृष्णः पतिदेव! कोऽपि' रुदती प्रोवाच विष्णुप्रिया
'ब्रह्माण्डेऽस्ति निमायिभाव! भवतश्चान्योऽतिरिक्तः पुनः ।
जानेऽद्यावधिमेव नेदमपि नो चाग्रे तु वेत्तुं मनो,
यत्किञ्चिद्धरिरीश्वरस्तु जगति स्थाने भवानेव मे ।।२१८२।।

त्वच्छ्रीपादसरोजचिन्तनपथादन्यन्न चिन्त्यन्तु मे
दृष्टौ चास्ति, तवाङ्घ्रिसेवनरता चैव स्वकं जीवनम् ।
ईहे वाहयितुं, सुखस्य नहि मे कस्यापि संसारिणः
प्राप्तीच्छाऽस्ति' निमायिसक्तमनसो दृष्टिः कथं मायिनि? ।।२१८३।।

ऊचेऽल्पां तदधीरतां प्रकटयन् स्वामी निमायी 'प्रिये!
तेऽहं पूर्वत एव चास्मि, सततं स्थास्यामि तेऽहं पुनः ।
किं विस्मर्तुमिदं कदापि सुकरं निस्स्वार्थकं प्रेम ते ?
गार्हस्थ्याध्वनि ना भविष्यति पुनः को भाग्यहीनस्तथा ।।२१८४।।

सम्पन्नां सकलैर्गुणैः सहचरीं यो जीवनस्य स्वकां
त्वत्तुल्यां हृदये करिष्यति परित्यक्तुं तथेच्छामपि ।
सत्यं सत्यमहं वदामि तु परं विष्णुप्रिये! मन्मनः
सम्प्रत्यस्ति वशे तथाहि मम न (स्वस्थो वशे यन्मनः) ।।२१८५।।

द्रष्टुं योग्यमथास्ति सम्प्रति न मे दुःखन्तु जीवात्मनां
संसारी त्वहमत्र तावदधिकं भूत्वा, वसित्वा गृहे ।
जीवानां न तथा विधातुमपरं कल्याणमद्य क्षम—
स्त्यागस्ते करणीय एव वपुषा संसारिहेतोर्मया ।।२१८६।।

विस्मार्यं न कदापि चास्ति मनसा तु प्रेम ते, हे प्रिये!
नाम त्वं कुरु सार्थकं ननु तथा पूर्णं स्वकं जीवनम् ।
कुर्वाणा भुवि विष्णुचिन्तनमहो! विष्णुप्रिये! सर्वदा'
श्रीमच्चिन्तनमेव सिद्धिरपरा लोके मनुष्यात्मनाम् ।।२१८७।।

ऊचे गौरपतिं प्रियाऽतिसरलाऽधीरस्वरे चाधिके,
'कल्याणे यदि देव! जीवजगतां वर्ते त्वहं बाधिका ।
तत्स्पृष्ट्वा भवदीयपादकमलं स्पष्टं ब्रुवे साम्प्रतं
यत्स्थास्यामि सदा गृहे निजपितु(र्ह्यद्यः पिताऽत्राऽऽश्रयः) ।।२१८८।।

गङ्गास्नाननिमित्तकं प्रतिदिनं यत्क्वापि गन्ता भवां—
स्तत्कर्ताऽस्मि निलीय दर्शनमहो! स्थानात्कुतोऽपि क्षणम् ।
आधारो जननीकृते ननु पुरस्त्वल्पाल्पकं स्थास्यति,
(प्रीयन्ते निजसूतदर्शनदिशा सर्वेऽत्र वै जन्तवः) ।।२१८९।।

अस्तु स्वं हृदयं विधाय कुलिशं स्थाने सहेयाप्यहं
दुःखं भूधरतुल्यमेतदपरे, तस्यास्तु मातुः परम् ।
वृद्धाया ननु का भविष्यति दशा?, कोऽप्यस्ति नाग्रे तथा
पृष्ठेऽस्यास्तु, तदीयजीवनमिदं त्वस्ति त्वदेकाश्रितम् ।।२१९०।।

नो जीविता स्थास्यति सा भवन्तं
विना, निजं निश्चितमेव घातम् ।
कृत्वाऽपरं जीवनमत्र हाता,
द्वीपक्षितेर्हानिरकालिकीयम्' ।।२१९१।।

ऊचेऽतस्तु विरम्य रुद्धगलकः स्थाने विरम्य प्रभुः
'सर्वस्यास्ति स एव चात्र पुरतः पृष्ठे तथा श्रीहरिः ।
तद्भिन्नस्त्वपराश्रयस्तु भवितुं न प्राणिनां युज्यते,
कल्याणं भविताऽत्र तत्स्मरणतः, सर्वस्य स त्वाश्रयः ।।२१९२।।

वर्तेऽहं विवशः प्रिये! भुवि नवद्वीपं परित्यज्य मे
लोकानां करणीयमेव गमनं त्वन्यत्र लीनात्मनाम् ।
संन्यासन्त्वपहाय कर्मणि परे नो मे सुखं कुत्रचित्,—
कर्तुं मां सुखिनं तथाहि सततं त्वं चेष्टमाना त्वभूः ।।२१९३।।

सर्वञ्चात्मसुखं गृहात्मनि परित्यक्तं त्वया मन्मुदे
तद्वत्त्वाचरणं सदा कृतवती यत्स्यां प्रसन्नात्मना ।
कर्तुं दुःखिनमद्य चेच्छसि कथं विष्णुप्रिये! मां प्रियं,
(सिद्धान्तोऽत्र तदीयसौख्यसुखिता लोकोत्तराणां सताम्) ।।२१९४।।

वस्तुं त्वं यदि मां करिष्यति नवद्वीपे बलादाग्रहं,
तन्मेलिष्यति मे सुखं न नियतञ्क्लेशन्तु मातुर्वचः ।
जग्राहानुमतिं ततस्त्वहमहो!, संन्यासहेतोस्तया
दत्ताऽज्ञापि च मह्य(मत्र किमपि स्नेहे तु नादेयता) ।।२१९५।।

अद्य त्वदस्त्यनुमतिग्रहणन्तु शेषं,
पूर्णाऽस्ति सम्प्रति निमायिहृदो ममाशा ।
अस्मिन्मदीयशुभकर्मणि मे न बाधां
कृत्वा, तु दास्यसि निजानुमतिं प्रसन्ना' ।।२१९६।।

आवेगं बलपूर्वकञ्च रुधती दुःखस्य सा चात्मनः
कृत्वोवाच कठोरमद्य हृदयं गौरस्य विष्णुप्रिया ।
'संन्यासस्य ददौ तथाहि भवतः स्वाज्ञां स्वमाता यदि
स्थानेऽहं भवदीयकर्मणि तदा कर्ता न बाधाऽश्मकम् ॥२१९७॥

अस्ति त्वन्मुदितासु चैव मुदिता मेऽपि प्रियायास्तव,
स्वीकार्यं मम वै तदेव तु भवान् यस्यां दशायामपि ।
स्यात्प्रीतो, हृदयात्तु विस्मर न मां प्राणेश्वर! श्रीश्वर!
ध्यानञ्छ्रीचरणाब्जयोश्च भवतो मे स्यादजस्रं यथा ॥२१९८॥

एवं याहि तथाऽऽशिषं भुवि नवद्वीपाद्ददानः प्रिय!
ब्रूयाच्चात्र कथं प्रसन्नहृदया, ते तु प्रमोदाऽग्रतः ।
स्वीकार्यं निखिलं ममास्ति, धरणीलोके समर्थो भवान्
स्वामी मेऽस्ति, तथा स्वतन्त्रदशको नीचात्मकोद्धारकः ॥२१९९॥

अस्मि त्वदीयपदयोरहमत्र दासी
स्वस्वामिपादमनसः सुखहेतुकन्तु ।
शक्नोति सोढुमखिलं, स्मरणं मदीयं
ह्येवार्थनेयमधुना वसतु त्वजस्रम् ॥२२००॥

आलिङ्गन्नमलप्रभुः कथयति प्रेम्णा स्वकीयां प्रियां
'त्वं धन्यासि, तथैकवीररमणीतुल्यैव तच्चोचिषे ।
एतत्साहसमत्र कर्तुमवनीपृष्ठे परञ्छकनुया–
न्नारी स्वामिपरायणा ननु सती-साध्वी प्रिये! त्वत्समा ॥२२०१॥

भविष्यसि त्वं हृदये सदा मे
विस्मार्यमत्र स्वहृदो न सख्यम् ।
प्रयामि किं साम्प्रतमेव ? साध्वि!
प्रिये! वदिष्यामि यदापि गन्ता ॥२२०२॥

एवं निशैव सकला ब्रुवतोर्व्यतीता
प्रेम्णा निमायिदयिताप्रिययोर्द्वयोः सा ।
जातेऽद्वितीयकथनक्रमतः प्रभाते
चोत्थाय नित्यविधये चलितो निमायी ॥२२०३॥

परमसहृदय-निमायि-निर्दयता

११५. चेतः कुसुमादपि सुकुमारं काले कुलिशकठोरम् ।
स्वार्थी लोको व्यवहारे पथि वासनयाऽतिक्रान्तः
प्रतिपलपरिवर्तितचेता भुवि वाचा क्रियया दृश्यः ।
परमार्थी दृढनिश्चयचेता व्यवसायी कोऽप्येकः
निजसंस्कारात्प्रायः सौम्यः, समये लगति कठोरः ॥

निर्दिष्टो भगवांस्तथाहि महतो मूले महीयान् पुन–
स्तत्रैवायमहो! स्फुटञ्च कथितो वेदे त्वणीयानणोः ।
न ज्ञातं, भुवि चास्ति किं विषमतायामेव लीनोच्चता?
सूक्षात्मा ननु दृश्यते स तु निराकारोऽपि साकारवत् ॥२२०४॥

उत्पत्तिस्थितिसंहृतिक्रमतया सर्वक्रियाकारणं
सर्वेषां स हि कथ्यतेऽत्र जगतां स्थाने त्वकर्ताऽपि सन् ।
शास्त्रे जन्मकथा त्वजन्मजगतस्तस्योच्यते श्रूयते,
किञ्चास्ति प्रभुता तथाविषमतायामेव नान्तर्हिता ? ॥२२०५॥

आयात्येव सुजीवनेऽपि महतां वैषम्यमेतादृशं
दृष्टौ चात्र सदा, यतो विषमतापर्यायिसंसारता ।
मर्यादापुरुषोत्तमस्य चरितञ्श्रीरामचन्द्रस्य तत्–
सम्पूर्णन्तु पठन्तु तद्भगवतः श्रीमच्च रामायणम् ॥२२०६॥

स्थाने तत्र भृता दृढं विषमता स्थाने पुनर्मेलिता,
भण्डारोऽस्ति विशालको विषमतास्थानस्य रामायणम् ।
श्रीरामः सुकुमारपुष्पसदृशोऽत्यन्तन्तु भूत्वाऽपि स
स्थाने भीषणराक्षसांश्च पलतो हन्ति प्रवीणोऽस्त्रके ॥२२०७॥

हस्तान्न त्यजतीह बाणधनुषी भूत्वा तपस्वी त्वयं,
सुग्रीवस्य भयं प्रदर्शयति तन्मैत्रीं विधायापि च ।
सम्पूर्णं ननु जीवनं विषमतापूर्णन्तु तस्येक्ष्यते,
वैषम्यस्फुटता सुशीलचरिते सौम्यात्मनां जायते ॥२२०८॥

प्राणेभ्योऽप्यभवत्प्रियः स्वजननीवृन्दस्य रामोऽत्र यो,
येनाज्ञा न कदापि बाल्यसमयादस्वीकृतैवं पितुः ।
द्रष्टुं नैव शशाक यस्य हृदयं कञ्चित्तथादुःखिनं
जातस्तावदसौ कठोरहृदयश्चारण्ययानक्षणे ॥२२०९॥

मातुर्वाक्यशरस्य, संततसरत्तद्वाष्पबिन्दोस्तथा,
दैन्येनानुनयस्य तन्निजपितु:, कारुण्यत: क्रन्दताम् ।
आर्तोक्ते: पुरवासिनां, सुतपसाञ्छुद्धात्मनामृत्विजां,
हंसश्वेतकचप्रभाववचसां वृद्धद्विजानां पुन: ।।२२१०।।

राजाऽमात्यपरिच्छदां भगवत: श्रीमद्वशिष्ठस्य त–
न्नानायुक्तिगिरां पुरस्थितिकृतेऽप्यल्प: प्रभावोऽस्य नो ।
त्यक्त्वा तान् रुदतस्तथाविलपत: शोकाब्धिमध्येऽखिलान्
कृत्वा स्वं हृदयं कठोरमधिकं कालेऽत्र वज्रादपि ।।२२११।।

असौ चचाल ध्रुवमेव रामो
वनाय, चात: परिचीयतेऽस्य ।
कठोरता चित्तनिलीनरूपा,
काले हि काले स्फुटतीह भाव: ।।२२१२।।

श्रीसीताहरणक्षणस्य विरलं क्रोधं पठित्वाऽस्य तं
चेत: कस्य न कम्पते, स निजकप्राणप्रियाया: कृते ।
ब्रह्माण्डं निखिलं करिष्यति निजैर्बाणैरमोघै: क्षणा–
त्प्रायश्चैव विनष्ट,मत्र भुवने भावाऽवशो मानव: ।।२२१३।।

आरुह्य स्फटिकाञ्छिलां, प्रियतमामुद्दिश्य चाधीरतां
पाषाणोऽपि निशम्य तस्य हृदयव्यक्तां बभूव द्रुत: ।
तल्लङ्काऽऽक्रमणस्य पूर्वमभितो दृष्ट: कियद्व्याकुल:
श्रीसीतावनिताकृते हनुमति प्राप्ते स लब्धुं प्रियम् ।।२२१४।।

आसीत्संततमेव तल्लघु-लघु स्मृत्वा वचोऽस्या रुदं–
स्तत्काले न बुबोध को, द्रुतमसौ प्राप्यैव सीतां प्रियाम् ।
नो रोदिष्यति तां विधाय च गले, स्थाने निजाङ्के तथा–
प्रेम्णा स्थापयिता न, धीरललितो वीरोऽपि दृश्यो गृही ।।२२१५।।

जाते किन्तु तथाहि रावणवधे तद्भाव एवाऽस्थित:,
सीतायां, रघुनन्दन: कथितवान्, सत्यां स्थितायां पुर: ।
शीघ्रं वक्तुमयोग्यमेव वचनं तिक्तं कठोरं यथा
ब्रूयात्कस्तु निशम्य तत्सहृदयं रामं तथा प्रेमिणम् ? ।।२२१६।।

चेत्पश्येत्तु यथार्थतोऽत्र, तदिदं तेषां महत्ताकृते
स्थाने द्योतकमस्ति, च व्यवहृतौ यं लाडयामो वयम् ।
प्राणेभ्योऽप्यधिकं, पुनर्यदि परित्यागक्षणो दैवत–
स्तस्याऽऽयाति, तदा क्षणेन विहितस्तत्त्याग एवात्र न: ।।२२१७।।

तत्प्रेम लोके कथितं यथार्थ,
स्वीकर्तुमत्रास्ति च यस्य शक्तिः ।
दार्ढ्येन, भूयोऽस्य हि तावदेव
त्यागस्य शक्तिस्त्वधिका भवेद्वै ॥२२१८॥

दृष्ट्वा प्रेम महाप्रभोर्ननु तथाऽपूर्वं स्वभक्तेषु तु
स्वप्नेऽप्यत्र न कोऽपि चानुमितिकं कर्तुञ्छशाक क्षितौ ।
एकस्मिन् दिवसे त्विमाञ्च निखिलांस्त्यक्त्वाऽपि यास्यत्यसौ,
रागी लोकमनःप्रियो भवति किं भूमौ विरागी क्षणात् ? ॥२२१९॥

भक्तैः सार्धमसौ प्रफुल्लहृदयो द्वीपे मिमेल प्रभुः
प्राणैर्भक्तजनस्य मेलयति स प्राणं समं चात्मनः ।
नृत्ये,ऽमुष्य पुरः प्रभोर्विहरणे, भक्तैः समं भोजने,
चैश्वर्ये, परिरम्भणेऽखिलविधौ रागात्मनः प्रेमिणः ॥२२२०॥

ओतप्रोतं सर्वत्रैव । आसीत्पूर्णं 'प्रेम-प्रेम' ॥२२२१॥

स्नेहञ्चातिशयं करोति मयि तु स्थाने बुबोध प्रिया
गौरश्रीपतिदेवनागरवरो, मत्प्रेमपाशे दृढम् ।
बद्धोऽसौ ननु विद्यतेऽत्र नदियाभूमौ निमायी प्रियः,
संसारे भुवि भारतीयपरिधौ स्वाम्येव हि स्त्रीस्वकम् ॥२२२२॥

तन्माता च बुबोध कुत्रचिदपि त्यक्त्वा निमायी न मां
गन्ता,ऽन्यत्र न रोचतेऽस्य वसनन्त्वेकं दिनं मां विना ।
कुक्षिस्त्वस्य न पूर्यते परकरद्वारा पुनर्भोजने,
यावन्मे करतो न खादति मनाक् तावन्न तृप्यत्यसौ ॥२२२३॥

एवं तत्र बुबोध बद्धमखिलः स्वप्रेमपाशे प्रभुं
दार्ढ्येनात्र, परं महापुरुषकस्त्वासीच्छचीनन्दनः ।
आसीत्तस्य कृते तदेतदखिलं लीला निमाय्यात्मनः
सत्प्रेमप्रतिमस्य कोऽस्य विमले चित्ते प्रियः, कोऽप्रियः? ॥२२२४॥

विश्वे स्थावरजङ्गमे स तु परं प्रेम्णः प्रियस्यात्मनो
गौराङ्गः कुरुते स्म दर्शनमिदञ्चाराध्यदेवोऽस्य वै ।
आसीत्प्रेम, न लोकमूर्तिषु रतिः, प्रेम्णस्त्वसौ पूजकः,
किञ्चासीन्ननु पूजकः ? प्रकृतितः प्रेमात्मकस्त्वेव सः ॥२२२५॥

संन्यासग्रहणस्य निश्चयमसौ चक्रे त्वकस्माद्दृढं
सर्वेषाञ्जनकैरभूत्त्वनुभवः स्व-स्वत्रुटीनामितः ।

बोधामो निजमेव केवलमहो! द्वीपे पुरा यं वयं,
जातोऽयं नदियानिमायिहृदयस्तु प्राणिमात्रप्रियः ॥२२२६॥

आस्माकतुल्यस्त्वधिकारभावः
समस्तजीवस्य समानरूपः ।
तस्योपरि, प्राप्य तदीयमार्गात्
प्रेमामृतं स्युर्निखिलाः प्रसन्नाः ॥२२२७॥

संन्सासग्रहणस्य सम्प्रति समाचारः समस्ते नव–
द्वीपेऽमुष्य महाप्रभोश्च नगरे गौरस्य तु प्रास्तृतः ।
लोकास्तत्प्रभुदर्शनार्थमधुनाऽऽयान्ति स्म भूयो बहु,
स्थाने सम्मिलनं जनस्य घटते प्राप्ते वियोगक्षणे ॥२२२८॥

संकीर्तने भवति सम्मिलितो न भक्तैः
सार्धं महाप्रभुरयं, त्वधुना स्वयं ते ।
कुर्वन्ति कीर्तनमथ प्रभुदर्शनार्थं
प्रातश्च यान्ति गृहमस्य तथाहि सायम् ॥२२२९॥

स्वामी केशवभारती प्रभुगृहे यस्मिन् दिने चागतः
संन्यासग्रहणस्य निश्चयमसौ तत्रैव चक्रे तिथेः ।
काले तत्र तु दक्षिणो रविरभू,च्छ्रौतं न कृत्य,च्छुभः
संस्कारः क्रियते तथेदृशमनुष्ठानं रवौ दक्षिणे ॥२२३०॥

तस्माच्छ्रीप्रभुरुत्तरायणरवेः कुर्वन् प्रतीक्षां त्वभू–
त्संसारे समयो महानपि पुनर्याति क्षणाभस्तथा ।
शोकाब्धौ शनकैश्च भक्तजगतां संबन्धिनाच्छ्रीप्रभोः
कालः सन्निकटो बभूव शनकैः संप्लावकः सोऽधुना ॥२२३१॥

नित्यं सूचितवांस्तिथिं गृहपरित्यागात्मिकीं, साग्रह–
श्चोचे मे 'जननी च मातृभगिनीस्वामी शशीशेखरः ।
ब्रह्मानन्दगदाधरौ परमिमेऽभिन्ना मुकुन्दस्तथा
पञ्चैतांस्तु विहाय कञ्चिदपरं मा ब्रूहि चैतद्वचः' ॥२२३२॥

स्वरूपमेवास्य बभूव नित्या–
नन्दस्तु चाज्ञाञ्छिरसा दधार ।
तथाहि दूनः कुरुते प्रतीक्षां
दुर्भाग्यरूपस्य दिनस्य तस्य ॥२२३३॥

द्वीपेऽद्यैव दिनं महाप्रभुकृते स्थाने दिनश्चान्तिमं,
गौरः श्वो न निमायिपण्डित-शचीपुत्रो भविष्यत्यतः ।
भावी केवलकप्रियापतिरसौ न, प्राणिमात्रप्रियो,
भक्तानां नमनीय एव न, जगद्वन्द्यः परस्मिन् दिने ॥२२३४॥

ज्ञातं तु कस्यापि बभूव किं पुन-
र्भविष्यति द्वीपधराऽधुना ध्रुवम् ।
तथाहि शून्या नदियासुनागरात्,
सदैव वज्रं पतति क्षितौ क्षणात् ॥२२३५॥

प्रातोऽभूदथ कर्मणश्च चलितो नित्यान्निवृत्तः प्रभुः
स्वैर्भक्तैः सह वासपण्डितगृहं, सर्वेऽत्र चैकत्रिताः ।
भक्तास्तत्प्रभुणा समञ्च मिलिताश्चक्रुस्तु संकीर्तनं
सङ्गे भक्तजनं विधाय स पुनर्यातिश्च गङ्गातटम् ॥२२३६॥

प्रायः संघटितास्तु तत्र निशि च सर्वेऽन्तरङ्गाः प्रभो,—
र्नीत्वाऽऽयात्प्रियखोलविक्रयकरः कस्मादपि श्रीधरः ।
अल्पं तच्चिपटान्नमत्र सुहृदश्चागत्य पादे प्रभो—
स्तत्प्रेम्णोपहृतञ्च तेन बहुना, प्रेमोपहारः प्रियः ॥२२३७॥

स्वस्याऽकिञ्चनकस्य भक्तसुहृदोऽपूर्वोपहारं प्रभु—
र्लब्ध्वा तत्समयेऽन्तिमे सहृदयो जातः प्रसन्नो बहु ।
ऊचे तं 'चिपटान्नमीदृशमिदं स्थाना'द्धसित्वा ' कुतो
नीत्वा श्रीधर! सुन्दरं त्वमधुना प्रेमास्पदस्याऽऽगतः' ? ॥२२३८॥

उक्त्वैतच्च महाप्रभुः स्वजननीहस्ते तदन्नं ददौ,
भक्तोऽन्यो बहुमात्रकं ननु पयो नीत्वाऽऽययौ तत्क्षणे ।
दृष्ट्वैव स्फुटकं जहास सहसा स्थाने निमायी प्रभु—
र्ब्रूते तन्मुदितां तथा प्रकटयन्, युक्ते प्रसादो हृदः ॥२२३९॥

'त्वं नीत्वा चिपटान्नमत्र चलितोऽत्यन्ते मुहूर्ते शुभे,
पश्य श्रीधर! तत्पयोऽपि समये प्राप्तं' तथोक्त्वा प्रभुः ।
निर्मातुं चिपटान्नपायसमतो ब्रूते सुतो मातरं,
माता शीघ्रमिदं पपाच, जननीप्राणाः सुतायोद्यताः ॥२२४०॥

भक्तैः सार्धमसौ जघास च महाभक्तप्रियश्रीधराऽऽ—
नीतैस्तैश्चिपटान्नकैः प्रभुरतो मात्रा कृतं पायसम् ।
तच्च द्वीपशचीस्वमातृकरयोस्तस्यान्तिमं भोजनं
(मातुर्जन्मभुवो मनुष्यवपुषः पाकोऽन्नमत्राऽमृतम्) ॥२२४१॥

स्वं स्वं गृहं भोजनकस्य पश्चा—
च्चचाल भक्तः क्रमशश्च सर्वः ।
गत्वा स्वकीये शयने गृहेऽयं
महाप्रभुश्चापि लुलोट शय्याम् ॥२२४२॥

आशङ्किता दयितभाविवियोगजन्याद्
विष्णुप्रियाऽऽन्तरभयाद्धरिणीव भीता ।
सा बिभ्यती शयनकेऽद्य विवेश गेहे
तल्लोचनाश्रु सरति स्म निरन्तरञ्च ॥२२४३॥

'द्रष्टुं प्रिये! केवलमेकवार—
न्त्वीहे हसत्ते वदनं सरोजम्' ।
प्रभुः स्मयन्नाह 'सती प्रसन्ना
ममोन्मुखं पश्य तु यात्रिपथ्यम्' ॥२२४४॥

किन्त्वेषाऽस्ति च मौनमेव दयितश्रीगौरविष्णुप्रिया,
दत्तं नोत्तरमत्र तत्प्रभुगिरः किञ्चित्तया साम्प्रतम् ।
ऊचेऽसौ परमाग्रहस्वरगलो 'विष्णुप्रिये!' तत्प्रभु—
'स्त्वं ब्रूषे न कथञ्च?, चिन्तयसि किं?' मौनं सदा नोचितम् ॥२२४५॥

विष्णुप्रियाऽश्रु मृजती वदति स्म मन्दं,
'जाने प्रभो! न, हृदयं मम कम्पते किम् ? ।
भूयोऽद्य तद्दलदिव स्वत एव याति
स्वामिन्न वेद्मि सरला स्फुटमस्य हेतुम्' ॥२२४६॥

ऊचे तथोक्तविषये परिवर्तनेच्छु—
'स्त्वं सर्वदा भवसि सम्प्रति चिन्तयन्ती ।
एषाऽस्ति तत्परिणतिः, सहसा हस त्वं,
पश्य क्षणेन सकलस्तव याति मोहः' ॥२२४७॥

ईषद्रोषयुतस्वरा कथयति प्रेम्णा तु विष्णुप्रिया,
'मुञ्चाप्यद्य, सदैव वञ्चयसि मां हास्यं तथैवं क्षणे ।
आगच्छेत्तव चैव, रोदिति तु मे चित्तं, हसेयं कथं ?
हास्यं त्वान्तरमोदभावजनितञ्चायाति लोकाऽऽकृतौ' ॥२२४८॥

कृत्वाऽवश्यमनाथिनीं पतिवरश्चाद्यैव मां सेविनीं
गेहत्यागमसौ विधास्यति तथाज्ञातं प्रियायास्त्वभूत् ।
सा किन्तु प्रभुसम्मुखे प्रकटितञ्चक्रे न चेदं वचो,
नारी त्यागमयी मृदुश्च भुवि नो पत्युः पथो बन्धनम् ॥२२४९॥

यावद्रात्रिमसौ पतिप्रभुपदे श्रीः सेवयन्ती त्वभूद्,–
गाढालिङ्गनमद्य तां प्रभुरपि प्रेम्णा विशेषेण तु ।
कारङ्कारमनेकवारमपरं येते विधातुं सुखां,
पत्युस्तत्परिरम्भणेषु न परं तस्याः प्रतीतं सुखम् ॥२२५०॥

यच्छूलीमधिरोहतो रुचिकरं सुस्वादु नानाविधं
मिष्टान्नं पुरुषस्य तत्र समये लोकेऽत्र नो जायते ।
स स्नेहोऽत्र बभूव तावदधिको विष्णुप्रियायाः कृते
तत्पत्युस्तु निमायिनोऽपि च सुखस्थानेऽतिपीडाकरः ॥२२५१॥

मातुः पूर्वत एव चास्ति विदितं, त्यक्त्वा निमायी गृहं
यास्यत्यद्य, ततोहि साऽत्र पतिता द्वारे तु यावन्निशाम् ।
आसीदान्तरमूर्च्छिता, प्रभुपदे विष्णुप्रियाऽप्यानिश--
ञ्चासिष्टात्र यथावदेव दधती, कान्ताङ्घ्रिभक्ती रतिः ॥२२५२॥

आसीत्सम्प्रति माघमाससमयश्चास्तं सितेन्दुर्गतः,
शेषा किन्तु घटीद्वया च रजनी, निश्चिन्तनिद्रागताः ।
सम्पूर्णस्य पुरस्य सन्ति शयिता नार्यो नराश्चाधुना,
सुप्ता वै निखिला, यतोहि विरलाः संसारजिज्ञासवः ॥२२५३॥

निद्रा कुत्र महाप्रभोः, परमसौ संन्यासियात्रापथो–
ल्लासे विस्मृतवांस्तथाहि युगपत्सर्व बुभुक्षातृषे ।
विश्रामं सुखसुप्तिकप्रभृतिकं, विष्णुप्रिया तत्पदे
सन्नाऽऽसीदधुना निगृह्य, वनितासौभाग्यसम्पत्पतिः ॥२२५४॥

तन्मुक्तश्च गवेषयन् स्ववसरं यातुं बहिः सोऽभवत्,
संसारे भवितव्यता बलवती बोभूयते सर्वदा ।
यद्भव्यन्तु तथैव साधनमपि प्राप्तं पुनस्तत्कृते
स्वाभाव्याद् भवती,ह पक्षिपशुवत्पाशेऽपि ना बध्यते ॥२२५५॥

तस्या जागरणेन चाऽऽनिशमहो! विष्णुप्रियाया रिपु–
र्निद्राऽऽप्ता, पतिपादयोस्तु पतिता सुप्ताऽधिशय्यामसौ ।
रात्रिं व्याप्य तु जागृताऽभवदियं, तद्गाढया निद्रयाऽऽ–
गत्यैतत्पतनक्षणे तदुपरि स्वस्याधिकारः कृतः ॥२२५६॥

एतच्चैव बुबोध तु स्ववसरं भूयः प्रभुः शोभनं,
तच्चोत्थापितवान् स्वपादयुगलं विष्णुप्रियाक्रोडतः ।
सोऽयं मन्दतयैव चाधिक,मतो विष्णुप्रिया तन्मनाक्
पादोत्थानमात्रतस्तु चलिता, रिक्तञ्चलत्यस्थिरम् ॥२२५७॥

तत्याजात्र यथावदेव निहितं पादं द्वितीयं प्रभु-
स्तस्यास्तत्क्षणमेव चोरसि, पुनः सोऽयं क्षणानन्तरम् ।
स्वञ्चोत्थापितवान् द्वितीयमपि तत्पादञ्छनैर्वै शनैः
किञ्चिन्नापि बुबोध सम्प्रति सती-साध्वी निमायिप्रिया ।।२२५८।।

शय्यातोऽवततार मन्दमधिकं नीचैः प्रभुः साम्प्रतं
पार्श्वे लम्बितमम्बरं परिदधौ दन्ते स्वकीयन्त्वसौ ।
भूयस्त्वत्र निजप्रियोन्मुखमयं तद्दृष्टिपातं प्रिय-
श्चक्रे सम्प्रति चैकवार,मपरप्राणप्रिया नृप्रिया ।।२२५९।।

कुर्वन्नस्ति पुरस्तथा टिम-टिम क्षीणप्रभो दीपको,
मन्येऽमुष्य वियोगदुःखभरतो दूनोऽप्यसौ रोदिति ।
आसीद्दीपकमन्दमन्दकिरणश्चास्ये प्रियायाः पतन्,
कान्तिस्तद्वदनस्य चाधिकमतः शोभायमाना त्वभूत् ।।२२६०।।

प्राणैः समायाः स निजस्य तस्याः
प्रगाढनिद्रापतितप्रियायाः ।
आह्लादकं चन्द्रमुखन्तु दृष्ट्वा
मनाक् चचाल प्रभुरेकवारम् ।।२२६१।।

'सम्प्रत्येतदबोधबालविषये कुर्वे त्वनर्थं कथं ?
सुप्तामद्य विना त्यजामि कथनञ्चैतां तथाऽऽजीवनम् ।
एतत्कर्म कठोरमस्ति बहु मेऽद्धा निन्दनीय'न्तथा
भूयश्चिन्तयते विधाय हृदयं स्वं सावधानं प्रभुः ।।२२६२।।

'मे कार्याऽस्ति कठोरतेयमधुना श्रेयः कृते प्राणिना,-
ञ्छ्रेयः स्याज्जगतः कथं?, न भविता पक्षे कठोरो यदा ।
मायाबद्धहृदां कथन्नु जगतां तत्त्यागवैराग्ययोः
पाठं मानवयोनिसौहृदरसं संपाठयिष्याम्यहम्' ।।२२६३।।

एवं सोऽत्र विचिन्त्य चैवमनसा विष्णुप्रियायाः प्रियो
निर्यातो निजमाशिषं स्वशयनाऽऽवासाद्ददानो बहिः ।
क्रन्दन्ती भुवि मूर्च्छितेव पतिता द्वारेऽस्ति माता शची
निद्रा क्वाऽस्तु तथाहि तन्नयनयो,र्भावी यतिर्यत्सुतः ।।२२६४।।

आसीत्पुत्रवियोगशोकजलधौ त्वेषा पुनर्मज्जती,
भूयश्चोत्प्लवते कदापि च जलेऽन्तर्लीयते कर्हिचित् ।
मूर्च्छाशायितदुःखिनीस्वजननीपादे ननाम प्रभु-
र्गौराङ्गो मनसैव, मानसजपो यज्ञेषु सर्वोत्तमः ।।२२६५।।

चक्रे तत्पदधूलिमद्य शनकैः संगृह्य शीर्षे पुनः
पुत्रः प्रार्थितवांस्तथैव मनसा गौरः परिक्रम्य ताम् ।
'हे मातर्मम हेतवे बहु महत्कष्टन्तु भुक्तं त्वया,
संभोज्याऽहमियान्महान् भुवि कृतोऽद्धा शिक्षयित्वा बुधः ।।२२६६।।

ते भूयोऽपि निमायिनाऽत्र विहिता किञ्चिन्न सेवा मया,
मातस्ते भविता ऋणी त्वहमयञ्चाजन्मजन्मान्तरम् ।
मुक्तोऽहन्तु तवर्णतोऽत्र भवितुञ्छक्ष्यामि नो कर्हिचित्'—
सर्वेषां निजमातृसेवनकृतिश्रेयो न वै लभ्यते ।।२२६७।।

एष निगद्य तथेयद् द्वारबहिर्द्रुतमिष्टः ।
तच्च पलाय्य निमायी देवनदीतटमाप्तः ।।२२६८।।

आसञ्छीतदिनानि सम्प्रति पुनस्तान्येव येषु प्रभो—
स्त्यक्त्वा गेहमयात्तथात्महृदयः श्रीविश्वरूपोऽग्रजः ।
द्वीपे गाङ्गतटे स एव समयो, घाटः स एवाऽधुना,
नैतत्सोदरसङ्गतेरुपमितिः काले कलौ साम्प्रतम् ।।२२६९।।

नौका कुत्र मिलेत्तथाऽत्र समये, श्रीविश्वरूपोऽपि स
श्रीगङ्गासरितः स्वहस्ततरणादेवात्र पारं ययौ ।
ज्येष्ठभ्रातृपथं पुनः प्रभुरपि स्वस्यानुसर्तुं तथा
चक्रे निश्चयमेव, साधुहृदयाऽऽचारः समानः स्वतः ।।२२७०।।

स्थित्वाऽयं परिवृत्य पृष्ठमधुना घाटेऽन्तिमं दर्शनं
गङ्गाद्वीपपुरश्चकार सुमनास्तच्चैकवारं परम् ।
संयोज्य स्वकरद्वयं कथयते गौरस्तु रुद्धस्वर—
'स्ताराव्याप्तनिशे! त्वमत्र तु गृहत्यागस्य मे साक्षिणी ।।२२७१।।

यूयं पश्यथ चाद्य हे दशदिशो! मां निस्सरन्तं गृहा—
च्चेष्टानां मम सर्वथाऽस्ति नियतं हे धर्म! बोद्धा भवान् ।
गेहद्वारमथ त्यजामि जगतीकल्याणहेतोरहं,
(लोकानां जगतीह मर्त्यवपुषा कार्यं किमप्यद्भुतम्) ।।२२७२।।

हे ब्रह्माण्डसमस्तपालक! हरे! वृद्धामहं मातरं,
स्वां पत्नीं युवतीं त्यजामि भवतश्चैवावलम्बेऽधुना ।
सर्वेषां कुरुषेऽत्र पालनमहो! स्थाता च कुर्वन् सदा,
निश्चिन्तस्तदहन्तु यामि भगवंस्ते नाम विश्वम्भरः' ।।२२७३।।

उक्त्वेदं प्रभुरेकवारमधुना गौरो निमायी नव—
द्वीपाख्यां नगरीं पुनर्भगवतीं भागीरथीञ्चानमत् ।
गङ्गाशीतलवारिणः प्रवहति द्राक्च प्रवाहेऽमले
तूत्साहेन तथाह्यकूर्दत पुनस्तीर्त्वा च पारं ययौ ।।२२७४।।

तेन प्रकारेण स कण्टकाख्ये
पुरे त्विदानीं 'कटवा'प्रसिद्धे ।
आर्द्राम्बरैरेव सुगाङ्गतीरे
प्रापाऽऽश्रमं केशवभारतीकम् ।।२२७५।।

गङ्गापारमहो! सुशीलहृदयौ श्रीरूपविश्वम्भरौ
कृत्वा द्वीपनिवासिनोऽकृत पृथक् तौ भ्रातरौ सोदरौ ।
संन्यासेऽपुनरागमाय पथिकौ, घाटस्तु यो निर्दयी,
(हातव्यं भुवि पावनाङ्गमपि तद्, यज्जायतेऽमङ्गलम्) ।।२२७६।।

अद्यावधिं त्वपि स 'निर्दयघाट'नामा
द्वीपे नवे निखिललोकभरे प्रसिद्धः ।
दत्ते निजं परिचयं सहनिर्दयत्वं,
स्थानं तथाघटनया परिचीयतेऽद्धा ।।२२७७।।

हाहाकारः

११६. दर्शय वदनसरोजं त्वरितम् ।
प्रियतम! निष्ठुर! कृपणाया मे त्वन्मात्रैकरसायाः
क्वासि क्वासि प्राणनाथ! हे! स्वं सन्निधिमालोकय ।
भवसागरनानाऽऽग्रहजालेऽसाधुसाधुजनघटिते
बद्धानामखिलानां दयितस्मरणं जीवनशरणम् ।।

सुप्ताऽसौ परिवर्तनं कृतवती पार्श्वस्य विष्णुप्रिया
स्तब्धाऽभूत्सहसा तथा द्रुतमियञ्चोत्थाय सन्नाऽधुना ।
पातो विस्तृतकस्थले तदुपरि प्रायो भवेद्विद्युतः,
सर्वस्वञ्छयनक्षणे त्वपहृतं केनापि वास्याः क्षणात् ।।२२७८।।

भ्रान्तेवेयमचेतनेव मृजती नेत्रे प्रमत्तेव तत्—
पश्यन्ती च बभूव तत्र परितस्तत्स्वामिसम्पत्प्रिया ।
तस्या जागरणक्षणेऽपि ददृशे स्वप्नानुभूतिर्यथा
पाणिभ्यामथ चात्मनो मृगयते शय्यां निमायिप्रभोः ।।२२७९।।

आसीत्तत्र किमेव सम्प्रति परं ? त्यक्त्वा शुकः पञ्जरं
सञ्जातो वनवासिकस्तु, तमथ स्वं प्राणनाथं प्रिया ।
पल्यङ्के सहसोच्चकैरकृत तच्चीत्कारमप्राप्य सा,
देहादात्मनि निस्सृतेऽप्ययमहो! स्थाने क्षणं स्पन्दते ।।२२८०।।

'हा! प्राणप्रिय! नाथ! चात्मविधिना दत्वाऽद्य मे कैतवं
दुःखिन्यै चलितः' पपात तदिदं नीचैर्वदन्त्युच्चकैः ।
पल्यङ्का,त्पतनक्षणेऽभवदियं गौरप्रिया मूर्च्छिता,
तस्याः क्रन्दनकध्वनिस्त्विह शचीमातुः पपात श्रुतौ ।।२२८१।।

मातुः क्रन्दनकात्ततश्च करुणान्मूर्च्छा तु दूरङ्गता,
सा तत्रैव तु 'पुत्रि! पुत्रि!' पतिता चोवाच माता शची ।
'किं सत्यं लुटिताऽद्य साम्प्रतमहं? किं मेऽद्वितीयः सुतो
मह्यं कैतवकं प्रदाय चलितो रूपो निमायी यथा ? ।।२२८२।।

वार्धक्येऽत्र कथं ? स मे नयनयोर्निस्सृत्य तारा गृहा—
दन्धां मां विधवाञ्चकार नियतं (वार्धक्ययष्टिः सुतः) ।
आसीत्कालविलम्बतोऽपि भुवने मन्नेत्रताराद्वय—
ञ्चैकस्मिन्ननु निस्सृते स्वमनसि स्थानेऽभवच्चिन्तनम् ।।२२८३।।

एकेनैव तु चक्षुषा भुवि नवद्वीपे करिष्ये कृतिं,
यातस्त्वद्य परोऽपि, लोकितमतो मे शून्यशून्यं जगत् ।
अन्धायास्तु, मदन्धवृद्धवनितायष्टिन्तु धर्ताऽद्य कः ?,
ब्रूषे किं नहि?, पुत्रि! किन्न चलितः सत्यं निमायी प्रिये!?' ।।२२८४।।

आसीद्गौरहरिप्रिया परमियं संज्ञानशून्याऽधुना
नो याति स्वर एव तद्वदनतो, मातुर्वचोऽशृण्वती ।
उच्चैः सा ननु शुश्रुवेऽत्र रुदती, माता निशम्योत्थिता
प्राप्ता सम्प्रति दुःखिनी च शयनाऽऽवासं पतन्ती प्रभोः ।।२२८५।।

तत्रापश्यदियं प्रभोश्च जननी शून्यन्तु पल्यङ्ककं,
नीचैः सा पतिता तथाहि रुदती विष्णुप्रियाऽऽसीत् पुनः ।
तन्मातुश्च विलोक्य नाभवदहोऽधैर्यस्य सीमा तदा
सा तूच्चै रुदती बभूव विधवा देवी निमायिक्षमा ।।२२८६।।

'स्थाने कुत्र निमायिपुत्र! चलितोऽरे! वञ्चयस्व स्वकां
वृद्धां नेत्थमिमां पुनश्च जननीं, क्वान्तर्हितः पुत्र! हे! ।
याहि त्वाकृतिकं प्रदर्श्य निजकां मातुर्निमायिंश्च मे,
(लोके सन्ततिदर्पणे हि पितरौ संपश्यतः स्वाकृतिम्) ।।२२८७।।

प्रातर्नित्यमथ प्रणाममकरोश्चोत्थाय मे पादयो–
र्वर्तेऽत्राद्य तथा क्षणेन कियता? किं न प्रणामं क्रिया:?'।
उक्त्वेदं जननी ददर्श परितो दीपं गृहीत्वा गृहं
मन्येऽत्रैव तु कुत्रचिन्मम सुतो लीनो निमायी स्थित: ? ।।२२८८।।

पल्यङ्कस्य तथाह्यधो नु जननी चालोकयन्ती त्वभूद्–
वारम्वारमियं निमायिममता पस्पर्श तद्विस्तरम् ।
पुत्रोऽत्रैव निमायिगौरहृदय: प्रायो विलीनस्तथा
दीपोऽध: पतित: सकम्पकरतो वृद्धार्तमातु: क्षितौ ।।२२८९।।

एषा चापि विचेतना तु पतिता विष्णुप्रियासन्निधौ
तच्चोत्थाय पुनस्तु यातुमभवद्यान्ती वदन्ती तथा ।
'तत्रैवाहमथ प्रयामि, भविता यस्मिन्निमायी तु मे
गौराङ्गञ्च निमायिनं मृगयिताऽस्मि स्वं तथाह्यन्तिमम् ।।२२९०।।

सोऽयञ्चेन्मिलितस्तदा भुवि सह स्थास्यामि तेनाऽथवा
गङ्गायां सरिति प्रकूर्द्य निजकान्प्राणांस्तु दास्याम्यहम्' ।
उक्त्वेदन्तु शची निमायिजननी द्वारोन्मुखं प्रासरत्,–
किं मूर्धन्यमणिं विना स्थिरमना लोके हि माताऽऽत्मजम्? ।।२२९१।।

संज्ञायामधुना प्रियापि च वधू: प्राप्ता तथासावपि
स्थाने मातृपटं विगृह्य चलिता वत्सेव गोपृष्ठत: ।
यावद्द्वारमपि त्वियाय नहि सा माता च वृद्धा शची,
मध्ये चैव तु मूर्च्छिताऽत्र पतिता, न स्त्री गृहं लङ्घयेत् ।।२२९२।।

तन्मध्ये प्रभुदर्शनार्थमधुना कृत्वा ह्युष:स्नानकं
प्राप्तो भक्तजनस्तथा कतिपयस्तन्मातरं मूर्च्छिताम् ।
दृष्ट्वा द्वारि बुबोध सोऽत्र पतितां, यातोऽद्य नूनं प्रभु–
र्द्वीपो यत्र ननर्त नृत्यति, विना तं गर्भधात्री स्थिरा ? ।।२२९३।।

नित्यानन्दगदाधरौ च निखिला: सर्वेऽन्तरङ्गा: प्रभो:
श्रीवास: शशिशेखर: सहृदया भक्ता मुकुन्दादय: ।
एतन्मध्यमथैव तत्र मिलिता: प्रेमावतारस्य ते,
लीलायामिह सौख्यदु:खसमये सन्ति प्रिया: प्रेमिण: ।।२२९४।।

विलापमेवन्तु विलोक्य कुर्वती–
ञ्छ्रीमातरं गौरहरिप्रियां तथा ।
आश्वासनं साम्प्रतिकं ददु: पुन:
संबोध्य भूयो विविधं तयोस्त्वमी ।।२२९५।।

'मात: शुचो मा, ननु मेलिता तेऽ—
वश्यं निमायी भवतीं धरित्रीम् ।
तथा न पुत्रोऽस्ति च ते कठोरो'
वासो जगाद प्रभुमातरं तत् ॥२२९६॥

संज्ञाशून्यसमा तथाहि पतिताऽसीदत्र माता शची,
नित्यानन्दयति: स्वहस्तयुगलाच्चोत्थापयामास ताम् ।
तत्सम्पूर्णशरीरधूलिपटल मातुस्तथाऽमार्जयत्—
सर्वञ्चात्मपटेन तत्कथयते धैर्यं ददानोऽधुना ॥२२९७॥

'एतावन्न शुचो, मदीयहृदयं मातस्ततो दीर्यते,
त्वत्पुत्रोऽस्मि तथापर:, सशपथं नित्यो ब्रुवे त्वामिदम् ।
यत्र क्वापि धरातलेऽत्र भविता पुत्रो निमायी तु ते,
तस्मादेव च मेलयामि नियतं संगृह्य तं त्वां तथा ॥२२९८॥

सम्प्रत्येव तु यामि', नित्यवचसा धैर्यं दधौ चाल्पकं
माता चाऽऽह 'निमायिनन्तु (रुदती) न स्यां विना जीविता ।
त्वञ्चान्विष्य कुतोऽपि पुत्र! विषयादादाय चायाहि तं
(नित्यानन्दयतिर्हि वेत्ति सकलञ्छ्रीपादपद्माननम्) ॥२२९९॥

भुक्त्वा विषं वाऽथ विकूर्द्य गङ्गा—
नदीप्रवाहेऽत्र परित्यजामि ।
प्राणान्निजान्' पण्डितवंशवल्ली
पित्राऽथवा भर्तृसुतेन रक्ष्या ॥२३००॥

'दृष्ट्वैवं तव रोदनन्तु हृदयं मे दीर्यते मातृके!
धैर्यं धेहि तु यामि शीघ्रमधुना' नित्यस्तथोक्त्वा यति: ।
मातु: प्रेक्षणहेतवे मृदुहृदो विष्णुप्रियायास्तथा
श्रीवासं व्यवहारपण्डितमयं तत्रैव तत्याज तु ॥२३०१॥

स्वाम्याऽऽस्ते कटवाख्यकण्टकपुरे श्रीकेशवो भारती,
संन्यासग्रहणं प्रभु: कथितवांस्तस्माद्यतिर्वेत्ति तत् ।
(श्रीहरिकीर्तनमुख्यान् गौरमहाप्रभुभक्तान्
सङ्गिगदाधरयुक्ताञ्छेखरवक्रमुकुन्दान्) ॥२३०२॥

तत्सङ्गे निजके विधाय सुहृदश्चोत्तीर्य गङ्गानदीं ।
नित्यानन्दसखा चचाल कटवामेवोन्मुख: सन् प्रति ॥२३०३॥

'गीतानन्तरसं' प्रभुस्तुतिपरं सौहार्दसारात्मकं
काव्यालङ्कृतिरीतिवस्तुविगुणञ्छब्दार्थसंयोजनम् ।
श्रीचैतन्यमहाप्रभोः सुचरितं संसारपाथेयकं
भाषायां पथिकेन साधुघटितं गीतं परं संस्कृते ।।२३०४।।

गौरप्रीतिहृदा निमायिमनसा चैतन्यभावात्मना
दत्तब्रह्मचरस्य गौरचरितञ्चास्वाद्य मुग्धाऽऽस्थया ।
गौरोऽनन्तरसोऽत्र धीरललितः सद्विप्रलम्भाश्रयो,
गीतोऽनन्तरसैर्निरन्तरतयाऽनन्तो 'निमायी' रसः ।।२३०५।।

मेषे संक्रमिते द्वितीयघटनञ्चारब्धमर्केऽधुना
गीतानन्तरसस्य पूर्णमभवत्तस्मिंश्च सिंहे स्थिते ।
'श्रीस्वप्नेश्वर'सन्निधेः पुनरियं सार्धैकवर्षे कृति-
र्जाता सन्ततिसंयुतात्मनसो योगात्सुमेधाश्रियः ।।२३०६।।

तल्लोकोत्तरवर्णनापटुकवेः कर्माऽस्ति काव्यं, भवे-
न्निर्दोषं ध्रुवमेव साम्प्रतगुणालङ्कारशोभाञ्चितम् ।
दोषं, काव्यगुणं, बुधो न सहते, साहित्यिकोऽपेक्षते,
भावव्यञ्जनयोग्यता तु कविता, या स्वाद्यते भावुकैः ।।२३०७।।

भूमौ महाप्रभुपवित्रचरित्रधारा
गङ्गेव पावयति सौहृदकं प्रमातुः ।
सापीह साधुतिलकप्रभुदत्तनीता
पाथेयमद्य पथिकस्य भवेन्न कस्य ।।२३०८।।

जयतु हरिर्नदियानिमायिको
जयतु सतां प्रभुदत्तसाधुकः ।
जयतु रसोऽमितगीतभावको
जयतु कृती प्रकृतिप्रमातृकः ।।२३०९।।

❄ ❄ ❄

कुशोत्पाटिनी अमावस्या
९-९-९९ ई०